Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

STATE MUSEUM, LUCKNOW
LIBRARY
Acc. No.
Book No.

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

Part II

राज्य संग्रहालय
क्रम. 3891
प्राप्ति तिथि 3.3.70
State Museum, Library, Lko.

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

igitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IK

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सान्त्वितोऽस्मि त्वया विप्र वचनैर्मधुराक्षरैः ॥ ११६ ।
निषादस्य वचः श्रुत्वा स मुनिः संशितव्रतः ।
उवाच मधुरं वाक्यं दुःखशोकपरिप्लुतः* ॥ ११७ ।
मारोदीर्वचिमि† भद्रन्ते तवाहं सा प्रियाऽभवम्‡ ।
गङ्गातीरं समासाद्य मुनिर्जातोऽस्म्यहं तथा§ ॥ ११८ ।
परिव्राजवचः श्रुत्वा निषादो विगतज्वरः ।
श्लक्ष्णं वचनमादाय प्रत्युवाच द्विजोत्तमम् ॥ ११९ ।
किमिदं भाषसे विप्र अव्यक्तं यत्कदाचन ?
न भाव वा यद्घटितं स्त्रियः पुंस्त्वं सदैव हि ॥ १२० ।
निषादस्य वचः श्रुत्वा ब्राह्मणोदुःखमूर्च्छितः ।
उवाच मधुरं वाक्यं गङ्गातीरे च धीवरम् ॥ १२१ ।
शीघ्रं गच्छ स्वकन्देशमितान् गृह्य स्वबालकान् ।
सर्व्वेषाञ्च यथासंख्यं स्नेहः कर्त्तव्य एव च ॥ १२२ ।
स तेन चोदितो ह्येवं निषादो नावगच्छति ।
मधुरं स्वरमादाय प्रत्युवाच द्विजोत्तमम्¶ ॥ १२३ ।
किं त्वया दुष्कृतं कर्म्म कृतं पूर्व्वं पुरातनम् ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।
† वत्सेति (ग) ।
‡ प्रवरस्त्रिय इति (ग) ।
§ जातोऽस्मि च तत्र स्त्रियेति (ग) ।
¶ स ब्राह्मणमिति (ग) ।

राजकीय संग्रहालय पुस्तकालय, लखनऊ
State Museum Library
क्रम. 3891
प्राप्ति 3.3.70
73

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम यद्भाषसे चैव स्त्रीत्वं प्राप्तोऽसि तत्कथम्* ॥ १२४ ।
केन दोषेण प्राप्तस्त्वं स्त्रीत्वं भूत्वा पुमान्पुनः ।
पुंस्त्वं चैव कथं प्राप्त एतदाचक्ष्व पृच्छतः† ॥ १२५ ।
एवं तस्य वचः श्रुत्वा स ऋषिः संशितव्रतः ।
उवाच मधुरं वाक्यं मायातीर्थजलेचरम् ॥ १२६ ।
निषाद शृणु तत्त्वेन मत्कथाञ्च प्रजल्पतः‡ ।
न मया दुष्कृतं किञ्चित्कृतं कुत्रापि तत्त्वतः§ ॥ १२७ ।
एकभक्तं समाचारे अभक्ष्यञ्चैव वर्जितम् ।
स मयाराधितो देवो लोकनाथो जनार्द्दनः ।
कर्म्मभिर्बहुभिश्चैव मयादर्शनकाङ्क्षिणा ॥ १२८ ।
अथ दीर्घेण कालेन मया दृष्टो जनार्द्दनः ।
वरेण छन्दयामास बहुधा मायया ततः¶ ॥ १२९ ।
मया नाभीप्सितस्तस्माद्दीयमानो वरस्ततः‖ ।
मायां मे दर्शय विभो विष्णो प्रणतवत्सल** ॥ १३० ।

---

* अहं तेऽद्य वरस्त्रिय इति (ग) ।

† केन दोषेण प्राप्तस्त्वं स्त्रियत्वं ऋषिपुङ्गव ।
मुनित्वञ्च कथं प्राप्तं एतदाचक्ष्व पृच्छत ॥ इति (ग) ।

‡ यां कथां मम तत्त्वत इति (ग) ।

§ कृतमेव हि केनचिदिति (ग) ।

¶ तदनन्तरमिति (ग) ।

‖ न मया चेप्सितस्तत्र दीयमानो वरस्तदेति (ग) ।

** ईप्सिता च मया तत्र विष्णुमाया महालयेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततो मां भाषते विष्णुर्मायां दृष्टा ह्यलं द्विज*।
मया पुनः पुनश्चोक्तो मम प्रीत्या प्रदर्शय† ॥ १३१ ॥
ततोऽहन्तेन चाप्युक्तस्तर्हि द्रचत्यलं भवान्।
गच्छ कुब्जाम्रके गङ्गां स्नात्वेत्यन्तर्हितोऽभवत्‡ ॥ १३२ ॥
अहं मायाप्रलोभेन गङ्गातीरमुपागतः।
दण्डं कुण्डीञ्च वस्त्रञ्च तीरं संस्थाप्य यत्नतः।
ततः स्नानविधानेन निमग्नस्तज्जलेऽमले§ ॥ १३३ ॥
न तत्र किञ्चिज्जानामि किमिदं किं प्रवर्त्तते।
निषादीगर्भसम्भूतस्तत्र पत्नत्रभवन्ततः¶ ॥ १३४ ॥
केनचित्कारणेनात्र प्रविष्टो जाह्नवीजले।
स्नात्वाऽपश्यं पूर्व्ववच्च तावज्जातो ऋषिस्त्वहम्‖ ॥ १३५ ॥

---

* किन्ते मायेन ब्राह्मण इति (ग)।

† (ग) पुस्तके एतदर्द्धं, परश्लोकपूर्व्वार्द्धञ्च न स्तः।

‡ गच्छ कुब्जाम्रकं श्रेष्ठं स्नानं कुरु च जाह्नवी।
एवं ततोवरश्चोक्ता विष्णुश्चान्तरधीयत ॥ इति (ग)।

§ अत्र (ग) पुस्तके पाठभेदो यथा—
स्थापितं दण्डकुण्डे च पात्रं वस्त्रञ्च निःक्षिपेत्।
उचितेनोपचारेण निमज्ज्य सलिलाम्भसीति ॥

¶ सर्व्वमेव विजानामि योनिषादगृहेऽवसमिति (ग)।

‖ लोभमोहार्थकामार्थक्रोधेन च परिप्लुतः।
ततः केनापि कर्म्मेण जलक्लत्यमुपागतः।
निमज्य सलिले चात्र जातोऽस्मि ब्राह्मणोह्यहमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम यद्भाषसे चैव स्त्रीत्वं प्राप्तोऽसि तत्कथम्* ॥ १२४ ।
केन दोषेण प्राप्तस्त्वं स्त्रीस्त्वं भूत्वा पुमान्पुनः ।
पुंस्त्वं चैव कथं प्राप्त एतदाचक्ष्व पृच्छतः† ॥ १२५ ।
एवं तस्य वचः श्रुत्वा स ऋषिः संशितव्रतः ।
उवाच मधुरं वाक्यं मायातीर्थजलेचरम् ॥ १२६ ।
निषाद शृणु तत्त्वेन म[illegible]थाञ्च प्रजल्पतः‡ ।
न मया दुष्कृतं किञ्चित्कृतं कुत्रापि तत्त्वतः§ ॥ १२७ ।
एकभक्तं समाचारे अभक्ष्यञ्चैव वर्जितम् ।
स मयाराधितो देवो लोकनाथो जनार्द्दनः ।
कर्म्मभिर्बहुभिश्चैव मयादर्शनकाङ्क्षिणा ॥ १२८ ।
अथ दीर्घेण कालेन मया दृष्टो जनार्द्दनः ।
वरेण छन्दयामास बहुधा मायया ततः¶ ॥ १२९ ।
मया नाभीप्सितस्तस्माद्दीयमानो वरस्ततः‖ ।
मायां मे दर्शय विभो विष्णो प्रणतवत्सल** ॥ १३० ।

---

* अहं तेऽद्य वरस्त्रिय इति (ग) ।

† केन दोषेण प्राप्तस्त्वं स्त्रियत्वं ऋषिपुङ्गव ।
मुनित्वञ्च कथं प्राप्तं एतदाचक्ष्व पृच्छत ॥ इति (ग) ।

‡ यां कथां मम तत्त्वत इति (ग) ।

§ कृतमेव हि केनचिदिति (ग) ।

¶ तदनन्तरमिति (ग) ।

‖ न मया चेप्सितस्तत्र दीयमानो वरस्तदेति (ग) ।

** ईप्सिता च [illegible]या तत्र विष्णुमाया महालयेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततो मां भाषते विष्णुर्मायां दृष्ट्वा ह्यलं द्विज* ।
मया पुनः पुनश्चोक्तो मम प्रीत्या प्रदर्शय† ॥ १३१ ।
ततोऽहन्तेन चाप्युक्तस्तर्हि द्रक्ष्यत्यलं भवान् ।
गच्छ कुब्जाम्रके गङ्गां स्नात्वेत्यन्तर्हितोऽभवत्‡ ॥ १३२ ।
अहं मायाप्रलोभेन गङ्गातीरमुपागतः ।
दण्डं कुण्डीञ्च वस्त्रञ्च तीरे संस्थाप्य यत्नतः ।
ततः स्नानविधानेन निमग्नस्तज्जलेऽमले§ ॥ १३३ ।
न तत्र किञ्चिज्जानामि किमिदं किं प्रवर्त्तते ।
निषादीगर्भसम्भूतस्तव पत्नाभवन्ततः¶ ॥ १३४ ।
केनचित्कारणेनात्र प्रविष्टो जाह्नवीजले ।
स्नात्वाऽपश्यं पूर्व्ववच्च तावज्जातो ऋषिस्त्वहम्‖ ॥ १३५ ।

---

* किन्ते मायेन ब्राह्मण इति (ग) ।

† (ग) पुस्तके एतदर्द्धं, परश्लोकपूर्व्वार्द्धञ्च न स्तः ।

‡ गच्छ कुब्जाम्रकं श्रेष्ठं स्नानं कुरु च जाह्नवी ।
एवं ततोवरश्चोक्ता विष्णुश्चान्तरधीयत ॥ इति (ग) ।

§ अत्र (ग) पुस्तके पाठभेदो यथा—
स्थापितं दण्डकुण्डे च पात्रं वस्त्रञ्च निःक्षिपेत् ।
उचितेनोपचारेण निमज्ज्य सलिलाम्भसीति ॥

¶ सर्व्वमेव विजानामि योनिषादगृहेऽवसमिति (ग) ।

‖ लोभमोहार्थकामार्थक्रोधेन च परिप्लुतः ।
ततः केनापि कर्म्मेण जलकृत्यमुपागतः ।
निमज्ज्य सलिले चात्र जातोऽस्मि ब्राह्मणोह्यहमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

निषाद पश्य कुण्डीञ्च मात्रां वस्त्रं यथा पुरा* ।
पञ्चाशद्वर्षदेशीयो जातोऽस्मि त्वद्गृहे वसन्† ।
दण्डवस्त्रादि यत्किञ्चिन्न जीर्णं गङ्गया हृतम्‡ ॥ १३६ ।
एवं तेन ततश्चोक्तो निषादोऽदृश्यतां गतः ।
ये च ते बालकास्तत्र तेषां कश्चिन्न दृश्यते ॥ १३७ ।
स ततो ब्राह्मणो देवि तपस्तपति निश्चितः ।
ऊर्द्ध्वश्वासोर्द्ध्ववाहुश्च वायुभक्षपरायणः ॥ १३८ ।
तस्य वै तिष्ठमानस्य अपराह्णन्तु§ जायते ।
ततः प्रमुच्यते तोयं देवि कृत्वा यथोचितम् ॥ १३९ ।
कर्म्मण्यानि च पुष्पाणि आहृत्य श्रद्धयान्वितः¶ ।
अर्च्चयित्वा यथान्यायं वीरासनमुपागतः ॥ १४० ।
दृतस्तु ब्राह्मणैर्मुख्यैर्गङ्गास्नानेषु वै द्विजः ।
ऊचुस्ततो द्विजास्तत्र तपस्विनमनिन्दितम् ॥ १४१ ।
पूर्व्वाह्णे स्थापयित्वात्र मात्रां कुण्डीं त्रिदण्डकम् ।
इतो गतोऽसि ब्रह्मेन्द्र स्थापयित्वा तु धीवरान् ।
विस्मृतं किं त्वया स्थानं कथं शीघ्रं न चागतः ॥ १४२ ।
ततो विप्रवचः श्रुत्वा तूष्णीमासीन्मुनिस्तदा ।

---

* सचीवरमिति (ग) ।

† पञ्चाशद्वर्षवासीऽपि ततस्तत्र न नश्यतीति (ग) ।

‡ न जीर्णाश्चाम्बराः सर्व्वे जाह्नव्या नैव ते हृता इति (ग) ।

§ अपराह्णश्चेति (ग) ।

¶ सुकर्म्मस्वेषु च्येषु समार्च्चनरतः सदेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ब्राह्मणानुगतं स्थानमात्मनात्मानुसंस्थितः ॥ १४३ ।
एतस्मिन्नन्तरे देवि स च ब्राह्मणपुङ्गवः ।
अद्य पञ्चाशद्वर्षाणि अमावस्याद्य चैव हि ॥* १४४ ।
कथमेतावतङ्कालं मामूचुर्ब्राह्मणाश्च किम् ।
पूर्व्वाह्णे स्थापयित्वा त्वं स्वां मात्राञ्चापराह्णिके ।
कथं कालेऽनुसम्प्राप्तः किमेतदिति भाषते ॥ १४५ ।
एतस्मिन्नन्तरे देवि ब्राह्मणाय ततो मया ।
दर्शयित्वा निजं रूपं तमवोचमिदन्धरे† ॥ १४६ ।
किमिदं भ्रान्तरूपोऽसि किं वा त्वं दृष्टवानसि ।
पश्यामि त्वां व्यग्रमिव सावधानोऽभवं स्वयम् ॥ १४७ ।
एवमुक्तः स तु मया भूमौ कृत्वा शिरः स्वकम् ।
उवाच दुःखितो दीनो निःश्वस्य च मुहुर्मुहुः ॥ १४८ ।
अहो देव द्विजा एते मां वन्दन्ति‡ जगद्गुरो ।
पूर्व्वाह्णे स्थापयित्वा त्वं वस्त्रं दण्डकमण्डलू ।
आगतोऽस्यपराह्णे किं स्थलं विस्मृतवानसि ॥ १४९ ।
अहं व्याधस्य वै भूत्वा भार्य्या च व्याधयोनिजा ।
पञ्चाशद्वर्षपर्य्यन्तं तत्र स्थित्वा ततः किल ॥ १५० ।
तस्माञ्चैव त्रयः पुत्रास्तिस्रश्चापि च कन्यकाः ।

---

* अमावस्या नु एष वै इति (ग) ।

† दर्शितं तस्य चात्मानं दिव्यरूपेण वर्च्चसेति (ग) ।

(ग) पुस्तकेऽत्र कति श्लोकाः परित्यक्ताः ।

‡ वन्दन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जातान्येवमपत्यानि दुष्टकर्म्मकृतस्तथा ॥ १५१ ।
स्नातुं कदाचिद्गङ्गायां गतोऽहं तीरभूमिगः ।
स्थापयित्वाद्य स्वं वस्त्रं मग्नः स्नास्यञ्जलेऽमले ।
उन्मज्य स्वयं पुनश्चैव प्राप्तो रूपं मुनिसुतम् ॥ १५२ ।
किं मया विकृतं कर्म्म सेवमानेन माधव ।
तपश्च तप्यमानेन किं मया विकृतङ्कृतम् ॥ १५३ ।
भक्षितं किमकर्म्मण्यं सेवमानेन चाच्युत ।
व्यभिचारश्च मे तत्र को जातस्तु तवार्च्चने ॥ १५४ ।
एतदाचक्ष्व तत्त्वेन येनाहं नरकं गतः ।
एतच्चिन्ताव्याकुलोऽहं निबोध भगवन्मम ॥ १५५ ।
मायालुब्धेन हि मया पूर्व्वं विज्ञापितो ह्यसि ।
नान्यत्स्मरामि पापञ्च नरके येन पातितः ॥ १५६ ।
ततस्तस्य वचः श्रुत्वा कारुण्यं परिदेवितम् ।
उक्तवानस्मि तं विप्रं दुःखसन्तप्तमानसम् ॥ १५७ ।
मा दुःखं कुरु विप्रेन्द्र आत्मदोषसमुद्भवम् ।
विकर्म्म न कृतं किञ्चिदपि मे विप्र पूजने ।
येन दुःखमनुप्राप्तं तिर्य्यग्योनिञ्च वै गतः ॥ १५८ ।
उक्तमेव मया पूर्व्वं शृणु ब्राह्मणपुङ्गव ।
वरान्वरय भो ब्रह्मन् त्वं मायां वृतवानसि ॥ १५९ ।
ददामि दिव्यभोगान्वै भौमान्वापि तवेप्सितम् ।
तांस्तु नेच्छसि मायाया दर्शनं वृतवानसि ॥ १६० ।
दृष्टा तु वैष्णवी माया या त्वया ब्राह्मणेप्सिता ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न गतो दिवसश्चेह नापराह्णोऽपि कुत्रचित्।
वर्षाणि चैव पञ्चाशन्निषादस्य गृहेऽपि न ॥ १६१ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तम।
या एषा वैष्णवी माया त्वया ब्राह्मण ईप्सिता ॥ १६२ ।
त्वया न तत्कृतं किञ्चिच्छुभं वाशुभमेव वा।
सर्व्वं मायामयं तत्र विस्मयात्परितप्यसे ॥ १६३ ।
यत्त्वया दुष्कृतं कर्म्म व्यभिचारश्च तत्र वै।
अर्चनञ्च न ते भ्रष्टं तपश्चैव न नाशितम् ॥ १६४ ।
भवान्तरे कृतं यच्च येनेदं प्राप्तवान्महत्।
दुःखन्तच्च तवाख्यास्ये शृणु ब्राह्मणसत्तम* ॥ १६५ ।
मम भक्ता द्विजाः शुद्धा यत्त्वया नाभिवादिताः।
तत्पापादीदृशो भोगस्तव जातो हि दुःखदः ॥ १६६ ।
ये च भागवताः शुद्धास्ते नूनं मम मूर्त्तयः।

---

* अत्र (ग) पुस्तकस्य पाठो यथा—
पुनरन्यत् प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तम।
यस्य चैवापराधेन स्वयं कृत्वा भवान्तरे ॥
शुद्धा भागवता विप्र मद्भक्ता नाभिवादिताः।
तस्य दोषापराध्यस्य कालं प्राप्तं ततोद्विजः ॥
सर्व्वथा वन्दनीया वै भक्ता भागवताः शुचिः।
ये मां वन्दन्ति विप्रेन्द्र भक्ता भागवता मम ॥
वन्दितोऽस्मि हि विप्रेन्द्र सत्यमेतन्न संशयः।
योमां पृच्छन्ति चैवेह यस्य वाच्यं न विद्यते ॥ इति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ताम्विप्रान्ये नमस्यन्ति ते मामेव नमस्यते* ।
विदितोऽस्मीह विप्रेन्द्र तैरहं नात्र संशयः ॥ १६७ ।
मम दर्शनकामा ये ते मे भक्ता द्विजास्तथा ।
शुद्धा भागवताः पूज्या द्रष्टव्याः सर्व्वदा नृभिः ॥ १६८ ।
विशेषेण कलौ ब्रह्मन्द्विजरूपी ह्यवस्थितः ।
तस्माद्ब्राह्मणभक्ता ये ते मद्भक्ता न संशयः ॥ १६९ ।
यो मां प्राप्तुमिहेच्छेत यस्यावाच्यं न विद्यते ।
अनन्यमानसो भूत्वा मद्भक्तेषु नियोजयेत् ॥ १७० ।
गच्छ ब्राह्मणसिद्धोऽसि यदा प्राणान्विमोक्ष्यसि† ।
तदा गतोऽसि मत्स्थानं श्वेतद्वीपं न संशयः‡ ॥ १७१ ।
एवमुक्त्वा वरारोहे तत्रैवान्तर्हितोऽभवम् ।
सोऽपि द्विजस्तनुन्त्यक्त्वा मायातीर्थे यशस्विनि ।
कृत्वा सुदुष्करं कर्म्म श्वेतद्वीपमुपागतः§ ॥ १७२ ।
धन्वी तूणी शरी खड्गी मायाबलपराक्रमः ।
माञ्च पश्यति वै नित्यं मायाबलसुसंस्थितम् ॥ १७३ ।

---

* नमस्यतीति साधु ।

† प्राणांश्चात्रैव मन्यस इति (ग) ।

‡ गच्छ मे परमं स्थानं श्वेतद्वीपं मया सहेति (ग) ।

§ अत्र (ग) पुस्तके पाठभेदो यथा —

एवमुक्तो मया भूमि स च ब्राह्मणपुङ्गवः ।
दत्त्वा वरं महाभागे तत्रैवान्तरधीयत ॥
ब्राह्मं देहं स [illegible]न्यस्य मायातीर्थे यशस्विनि । इति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मायया किन्तव धरे न मायां ज्ञातुमर्हसि।
मम मायां न जानन्ति देवदानवराक्षसाः॥ १७४।
एतत्ते कथितं भूमे मायाख्यानं महौजसम्*।
मायाचक्रमिति ख्यातं सर्व्वपुण्यसुखावहम्†॥ १७५।
आख्यानानां महाख्यानं तपसाञ्च परन्तपः।
पुण्यानां परमं पुण्यं गतीनाञ्च परा गतिः॥ १७६।
पठेद्यो नित्यं भक्तेषु अभक्तेषु न कीर्त्तयेत्।
मा पठेन्नीचमध्येषु मा पठेच्छास्त्रदूषके॥ १७७।
अग्रतः पृच्छतां शूद्रमद्भक्तेषु तथाग्रतः।
पठते शोभते विप्रो न तु ये शास्त्रदूषकाः॥ १७८।
काल्यमुत्थाय यो भूमे पठते च दृढ़व्रतः।
तेन द्वादश वर्षाणि ममाग्रे पठितं भवेत्॥ १७९।
अथ पूर्णेन कालेन पुमान्पञ्चत्वमागतः।
मद्भक्तो जायते देवि वियोनिं न च गच्छति॥ १८०।
य एवं शृणुयान्नित्यं महाख्यानं वसुन्धरे।
न स जायेत मन्दात्मा वियोनिं नैव गच्छति॥ १८१।

---

* महौज इति साधु।

† सर्व्वस्य स्वसुखावहमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं भद्रे त्वया यत्पूर्व्वमीप्सितम् ।
मुच्यमाना वरारोहे किमन्यत्परिपृच्छसि* ॥ १८२ ।

इति वराहपुराणे भगवच्छास्त्रे मायाचक्रं नाम
पञ्चविंशत्यधिकशततमोऽध्यायः ।

षड्विंशत्यधिकशततमोऽध्यायः ।

श्रुत्वा मायाबलं ह्येतद्धरणी शंसितव्रता ।
वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ १ ।

धरण्युवाच ।

यत्त्वत्कुब्जाम्रके देव भाषसे तदनन्तकम् ।
न तत्राहं विजानामि पूर्व्वमुक्तञ्च यत्त्वया* ॥ २ ।
यच्च कुब्जाम्रके पुण्यं पुष्टिस्तस्य सनातनी† ।
एतन्मे परमं गुह्यं भगवन्वक्तुमर्हसि ॥ ३ ।

---

* एतत्ते कथितं देवि त्वया वचनमीरितम् ।
अधुना च वरारोहे किमन्यत्परिपृच्छसि ॥ इति (ग) ।

---

* त्वमिह त्वविजानामि यत्त्वया पूर्व्वपृच्छितमिति (ग) ।
† यच्च कुब्जाम्रके देव पुण्यपुष्टिः सनातनीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच।

सर्व्वं तत्कथयिष्यामि सर्व्वलोकसुखावहम्।
यच्च कुब्जाम्रके पुष्टिर्यच्च तीर्थमनिन्दिते।
तच्च कार्त्स्न्येन मे देवि शृणु तत्त्वेन सुन्दरि॥ ४।
यथा कुब्जाम्रको जातस्ततस्तीर्थं यथाक्रमम्।
यच्च कर्म्म यतोभूमि स्नातो याति मृतोऽपि च॥ ५।
युगे सप्तदशे भूमि कृत्वा चैकां वसुन्धराम्।
मधुकैटभौ तथा हत्वा ब्रह्मणो वचनात्तदृश।
जलसंहरणं कृत्वा ममाधारमुपागतः॥ ६।
पश्यामि तं नतं भूमि रैभ्यं नाम महामुनिम्।
ममैवाराधने युक्तं सर्व्वकर्म्मसु निष्ठितम्।
युक्तिमन्तङ्गुणज्ञञ्च शुचिं दक्षं जितेन्द्रियम्॥ ७।
दशवर्षसहस्राणि ऊर्द्ध्वबाहुः स तिष्ठति।
सहस्रञ्चाम्बुभक्षेण तथा शैवालभक्षणम्।
वर्षाणाञ्च शतं पञ्च तिष्ठते स महामुनिः॥ ८।
ततः प्रीतोऽस्म्यहं देवि रैभ्यस्य च महात्मनः।
भक्त्या च परया चैव तेन चाराधितो ह्यहम्*॥ ९।

---

* (ग) पुस्तकेऽत्र पाठभेदो यथा—
ममैवाराधने युक्तो धर्म्मकर्म्मसु निष्ठितः।
मधुञ्च कैटभं हत्वा प्रसन्नेन च चोदितः॥
संहारन्तु ततः कृत्वा गङ्गाद्वारमुपागतः।
पश्यामि तत्र तं भूमे भुक्तिमुक्तिमतात्मकम्॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तवो वै तप्यमानन्तं* गङ्गाद्वारमुपागतम् ।
आम्रवृचं समासाद्य दृष्टः स मुनिपुङ्गवः ॥ १० ॥
दर्शितोऽयं मया चात्मा हेतुमात्रेण केनचित् ।
मया यदाश्रितश्चाम्रस्तेन कुब्जत्वमागतः† ॥ ११ ॥
एवं कुब्जाम्रकं ख्यातं स्थानमेतन्मनस्विनि‡ ।
मृतापि§ तत्र गच्छन्ति मम लोकाय केवलम् ॥ १२ ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
दृष्ट्वा स मामृषिश्चैव यानि वाक्यानि भाषते ॥ १३ ॥
एवं तत्र मया दृष्टः कुब्जरूपं समाश्रितः ।
जानुभ्यामवनिङ्गत्वा किञ्चिदेव प्रभाषते ॥ १४ ॥
नमस्कृत्य स्थितं तन्तु मुनिं वै संशितव्रतम् ।
वरेण छन्दयामास अहम्प्रीतमना धरे¶ ॥ १५ ॥

गुणज्ञञ्च शुचिं दक्षं जितात्मानं जितेन्द्रियम् ।
दशवर्षसहस्राणि ऊर्द्धबाहुः सहस्रकम् ॥
सहस्रं वायुभक्ष्यश्च पुनःशैवालभक्षणम् ।
वर्षाणाञ्च शतं पञ्च तिष्ठते स महामुनिः ॥ इति ।

* तप्यमानन्तु इति (ग) ।

† एतदर्द्धं (ग) पुस्तके नास्ति ।

‡ यशस्विनीति (ग) ।

§ मृता अपीति साधु ।

¶ श्लोक एष (ग) पुस्तके एवं पठितः —
जानुभ्यां पतितं दृष्ट्वा तं मुनिं शंसितव्रतम् ।
वरेण छन्दितस्तस्य यत्तस्यैव च रोचते ॥ इति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ममैव वचनं श्रुत्वा स मुनिस्तपसान्वितः।
उवाच मधुरं वाक्यं प्रसादार्थी* महायशाः॥ १६॥
यदि प्रसन्नो भगवाँल्लोकनाथो जनार्द्दनः।
तव चात्र† निवासं वै देव इच्छामि नित्यशः॥ १७॥
यावल्लोका धरिष्यन्ति तावच्चैव‡ महाप्रभो।
स्थानन्तव हृषीकेश इच्छामि मधुसूदन§॥ १८॥
त्वयि भक्तिः सदा भूयाद्यावत्स्थानं जनार्द्दन¶।
अन्यभक्तिर्मम विभो‖ रोचते न कदाचन॥ १९॥
एतदेव परं चित्तं मया चैव विधार्य्यते**।
उपेन्द्र यदि तुष्टोऽसि ममायं दीयतां वरः॥ २०॥
ततस्तस्य वचः श्रुत्वा रैभ्यस्यर्षेरहम्मुनः।
बाढ़मित्येव ब्रह्मर्षे†† एवमेतद्भविष्यति॥ २१॥
ममैवं वचनं श्रुत्वा ब्राह्मणः स वसुन्धरे।

---

* प्रसादार्थमिति (ग)।

† तवैवात्रेति (ग)।

‡ तावत्तवेति (ग)।

§ स्थानं तव प्रसादाद्धि वाञ्छेयं तव संस्थितिमिति (ग)।

¶ सा मे भक्तिर्भवेद्दैन्ये तव चर्च्चा जनार्द्दनेति (ग)।

‖ अन्यभक्तिर्भवेद्विष्णो इति (ग)।

** एतच्च परमं वृत्तं यन्मया हृदि वर्त्तते इति (ग)।

†† ब्रह्मेन्द्रेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding ; IKS

मुहूर्त्तं ध्यानमास्थाय मामुवाच मुदान्वितः* ॥ २२ ।
एतस्य तीर्थवर्य्यस्य महिमानं त्वया प्रभो ।
शृणुवै† कथ्यमानन्तु वद लोकोपकारक ॥ २३ ।
अन्यानि यानि तीर्थानि एतत्क्षेत्राश्रितानि तु ।
तान्यपि श्रोतुमिच्छामि कथ्यमानानि च त्वया‡ ॥ २४ ।
शृणु तत्त्वेन मे ब्रह्मन् यन्मान्त्वं परिपृच्छसि ।
तीर्थं कुब्जाम्रके पुण्ये मम लोके सुखावहे ॥ २५ ।
तीर्थन्तु कुमुदाकारं तस्मिन्कुब्जाम्रके स्थितम् ।
स्नानमात्रेण सुश्रोणि स्वर्गं प्राप्नोति मानवः¶ ॥ २६ ।
कौमुदस्य तु मासस्य तथा मार्गशिरस्य§ च ।
वैशाखस्यैव मासस्य कृत्वा कर्म्म सुदुष्करम् ॥ २७ ।
यो वै परित्यजेत्प्राणान्स्त्री पुमान्वा नपुंसकः ।
निष्कलां लभते सिद्धिं मम लोकं स गच्छति ॥ २८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थं मानसमित्येव विख्यातं मम सुन्दरि ॥ २९ ।
यस्मिन् स्नात्वा विशालाक्षि गच्छते‖ नन्दनं वनम् ।

---

* प्रत्युवाच द्विजोत्तम इति (ग) ।

† शृणवानीति साधु ।

‡ (ग) पुस्तके २३।२४ श्लोकौ न स्तः ।

§ मार्गशिरस इति, साधु ।

¶ यत्तु तत्र विधीयत इति (ग) ।

‖ गच्छतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दिव्यं वर्षसहस्रं वै मोदते चाप्सरैः* सह ॥ ३० ।
पूर्णे वर्षसहस्रे तु जायते विपुले कुले ।
द्रव्यमान्गुणवांश्चैव जायते तत्र मानवः ॥ ३१ ।
तत्राथ मुञ्चते† प्राणान् कौमुदस्य तु द्वादशी ।
पुष्कलां लभते सिद्धिं मम लोकञ्च गच्छति ॥ ३२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मायातीर्थमिदं ख्यातं येन मायां विजानते‡ ॥ ३३ ।
तस्मिन् कृतोदको ब्रह्मन्मायातीर्थे महायशाः ।
दशवर्षसहस्राणि मद्भक्तो जायते नरः ॥ ३४ ।
लभते परमां पुष्टिं कुवेरभवनं यथा§ ।
एकं सहस्रं वर्षाणां स्वच्छन्दगमनात्त्वयम् ॥ ३५ ।
अथवा म्रियते तत्र मायातीर्थे यशस्विनी ।
मायायोगी ततो भूत्वा मम लोकाय गच्छति ॥ ३६ ।
अन्यच्च ते¶ प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थं सर्व्वात्मकं नाम सर्व्वतीर्थगुणान्वितम्‖ ॥ ३७ ।
यस्तत्र स्नायते कश्चिद्वैशाखस्य तु द्वादशीम् ।

---

* अप्सरोभिरिति साधु ।

† मुञ्चतीति साधु ।

‡ विजानीते इति साधु ।

§ तथेति (क), (ख) ।

¶ पुनरन्यदिति (ग) ।

‖ सर्व्वधर्म्मगुणान्वितमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

निष्कलं लभते स्वर्गं सहस्रं दश पञ्च च ॥ ३८ ।
अथात्र मुञ्चते प्राणान्तीर्थे सार्षपके तथा ।
सर्व्वसङ्गं परित्यज्य मम लोकञ्च* गच्छति ॥ ३९ ।
पुनरन्यत्प्रवक्ष्यामि शृणुष्व† शुभलोचने ।
तीर्थं पूर्णमुखं नाम तन्न जानाति कश्चन‡ ॥ ४० ।
तत्र सर्व्वा भवेद्गङ्गा शीतलं जायते जलम् ।
यत्र चोष्णं भवत्यम्बु§ ज्ञेयं पूर्णमुखं तथा ॥ ४१ ।
स्नातो¶ गच्छति सुश्रोणि सोमलोके महीयते ।
पश्यते तु तदा सोमं सहस्रं दश पञ्च च ॥ ४२ ।
ततः स्वर्गात्परिभ्रष्टो ब्राह्मणश्चैव जायते ।
मद्भक्तः शुचिमान्दक्षः सर्व्वकर्म्मगुणान्वितः ॥ ४३ ।
अथवा म्रियते तत्र मासि मार्गशिरे‖ तथा ।
शुक्लपक्षे च द्वादश्यां मम लोकञ्च गच्छति ॥ ४४ ।
तत्र मां पश्यते नित्यं दीप्तिमन्तं चतुर्भुजम् ।
न जन्म विद्यते तस्य मरणञ्च कदाचन ॥ ४५ ।

---

* लोकायेति (ग) ।

† शृणु मे इति (ग) ।

‡ तत्तु कश्च न जानत इति (ग) ।

§ तपत्यम्बु इति (ग) ।

¶ स्नात्वेति (ग) ।

‖ मार्गशिरसीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
अनन्यमानसोभूत्वा भक्तोभागवतो मम ॥ ४६ ।
तस्मिंस्तीर्थे तु यः स्नाति* कदाचिदपि मानवः।
दशवर्षसहस्राणि मोदते ह्यमरालये ॥ ४७ ।
ततः स्वर्गात्परिभ्रष्टस्तत्तीर्थस्य प्रभावतः† ।
द्रव्यवान् गुणवांश्चैव मद्भक्तश्चैव जायते ॥ ४८ ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी।
यदि मुञ्चेत्स्वकं देहं कृत्वा कर्म्म सुदुष्करम् ॥ ४९ ।
न जन्म मरणं तस्य न ग्लानिर्न च वै भयम्।
सर्व्वसङ्गविनिर्मुक्तो मम लोकाय गच्छति ॥ ५० ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
तीर्थं करवीरकं नाम सर्व्वलोक‡सुखावहम् ॥ ५१ ।
तस्य चिह्नं प्रवक्ष्यामि येन ज्ञापयते§ शुभे।
पुरुषो ज्ञानवांस्तावन्मम भक्तिविनिश्चितः¶ ॥ ५२ ।
माघमासे तु सुश्रोणि शुक्लपक्षे तु द्वादशी।
पुष्पिते करवीरे वै मध्याह्ने तु न संशयः ॥ ५३ ।
तस्मिन् कृतोदकस्तीर्थे स्वच्छन्दगमनालयः।

---

* यस्तु स्नाति तत्र तीर्थे इति (ग)।

† तस्य तीर्थस्य यत्फलमिति (ग)।

‡ मम लोकेति (ग)।

§ ज्ञापयतीति साधु।

¶ एष श्लोकः (ग) पुस्तके नास्ति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अग्निद्विमानमारूढ़ो सहस्रान्नरीनर्त्तितः ॥ ५४ ।
तत्राथ म्रियते भूमे माघमासस्य* द्वादशीम् ।
ब्रह्माणं मां च पश्येत पश्यति† च वृषध्वजम् ॥ ५५ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तस्य ब्राह्मणमुख्यस्य पूर्व्वं यत्कथितं मया ।
तस्मिन् कुब्जाम्रके भद्रे स्थानन्तु मम रोचते ॥ ५६ ।
पुण्डरीक इति ख्यातं तीर्थञ्चैव महत्फलम् ।
तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व शुचिस्मिते‡ ॥ ५७ ।
तस्य तीर्थस्य सुश्रोणि मध्याह्ने द्वादशीदिने ।
रथचक्रप्रमाणो वै चरति तत्र कच्छपः§ ॥ ५८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
स्नात्वा प्राप्नोति सुश्रोणि फलं तत्र महागुणम् ॥ ५९ ।
पुण्डरीकस्य यज्ञस्य यजमानस्य यत्फलम् ।
प्राप्नोति वसुधे तत्र एवमेव न संशयः¶ ॥ ६० ।
अथवा म्रियते तत्र लब्धसंज्ञो महायशाः ।
दशानां पुण्डरीकाणां फलं प्राप्नोति मानवः ॥ ६१ ।

---

* माघमासे तु इति (ग) ।

† पश्येत् पश्यतीति साधु ।

‡ वसुन्धरे इति (ग) ।

§ एष श्लोकः (ग) पुस्तके नास्ति । तत्र केवलं तस्य तीर्थस्य सुश्रोणि फलं महागुणमिति पाठो वर्त्तते ।

¶ एवमेतैन्न संशय इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भुक्त्वा यत्नफलं तत्र जातिशुद्धो महातपाः।
सिद्धश्च लभते नित्यं मम लोकाय गच्छति ॥ ६२ ॥
अन्यच्च ते प्रवक्ष्यामि प्रिये तद्वै शृणुष्व* मे।
अग्नितीर्थमिति ख्यातं सिद्धं कुब्जाम्रके स्थितम्।
यद्वै प्रज्ञायते† देवि द्वादश्यां पापवर्ज्जितैः ॥ ६३ ॥
कौमुदस्य तु मासस्य मासो मार्गशिरस्य च‡।
आषाढ़स्य च मासस्य शुक्लपक्षस्य द्वादशीम्§ ॥ ६४ ॥
यश्चैव माधवे मासि समये हृदि वर्त्तते।
तस्मात्तु शुक्लद्वादश्यां तीर्थं तिष्ठति यत्नतः ॥ ६५ ॥
तस्य चिह्नं प्रवक्ष्यामि शृणुष्व हि वसुन्धरे¶।
येन चिह्नेन विज्ञेयं तीर्थं तच्चैव मामकम्।
एकाग्रन्तु मनः कृत्वा तच्छृणुष्व वसुन्धरे‖ ॥ ६६ ॥
मुक्त्वा भागवतान्शुद्धान्मम संहितापाठकान्**।
न हि कश्चिद्विजानाति शास्त्रं मम न यश्च वे†† ॥ ६७ ॥
फलं तस्य प्रवक्ष्यामि मृतोऽपि स्नातकोऽपि वा।

---

* शृणोहि मे इति (ग)।

† पुनः प्रजायते चैव द्वादशीः पश्य माधवि इति (ग)।

‡ मार्गशिरस इति साधु।

§ एष श्लोकः (ग) पुस्तके नास्ति।

¶ देवि तत्त्वेन ज्ञायतामिति (क), (ग)।

‖ एतदर्द्धं (ग) पुस्तके नास्ति।

** मम सद्द्विजयाजकानिति (ग)।

†† यस्तु शास्त्रं न जानतीति (ग)। जानातीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकचित्तं समाधाय तच्छृणुष्व वसुन्धरे* ॥ ६८ ।
अग्नितीर्थेषु स्नातो वै तस्मिन् कुब्जाम्रकेषु च ।
अग्नितीर्थं महाभागे दीप्तिमन्तं सवैष्णवम् ॥ ६९ ।
सप्त कृत्वाग्निमेधानां यत्फलं भवति प्रिये ।
प्राप्नोति तन्महाभागे स्नानमात्रान्न संशयः ॥ ७० ।
अथवा म्रियते तत्र एकैकान्द्वादशीकृतान् ।
स्थित्वा विंशत्यहोरात्रान् मम लोकाय गच्छति ॥ ७१ ।
तीर्थस्य तस्य वक्ष्यामि चिह्नानि शृणु सुन्दरि ।
येन विज्ञायते प्राज्ञै†र्मम भक्तं सुखावहम् ॥ ७२ ।
उष्णं भवति हेमन्ते वसुधे तज्जलन्तथा ।
उष्णकाले भवेच्छीतमेवं चिह्नन्तु तद्भवेत् ॥ ७३ ।
एष वह्निर्महाभागे‡ तीर्थमाग्नेयमुत्तरे ।
तरन्ति मानवा येन घोरं संसारसागरम् ॥ ७४ ।
अन्यच्च ते प्रवक्ष्यामि देवि कुब्जाम्रके महत्§ ।
वायव्यमिति विख्यातं तीर्थं धर्म्मादिभिः स्मृतम् ॥ ७५ ।
तस्मिंस्तीर्थे तु यः स्नातः कृतनित्योदकक्रियः¶ ।
वाजपेयस्य यज्ञस्य फलं प्राप्नोति निष्कलम् ॥ ७६ ।

---

* तच्छृणोहि वसुन्धरे इति (ग) ।

† विद्वानिति (ग) ।

‡ एवं चिह्नं महाभागे इति (ग) ।

§ ह्यहमिति (ग) ।

¶ कृतोदककृताह्निक इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथवा म्रियते तत्र वायुतीर्थे महाह्रदे ।
दिनानि दश पञ्चैतत्कृतमेव हि मामकम् ॥ ७७ ।
जन्म वा मरणं वापि भूमौ नैव पुनर्भवेत्* ।
जायते च चतुर्बाहुर्मम लोकप्रतिष्ठितः ॥ ७८ ।
तस्य चिह्नं प्रवक्ष्यामि वायुतीर्थस्य सुन्दरि ।
येन चिह्नेन विज्ञेयं तीर्थं तच्च महत्तरम्† ॥ ७९ ।
अश्वत्थवृक्षपत्राणि चलन्ति नित्यशो वने ।
चतुर्विंशतिर्द्वादश्यां येन विज्ञायते खलु‡ ॥ ८० ।
पुनरन्यत्प्रवक्ष्यामि तीर्थं कुब्जाम्रके धरे§ ।
शक्रतीर्थमिति ख्यातं सर्व्वसंसारमोक्षणम्¶ ॥ ८१ ।
तस्मिंस्तीर्थे वरारोहे शक्रतीर्थे वसुन्धरे‖ ।
शक्रस्य वसते लोके वज्रहस्तो न संशयः ॥ ८२ ।
अथवा म्रियते तत्र** शक्रतीर्थे महातपे ।
उपोष्य दशरात्राणि†† मम लोकाय गच्छति ॥ ८३ ।

---

* न तस्य मरणं भूमौ जन्म तस्य न विद्यते इति (ग) ।

† शुभैर्भागवतैस्तथैति (ग) ।

‡ विभो इति (ग) ।

§ भुवीति (ग) ।

¶ मोचनमिति (ग) ।

‖ महायशा इति (ग) ।

** देवीति (ग) ।

†† दशरात्रानिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding ; IKS

तस्य चिह्नं प्रवक्ष्यामि येन विज्ञायते ततः* ।
एकचित्तं समाधाय शृणु सुन्दरि तत्त्वतः ॥ ८४ ॥
पञ्च वृक्षास्तु तिष्ठन्ति तद्दक्षिणदिशि क्षितौ ।
शक्रतीर्थस्य चिह्नन्ते वसुधे परिकीर्त्तितम्† ॥ ८५ ॥
अन्यच्च तीर्थं वक्ष्यामि तस्मिन् कुब्जाम्रके परम्‡ ।
वरुणेन तपस्तप्तं सहस्रं पञ्च सप्त च ॥ ८६ ॥
तत्र स्नातस्य वक्ष्यामि जायते तत्र यत्फलम् ।
यत्प्राप्नोति मृतो वापि पुरुषः संशितव्रतः ॥ ८७ ॥
अष्ट वर्षसहस्राणि गत्वा वै वरुणालयम् ।
स्वच्छन्दगमनो भूत्वा एवमेव न संशयः ॥ ८८ ॥
अथ वै म्रियते तत्र विंशवर्षोषितो नरः§ ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ८९ ॥
तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व¶ वसुन्धरे ।
तत्र धारा पतत्येका एकरूपा सदा भवेत् ।
न वर्द्धते च वर्षासु घर्म्मे न ह्रसते‖ पुनः ॥ ९० ॥

---

* नर इति (ग) ।

† पञ्चवृक्षास्ततस्तस्य तीर्थस्य दक्षिणे स्थिताः ।
भूमे येन सविज्ञेयं शक्रतीर्थमिति स्मृतम् ॥ इति (ग) ।

‡ पुनरन्यत् प्रवक्ष्यामि तीर्थमेव वसुन्धरे इति (ग) ।

§ चिररात्रोषितोनरः इति (ग) ।

¶ तच्छृणोहीति (ग) ।

‖ ह्रसतीतिच्छाधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तसामुद्रकं नाम तस्मिन् कुब्जाम्रके परम्* ।
तस्मिन् कृतोदको भूमे नरो धर्म्मपरायणः ।
त्रयाणामश्वमेधानां फलं प्राप्नोति मानवः ॥ ९१ ।
शीघ्रं गच्छति वै स्वर्गं सहस्रं दश पञ्च च ।
ततः स्वर्गात्परिभ्रष्टः कुलवाञ्जायते द्विजः ।
वेदवेदाङ्गकुशलः सोमपश्चैव जायते ॥ ९२ ।
अथात्र मुञ्चति प्राणान्मुक्तसङ्गो जितेन्द्रियः ।
उषित्वा सप्तरात्रं वै मम लोकाय गच्छति ॥ ९३ ।
तस्य चिह्नं प्रवक्ष्यामि तीर्थस्य शृणु सुन्दरि ।
वैशाखशुक्लद्वादश्यां विभूतिस्तत्र या भवेत् ।
विमला गाङ्गता यत्र गङ्गाजलबिमिश्रितम् ॥ ९४ ।
तस्मिन्तीर्थे तदेवैतत्क्षीरवर्णं पुनर्भवेत् ।
पुनश्च पीतवर्णाभा पुनारक्तः कदा भवेत् ॥ ९५ ।
पुनर्मरकताभासं पुनर्मुक्तासमप्रभम्† ।
एतैश्चिह्नैस्तु विज्ञेयन्तत्तीर्थं विदिताक्षभिः ॥ ९६ ।
अन्यच्च ते प्रवक्ष्यामि तीर्थं कुब्जाम्रके महत्‡ ।
तीर्थं मानसरो नाम सर्व्वभागवतप्रियम्§ ॥ ९७ ।

---

* स्थितमिति (ग) ।

† वर्णोमरकतोभाति पुनारक्तसमप्रभ इति (ग) ।

‡ तस्मिन् कुब्जाम्रके भुवीति (ग) ।

§ सर्व्ववैष्णवकं शुभमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्मिन् स्नातो वरारोहे गच्छते* मानसं सरः† ।
देवान् पश्यति वै सर्व्वान्रुद्रेन्द्रसमरुद्गणान् ॥ ९८ ।
अथ तत्र मृतो भूमि त्रिंशद्रात्रोषितो नरः ।
सर्व्वसङ्गविनिर्मुक्तो मम लोकाय गच्छति ॥ ९९ ।
तस्य चिह्नं प्रवक्ष्यामि येन तज्ज्ञायते‡ नरैः ।
पञ्चाशत्क्रोशविततं मानुषाणां दुरासदम् ॥ १०० ।
एतत्तु भूमि विज्ञेयं यथैतन्मानसं सरः ।
शुद्धैर्§भागवतैर्ज्ञेयं मम कर्म्मसु निष्ठितैः ॥ १०१ ।
एतत्तीर्थं महाभागे तस्मिन् कुब्जाम्रके स्मृतम् ।
सिद्धिकामस्य विप्रस्य रैभ्यस्य¶ परिकीर्त्तितम् ॥ १०२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तत्र कुब्जाम्रके वृत्तं पुराश्चर्य्यं महाद्भुतम्‖ ॥ १०३ ।
मम निर्माल्यपार्श्वे वै व्याली तिष्ठति निर्भया** ।
गन्धमाल्योपहार्य्याणि भक्षयन्ती यदृच्छया ॥ १०४ ।
कस्यचित्त्वथ कालस्य नकुलस्तत्र चागतः ।

---

* गच्छतीति साधु ।

† तस्मिंस्तीर्थे वरारोहे गच्छेन्मानससुन्दरि इति (ग) ।

‡ विज्ञायते इति (ग) ।

§ शुभैरिति (ग) ।

¶ भक्तस्येति (ग) ।

‖ महौजसमिति (ग) ।

** वसति निर्भयेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पश्यति च ततस्तत्र रममाणां यदृच्छया ॥ १०५ ।
नकुलेन सह व्याल्या तदा युद्धमभूच्च तत्* ।
सम्पूर्णे ते तु मध्याह्ने माघमासे तु द्वादशीम् ॥ १०६ ।
तया स दृष्टो नकुलो नाशाय मम मन्दिरे ।
तेनापि विषदिग्धेन व्याली शीघ्रं निपातिता ॥ १०७ ।
उभौ चान्योऽन्ययुद्धेन तदा पञ्चत्वमागतौ ।
व्याली प्राग्ज्योतिषे जाता राजपुत्री यशस्विनी ॥ १०८ ।
नकुलोऽजायत तदा कोशलेषु जनाधिपः ।
रूपवान् गुणवांन्देवि सर्व्वशास्त्रकलान्वितः ॥ १०९ ।
तौ तु दीर्घेण कालेन सौख्येन परिरञ्जितौ ।
अवर्द्धतां यथाकालं शुक्लपक्षे यथा शशी ॥ ११० ।
स कन्या नकुलं दृष्ट्वा सद्यो हन्तुं तथेच्छति ।
व्यालीं दृष्ट्वा राजपुत्रः सहसा हन्तुमिच्छति ॥ १११ ।
अथ तस्यास्तु कालेन कोशलाधिपतिस्तथा ।
पाणिं जग्राह विधिवन्मत्प्रसादाद्वसुन्धरे† ॥ ११२ ।
कोशलाधिपतेश्चापि राज्ञः प्राग्ज्योतिषस्य च ।
महोत्सवेन संवृत्तः सम्बन्धो मत्प्रसादतः ॥ ११३ ।
दृढ़प्रीतिस्तयोर्जाता यथा च जतुकाष्ठयोः ।
रमतो‡ धूमकेतोश्च वह्निश्चैव यथा तथा ॥ ११४ ।

---

* प्रावर्त्ततेति (ग) ।

† मत्प्रसादेन वै देवि सम्बन्धश्चैव जायते इति इति (ग) । तत्र परश्लोको नास्ति ।

‡ रममाणस्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथा शची च शक्रस्य रमन्तौ* नन्दने वने ।
एवञ्च दीर्घकालं हि तयोः प्रीतिर्न हीयते ॥ ११५ ।
एवन्तौ विहरन्तौ तु तस्मिन्नुपवने ततः ।
वसेते च यथान्यायं वेलामिव महोदधिः ॥ ११६ ।
एवं तयोर्गतः कालो वर्षाणां सप्तसप्ततिः ।
न बुध्यतोस्तथात्मानं मम मायाविमोहितौ ॥ ११७ ।
एवन्तौ विहरन्तौ तु तस्मिन्नुपवने ततः ।
दृष्ट्वा व्यालीं राजपुत्रस्ततो हन्तुं व्यवस्थितः ॥ ११८ ।
स तया वार्य्यमाणोऽपि व्यालीं हन्तुमिहोद्यतः ।
गरुड़ो हन्ति नागान्वै दृष्ट्वैव विनतात्मजः ॥ ११९ ।
एवं स वार्य्यमाणोऽपि व्यालीं हन्ति स्म दारुणम् ।
तदा सा रुषिता देवी न किञ्चिदपि भाषते† ॥ १२० ।
ततस्तस्यान्तु वेलायां राजपुत्रग्रतो विलात्‡ ।
नकुलस्तु विनिर्गत्य§ आहारार्थं समुद्यतः ॥ १२१ ।
दृष्ट्वा तु राजपुत्री सा नकुलं सर्पकाङ्क्षिणम् ।
हृष्टं चङ्क्रममाणं सा नकुलं शुभदर्शनम् ॥ १२२ ।

---

* रममाणाविति साधु ।

† सा तथा धृष्यमाणा च शीघ्रमेव निपातिता ।
रुषिता राजपुत्री सा न किञ्चिदपि भाषते ॥ इति (ग) ।

‡ राजपुत्र्याः समग्रत इति (ग) ।

§ विलान्निष्क्रम्य नकुल इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्रोधात्तं नकुलञ्चापि विनिहन्तुं प्रचक्रमे* ।
वारिता राजपुत्रेण सुता प्राग्ज्योतिषस्य वै ॥ १२३ ॥
नकुलं घातितं दृष्ट्वा मङ्गल्यं शुभदर्शनम् ।
कुपितो राजपुत्रो वै राजपुत्रीमभाषत ॥ १२४ ॥
स्त्रीणां भर्त्ता सदा मान्यस्त्वं मामुल्लङ्घ्य निष्ठुरम्† ।
दर्शनीयः प्रियो राज्ञां मङ्गल्यः शुभदर्शनः ।
घातितो नकुलः कस्मान्मया वै वार्य्यमाणया ॥ १२५ ॥
इति भर्त्तृवचः श्रुत्वा प्राग्ज्योतिषसुता तदा ।
प्रत्युवाच ततः क्रोधात्कोशलाधिपतेः सुतम्‡ ॥ १२६ ॥
असकृद्वार्य्यमाणोऽपि व्यालीं घातितवान् यतः ।
तस्मान्मयापि नकुलो घातितः सर्पघातकः§ ॥ १२७ ॥
राजपुत्र्या वचः श्रुत्वा राजपुत्रस्ततोऽब्रवीत् ।
वाग्भिः स कटुकाभिश्च तर्ज्जयन्निव¶ तां धरे ॥ १२८ ॥
सर्पस्तीव्रविषो भद्रे तीक्ष्णदंष्ट्रो दुरासदः‖ ।

---

* क्रोधो वै जायते तस्या नकुलं हन्तुमुद्यतेति (ग) ।

† स्त्रीणां भर्त्ता चैव मान्यः सदैव तु विधीयत इति (ग) ॥

‡ एष श्लोकः (ग) पुस्तके नास्ति ।

§ मया वै धार्य्यमाणेन त्वया व्यालिर्निपातिता ।
किन्तेऽपराधं राजेन्द्र अहिना विलवासिना ।
यत्त्वया वार्य्यमाणेन शीघ्रमेव निपातिता ॥ इति (ग) ॥

¶ स कटुकं प्रोक्तं मम पूर्व्वं कदाचनेति (ग) ।

‖ महावन इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दृश्यते मानुषं दुष्टो येनाऽसौ म्रियते जनैः* ।
तस्मान्मया हतो भद्रेऽहितकारी विषोद्धतः ॥ १२९ ॥
प्रजापाला वयं भद्रे येऽपि चैवापथे† स्थिताः ।
सर्व्वांस्तान्दण्डयामो हि तीव्रदण्डैर्यथोचितम्‡ ॥ १३० ॥
साधून्ये चापि हिंसन्ति ह्यपराधविवर्ज्जितान् ।
स्त्रियश्चैवापि हिंसन्ति कामकाराश्च ये नराः ॥ १३१ ॥
ते दण्ड्याश्चैव वध्याश्च राजधर्म्मो यथार्हतः§ ।
मयापि राजधर्म्मो वै कर्त्तव्यो राजकर्म्मणि ॥ १३२ ॥
नकुलेनापराद्धं किं तद्वद त्वं ममापि हि¶ ।
दर्शनीयः सुरूपश्च राज्ञां योग्यो गृहेषु च ।
मङ्गल्यश्च पवित्रश्च नकुलः किं हतस्त्वया‖ ॥ १३३ ॥
वार्य्यमाणोऽपि हि मया घातितो नकुलस्ततः** ।
ततो मम न भार्य्यासि न चाहन्ते पतिः स्थितः ।
किञ्च तेन न हन्मि त्वां स्त्रियोऽवध्याः सदैव यत् ॥ १३४ ॥

---

* दृश्यते मानुषं शीघ्रं तेन सर्पो मया हत इति (ग) ।

† ये केचिदपथे इति (ग) ।

‡ सर्व्वास्ते रचितव्या वै राजशास्त्रे यथा श्रुतिरिति (ग) ।

§ श्वापदं ये तु हिंसन्ति मानुषांस्तेऽपि कामतः ।
सर्पञ्च येऽपि हिंसन्ति तेऽपि वध्या न संशयः ॥ इति (ग) ।

¶ ते आख्याहि यदि किं कृतमिति (ग) ।

‖ न कुलस्यापि पातितः इति (ग) ।

** मम त्वपि न भार्य्यासि अहञ्चास्मि पतिर्न चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इत्युक्ता राजपुत्रस्तां निवृत्त्य नगरं प्रति।
एवं क्रोधं समादाय नष्टस्नेहौ परस्परम्॥ १३५।
एवं गच्छति काले वै कोशलायां जनाधिपः।
शृणोति तां कथां सर्व्वां वधं नकुलसर्पयोः॥ १३६।
एवं श्रुत्वा यथान्यायं सक्रोधौ तावुभावपि।
ततः कञ्चुकिनश्चैव स्वामात्यानग्रतः स्थितान्।
पुत्रं मम वधूञ्चैव समानयत संत्वरम्॥ १३७।
ततो वै राजभृत्यास्तु राज्ञो वै प्रियकारिणः।
राजाज्ञां तां पुरस्कृत्य वधूं पुत्रञ्च सादरम्।
आनीय दर्शयामासुर्यत्र राजा स्वयं स्थितः॥ १३८।
वधूपुत्रौ ततो दृष्ट्वा राजा वचनमब्रवीत्*।
पुत्र कुत्र गतं प्रेम युवयोस्तत्समाहितम्।
स्नेहश्च क्व गतः पूर्व्वौ विरुद्धाचरणौ कथम्॥ १३९।
आसीद्या युवयोः प्रीतिरन्योऽन्यं जतुकाष्ठवत्।
दर्पणे प्रतिबिम्बञ्च दृश्यते यद्वदात्मनः।
सम्मुखत्वेन च सदा तद्वद्वां याऽभवत्पुरा†॥ १४०।

---

* वधूपुत्रौ समानीय राजा वचनमब्रवीदिति (ग)।

† अत्र (ग) पुस्तके पाठभेदो यथा —

कुतः पुत्र गतं प्रेम वध्वर्थे क्व गतं तव।
वधु नु मे कष्टं पुत्रप्रीतिस्तव कुतोगता॥
दर्पणेष्विव पश्यामि प्रतिबिम्बं यथात्मनि।
निष्कषा वै सापराधेन कदाचिदपि पुत्रक॥ इति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दत्ता सुशीला धर्म्मिष्ठा मैनां त्यक्तुन्त्वमर्हसि* ।
अप्रियं नोक्तपूर्व्वन्तु यया परिजनेऽपि च† ।
मिष्टान्नसाधने दत्ता त्वया त्यक्तुं न युज्यते ॥ १४१ ।
धनसर्व्वस्तु ते धर्म्मः स च योषित्कृतः खलु‡ ।
अहो सत्यं जनानाञ्च स तु स्त्रीभ्यः सुतः कुलम् ॥ १४२ ।
ततः पितुर्वचः श्रुत्वा राजपुत्री यशस्विनी ।
उभौ तच्चरणौ गृह्य पितरं प्रत्यभाषत ॥ १४३ ।
दोषो न विद्यते तात स्नुषायां कोऽपि कुत्रचित् ।
किं मे तु वार्य्यमाणापि नकुलं मेऽग्रतोऽहनत्§ ॥ १४४ ।
ततोऽभवन्मम क्रोधो दृष्ट्वा पातितमग्रतः¶ ।
क्रोधासक्तेन तु मया यथेयं परिभाषिता ॥ १४५ ।
मम भार्य्या न भवती न चाहन्तव वै पतिः ।
एतच्च कारणं नान्यत्किञ्चिद्राजन्न संशयः‖ ॥ १४६ ।
ततः पतिवचः श्रुत्वा प्राग्ज्योतिषकुलोद्भवा ।
शिरसा प्रणतिङ्कृत्वा इदं वचनमब्रवीत्** ॥ १४७ ।

---

* न च वै त्यक्तुमर्हसीति (ग) ।

† परिजने जने इति (ग) ।

‡ धर्म्मो यो भिन्नसंशय इति (ग) ।

§ वार्य्यमाणा मया राजन्नकुलश्चाग्रतोहत इति (ग) ।

¶ ततोमे जायते मन्युर्दृष्ट्वा न कुलपातनमिति (ग) ।

‖ एष श्लोको (ग) पुस्तके नास्ति ।

** वाक्यञ्चेत्सुवाच इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अपराधविहीनश्च भीतश्च* भुजगस्तथा।
शतशो वार्य्यमाणेन शीघ्रमेव निपातितः॥ १४८।
ततः सर्पवधं दृष्ट्वा क्रोधसन्तप्तमानसा† ।
नाभाषितः किमपि नो मयैतदवधेहि वै‡॥ १४९।
वधूपुत्रवचः श्रुत्वा कोशलानां जनेश्वरः।
उवाच मधुरं वाक्यमुभयोर्जनसंसदि§॥ १५०।
अनेन निहतः सर्पस्त्वया च नकुलो हतः।
कथं वा क्रियते क्रोधस्तन्मे वक्तुमिहार्हथ¶॥ १५१।
हते तु नकुले पुत्र किन्ते क्रोधस्य कारणम्‖।
राजपुत्रि हते सर्पे किं वा ते मन्युकारणम्**॥ १५२।
ततः पितुर्वचः श्रुत्वा कोशलेश्वरनन्दनः।
उवाच मधुरं वाक्यं राजपुत्रो महायशाः॥ १५३।
एतेन किं वा प्रश्नेन नैतत्प्रष्टुं त्वमर्हसि।
एनां पृच्छ महाराज ज्ञास्यते कार्य्यचेष्टितम्॥ १५४।

---

* अनपराधीभीतश्च व्रजश्चेति (ग)।

† क्रोधसन्तप्तदर्शनेति (ग)।

‡ अनेन चाहं संवादं किञ्चिदेव प्रभाषितमिति (ग)।

§ यज्ञितं शुभमिति (ग)।

¶ नकुलं हतमित्याह यदि सर्पो निपातितः।
किमिदं क्रियते क्रोधमेतन्मे वक्तुमर्हसीति (ग)।

‖ कस्मै मन्युर्भवेत्तत इति (ग)।

** कस्मै मन्युर्भवेदिहेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुत्त्रस्य वचनं श्रुत्वा कोशलानां जनेश्वरः ।
उवाच मधुरं वाक्यं धर्म्मसंयोग्यसाधनम् ॥ १५५ ।
ब्रूहि पुत्र यथान्यायं यत्ते मनसि वर्त्तते ।
प्रीतिविच्छेदकारणमुभयोरिह कथ्यताम् ॥ १५६ ।
जाताः सम्बन्धिताः पुत्राः सर्व्वकामेषु निष्ठिताः ।
पितृपृष्टन्तु यद्गुह्यं गोपयन्ति सुताधमाः* ॥ १५७ ।
सत्यं वा यदि वाऽसत्यं† न ब्रुवन्ति कदाचन ।
पतन्ति नरके घोरे रौरवे तप्तबालुके ॥ १५८ ।
पित्रा पृष्टन्तु ये ब्रूयुः शुभं वाशुभमेव वा‡ ।
दिव्याञ्च ते गतिं यान्ति या गतिः सत्यवादिनाम् ॥ १५९
अवश्यमेव तद्वाक्यं वक्तव्यं मम सन्निधौ ।
यस्य दोषेण ते पुत्र नष्टा प्रीतिर्गुणाकरा ॥ १६० ।
ततः पितुर्वचः श्रुत्वा कोशलानन्दिवर्द्धनः ।
उवाच श्लक्ष्णया वाचा तत्रैव जनसंसदि ॥ १६१ ।
गच्छन्त्वेष§ जनाः सर्व्वे यथान्यायं गृहाणि वै ।
प्रातस्त्वां कथयिष्यामि यद्वक्तव्यमवश्यकम्¶ ॥ १६२ ।

---

* गोपयन्ति नराधमा इति (ग) ।
† सत्यञ्च यदसत्यञ्चेति (ग) ।
‡ पित्रा पृष्टन्तु ये सत्यं वदन्ते वा शुभाशुभमिति (ग) ।
§ गच्छन्त्विवेति (ग) ।
¶ कल्यं ते कथयिष्यामि एवं यदि च रोचते इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रभातायान्तु शर्व्वर्य्यां दुन्दुभीनां निनादनैः।
विबुद्धः कोशलश्रेष्ठः सूतमागधवन्दिभिः॥ १६३।
तदा* कमलपत्राक्षो राजपुत्रो महायशाः।
स्नात्वा च मङ्गलैर्युक्तो राजद्वारमुपागतः† ॥ १६४।
ततस्तु कञ्चुकी गत्वा राज्ञे चैव न्यवेदयत्।
द्वारि तिष्ठति पुत्रस्ते तव दर्शनलालसः॥ १६५।
कञ्चुकेस्तु‡ वचः श्रुत्वा कोशलानां जनेश्वरः§।
शीघ्रं प्रवेशय सुतं कञ्चुकेण साधुवाहिनम्¶
इत्युक्तो राजपुत्रन्तु प्रावेशयदनुज्ञया॥ १६६।
राजपुत्रः पितुर्वेश्म प्रविश्य नियतः शुचिः।
ववन्दे चरणौ मूर्द्ध्ना निषीदेति सुतन्ततः।
तमब्रवीत्पिता जीव जयेत्युक्त्वा मुदान्वितः॥ १६७।
पितृपुत्रौ तु विज्ञेयौ जनैस्त्वेकत्र संस्थितौ।
हर्षितस्त्वान्तरो बाह्यः कृतकौतुकमङ्गलः॥ १६८।
ततः पुत्रं प्रहस्याह कुमारं स जनाधिपः।
वद पुत्त्र महाभाग पूर्व्वं पृष्टं मया हि यत्।
युवयोः प्रीतिविच्छेदे कारणं गोपितं हि यत्॥ १६९।

---

* तत इति पाठान्तरं (ग) पुस्तके दृश्यते।

† राजधानीमुपागत इति (ग)।

‡ कञ्चुकिन इति साधु।

§ नरेश्वर इति (ग) पुस्तकपाठः।

¶ कञ्चुकिन्निति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततो राजकुमारस्तं पितरं प्रत्यभाषत ।
अवश्यमेव वक्तव्यं त्वया पृष्टेन निष्फलम् ।
तद्गुह्यं हि महाराज प्रीतिविच्छेदकारकम् ॥ १७० ।
यदीच्छसि महाराज श्रोतुं गुह्यमिदं महत् ।
आगच्छ तात कुब्जाम्रे मया सह महीपते* ॥ १७१ ।
तत्र ते कथयिष्यामि कोशलाधिपते त्वरन्† ।
यत्त्वया पृच्छितं ह्येतद्गुह्यं पूर्व्वमनिन्दितम् ॥ १७२ ।
ततस्तस्य वचः श्रुत्वा राजपुत्रस्य वै नृपः ।
वाढ़मित्येव तत्राह पुत्रप्रेम्णा समन्वितः ॥ १७३ ।
राजपुत्रे गते सुभ्रु अमात्यानाञ्च सन्निधौ ।
उवाच मधुरं वाक्यं ये वै तत्र समागताः‡ ॥ १७४ ।
अमात्याः शृणुतेमं मे वचनङ्कृतनिश्चयम् ।
कुब्जाम्रकं प्रति वयं गच्छामस्तस्य साधनम् ॥ १७५ ।
शीघ्रं सम्पाद्यताञ्चैव युज्यन्तां गजवाजिनः ।
राज्ञो वचस्ते संश्रुत्य तमूचुः कृतमेव तत् ॥ १७६ ।
इत्युक्ता सप्तरात्रेण सर्व्वं सम्पाद्य साधनम् ।
गजाश्वपशुयानादिकार्षापणकधेनुकम् ॥ १७७ ।
सुवर्णरत्नवस्त्राणि अन्नञ्चान्यदपेक्षितम् ।

---

* गच्छ कुब्जाम्रकं शीघ्रं तात एवं मया सहेति (ग) पाठः ।
† नृपेति (ग) पुस्तके पाठः ।
‡ ये वै तत्र गताः स्थिता इति (ग) पुस्तकपाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

राजानन्ते समागत्य सिद्धिमत्यूचुरीश्वरम्* ॥ १७८ ।
ततः स राजशार्दूलः पुत्रमाह वसुन्धरे ।
राज्यं शून्यं कथन्त्यक्त्वा गमिष्यामो वयं सुत ॥ १७९ ।
ततः पितुर्वचः श्रुत्वा राजपुत्रो महायशाः ।
उवाच मधुरं वाक्यं गृहीत्वा† चरणौ पितुः ॥ १८० ।
कनीयानेष मे भ्राता एकोदरसमुद्भवः‡ ।
एतस्य दीयतां राज्यं यथान्यायेन चागतम् ॥ १८१ ।
पुत्रस्य वचनं श्रुत्वा कोशलानां कुलोद्वहः§ ।
वर्त्तमानेऽपि च ज्येष्ठे कनीयान् कथमर्हति ॥ १८२ ।
ततः पितुर्वचः श्रुत्वा कोशलायाः कुलोद्भवः ।
उवाच मधुरं वाक्यं पितरन्धर्म्मकारणात् ॥ १८३ ।
अनुजानामि ते तात दीयमानां वसुन्धराम् ।
नास्य धर्म्मविलोपस्तु भुञ्जमानस्य¶ मेदिनीम् ॥ १८४ ।

---

* अत्र (ग) पुस्तके पाठभेदो यथा –
अथ ते सप्तरात्रेण राजानं तमुवाच ह ।
सज्जानि सर्व्वद्रव्याणि किमाज्ञापयते भवान् ॥
अमात्यानां वचः श्रुत्वा कोशलानामथाधिपः ।
साधु साध्विति चोक्त्वा वै अमात्यजनसंसदि ॥ इति ।

† निपत्य चरणाविति (ग) पुस्तकस्य पाठः ।

‡ एकोदरविनिःसृत इति (ग) पुस्तकपाठः ।

§ स राजा धर्म्मनिष्ठित इति (ग) पाठः ।

¶ भुञ्जमानस्येति आर्षम्, भुञ्जत इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नाहं कुब्जाम्रकं त्यक्त्वा निवर्त्तिष्ये कदाचन ।
एतत्सत्यञ्च धर्म्मञ्च तात ते कथितं मया* ॥ १८५ ।
पुत्रेण चाभ्यनुज्ञातः कनीयानभिषेचितः ।
स मुख्येनाभ्यनुज्ञातो भूमिं भूपतिसत्तमः† ॥ १८६ ।
ततो दीर्घेण कालेन स्थानं कुब्जाम्रकं गतः ।
अन्तःपुरेण सहितः‡ सर्व्वद्रव्यसमन्वितः ॥ १८७ ।
ततस्तीर्थविधिं कृत्वा दत्त्वा दानानि भूरिशः ।
अन्नवस्त्रसुवर्णानि गोहस्त्यश्वभुवस्तथा ॥ १८८ ।
ततो बहुतिथे काले व्यतीते सति धीमताम् ।
ततः कदाचिन्नृपालो राजपुत्रमुपस्थितम् ।
दम्पत्योः प्रीतिविच्छेदं गुह्यन्तत्समपृच्छत ॥ १८९ ।
स्थानं पावनकं वत्स विष्णोः पादसमाश्रयम् ।
दत्तानि धनरत्नानि जातस्तस्य विधिः परः ॥ १९० ।
इदानीं ब्रूहि सत्यं त्वद्यत्कृते सुन्दरी स्नुषा ।
अदुष्टकारिणी युक्ता कुलशीलगुणान्विता ।
त्वया मिथ्यैव किन्त्यक्ता तद्गुह्यं वद पुत्रक ॥ १९१ ।
ततः स पितरम्प्राह रात्रिर्गच्छतु सुप्यताम् ।
श्वः प्रभाते ततः सर्व्वं कथयिष्यामि तत्पुनः ॥ १९२ ।

---

* तत इति (ग) पुस्तके पाठान्तरं दृश्यते ।

† भूमिपसत्तम इति (ग) पुस्तकपाठः ।

‡ अन्तःपुरसमायुक्त इति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततो रात्र्यां व्यतीतायामुदिते* च दिवाकरे।
कृतोदकस्तु गङ्गायां चौमवस्त्रविभूषितः॥ १९३।
अर्चयित्वा यथान्यायं माञ्चैव गुरुवत्सलः।
पितुः प्रदक्षिणङ्कृत्वा वाक्यमेतदुदाहरत्†॥ १९४।
एह्येहि तात गच्छामः यस्त्वं गुह्यानि पृच्छसि‡।
शृणु तत्त्वेन मे राजन् यत्त्वया पूर्व्वपृच्छितम्॥ १९५।
राजपुत्रश्च वै राजा सा च पङ्कजलोचना।
गत्वा निर्म्माल्यकूटन्ते यत्तद्वृत्तं पुरातनम्॥ १९६।
निर्म्माल्यन्तु समासाद्य राजपुत्रो महातपाः।
उभौ तौ चरणौ गृह्य पितरं प्रत्यभाषत॥ १९७।
नकुलोऽहं महाराज वसामि कदलीतले।
ततोऽहं कालसंयुक्तः प्राप्तो निर्म्माल्यकूटकम्॥ १९८।
ततस्त्वाशीविषा सर्पी सर्पतेऽत्र जनाधिप।
भक्षयन्ति सुगन्धानि पुष्पाणि विविधानि च॥ १९९।
दृष्ट्वा तु तां महाव्यालीं क्रोधसंरक्तलोचनः।
अचिरेणैव कालेन तस्याङ्कं सहसा गतः॥ २००।§
तया सह महाराज घोरं युद्धमवर्त्तत।

---

* ततो रजन्यां व्युष्टायामिति (ग) पुस्तकपाठः।
† वाक्यमेतदुवाच हेति (ग) पाठः।
‡ त्वं गुह्यानि यदीच्छसीति (ग) पाठः।
§ (ग) पुस्तके (१९९—२००) श्लोकौ न स्तः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

माघमासस्य द्वादश्यां तत्र कश्चिन्न पश्यति ॥ २०१ ।
युध्यमानस्य मे तत्र गात्रश्चैव निगूहतः ।
नासावंशे तया दष्टो भुजङ्ग्या च तदन्तरे ॥ २०२ ।
मयापि विषदिग्धेन निहता च भुजङ्गमा* ।
उभौ प्राणान्परित्यज्य उभौ पञ्चत्वमागतौ ॥ २०३ ।
मृतौ स्वकाले राजेन्द्र क्रोधमोहपरिच्युतौ† ।
जातोऽहं तव पुत्त्रस्तु कौशलाधिपते प्रियः ॥ २०४ ।
एवं मे घातितः सर्पस्तत्क्रोधवशनिश्चयात् ।
एतद्गुह्यं मया राजन् यत्त्वया पूर्व्वपृच्छितम् ॥ २०५ ।
राजपुत्त्रवचः श्रुत्वा वधूर्वचनमब्रवीत् ।
अहं सर्पी महाराज पुरा निर्माल्यकूटके ॥ २०६ ।
युध्यमाना तु तेनैव नकुलेन निपातिता‡ ।
प्राग्ज्योतिषकुले जाता जाता तव वधूस्ततः§ ॥ २०७ ।
तेन क्रोधेन नृपते मूर्च्छिता मरणम्प्रति ।
घातितो नकुलश्चैतद्गुह्यं प्रोक्तं तव प्रभो ॥ २०८ ।
वधूपुत्त्रवचः श्रुत्वा स राजा संशितव्रतः ।
मायातीर्थं समासाद्य ततः पञ्चत्वमागतः ॥ २०९ ।

---

* भुजङ्गमीति पाठः (ग) पुस्तके दृश्यते ।

† क्रोधदोषपरिच्युताविति (ग) पाठः ।

‡ अहं सर्पी महाराज नकुलेन निपातितेति (ग) पुस्तकपाठः ।

§ वधूस्तव उपागतेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

राजपुत्रो विशालाक्षी राजपुत्री यशस्विनी ।
पौण्डरीके ततस्तीर्थे तेऽपि पञ्चत्वमागताः ।
गतास्ते परमं स्थानं यत्र देवो जनार्द्दनः ॥ २१० ।
राजा वा राजपुत्रश्च राजपुत्री यशस्विनी ।
मम चैव प्रसादेन तपसश्च बलेन च ।
कृत्वा सुदुष्करं कर्म्म श्वेतद्वीपमुपागताः ॥ २११ ।
योऽसौ परिजनो देवि कृत्वा तु सुकृतं महत्* ।
सोऽपि सिद्धिं परां प्राप्तः श्वेतद्वीपमुपागतः† ॥ २१२ ।
एष ते कथिता देवि पुष्टिः कुब्जाम्रकस्य च ।
तस्य ब्राह्मणमुख्यस्य रैभ्यस्य कथिता मया ॥ २१३ ।
एतत्पुण्यं परञ्जप्यं चातुर्वर्ण्येन सर्व्वदा‡ ।
सर्व्वकर्म्मसु मुख्यञ्च एतदेव विशिष्यते§ ।
तेजसाञ्च महत्तेजस्तपसाञ्च महत्तपः ॥ २१४ ।
एतन्न मूर्खमध्यन्तु पठेच्चापि कदाचन ।
न पठेन्नोघ्नमधेर तु वेदवेदाङ्गनिन्दके ॥ २१५ ।
न पठेद्गुरुविद्विष्टे न पठेच्छास्त्रदूषके ।
पठेद्भागवतानाञ्च मधेर दीक्षावतान्तथा ॥ २१६ ।

---

* तवेति पाठान्तरं (ग) पुस्तके लक्ष्यते ।

† तेऽपि सिद्धिं परां प्राप्ताः श्वेतद्वीपमुपागताः इति (ग) पाठः ।

‡ एष जप्यश्च मुख्यश्च चातुर्व्वर्ण्यव्यवस्थितैरिति (ग) पाठः ।

§ कार्य्याणाञ्च महाकार्य्यं क्रियाणाञ्च महाक्रियेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

य एतत्पठते भूमे कल्यमुत्थाय मानवः ।
तारयेच्च स्वकुलजान्* दशपूर्व्वान्दशापरान् ॥ २१७ ।
एतत्तु पठमानो वै यस्तु प्राणान्विमुञ्चति ।
चतुर्भुजश्च जायेत मल्लोकेषु प्रतिष्ठितः ॥ २१८ ।
एतत्ते कथितं भूमे स्थानं कुब्जाम्रके तथा ।
मम भक्तसुखार्थाय किमन्यत्परिपृच्छसि ॥ २१९ ।

इति वराहपुराणे भगवच्छास्त्रे कुब्जाम्रकमाहात्म्ये रैभ्यानुग्रहणं नाम षड्विंशत्यधिकशततमोऽध्यायः ।

सप्तविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच ।

एवं धर्म्मांस्ततः श्रुत्वा बहुमोक्षार्थकारणात् ।
प्रत्युवाच ततो भूमिर्लोकनाथं जनार्द्दनम् ॥ १ ।
अहो प्रभावः क्षेत्रस्य* कथ्यमानोऽतिपुष्कलम् ।

---

* पठंस्तारयते देवीति (ग) पुस्तकस्य पाठः ।

* धर्म्मस्येति (ग) पुस्तकपाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अहं भारभराक्रान्ता लघुर्जातास्मि धावती* ॥ २ ।
विमोहा च विशुद्धा च शृखमाणा† त्विमां प्रभो ।
अहं लोकेषु विख्याता मुखात्तव विनिःसृता ॥ ३ ।
पुनः पृच्छामि ते देव संशयं धर्म्मसंहितम् ।
येन धर्म्मविधानेन दीचा प्राप्येत पुष्कला ॥ ४ ।
एतन्मे परमं गुह्यं परं कौतूहलञ्च मे ।
धर्म्मसङ्ग्रहणार्थाय तद्भवान्वक्तुमर्हसि‡ ॥ ५ ।
ततो महीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ६ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि मम धर्म्मं सनातनम् ।
देवा एतन्न जानन्ति§ ये च योगव्रते स्थिताः ॥ ७ ।
एतं¶ धर्म्मं वरारोहे माङ्गल्यमुखनिःसृतम्‖ ।
अहमेको विजानामि मद्भक्ता ये जना भुवि ॥ ८ ।
यच्च पृच्छसि मे भद्रे दीचां भागवतीं कथाम् ।
तच्छृणुष्व वरारोहे कर्म्मसंसारमोचणम्** ॥ ९ ।

---

* माधवीति (ग) पुस्तकस्य पाठान्तरम् ।

† शृखमाणेति आर्षं, शृखतीति साधु ।

‡ (ग) पुस्तके श्लोकद्वयं नास्ति ।

§ मम देवा न जानन्तीति (ग) पुस्तकपाठः ।

¶ इममिति (ग) पुस्तकस्य पाठः ।

‖ ममाङ्गविधिनिःसृतमिति (ग) पाठः ।

** कर्म्मसंसारसागरादिति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मयोक्तां लभते कश्चिद्दीक्षाञ्चैव सुखावहाम्* ।
चातुर्वर्ण्यविधानेन तान्दीक्षां शृणु सुन्दरि† ॥ १० ।
मयि शान्तं मनःकृत्वा तदुत्कृष्टञ्च सुन्दरि ।
अभिगच्छेद्गुरुन्देवि शाधि शिष्योऽस्मि मां गुरो‡ ॥ ११ ।
तदाज्ञान्तु पुरस्कृत्य दीक्षाद्रव्यानथाहरेत् ।
लाजा मधु कुशाश्चैव घृतञ्चामृतसन्निभम् ॥ १२ ।
गन्धं सुमनसो धूपं दीपं प्रापणकादिकम्§ ।
कृष्णाजिनञ्च पालाशं दण्डञ्चैव कमण्डलुम्¶ ॥ १३ ।
घटं वासः पादुकाञ्च‖ शुक्लयज्ञोपवीतकम् ।
यज्ञिकामर्घपात्रीञ्च चरुस्थालीं सदर्विकाम् ।
तिलव्रीहियवांश्चैव विविधांश्च फलोदकम्** ॥ १४ ।
भक्ष्यं भोज्यान्नपानञ्च कर्म्मण्यांश्चैव सञ्चयान् ।
दीक्षिता यदि भुञ्जन्ति मम कर्म्मपरायणाः ॥ १५ ।
यानि कानि च†† बीजानि रत्नानि विविधानि च ।

---

* मयोक्तां तु वरारोहे सर्व्ववर्णसुखावहामिति (ग) ।

† चातुर्वर्ण्यं प्रवक्ष्यामि दीक्षामेव तु शाश्वतीमिति (ग) ।
अत्र हरन्ति मनुजा येन गर्भसंसारसागरादित्यधिकः पाठो वर्त्तते ।

‡ शिष्य, अहं तवेति (ग) पुस्तकस्य पाठः ।

§ धूपगन्धाश्च माल्याश्च पालाशी दण्डयष्टिकमिति (ग) पाठः ।

¶ चर्म्मकृष्णाजिनञ्चैव दण्डञ्चैव कमण्डलुमिति (ग) पाठः ।

‖ वासांसि पादुके चैवेति (ग) पाठः ।

** फलांस्तथेति (ग), फलानीति साधु ।

†† तानि कानि चेति (ग) पुस्तकपाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

काचकादीनि* सुश्रोणि तानि शीघ्रमुपाहरेत् ॥ १६ ।
एतान्येवोपहार्य्याणि गुरुमूले ततः परम् ।
स्नात्वा मङ्गलसंयुक्तो दीक्षाकामश्च ब्राह्मणः ।
गुरोश्चरणौ संगृह्य ब्रूहि किङ्करवाणि ते ॥ १७ ।
ततस्तु गुर्वनुज्ञातो वेदीं कुर्य्याच्च पुष्कलाम् ।
ब्राह्मणो दीक्षमाणस्तु चतुरस्रान्तु षोड़श ।
हस्तान् कृत्वा तत्र म† कलशोपरि युञ्जयेत् ॥ १८ ।
प्रतिष्ठाप्य विधानेन धान्योपरि दृढ़ं नवम् ।
जलेन पूरितं मन्त्रैः पुष्पपल्लवशोभितम् ॥ १९ ।
तस्योपरि तिलैः पूर्णपात्रं स्थाप्य विधानतः ।
पूजयेन्मां गुरुं द्रव्यैः शिष्यैणैवोपकल्पितैः ॥ २० ।
तत्रार्चनविधिङ्कृत्वा गुरुर्द्धर्म्मविनिश्चयः ।
पूर्व्वोक्तानि च‡ द्रव्याणि वेदीमध्यमुपाहरेत् ॥ २१ ।
चतुरः कलशान्दद्याच्चतुष्पार्श्वेषु सुन्दरि ।
वारिपूर्णान्द्विजान् शुद्धान् सहकारविभूषितान् ॥ २२ ।
सर्व्वतः शुक्लसूत्रेण वेष्टयेत तथानघे ।
पूर्णपात्राणि चत्वारि चतुष्पार्श्वेषु स्थापयेत् ॥ २३ ।
एवं मन्त्रं ततः कृत्वा दद्याद्दीक्षाप्रयोजकः ।
सा च मन्त्रा यथान्यायं येन वा तुष्यते गुरुः ॥ २४ ।

---

* कनकादीनीति (ग) पुस्तकस्य पाठः ।
† अत्र छन्दोभङ्गः सप्ताक्षरात्मकपादत्वात् ।
‡ यानि कानि चेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यस्मान्यायेन संगृह्य गुरुकर्म्मविनिश्चितः ।
प्रपद्यावसथं विष्णोर्दीक्षाणां परिकाङ्क्षिणः ॥ २५ ।
उपसृज्य यथान्यायं भूत्वा पूर्व्वमुखस्ततः ।
सर्व्वांस्तु श्रावयेच्छिष्यान्दीक्षणार्थं न संशयः* ॥ २६ ।
यस्तु भागवतान्दृष्ट्वा स्वयं भागवतः शुचिः† ।
अभ्युत्थानं न कुर्व्वीत तेनाहन्तु विहिंसितः‡ ॥ २७ ।
कन्यान्दत्त्वा पुनस्तान्तु कर्म्मणा नोपपादयेत् ।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ॥ २८ ।
भार्य्यां प्रियसखीं यस्तु साध्वीं हिंसति निर्घृणः ।
न तेन तां प्राप्नुवन्ति हिंसका दुष्टयोनिजाः§ ॥ २९ ।
ब्रह्मघ्नस्य कृतघ्नस्य गोघ्नस्य कृतपातकाः ।
एतान्छिष्यान् विवर्ज्जीत¶ उक्ता ये चान्यपातकाः ॥ ३० ।
विल्ववृक्षोदुम्बरस्य तथा चान्ये कदाचन ।
कर्म्मण्याश्चैव ये वृक्षा न छेत्तव्याः कदाचन ॥ ३१ ।
यदिच्छेत्परमां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्यञ्च तं शिष्यं वेदितव्यं तदन्तरे ॥ ३२ ।
करीरस्य वधः शस्तः फलान्यौदुम्बरस्य च ।

---

* सर्व्वेषां श्रावयेद्विद्यां रक्षणार्थं न संशय इति (ग) पाठः ।

† भूत्वा भागवत इति (ग) पुस्तकपाठः ।

‡ अहं तेनापि हिंसित इति (ग) पाठः ।

§ न तेषां पुनरावृत्तिः हिंसितस्याथ सुन्दरीति (ग) पाठः ।

¶ विवर्ज्जयेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सद्योभक्षी भवेत्तेन अभक्ष्या पूतिवासिका ॥ ३३ ।
न भक्षणीयं वाराहं मांसं मत्स्याश्च सर्व्वशः* ।
अभक्ष्या ब्राह्मणैरेते दीक्षितैश्च† न संशयः ॥ ३४ ।
परीवादं न कुर्व्वीत न हिंसां वा कदाचन ।
पैशुन्यन्न च कर्त्तव्यं स्तैन्यं वापि कदाचन‡ ॥ ३५ ।
अतिथिञ्चागतन्दृष्ट्वा दूराध्वानं गतं क्वचित्§ ।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्त्रक ॥ ३६ ।
गुरुपत्नी राजपत्नी ब्राह्मणस्त्री¶ कदाचन ।
मनसापि न गन्तव्या एवं विष्णुः प्रभाषते ॥ ३७ ।
कनकादीनि रत्नानि यौवनस्था च कामिनी ।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते ॥ ३८ ।
दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनन्तथा ।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः ॥ ३९ ।
एवं ततः श्रावयीत‖ दीक्षाकामं वसुन्धरे ।
छत्रञ्चोपानहञ्चैव मनसा चोपकल्पयेत् ॥ ४० ।
द्वे द्वे औदुम्बरस्य पत्रे वेदीमध्ये तु स्थापयेत् ।

---

* भुक्ता मांसं वराहस्य मत्स्यस्य सकलेश्वरीति (ग) पाठः ।

† दीक्षितैर्वेति (ग) पुस्तकपाठः ।

‡ पिशुनस्तेनी वा क्वचिदिति (ग) पाठः ।

§ दूरस्थानागतं क्वचिदिति (ग) पुस्तकपाठः ।

¶ ब्राह्मणी वेति (ग) पुस्तकस्य पाठः ।

‖ श्रावयित्वेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्षुरञ्चैव वरारोहे* जलपूर्णञ्च भाजनम्।
ममावाहनपूर्व्वन्तु मन्त्रेण विधिनार्च्चयेत्॥ ४१।

ओँ मन्त्रः—सप्त द्वीपानि सप्त सागराश्च सप्त प्रर्व्वताश्च दश स्वर्गसहस्राश्च† समस्ताश्च नमोऽस्तु सर्व्वास्ते हृदये वसन्ति। यश्चैतद्वर्षति पुनरुन्नमति। ओँ भगवन्वासुदेव ममैतत्सारयुक्तं वराहरूपस्रष्टेन‡ पृथिव्यान्तु मन्त्रानुस्मरणञ्च य आज्ञापयानुभावनास्माकमाज्ञप्तमनुचिन्तयित्वा भगवन्नागच्छ दीक्षाकामर्विप्रस्त्वत्प्रसादात्तु दीक्षति। एतन्मन्त्रमुदाहरित्वा§ ओँ शिरसा जानुभ्यामवनिं गतेन भवितव्यम्। ओँ स्वागतं स्वागतवानिति।

तत एतेन मन्त्रेण आनयित्वा वसुन्धरे।
अर्घ्यं पाद्यञ्च दातव्यं मन्त्रेण विधिनिश्चयात्॥ ४२।

मन्त्रः—अक्षतघ्ने देवानसुराक्षतघ्नरुद्रेण ब्राह्मणाय च लब्धं सर्व्वमिमां भगवतेऽस्तु दत्तं प्रतिगृह्णीष्व च लोकनाथ।

एवं भूमि ततो दत्त्वा अर्घ्यम्पाद्यञ्च कर्म्मणा।
क्षुरं गृहीत्वा¶ यथान्यायमिमं मन्त्रमुदीरयेत्॥ ४३।

मन्त्रः—एवं वरुणः पातु शिष्य ते वपतः शिरः।

---

* उदुम्बरं वरारोहे इति (ग) पुस्तकस्य पाठः।

† सप्त स्वर्गसहस्राश्चेति (ग) पुस्तकधृतपाठः।

‡ वराहरूपतुष्टेनेति (ग) पुस्तकस्य पाठान्तरम्।

§ उदाहृत्येति साधु।

¶ चीरं गृह्येति (ग) पुस्तकप्राठो न समीचीनः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जलेन विष्णुयुक्तेन दीक्षा संसारमोक्षणम् ॥ ४४ ।
एकस्य कलशन्दद्यात्कर्म्मकारस्य सुन्दरि ।
निष्कलन्तु शिरः कृत्वा शोणितेन विवर्ज्जितम् ।
पुनः स्नानं ततः कृत्वा शीघ्रमेव न संशयः ॥ ४५ ।
एतस्य विधिवत्कृत्वा दीक्षाकामस्य सुन्दरि ।
दत्त्वा संसारमोक्षाय सर्व्वकामविनिश्चितः ।
जानुभ्यामवनीं गत्वा इमं मन्त्रमुदीरयेत् ॥ ४६ ।

ओं मन्त्रः—वेदाम्यहं* भागवतांश्च सर्व्वान्† ।
सुदीक्षिता ये गुरवश्च सर्व्वे ।
विष्णुप्रसादेन च लब्धदीक्षा
मम प्रसीदन्तु नमामि सर्व्वान् ॥ ४७ ।

नत्वा तु‡ भगवद्भक्तान् प्रज्वाल्य च हुताशनम् ।
घृतेन मधुमिश्रेण लाजाकृष्णतिलैस्तथा§ ॥ ४८ ।
सप्तवारांस्ततो दत्त्वा विंशतिञ्च तिलोदनम्¶ ।
जानुभ्यामवनिं गत्वा इमं मन्त्रमुदाहरेत् ॥ ४९ ।

मन्त्रः—अश्विनौ दिशः सोमसूर्य्यौ साक्षिमात्रं‖ वयं प्रसन्नाः शृण्वन्तु मे सत्यवाक्यं वदामि ।

---

* वेदामीति आर्षप्रयोगः, वेद्मीति साधु ।

† वन्दामि भो भागवतांश्च सर्व्वानिति (ग) पाठः ।

‡ नमित्वेति (ग) पाठस्तु न साधुः ।

§ कृष्णतिलेन चेति (ग) पुस्तकपाठः ।

¶ विंशत्येवं प्रसीदनमिति (ग) पाठः प्रामादिकः ।

‖ साक्षिपात्रमिति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सत्येन धार्य्यते भूमिः सत्येन तिष्ठति भूमिः ।
सत्येन गच्छते* सूर्य्यो वायुः सत्येन वाति† च ॥ ५० ।
एवं सत्यं ततः ज्ञात्वा ब्राह्मणोवीक्षणं पुनः ।
गुरुम्प्रसादयेत्तत्र मन्त्रेण विधिनार्च्चयन् ॥ ५१ ।
तिस्रः प्रदक्षिणाः कृत्वा देवं भागवतं गुरुम् ।
गुरुपादौ तु संगृह्य‡ इमं मन्त्रमुदीरयेत् ॥ ५२ ।
मन्त्रः—गुरुदेवप्रसादेन लब्धा दीक्षा यदृच्छया ।
यच्चैवापकृतं§ किञ्चिद्गुरुर्मर्षयतां मम ॥ ५३ ।
एवं प्रसादयित्वा तु शिष्यो मन्त्रेण सुन्दरि ।
वेदीमध्ये स्थापयित्वा भूत्वा पूर्व्वमुखस्ततः ।
शिष्यमेव ततो दृष्ट्वा गृहीत्वा च कमण्डलुम् ।
शुक्लयज्ञोपवीतञ्च इमं मन्त्रमुदाहरेत् ॥ ५४ ।
मन्त्रः—विष्णुप्रसादेन गतोऽसि सिद्धिं
प्राप्ता च दीक्षा सकमण्डलुश्च ।
गृहीत्वा तु॰कराभ्यां युक्तोऽसि
कर्म्मणा क्रियायाञ्चैव ॥ ५५ । ¶

---

* गच्छतीति साधु ।

† भूमिः सत्येन वर्द्धते इति (ग) पुस्तकस्य पाठः ।

‡ गुरवे चरणौ गृह्येति (ग) पाठो न साधुः ।

§ यत्ते पूर्व्वं कृतमिति (ग) पुस्तकपाठः ।

¶ आगृह्य राज्यकराभ्यां युक्तो सिद्धिं कर्म्मणा क्रियायाञ्चैवेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मुखपदं ततः कृत्वा दीक्षितो गुरुणा तथा ।
सर्व्वप्रदक्षिणं कृत्वा इमं मन्त्रमुदाहरेत् ॥ ५६ ।

अद्योऽधो भूत्वा यद्यहम्भास्य-
ल्लब्धो गुरुर्विष्णुदीक्षा च लब्धा ।
तव प्रसादाच्च गुरो यथा च ॥ ५७ ।

एतेन मन्त्रेण मुखं पदं कारयेत् । शौचसेके वै कुर्य्याद्देवान् तन्तुवाससम् ।

एवं वै वास आदत्ते गृह्ण वस्त्र कमण्डलुम् ?
इमं लोकेषु विख्यातं शोधनं सर्व्वकर्म्मसु ॥ ५८ ।

मन्त्रः—गृह्णीष्व* गन्धपात्राणि सर्व्वगन्धं सुखोचितम् ।
सर्व्ववैष्णवकं शुद्धं सर्व्वसंसारमोक्षणम् ।
मधुपर्कं गृहीत्वा तु इमं मन्त्रमुदीरयेत्† ॥ ५९ ।

मन्त्रः—गृहाण‡ मधुपर्कञ्च प्रार्थकाय विशोधनम् ।
ततो गृहीत्वा चरणौ गुरोर्यत्नात्तुतोषयेत्§ ॥ ६० ।
शिरसा¶ चाञ्जलिं कृत्वा मनश्चैव सुसंयतम् ।
गुरूपदिष्टं सन्धार्य्य‖ इमं मन्त्रमुदीरयेत्** ॥ ६१ ।

---

* गृह्ण त्वं गन्धपात्राणीति (ग) पुस्तकपाठः ।

† एतदर्द्धं (ग) पुस्तके नास्ति ।

‡ गृह्ण त्वमिति (ग) पुस्तकधृतपाठः ।

§ उभौ तु चरणौ गृह्य उपाध्यायोपकल्पयेदिति (ग) पाठः ।

¶ मनसेति (ग) पुस्तकस्य पाठान्तरम् ।

‖ अथ गृह्य यथान्यायमिति (ग) पाठः ।

** उदाहरेदिति (ग) पुस्तकपाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मन्त्रः—शृखन्तु मे भागवतास्तु सर्व्वे
गुरुश्च मे सर्व्वकामत्त्वयञ्चकार ।
अहं शिष्यो दासभूतस्तथैव*
देवसमो गुरुश्च मे तथोपपन्नम्† ॥ ६२ ।
एषागमे ब्राह्मणस्य दीक्षा भूमे ह्युदाहृता‡ ।
त्रयाणामथ वर्णानां मम दीक्षाविधीञ्छृणु ॥ ६३ ।
एतेनैव विधानेन दीक्षयेत वसुन्धरे ।
उभौ च प्राप्नुतां सिद्धिमाचार्य्यः शिष्य एव च ॥ ६४ ।

इति वराहपुराणे ब्राह्मणदीक्षासूत्रं नाम
सप्तविंशत्यधिकशततमोऽध्यायः ।

अष्टाविंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

क्षत्रियस्य प्रवक्ष्यामि तच्छृणुष्व* वसुन्धरे ।
त्यक्त्वा प्रहरणान्सर्व्वान्यत्किञ्चित्पूर्व्वशिक्षितम् ।

---

* तवेति (ग) पुस्तकधृतः पाठः ।
† दासभूतस्तव देव समयश्च मे यथोपपन्न इति (ग) पाठः ।
‡ एषागमेषु वर्णेषु दीक्षां भूमि विजानतेति (ग) पाठः ।

---

* शृणोहीति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूर्व्वमन्त्रेण* मे भूमि तस्य दीक्षाञ्च कारयेत् ॥ १ ।
मया च पूर्व्वमुक्तानि यानि संसारकानि च ।
तानि सर्व्वाणि चानीय एकं वर्ज्यं यशस्विनि ॥ २ ।
न दद्यात्कृष्णसारस्य चर्म्म तत्र कदाचन ।
पालाशं दण्डकाष्ठञ्च दीक्षायान्न तु कारयेत् ॥ ३ ।
छागस्य चैव कृष्णस्य चर्म्म तत्र प्रदापयेत् ।
आश्वत्थं दण्डकाष्ठन्तु दीक्षायान्तदनन्तरम् ॥ ४ ।
कृत्वा द्वादशहस्तान्तु वेदीन्तत्रोपलेपयेत् ।
सर्व्वं ममोक्तं कर्त्तव्यं यच्च मे† पूर्व्वभाषितम् ॥ ५ ।
एवं क्षत्रियदीक्षायां सर्व्वं सम्पाद्य यत्नतः‡ ।
चरणौ मम सङ्गृह्य§ इमं मन्त्रमुदाहरेत् ॥ ६ ।
मन्त्रः—त्यक्तानि विष्णो शस्त्राणि त्यक्तं सर्व्वं क्षत्रियकर्म्म सर्व्वं त्यक्त्वा देवं विष्णुं प्रपन्नोऽथ संसाराद्वै जन्मनात्तारयस्व ।
एवं ततो वचश्चोक्त्वा क्षत्रियो मम पार्श्वतः ।
उभौ च चरणौ गृह्य इमं मन्त्रमुदीरयेत्¶ ॥ ७ ।

---

* पूर्व्वक्रमेणेति (ग) पुस्तके पाठो दृश्यते ।

† यन्मयेति (ग) पुस्तकपाठः ।

‡ एवं कृत्वा ततः सर्व्वं क्षत्रिये दीक्षाकारिणीति (ग) पाठः ।

§ ममैव चरणं गत्वेति (ग) पुस्तकपाठः ।

¶ मन्त्रमुदाहरेदिति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मन्त्रः—नाहं शस्तं देवदेव स्मरामि
परापवादं न च देव ब्रवीमि ।
कर्म्म करोमि संसारमोक्षण-
न्त्वया चोक्तमेव वराहसंस्थान* ॥ ८ ।

तत एवं वचो ब्रूते सर्व्वञ्चैवात्र पूजयेत्† ।
विविधैर्गन्धपत्रैश्च धूपैश्चैव यथोदितम् ॥ ९ ॥
यथोक्तेनैव तान्भूमि भोजयेत्तदनन्तरम्‡ ।
शुद्धान्भागवतांश्चैव§ एवमेतन्न संशयः ॥ १० ॥
एषा वै क्षत्रिये दीक्षा देवि संसारमोक्षणम् ।
मत्प्रसादेन कर्त्तव्यं यदीच्छेत्सिद्धिमुत्तमाम् ॥ ११ ॥
वैश्यस्य चैव वक्ष्यामि¶ शृणु तत्त्वेन सुन्दरि ।
दीक्षा च यादृशी तस्य‖ यथा भवति सुन्दरि ॥ १२ ॥
त्यक्त्वा तु वैश्यकर्म्माणि मम कर्म्मपरायणः ।
यथा च लभते सिद्धिं तृतीया वर्णसंस्थितिः ॥ १३ ॥
सर्व्वं तत्र समानीय यन्मया पूर्व्वभाषितम् ।
दशहस्तां ततः कृत्वा वेदीं वेदविचेतितः** ॥ १४ ॥

---

* संस्थितमिति (ग) पुस्तकपाठो न समीचीनः ।

† योजयेदिति (ग) पुस्तकस्य पाठः ।

‡ गोपयेत्तदनन्तरमिति (ग) पुस्तकपाठः ।

§ शुभैर्भागवतैश्चेति (ग) पुस्तकस्य पाठः ।

¶ वैश्यस्यैव प्रवक्ष्यामीति (ग) पाठान्तरम् ।

‖ तत्रेति (ग) पुस्तकपाठो न सुसङ्गतः ।

** विंशद्धस्तां समालिप्य पूर्व्वन्यायेन कारयेदिति (ग), तत्र परश्लोकस्य पूर्व्वार्द्धं नास्ति

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

लेपयेद्गोमयेनादौ पूर्व्वन्यायेन तत्र वै ।
चर्म्मणापि तु छागस्य स्वगात्रं परिवेष्टयेत् ॥ १५ ।
उदुम्बरं दन्तकाष्ठं गृहीत्वा दक्षिणे करे* ।
शुद्धभागवतानाञ्च कृत्वा त्रिः परिवर्त्तनम्† ।
जानुभ्यामवनीङ्गत्वा इमं मन्त्रमुदीरयेत्‡ ॥ १६ ।

मन्त्रः—अहं वैश्यो भवन्तमुपागतः
प्रमुच्य कर्म्माणि च वैश्ययोगम् ।
दीक्षा च लब्धा भगवत्प्रसादा-
त्प्रसीदतां§ मे भवबन्धमोक्षणम् ॥ १७ ।

मामेवं सोऽपि चोक्त्वा वै मम कर्म्मप्रसादवान्¶ ।
गुरोश्च चरणौ गृह्य इमं मन्त्रमुदाहरेत् ॥ १८ ।
त्यक्त्वा वै कृषिगोरक्षावाणिज्यक्रयविक्रयम् ।
लब्धा च त्वत्प्रसादेन विष्णुदीक्षा मयाऽधुना‖ ॥ १९ ।
देवाभिवादनङ्कृत्वा गुरौ भागवतेषु च ।
पश्चात्तु भोजनं दद्यादपराधवहिष्कृतम् ॥ २० ।
एवं दीक्षा तु वैश्यानां मम मार्गानुसारिणाम् ।

---

* गृह्य हस्ते च दक्षिणे इति (ग) पाठः ।

† कुर्य्याद्भागवतान् शुद्धान् त्रीणि वारान् प्रदक्षिणमिति (ग) पाठः ।

‡ मन्त्रमुदाहरेदिति (ग) पुस्तकपाठः ।

§ प्रसीदेति साधु ।

¶ मम त्वेवं ततश्चोक्त्वा मम कर्म्मप्रसादनादिति (ग) पाठः ।

‖ विष्णुदीक्षाऽहं कामये इति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

येन मुचन्ति* सुश्रोणि घोरसंसारसागरात् ॥ २१ ।
शूद्रस्यापि प्रवक्ष्यामि मद्भक्तस्य वराङ्गने† ।
यस्तु दीक्षां समासाद्य मुच्यते सर्व्वकिल्बिषैः ॥ २२ ।
सर्व्वसंस्कारद्रव्याणि मया पूर्व्वोदितानि च ।
दीक्षाकामस्य शूद्रस्य शीघ्रं तानि प्रकल्पयेत् ॥ २३ ।
अष्टहस्तां ततो देवि संलिप्य नीयतां ततः ।
चर्म्म नीलस्य छागस्य कल्पयेच्छूद्रयोनये ।
दण्डञ्च वैणवं दद्यान्नीलं वस्त्रञ्च तस्य वै‡ ॥ २४ ।
एवं गृहीत्वा शूद्रोऽपि दीक्षायाः कारणं परम्§ ।
ममैव शरणं गत्वा इमं मन्त्रमुदाहरेत् ॥ २५ ।
मन्त्रः—शूद्रोऽहं शूद्रकर्म्माणि मुक्त्वा भक्ष्यञ्च सर्व्वशः ।
भक्ष्याभक्ष्यं ततस्त्यक्त्वा त्यक्त्वा च शूद्रकर्म्म च ॥ २६ ।
एवं वदेत्ततो देवं¶ शूद्रो दीक्षाभिकाङ्क्षिणम् ।
विमुक्तः सर्व्वपापेभ्यो लब्धसंज्ञो गतस्पृहः ॥ २७ ।
उभौ तौ चरणौ गृह्य गुरोर्वै तदनन्तरम् ।
गुरोः प्रसादनार्थाय इमं मन्त्रमुदाहरेत् ॥ २८ ।

---

* मुच्यन्ते इति साधु । मुच्येत इति (ग) पुस्तकपाठः ।

† वसुन्धरे इति (ग) पुस्तकस्य पाठः ।

‡ उपलिप्य सप्तहस्तं स्थण्डिलं तदनन्तरम् ।
चर्म्मणा कृष्णछागस्य तस्य गात्राणि वेष्टते ॥ इति (ग) पाठः ।

§ एवं गृह्य यथान्यायं शूद्रोदीक्षाय कारणमिति (ग) पाठः ।

¶ देवीति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मन्त्रः—विष्णुप्रसादे गुह्यं प्रसन्नात्पूर्व्वच्च लब्धा चैव संसारमोक्षणाय करोमि कर्म्म प्रसीद।

एतन्मन्त्रं समुच्चार्य्य कुर्य्यात्तत्र प्रदक्षिणम्।
चतुरश्च यथान्यायं पुनश्चैवाभिवादयेत्॥ २९।
अनन्तरन्ततः कुर्य्याद्गन्धमाल्येन चार्च्चनम्।
भोजयेच्च* यथान्यायमपराधविवर्ज्जितः॥ ३०।
दीक्षा एषा च शूद्राणामुपचारश्च ईदृशः।
चतुर्णामपि वर्णानां दुःखसंसारमोक्षणम्॥ ३१।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व† वसुन्धरे।
चतुर्णामपि वर्णानां यथा छत्रं‡ प्रदीयते॥ ३२।
ब्राह्मणे पाण्डुरञ्छत्रं क्षत्रिये रक्तमेव च।
वैश्याय पीतं वै दद्यान्नीलं शूद्राय दापयेत्॥ ३३।

सूत उवाच।

चातुर्व्वर्ण्यस्य श्रुत्वा वै सा मही संशितव्रता।
वराहं पुनरप्याह नत्वा सा धरणी तदा§॥ ३४।

धरोवाच¶।

श्रुता दीक्षा यथान्यायं चातुर्व्वर्ण्यस्य केशव।

---

* भोजयेतेति (ग) पुस्तकस्य पाठः।

† शृणोहीति (ग) पुस्तकपाठः।

‡ शस्त्रमिति (क), (ख) पुस्तकयोः पाठः।

§ वराहरूपिणं वन्द्यं प्रत्युवाच वसुन्धरेति (ग) पाठः।

¶ धरण्युवाचेति (ग) पाठः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दीक्षितैः किन्नु कर्त्तव्यं तव कर्म्मपरायणैः ॥ ३५ ।
ततो महीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ।
वराहरूपी भगवानुवाच स महाद्युतिः ॥ ३६ ।

वराह उवाच ।

शृणु तत्त्वेन कल्याणि यन्मान्त्वं परिपृच्छसि ।
सर्व्वत्र चिन्तनीयोऽहं गुह्यमेव गणान्विकम् ॥ ३७ ।
नारायणवचः श्रुत्वा धरणी शंसितव्रता ।
हृष्टतुष्टमनास्तत्र श्रुत्वा तच्च महौजसम् ।
शुचिर्भागवतां श्रेष्ठा तव कर्म्मणि नित्यशः ॥ ३८ ।
ततः कमलपत्राक्षी भक्ताभक्तेषु वत्सला ।
कराभ्यामञ्जलिङ्कृत्वा नारायणमथाब्रवीत् ॥ ३९ ।

धरण्युवाच ।

त्वद्भक्तेन महाभाग विधिना दीक्षितेन च ।
तव चिन्तापरेणात्र किङ्कर्त्तव्यञ्च माधव ॥ ४० ।
केन चिन्तयितव्यस्त्वमचिन्त्यो* मानुषैः परः ।
किञ्च भागवतैः कार्य्यं यथावित्तं न शक्यते ॥ ४१ ।
ततो भूम्या वचः श्रुत्वा आदिरव्यक्तसम्भवः ।
मधुरं स्वरमादाय प्रत्युवाच वसुन्धराम् ॥ ४२ ।

वराह उवाच ।

देवि तत्त्वेन वक्ष्यामि यन्मान्त्वं परिपृच्छसि ।

---

* चिन्तयसी देवेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

येन चिन्तयसे चिन्तां मम कर्म्मपरायणा* ॥ ४३ ।
एषा गणान्तिका नाम दीक्षाङ्गबीजनिःसृता ।
एतद्गुह्यां महाभागे मम चिन्तां विचिन्तयेत् ॥ ४४ ।
दीक्षितेन तु शुद्धेन मम निश्चितकर्म्मणा† ।
ग्रहीतव्यं‡ विशालाक्षि मन्त्रेण विधिनात्र वै ॥ ४५ ।
यस्तु भागवतो भूत्वा तद्गृह्णाति गणान्तिकाम् ।
जनस्य दर्शनस्पर्शसंयुक्तां वामसंयुताम् ।
तस्य धर्म्मो न विद्येत दीक्षा तस्य महाफला§ ॥ ४६ ।
यस्तु गृह्णातिं सुश्रोणि मन्त्रभूतां गणान्तिकाम् ।
आसुरी नाम सा दीक्षा यथाधर्म्मः प्रवर्त्तते ॥ ४७ ।
यस्माद्गणान्तिकां गुह्यां चिन्तयेच्छुद्धमानसः ।
गुह्यां गणान्तिकां यो मां चिन्तयेत्स बुधोत्तमः¶ ।
जन्मान्तरसहस्राणि चिन्तिता तेन तेन सः ॥ ४८ ।
ग्रहणस्य प्रवक्ष्यामि यथा शिष्याय दीयते ।
मन्त्रं लोकसुखार्थाय तच्छृणुष्व वसुन्धरे‖ ॥ ४९ ।

---

* चिन्ता चिन्तयते मम कर्म्मपरायणः इति (ग) पाठः ।

† दीक्षितेन विशुद्धेन विधिदृष्टेन कर्म्मणेति (ग) पाठः ।

‡ मज्जितार्थमिति (ग) पुस्तकस्य पाठान्तरम् ।

§ न स दीक्षित उच्यत इति (ग) पाठः ।

¶ गुह्यां गणान्तिकां देवी यो मां चिन्तयते बुध इति (ग) पाठः ।

‖ मन्त्रं लोकसुखार्थञ्च तच्छृणोहि वसुन्धरे इति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कौमुदस्य तु मासस्य मार्गशीर्षस्य वाप्यथ* ।
वैशाखस्यापि मासस्य शुक्लपक्षे तु द्वादशी ॥ ५० ॥
कुर्य्यान्निरामिषं तत्र दिनानि त्रीणि निश्चितः ।
तस्मिन् गणान्तिकं ग्राह्यं मम धर्म्मविनिश्चयात्† ॥ ५१ ॥
ममाग्रतो वरारोहे प्रज्वाल्य च हुताशनम् ।
कुशैरास्तरणङ्कृत्वा‡ स्थापयित्वा गणान्तिकम् ॥ ५२ ॥
ततः शिष्यो गुरुश्चैव दीक्षितः शुचिरुत्तमः ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ५३ ॥
मन्त्रः—या धारिता पूर्व्वपितामहेन§
ब्रह्मण्यदेवेन भवोद्भवेन ।
नारायणाद्दक्षिणगात्रजातां
हे शिष्य गृह्णीष्व स वै त्वमेव ॥ ५४ ॥
तत एतेन मन्त्रेण गुरुर्गृह्य¶ गणान्तिकम् ।
शिष्याय दत्त्वा स्निग्धाय इमं मन्त्रमुदीरयेत्‖ ॥ ५५ ॥
मन्त्रः—नारायणस्य दक्षिणगात्रजातां
स्वशिष्य गृह्णीष्व समयेन देवीम् ।

---

* मार्गशीर्षस्य वा तथेति (ग) पाठः ।
† तस्मिन् गणान्तिकां प्राप्य मम धर्म्मविनिश्चयादिति (ग) पाठः ।
‡ संस्तरणं कृत्वेति (ग) पुस्तकस्य पाठः ।
§ पाद्यादिना पूजिता पितामहेनेति (ग) पाठः ।
¶ स्तुत्वा गृह्य गणान्तिकामिति (ग) पाठः ।
‖ शिष्याय प्रददौ तत्र पुनर्मन्त्रमुदाहरेदिति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतद्विचिन्त्यापरएव भूत्वा
भवे पुनर्भावनमेति नैव ॥ ५६ ।

धरण्युवाच ।

स्नानोपकल्पनान्तेषु किङ्कर्त्तव्यन्तु माधव ।
प्रसाधनविधिञ्चैव केन मन्त्रेण कल्पयेत्* ।
अकर्म्मण्येन मुच्येत तव कर्म्मपरायणः ॥ ५७ ।
ततो भूम्या वचः श्रुत्वा लोकनाथो जनार्द्दनः ।
धर्म्मसंयुक्तवाक्येन प्रत्युवाच वसुन्धराम् ॥ ५८ ।

वराह उवाच ।

देवि तत्त्वेन वक्ष्यामि यन्मात्त्वं परिपृच्छसि ।
स्नानस्यैवोपचाराणि यानि कुर्व्वन्ति कर्म्मिणः ॥ ५९ ।
वृत्तेष्वेवोपचारेषु जलप्रधानाणिकेषु च ।
कङ्कतीञ्चाञ्जनञ्चैव दर्पणञ्चैव सुन्दरि ।
यथा मन्त्रेण दातव्यं तच्छृणुष्व वसुन्धरे† ॥ ६० ।
स्पृष्ट्वा तु मम गात्राणि चौमवस्त्रेण संहृतः ।
अञ्जनं कङ्कतीञ्चैव शीघ्रमेव प्रसादयेत्‡ ॥ ६१ ।
ततो जानुस्थितो भूत्वा मम कर्म्मपरायणः ।

---

* कारयेदिति (ग) पुस्तकस्य पाठः ।

† कङ्कतीञ्चाञ्जनञ्चैव शीघ्रमेव प्रकल्पयेत् ।
दर्पणञ्च वरारोहे येन मन्त्रेण दीयते ॥ इति (ग) ।

‡ प्रकल्पयेदिति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अञ्जली कङ्कतीं* गृह्य इमं मन्त्रमुदाहरेत् ॥ ६२ ।

मन्त्रः—एतां कङ्कतीमञ्जलिस्थां प्रगृह्य†
प्रसीद नारायण शिरः प्रसाधि हि ।
महानुभाव विश्वनेत्रे स्वनेत्रे
याभ्यां पश्यसे त्वं त्रिलोकीम् ।
लोकप्रभो सर्व्वलोकप्रधान
एषो जनमञ्जनं लोकनाथ ॥ ६३ ।

ततः संस्नापयेद्देवं मन्त्रेणानेन सुव्रतम् ॥ ६४ ।

मन्त्रः—देवदेव स्नानीयमिदं मम कल्पितं सुवर्णकल
गृहाण प्रसीद एषोऽञ्जलिर्मया परिकल्पितः स्नाहि स्नाहीति‡

नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ६५ ।

मन्त्रः—एषा मया माधव त्वत्प्रसादा-
द्गुरुप्रसादाच्च हि मन्त्रपूजा ।
आशा ममैषा च गणान्तिका वै
भवेदधर्म्मो न च मे कदाचित् ॥ ६६ ।

य एतेन विधानेन मम कर्म्मणि दीक्षितः ।
गुरोर्गृहीत्वा महतो मम लोकाय गच्छति ।
कुशिष्याय न दातव्या पिशुनाय शठाय च ॥ ६७ ।

---

* अञ्जलिकणकमिति (ग) पुस्तकपाठः ।

† स्त्रीऽञ्जलिं कणकं देव इति (ग) पाठः ।

‡ एष पाठः (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एषा चैव वरारोहे गृहीत्वा गणनान्तिका ।
सुशिष्याय च दातव्या हस्ते चैव गणान्तिका ॥ ६८ ।
उत्तमाष्टाधिकशतं पञ्चाशत्तुर्य्यमध्यमा ।
तदर्द्धं कन्यसी चापि परिमाणेन सुन्दरि* ॥ ६९ ।
रुद्राक्षैरुत्तमा सा तु मध्यमा पुत्त्रजीवकैः† ।
पद्माक्षैः कन्यसी ज्ञेया देवि ते कथिता मया ॥ ७० ।
एतत्कश्चिन्न जानाति‡ जन्मान्तरशतैरपि ।
सर्व्वलोकहितां शुद्धां मोक्षकामां गणान्तिकाम् ॥ ७१ ।
नोच्छिष्टः संस्पृशेत्तान्तु§ स्त्रीणां हस्ते न कारयेत् ।
आकाशे स्थापनं कुर्य्यान्न च वामेन संस्पृशेत् ॥ ७२ ।
न दर्शयेच्च कस्यापि चिन्तयित्वा तु पूजयेत्¶ ।
एतत्ते परमं गुह्यमाख्यातं मोक्षदायकम् ॥ ७३ ।
एवं हि विधिपूर्व्वेण पालयेत गणान्तिकाम्‖ ।
विशुद्धो मम भक्तश्च मम लोकाय गच्छति ॥ ७४ ।

---

* परिमाणं विधीयत इति (ग) पुस्तकपाठः ।

† रुद्राक्षा उत्तमा चैवं पुत्रजीवकमध्यमा इति (ग) पाठः ।

‡ एतन्न जानते कश्चिदिति (ग) पाठः ।

§ नोच्छिष्टेन तु स्प्रष्टव्या इति (ग) पाठः ।

¶ यदीच्छेत् परमां गतिमिति (ग) पाठः ।

‖ गुह्यात्तु परमं गुह्यं सन्ध्योपासनमेव च ।
एष मन्त्रश्च जापश्च पूज्या वै गणनान्तिकेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं विष्णोर्वचः श्रुत्वा धरणी शंसितव्रता* ।
प्रत्युवाच परं श्रेष्ठं लोकनाथं महौजसम् ॥ ७५ ।
दर्पणन्ते कथं देया† तन्ममाख्याहि माधव । ·
येन तुष्टो निजं रूपं पश्यसे चिन्तितः प्रभोः ॥ ७६ ।
धरण्यास्तद्वचः श्रुत्वा वराहः पुनरब्रवीत् ।
शृणु मे दर्पणविधिं यथावद्देवि सुव्रते ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ७७ ।

मन्त्रः—श्रुतिर्भागवती श्रेष्ठा श्रुती अग्निर्द्विजश्च तव मुखं नासेऽश्विनौ नयने चन्द्रसूर्य्यौ मुखञ्च चन्द्र इव गात्राणि जगत्प्रधानानीमञ्च दर्पणं पश्य पश्य रूपम्‡ ।

य एतेन विधानेन मम कर्म्मपरायणः ।
करोति मम कर्म्माणि तारितं कुलसप्तकम्§ ॥ ७८ ।
एतेन मन्त्रेण वै भूमे उपचारस्तु¶ ईदृशः ।
हृष्टतुष्टेन कर्त्तव्यो यदीच्छेत्परमां गतिम् ॥ ७९ ।

इति वराहपुराणे कङ्कताञ्जनदर्पणं नाम
अष्टाविंशत्यधिकशततमोऽध्यायः ।

---

* रत्नभूषितेति (ग) पुस्तकस्य पाठः ।

† दद्यादिति (ग) पुस्तकपाठः ।

‡ श्रुतिर्भागवताः श्रेष्ठाः तव कर्म्म विनिश्चिता गात्राणि यत्प्रयतानि मुखं चन्द्रो यमतानेत्रे दर्पणं च मे दर्पणलोकनाथस्य स्वरूपजगत्सर्व्वतः इति (ग) पाठः ।

§ [illegible] कर्म्माणि कुर्व्वीत तारितान् सप्त वै कुलानिति (ग) पाठः ।

¶ भूमि उपचारश्चेति (ग) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऊनत्रिंशदधिकशततमोऽध्यायः।

वराह उवाच।

भूषितालङ्कृतङ्कृत्वा मम कर्म्मपरायणः।
शुक्लं यज्ञोपवीतञ्च देयन्नवगुणन्तथा*।
गन्धेन तिलकं दद्याल्ललाटे मम सुन्दरि॥ १।

---

* दद्यान्नवगुणन्तथेति (ग) पाठः। अस्माच्छ्लोकादनन्तरं (ग) पुस्तके कश्चिदधिकः पाठो वर्त्तते यथा—

शिरसा चाञ्जलिङ्कृत्वा वसुधा पुनरब्रवीत्।
धरण्युवाच।
एतन्मां परमं गुह्यं तद्भक्तां वक्तुमर्हसि।
सन्ध्यां वैकेन मन्त्रेण तव कर्म्मपरायणाम्।
वद भागवतां शुद्धां तव कर्म्मविनिश्चिताम्॥
ततो भूमिवचः श्रुत्वा भूतानां प्रभवोऽव्ययः।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम्॥
वराह उवाच।
शृणु माधवि तत्त्वेन यन्मां त्वं परिपृच्छसि।
कथयिष्यामि ते भद्रे प्रवरं गुह्यमुत्तमम्॥
यया वन्दितसुभूपैः पुण्याः भागवताः शुभाः।
ज्ञात्वा तु मम कर्म्माणि शुचिः संसारमोचणीम्॥
कुर्व्वीतैव परां सन्ध्यां यथावदिति निश्चितम्।
जलाञ्जलिं ततोगृह्य मम भक्त्या व्यवस्थितः।
मुहूर्त्तं ध्यानमास्थाय इमं मन्त्रमुदाहरेत्॥
मन्त्रः—भवोद्भवमादिव्यक्तरूपमाद्यं सर्व्वे देवा ब्रह्मा रुद्रस्त्वाष्टकस्समासीत् ध्यानयोग·

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्यच्च ते प्रवक्ष्यामि कर्म्म लोकसुखावहम् ।
येन मन्त्रेण दातव्यं ललाटे तिलकं मम* ॥ २ ।
मन्त्रः—मुखं मण्डनं चिन्तया† वासुदेव
त्वया प्रयुक्तञ्च मयोपनीतम् ।
एतेन चित्रं कुरु वासुदेव

स्थिता ते सन्ध्यासंस्था वासुदेवं नमति वयं देवमादित्यन्तारूपमात्मसप्तदिवसं तथापि संसारार्थं कर्म्म तत्करणमेव सन्ध्यासंस्था वासुदेव नमोऽस्तु ते ।

मन्त्राणां परमो मन्त्रस्तपसां परमं तपः ।
आचारं कुरुते ह्येवं मम लोकाय गच्छति ॥
गुह्यानां परमं गुह्यं रहस्यं परमुत्तमम् ।
य एवं पठते नित्यं न स पापेन लिप्यते ॥
नादीक्षिताय दातव्यं नोपवीते कथञ्चन ।
दीक्षितायैव दातव्यं उपपन्ने तथैव च ॥
पुनरन्यत्प्रवक्ष्यामि देवि तत्त्वेन मे शृणु ।
न दीपमपि गृह्णाति दत्तं भागवतैः शुभैः ॥
कृत्वा तु मम कर्म्माणि गृह्य दीपकमुत्तमम् ।
जानुसंस्थां ततः कृत्वा इमं मन्त्रमुदीरयेत् ॥

मन्त्रः—ॐ नमो भगवतेऽनुग्रहतेजसे विष्णो सर्व्वदेवा त्वाग्निसंस्था प्रविष्टा एवा चाग्निसंस्था प्रविष्टा एवं चाग्निस्तव तेजसा भविष्यति स्वतेजसा मामाशु मन्त्रस्य तेजसा संसारार्थं देव गृह्यं दीपकं निमन्त्रं मूर्त्तिमन्त्रं स्वभूत्वा इमं कर्म्म निष्फलम् ।

तत्करोति यथान्यायं दीपकं ददते नरः ।
तारिताः पितरस्तेन निष्फलाश्च पितामहाः ॥ इति

* तिलकमिति (घ) पाठः ।
† मुखमण्डलं विद्येति (ध) पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम चैवं कुरु संसारमोचम्* ।
एतेन मन्त्रेण चित्रकं मे
दद्याल्ललाटे तिलकं धरित्रि† ॥ ३ ।
ततः सुमनसो गृह्य इमं मन्त्रमुदाहरेत् ॥ ४ ।
मन्त्रः—इमाः सुमनसः सौमनस्याय भगवन्! सर्व्वं सुमनसं कुरु त्वयैते सौमनस्याय निर्म्मिता गृहीता स्वाहा ।
एवं सुमनसो दत्त्वा धूपञ्चैव निवेदयेत् ।
ततो गृहीत्वा धूपन्तु सुगन्धं सुमनोहरम् ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ५ ।
मन्त्रः—सुगन्धानि तवाङ्गानि स्वभावेनैव केशव ।
अमुना चैव धूपेन धूपितानि तवाऽनघ ॥ ६ ।
तवाङ्गानां सुगन्धेन सर्व्वं सौगन्धिकं कुरु ।
गृहाणेमञ्च मे धूपं सर्व्वसंसारमोचणम् ॥ ७ ।
पुनरन्यत्प्रवक्ष्यामि यथा दीपं निवेदयेत् ।
यथा दत्तन्तु गृह्णामि मम भक्तैः सुखावहम्‡ ॥ ८ ।
कृत्वा तु मम कर्म्माणि गृह्य दीपमनुत्तमम् ।
जानुसंस्थं ततः कृत्वा इमं मन्त्रमुदीरयेत् ॥ ९ ।
मन्त्रः—नमो भगवते तेजसे विष्णो
सर्व्वे देवास्त्वग्निसंस्थाः प्रतिष्ठाः ।
एवञ्चाग्निस्तव तेजसा प्रतिष्ठितो

---

* एतेन चित्रं ते देवगृहं ममैव संसारकारामोक्षमिति (ग)। † एतेन मन्त्रेण चित्रकं दातव्यमिति (ग)। ‡ (ग) पुस्तके (४—७) श्लोका न सन्ति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेजस्वात्मा स्वयमेव मन्त्रश्च ॥ १० ।
तेजः संसारान्मोचयितुं देव
गृह्णीष्व दीपं द्युतिमन्तञ्च
मूर्त्तिश्च भूत्वा इदं कर्म्म निष्कलम् ॥ ११ ।
मां करोति यथान्यायं दीपकं ददते नरः ।
तारिताः पितरस्तेन निष्कलाश्च पितामहाः ॥ १२ ।
नारायणवचः श्रुत्वा विस्मिता च* वसुन्धरा ।
वराहरूपिणन्देवं प्रत्युवाच वसुन्धरा† ॥ १३ ।
श्रुता मया भागवतास्तव कर्म्मपरायणाः ।
शेषसंश्रवणार्थाय मनो धावति सत्पथे‡ ॥ १४ ।
तव प्रापणकं कृत्यं केषु पात्रेषु कारयेत् ।
एतदाचक्ष्व तत्त्वेन येन तुष्यसि माधव ॥ १५ ।
ततोभूमेर्वचः§ श्रुत्वा लोकनाथोऽब्रवीदिदम् ।
शृणु तत्त्वेन मे देवि पात्राणि यानि रोचते¶ ।
तानि ते कथयिष्यामि त्वया मे पूर्व्वपृच्छितम् ॥ १६ ।
सौवर्णं रजतङ्कांस्यं येषु दद्यात्प्रपाणकम् ।
सर्व्वाणि तानि त्यक्त्वेह ताम्रञ्च मम रोचते ॥ १७ ।
एतन्नारायणाच्छ्रुत्वा धर्म्मकामा|| वसुन्धरा ।

---

* प्रत्युवाचेति (ग) । † प्रत्युवाच पुनर्वच इति (ग) । ‡ कृत्वा च तव कर्म्माणि शेषे च तस्मिन् वने इति (ग) । § भूम्या वच इति (घ) । ¶ ये च पात्रा मम प्रिया इति (ग), अत्र पात्रस्य पुंस्त्वमार्षम् । || धर्म्मकामेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम् ।
एतन्मे परमं गुह्यं ताम्रन्ते रोचते कथम् ॥ १८ ।
ततो भूमिर्वचः* श्रुत्वा अनादिरपराजितः ।
लोकानां प्रवरः श्रेष्ठः प्रत्युवाच वसुन्धराम् ॥ १९ ।
शृणु तत्त्वेन मे भूमि† कथ्यमानं मयाऽनघे ।
एकाग्रं चित्तमाधाय येन ताम्रं मम प्रियम् ॥ २० ।
सप्तयुगसहस्राणि आदिकालेऽथ माधवि ।
यथा ताम्रं समुत्पन्नं यथैव प्रियदर्शनम्‡ ॥ २१ ।
पूर्व्वं कमलपत्राक्षि गुडाकेशो महासुरः ।
ताम्ररूपं समादाय ममैवाराधने रतः§ ॥ २२ ।
तत आराधितस्तेन वर्षाणान्तु चतुर्द्दश¶ ।
सहस्राणि विशालाक्षि धर्म्मकामेन निश्चलम्‖ ॥ २३ ।
अहन्तु तपसा तुष्टस्तीव्रेण कृतनिश्चयात्** ।
ततस्ताश्रमये रम्ये यत्र ताम्रसमुद्भवः ॥ २४ ।
दृष्ट्वाश्रमं महादेवि किञ्चिदेव सुभाषितम् ।
ततो जानुस्थितो भूत्वा†† मम एष विचिन्तयत्‡‡ ॥ २५ ।
चतुर्बाहुश्च मां दृष्ट्वा मम कर्म्मपरायणः§§ ।

---

* भूमिवच इति (ग)। † भूमि इति (ग)। ‡ ममैव प्रियदर्शनमिति (ग)। § स्थित इति (ग)। ¶ सहस्राणि च षोडशेति (ग)। ‖ मम भक्तो विशालाक्षि धर्म्मकामी तु निश्चये इति (ग)। ** ततः प्रीतोऽस्मि सुश्रोणि तस्य संतपनिश्चयादिति (ग)। †† जानुस्थितो भूयेति (ग)। ‡‡ विचिन्त्य तदिति (ग)। §§ ऊर्द्ध्वंबाहुस्ततोदृष्ट्वा मम चिन्तापरायण इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रणतः प्राञ्जलिः प्राह शिरो भूमौ निधाय्य सः ।
तच्च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना* ॥ २६ ।
गुड़ाकेश महाभाग ब्रूहि किङ्करवाणि ते ।
तोषितोऽस्म्यनया भक्त्या दुराराध्योऽपि सुव्रत† ॥ २७ ।
यत्त्वया चिन्तितं सौम्य कर्म्मणा मनसा गिरा‡ ।
वरं ब्रूहि महाभाग तव यद्रोचतेऽनघ§ ॥ २८ ।
एवं मम वचः श्रुत्वा गुड़ाकेशोऽब्रवीदिदम्¶ ।
कराभ्यामञ्जलिङ्कत्वा विशुद्धेनान्तरात्मना ॥ २९ ।
यदि तुष्टोऽसि मे देव समस्तेनान्तरात्मना ।
जन्मानान्तु सहस्राणि त्वयि भक्तिर्दृढ़ाऽस्तु मे ।
चक्रेण वधमिच्छामि त्वया मुक्तेन केशव‖ ॥ ३० ।
चक्रेण पातितस्यैतद्दसामांसानि किञ्चन** ।
ताम्रं नाम भवेद्देव पवित्रीकरणं शुभम् ॥ ३१ ।
तेन पात्रं ततः कृत्वा शुद्धधर्म्मविनिश्चितः ।
तस्मिन् प्रापणकं कृत्वा शुद्धे वै ताम्रभाजने ।
निवेदिते परा प्रीतिर्भवत्वेतन्मनोगतम् ॥ ३२ ।
प्रसन्नो यदि मे देव ह्येष मे दीयतां वरः ।

---

* गुड़ाकेशो महाभाग मम कर्म्मविधौ स्थितः । एवं तत्तु मया प्रोक्तं प्रसन्नेनान्तरात्मनेति (ग) । † तोषितोऽहं महाभाग्य त्वया भक्तेन केवलमिति (ग) । ‡ च वै इति (ग) । § हृदीति (ग) । ¶ वचोऽब्रवीदिति (ग) । ‖ सर्व्वश इति (ग) । ** य एष मम मांसौघस्त्वया चक्रेण पातित इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यच्चिन्तितोऽसि देवेश उग्रे तपसि तिष्ठता* ॥ ३३ ।
वाढ़मित्येव सोऽप्युक्तो यावल्लोकस्थितिर्मया ।
तावत्ताम्रास्थितो भूत्वा मम संस्थो भविष्यसि† ॥ ३४ ।
ततःप्रभृति ताम्रात्मा गुड़ाकेशो व्यवस्थितः ।
तत्ताम्रभाजने मह्यं दीयते यत्सुपुष्कलम् ।
अतुला तेन मे प्रीतिर्भूमे‡ जानीहि सुव्रते ॥ ३५ ।
मङ्गल्यञ्च पवित्रञ्च ताम्रन्तेन प्रियं मम ॥ ३६ ।
त्वञ्च द्रक्ष्यसि तच्चक्रं मध्यसंस्थे दिवाकरे ।
वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशी ।
मम तेजोमयं चक्रं त्वां वधिष्यत्यसंशयम् ।
एष्यसे मम लोकाय एवमेतन्न संशयः ॥ ३७।३८ ।
एवमुक्त्वा गुड़ाकेशं तत्रैवान्तर्हितोऽभवम् ।
चक्राद्वधमभीप्सन्वै सोऽपि मत्कर्मणि स्थितः ॥ ३९ ।
दिने दिने विशिष्टन्तु शुभं कुर्वंस्तपस्यति ।
विष्णुसंस्थो भविष्यामि कदाहमिति चिन्तयन् ॥ ४० ।
एवं स्थितस्य तस्याथ वैशाखस्य तु द्वादशी ।
शुक्लपक्षस्य सम्प्राप्ता तस्यां धर्म्मविनिश्चितः ।
विष्णुपूजां ततः कृत्वा प्रार्थयामास मां प्रति ॥ ४१ ।
मुञ्च मुञ्च प्रभो चक्रमपि वह्निसमप्रभम् ।

---

* यत्त्वया चिन्तितं देव उग्रं तप इदं महदिति (ग) । † वाढ़मित्येव सोऽप्युक्त-एवमेतद्भविष्यति । यावल्लोका धरिष्यन्ति यावच्चैव महीसुराः । तावत्तामस्थि[illegible]ति (ग) ।
‡ भूमि इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आत्मा मे नीयतां शीघ्रं निकृत्याङ्गानि सर्व्वशः ॥ ४२ ।

तदैव चक्रेण विपाटितोऽसौ
प्राप्तोऽपि मां भागवतप्रधानः ।
ताम्रन्तु तन्मांसमसृक् सुवर्ण-
मस्थीनि रूप्यं बहुधातवश्च ।
रङ्गञ्च सीसं त्रपुधातुसंस्थं
कांस्यञ्च रीतिश्च मलस्तु तेषाम् ॥ ४३ ।

ताम्रपात्रेण वै भूमे प्रापणं यत्प्रदीयते ।
सिक्थेऽसिक्थे* फलं तस्य शृणुष्व गदतो मम ॥ ४४ ।
एतद्भागवतैः कार्य्यं मम प्रियकरैः सदा
एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत् ।
दीक्षितैर्वै भागवतैः पाद्यार्घादौ च दीयते ॥ ४५ ।
एवं दीक्षाविधिः प्रोक्त एवं ताम्रसमुद्भवः ।
देवि तत्त्वेन कथितः किमन्यत्परिपृच्छसि ॥ ४६ ।

भूमिरुवाच ।

देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद ।
केन मन्त्रेण वा भक्तस्तव कर्म्मपरायणः ॥ ४७ ।

वराह उवाच ।

शृणु माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ।
यथा वन्दन्ति वै सूर्य्यं सन्ध्यां पूर्व्वापरान्तथा ॥ ४८ ।
जलाञ्जलिं गृहीत्वा तु मम भक्त्या व्यवस्थितः ।

* सिद्धेऽसिद्धे इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मुहूर्त्तन्ध्यानमास्थाय इमं मन्त्रमुदीरयेत् ॥ ४९ ।
सिक्थानि* तत्र यावन्ति ताम्रप्रापणके धरे।
तावद्वर्षसहस्राणि मम लोके स मोदते ॥ ५० ।
मन्त्रः—भवोद्भवमादिव्यक्तरूपमादित्यं
सर्व्वे देवा ब्रह्मरुद्रेन्द्रास्त्वाञ्च।
क्षणे यथासीद्ध्यानयोगस्थितास्ते
सन्ध्यासंस्था वासुदेवं नमन्ति ॥ ५१ ।
वयं देवमादिमव्यक्तरूपं
कृत्वा चात्मनि देव संस्थास्तथापि।
संसारार्थं कर्म्म तत्करणमेव
सन्ध्यासंस्था वासुदेव नमो नमः ॥ ५२ ।
अनेनैव हि† मन्त्रेण सन्ध्यां कुर्य्यात्तु दीक्षितः ॥ ५३ ।

इति वराहपुराणे चतुर्वर्णदीक्षा नाम ऊनत्रिंशदधिकशततमोऽध्यायः।

त्रिंशदधिकशततमोऽध्यायः।

सूत उवाच।

एवं दीक्षां ततः श्रुत्वा नारायणमुखान्मही।
विशुद्धमानसा देवी नारायणमथाब्रवीत् ॥ १ ।

* सिद्धानीति (ग)। † अनेनैव त्विति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding.: IKS

धरण्युवाच ।

अहो ते दीक्षामाहात्म्यं यस्य वै व्युष्टिरुत्तमा ।
श्रुत्वाहन्तु महाभाग जातास्मि विमला विभो ॥ २ ।
अहो देवस्य माहात्म्यं लोकनाथस्य तत्त्वतः ।
येन सा कारिता दीक्षा चातुर्वर्ण्यसुखावहा ॥ ३ ।
एकं मे परमं गुह्यं यदीश हृदि वर्त्तते ।
भव भक्तसुखार्थाय तत्त्वं मे वक्तुमर्हसि ॥ ४ ।
देव पूर्व्वापराधास्ते द्वात्रिंशदपि कीर्त्तिताः* ।
एवङ्कृत्वापराधानि† मनुजा अल्पचेतसः ॥ ५ ।
कर्म्मणा केन शुद्ध्यन्ति अपराधस्य कारिणः ।
तन्ममाचक्ष्व तत्त्वेन मम प्रीत्या च माधव ॥ ६ ।
तद्वै भूम्या वचः श्रुत्वा हृषीकेशो महामनाः ।
दिव्यन्ध्यानं समादाय प्रत्युवाच वसुन्धराम् ॥ ७ ।

वराह उवाच ।

शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन वा ॥ ८ ।
आपद्गता हि भुञ्जन्ति राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते‡ नरके नराः ॥ ९ ।
भगवद्वचनं श्रुत्वा कम्पिता च वसुन्धरा ।
दिनानि सप्त दश च भयन्तीव्रमजायत ॥ १० ।

---

* द्वात्रिंशत्परिकीर्त्तितेति (ग) । † अपराधानिति साधु । ‡ पचन्ते इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततो दीनमना भूत्वा सा मही शंसितव्रता ।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम् ॥ ११ ।
धरण्युवाच ।
शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ।
को नु दोषोऽस्ति राज्ञां हि तन्मे त्वं वक्तुमर्हसि ॥ १२ ।
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः ।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम् ॥ १३ ।
वराह उवाच ।
शृणु सुन्दरि तत्त्वेन गुह्यमेतदनिन्दिते ।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥ १४ ।
यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते ।
राजसन्तामसं वापि कुर्व्वन् कर्म्म सुदारुणम् ॥ १५ ।
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे ।
धर्म्मसन्धारणार्थाय न तु मे रोचते भुवि ॥ १६ ।
ततो यद्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा राज्ञान्तु भोज्यं वै शुद्धैर्भागवतैर्नरैः ॥ १७ ।
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा ।
धनधान्यसमृद्धानि दत्त्वा भागवतैरपि ॥ १८ ।
सिद्धं भागवतैश्चान्नं मम प्रापणशेषकम् ।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ॥ १९ ।
एवं विष्णुवचः श्रुत्वा धरणी शंसितव्रता ।
वराहरूपिणं देवं प्रत्युवाच वरानना ॥ २० ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

धरण्युवाच ।

राजान्नन्तु नरो भुक्त्वा शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्ध्येत तन्मे ब्रूहि जनार्द्दन ॥ २१ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मान्त्वं भीरु भाषसे ।
तरन्ति पुरुषा येन राजान्नस्योपभुञ्जकाः ॥ २२ ।
एकं चान्द्रायणङ्कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कुर्य्यात्सान्तपनञ्चैकं शीघ्रं मुच्यन्ति* किल्बिषात् ।
न तस्य चापराधोऽस्ति वसुधे वै वचो मम ॥ २३ ।
एवमेव न भोक्तव्यं राजान्नं वै कदाचन ।
ममात्र पूजाकामेन यदीच्छेत्परमां गतिम् ॥ २४ ।

इति वराहपुराणे भगवच्छास्त्रे राजान्नप्रायश्चित्तं नाम
विंशदधिकशततमोऽध्यायः ।

एकत्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

दन्तकाष्ठमखादित्वा यो हि मामुपसर्पति* ।
पूर्व्वकालकृतं कर्म्म तेन चैकेन नश्यति ॥ १ ।

---

* मुच्यन्ते इति साधु ।

---

* अतःपरं (ग) पुस्तके श्लोक एको नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारायणवचः श्रुत्वा पृथिवी धर्म्मसंश्रिता।
विष्णुभक्तसुखार्थाय हृषीकेशमुवाच ह ॥ २।

धरण्युवाच।

सर्व्वकालकृतं कर्म्म क्लेशेन महताऽनघ।
कथमेकापराधेन सर्व्वमेव प्रणश्यति ॥ ३।

वराह उवाच।

शृणु सुन्दरि तत्त्वेन कथ्यमानं मयाऽनघे।
येन चैकापराधेन पूर्व्वकर्म्म प्रणश्यति ॥ ४।
मनुष्यः किल्विषी भद्रे कफपित्तसमन्वितः।
पूयशोणितसम्पूर्णं दुर्गन्धि मुखमस्य तत् ॥ ५।
तत्सर्व्वबीजं नश्येत* दन्तकाष्ठस्य भक्षणात्।
शुद्धिर्भागवती चैव आचारेण विवर्ज्जिता ॥ ६।

धरण्युवाच।

दन्तकाष्ठमखादित्वा यः कर्म्माणि करोति ते।
प्रायश्चित्तञ्च मे ब्रूहि येन धर्म्मो न नश्यति ॥ ७।

वराह उवाच।

एवमेतन्महाभागे यन्मां त्वं परिपृच्छसि।
कथयिष्यामि हीदं ते यथा शुध्यन्ति मानवाः ॥ ८।
आकाशशयनङ्कृत्वा दिनानि द्वे च पञ्च च।
अभुक्तदन्तकाष्ठाश्च एवं शुध्यन्ति मानवाः ॥ ९।
एवं ते कथितं भद्रे दन्तकाष्ठस्य भक्षणम्।

---

* न सहेदुचितं देवीति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
कुतस्तस्यापराधोऽस्ति एवमेव न संशयः ॥ १० ॥

इति वराहपुराणे दन्तकाष्ठाभक्षणप्रायश्चित्तं
नामैकत्रिंशदधिकशततमोऽध्यायः ।

द्वात्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

गत्वा तु मैथुनं भद्रे अस्नातो यः समस्पृशेत् ।
रेतः पिबति दुर्बुद्धिः सहस्रं नव पञ्च च ॥ १ ॥
एतन्नारायणाच्छ्रुत्वा सा मही शंसितव्रता ।
ततो दीनमना भूत्वा प्रोवाच मधुसूदनम् ॥ २ ॥

धरण्युवाच ।

किमिदं भाषसे देव धर्म्मं भीषणसङ्कटम् ।
कथमेवं पुमान्वै स रेतःपानपरो भवेत् ।
एतन्मे परमं दुःखं तद्भवान्वक्तुमर्हसि ॥ ३ ॥

वराह उवाच ।

शृणु तत्त्वेन मे देवि इदं गुह्यमनुत्तमम् ।
चिह्नमेतद्वरारोहे आधिचारविनिश्चयः ॥ ४ ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुरुषः स्त्रीषु कर्म्माणि यो विकुर्व्वीत निर्घृणः ।
दृष्टं तस्यापराधस्य फलं प्राप्नोति मानवः ॥ ५ ।
एवमेतद्वरारोहे यन्मात्वं परिपृच्छसि ।
अपराधस्य दोषेण विशुद्धिश्च न जायते ॥ ६ ।
प्रायश्चित्तं प्रवक्ष्यामि रागदोषेण दोषितम् ।
गृहस्थाः पुरुषा-भद्रे मम कर्म्मपरायणाः ॥ ७ ।
यावकेन त्रयं चिप्त्वा पिन्याकेन दिनत्रयम् ।
वायुभक्षं दिनं त्वेकं ततो मुच्येत किल्विषात् ॥ ८ ।
य एवं कुरुते भूमि विधिदृष्टेन कर्म्मणा ।
ज्ञात्वा कर्म्मापराधन्तु न स पापेन लिप्यते ॥ ९ ।
एतत्ते कथितं भद्रे मिथुनं योऽभिगच्छति ।
प्रायश्चित्तं महाभागे मम लोकसुखावहम् ॥ १० ।
स्पृष्ट्वा तु मृतकं भद्रे नरं पञ्चत्वमागतम् ।
मम शास्त्रं वहिष्कृत्वा यः श्मशानं प्रपद्यते ॥ ११ ।
पितरस्तस्य सुश्रोणि आत्मनश्च पितामहाः ।
श्मशाने जम्बुका भूत्वा भक्षयन्ति शवांस्तथा ॥ १२ ।
ततो हरेर्वचः श्रुत्वा धर्म्मकामा वसुन्धरा ।
उवाच मधुरं वाक्यं सर्व्वलोकहिताय वै ॥ १३ ।

धरण्युवाच ।

तव नाथ प्रपन्नानां क्व पापं विद्यते प्रभो ।
प्रायश्चित्तञ्च मे ब्रूहि येन मुच्यन्ति* किल्विषात् ॥ १४ ।

---

* मुच्यन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच ।

शृणु सुन्दरि तत्त्वेन यस्मात्त्वं परिपृच्छसि ।
कथयिष्यामि ते ह्येतं शोभनं पापनाशनम् ॥ १५ ।
एकाहारी दिनान्सप्त त्रिरात्रं चाप्युपोषितः ।
पञ्चगव्यं ततः पीत्वा ततो मुच्यति* किल्बिषात् ॥ १६ ।
शवे स्पृष्टेऽपराधस्य एष ते कथितो विधिः ।
सर्व्वथा वर्ज्जनीयं वै सर्व्वभागवतेन तु ॥ १७ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
विमुक्तः सर्व्वपापेभ्यो नापराधोऽस्ति तस्य वै† ॥ १८ ।
नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्भयः ।
रागमोहेन संयुक्तः कामेन च वशीकृतः ॥ १९ ।
वर्षाणान्तु सहस्रैकं रजः पिबति निर्घृणः ।
अन्धश्च जायते देवि दरिद्रो ज्ञानमूर्खवान् ॥ २० ।
न च विन्दति चात्मानं पतितो नरके यथा ।
अपराधमिमङ्कृत्वा तत्रैवं नास्ति संशयः ॥ २१ ।

धरण्युवाच ।

तव देव प्रपन्नानां मोक्षं संसारसागरात् ।
अपराधसमायुक्तस्तव कर्म्मपरायणः ।
कर्म्मणा येन शुध्येत तन्मे ब्रूहि जनार्द्दन ॥ २२ ।

वराह उवाच ।

स्पृष्ट्वा रजस्वलां नारीं नरो मद्भक्तितत्परः ।

---

* मुच्यते इति साधु । † अपराधी न विद्यते इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तपः कृत्वा त्रिरात्रन्तु आकाशशयने वसेत्॥ २३।
शूद्रो भागवतो भूत्वा मम कर्म्मपरायणः।
एवङ्कृत्वा महाभागे प्रायश्चित्तं मम प्रियम्॥ २४।
मुच्यते किल्बिषाद्देवि आचारेण वहिष्कृतः।
एतत्ते कथितं भद्रे यत्स्पृष्ट्वा तु रजस्वलाम्॥ २५।
स्पृष्ट्वा तु मृतकं देवि यो मत्क्षेत्रेषु तिष्ठति।
शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते॥ २६।
दशवर्षसहस्राणि चण्डालश्चैव जायते।
अन्धः सप्तसहस्राणि मण्डूकश्च* शतं समाः॥ २७।
मक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं† समाः।
दंशो वै सप्त चान्यानि कृकलासो भवेत्समाः॥ २८।
हस्ती वर्षशतञ्चैव खरो द्वात्रिंशकं भवेत्।
मार्ज्जारो नव वर्षाणि वानरो दश पञ्च च॥ २९।
एवं स चात्मदोषेण मम कर्म्मपरायणः।
प्राप्नोति सुमहद्दुःखं देवि चैवं न संशयः॥ ३०।
ततो हरेर्वचः श्रुत्वा दुःखेन परिपृच्छती।
सर्व्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा॥ ३१।

धरण्युवाच।‡

किमिदं भाषसे देव मानुषाणां दुरासदम्।
वाक्यभीषणमत्यन्तं§ मम मर्म्मप्रभेदकम्॥ ३२।

---

* कन्दूकश्चेति (ग)। † डिण्डिभैकादशमिति (ग)। ‡ (ग) पुस्तके एष पाठोनास्ति। § भीषणकश्चैवेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आचाराच्च परिभ्रष्टस्तव कर्म्मपरायणः ।
यथा तरति* दुर्गाणि प्रायश्चित्तं तथा वद ॥ ३३ ।
श्रुत्वा पृथ्व्यास्तथा वाक्यं† लोकनाथो जनार्द्दनः ।
धर्म्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम् ॥ ३४ ।

वराह उवाच ।

स्पृष्ट्वा तु मृतकं भूमि मम कर्म्मपरायणः ।
एकाहारं ततस्तिष्ठेद्दिनानि दश पञ्च च ॥ ३५ ।
तत एवं विधिङ्कृत्वा पञ्चगव्यन्तु प्राशयेत् ।
शुद्धभावं विशुद्धात्मा कर्म्मणा च न लिप्यते ॥ ३६ ।
एतत्ते कथितन्देवि स्पृष्ट्वा मृतकमेव च ।
दोषञ्चैवं विशुद्ध्यर्थं यत्त्वया पूर्व्वमिच्छितम्‡ ॥ ३७ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
अपराधविमुक्तो वै मम लोकं स गच्छति ॥ ३८ ।

इति वराहपुराणे मृतकस्य स्पर्शनप्रायश्चित्तं नाम
द्वात्रिंशदधिकशततमोऽध्यायः ।

---

* तरन्ति येनेति (ग) । † ततोवाक्यमिति (ग) । ‡ पूर्व्वपृच्छितमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

स्पृश्यमानेन मां भूमि वातकर्म्म प्रमुच्यते* ।
एवञ्च पुरुषो युक्तो वायुपीड़ितमानसः ॥ १ ।
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ॥ २ ।
एष वै तापनं देवि मोहनं मम साम्प्रतम्† ।
यो वै शास्त्रं विजानाति मम कर्म्मपरायणः ।
श्रुत्वा वाक्यं हृषीकेशं प्रत्युवाच वसुन्धरा ॥ ३ ।

धरण्युवाच ।

अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥ ४ ।

वराह उवाच ।

शृणु कार्त्स्न्येन मे देवि‡ कथ्यमानं मयाऽनघे ।
अपराधमिमङ्कृत्वा सन्तरेद्येन कर्म्मणा ॥ ५ ।
पावकेन दिनं त्रीणि नक्तानि च पुनस्त्रयः§ ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ६ ।

---

* स्पृश्यमानोऽथ मां देवि वातकर्म्म प्रमुञ्चतीति (ग)। स्पृशता, स्पृशन् वा साधु। † ध्वंसतीति (क), (ख)। ‡ शृणु क्रमेण मे देवि इति (ग)। § नक्तेन च पुनस्त्रय- इति (ग)। उभयत्रापि त्रय इति पुंस्त्वमार्षं त्रीणीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं भद्रे मद्धर्म्मापराधिनः ।
दोषश्चैव गुणश्चैव यत्त्वया परिपृच्छितम्* ॥ ७ ।
शृणु तत्त्वेन मे भूमि कथ्यमानं मयाऽनघे ।
पुरीषं मुच्यते यस्तु मम कर्म्म समाचरन् ॥ ८ ।
दिव्यवर्षसहस्रन्तु रौरवे नरके वसेत् ।
पुरीषं भक्षयेत्तत्र मम कर्म्मपरायणः ॥ ९ ।
प्रायश्चित्तं वदाम्यत्र येन मुच्येत किल्बिषात् ।
मम कर्म्मपरिभ्रष्टो विह्वलेनान्तरात्मना ॥ १० ।
एकं जलमयीं शय्यामेकमाकाशशायिनीम् ।
एवङ्कृत्वा विधानन्तु सोऽपराधात्प्रमुच्यते ॥ ११ ।
एतत्ते कथितं भद्रे पुरीषं यः समुत्सृजेत् ।
मद्भक्तेषु विशालाक्षि अपराधविनिश्चयः ॥ १२ ।

इति वराहपुराणे मद्धर्म्म-पुरीषोत्सर्ग-प्रायश्चित्तं नाम
त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

चतुस्त्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

मुक्त्वा तु मम कर्म्माणि मम कर्म्मपरायणः ।
प्रायश्चित्तविधिन्देवि यस्तु वाक्यं प्रभाषते ।

---

* परिपृष्टमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मूर्खो भवति सुश्रोणि मम कर्म्मपरायणः॥ १।
प्रायश्चित्तविधिन्देवि येन मुच्येत किल्बिषात्।
आकाशशयनं कृत्वा दिनानि दश पञ्च च।
मुच्यते किल्बिषात्तत्र देवि चैवं न संशयः॥ २।

इति मौनत्यागप्रायश्चित्तम्।

वराह उवाच।

भूषितो नीलवस्त्रेण यो हि मामुपपद्यते।
वर्षाणां हि शतं पञ्च कृमिर्भूत्वा स तिष्ठति॥ ३।
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम्।
प्रायश्चित्तं विशालाक्षि येन मुच्येत किल्बिषात्॥ ४।
व्रतं चान्द्रायणङ्कृत्वा विधिदृष्टेन कर्म्मणा।
मुच्यते किल्बिषाद्भूमे एवमेतन्न संशयः॥ ५।
अविधानेन संस्पृश्य यो हि मामुपसर्पति।
स मूर्खः पापकर्म्मा च मम विप्रियकारकः॥ ६।
तेन दत्तं वरारोहे गन्धमाल्यसुगन्धितम्।
प्रापणञ्च न गृह्णामि स्पृष्टञ्चापि कदाचन॥ ७।
ततो नारायणवचः श्रुत्वा सा संशितव्रता।
उवाच मधुरं वाक्यं धर्म्मकामा वसुन्धरा॥ ८।

धरण्युवाच।

यस्मात्त्वं भाषसे नाथ आचारस्य व्यतिक्रमम्।

---

* अतःपरं (ग) पुस्तके इति नीलवस्त्रप्रायश्चित्तमित्यधिकः पाठो वर्त्तते।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उपस्पृश्य समाचारं रहस्यं वक्तुमर्हसि ॥ ९ ।
केन कर्म्मविधानेन भूत्वा भागवता भुवि ।
उपस्पृश्योपसर्पन्ति तव कर्म्मपरायणाः ॥ १० ।
एतन्मे संशयं* देव परं कौतूहलं हि मे ।
तव भक्तसुखार्थाय निष्कलं वक्तुमर्हसि ॥ ११ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
कथितं मम तत्त्वेन गुह्यमेतत्परं महत् ॥ १२ ।
विमुच्य सर्व्वकर्म्माणि यो हि मामुपसर्पति ।
तस्य वै शृणु सुश्रोणि उपस्पृश्य च या क्रिया ॥ १३ ।
भूत्वा पूर्व्वमुखस्तत्र पादौ प्रक्षाल्य चाम्बुभिः ।
उपस्पृश्य यथान्यायं तिस्रो वै गृह्य मृत्तिकाः ॥ १४ ।
ततः प्रक्षालितं हस्तं जलेन तदनन्तरम् ।
सप्तकोशं ततो गृह्य जलेन क्षालयेत्ततः† ॥ १५ ।
पादमेकैकशस्तद्वत्पञ्च पञ्च ददेत्ततः ।
कोशौ सम्मृज्यतां‡ तत्र यदीच्छेत§ मम प्रियम् ॥ १६ ।
त्रीणि कोशान्पिवेत्तत्र सर्व्वपापविशोधनम्¶ ।
कराभ्यां मुखं मार्ज्येत‖ सर्व्वमिन्द्रियनिग्रहम् ॥ १७ ।

---

* अत्र क्लीवत्वमार्षम्, एष मे संशय इति साधु । † मुखं प्रक्षालयेत्तथेति (ग) ।
‡ संस्पृश्यतां तत्रेति (ग) । § यदीच्छेत मम प्रियमिति (ग) ; तत्र इच्छेदिति साधु ।
¶ सर्व्वकर्म्मविशोधनमिति (ग) । ‖ मुखमित्यत्र छन्दोभङ्ग आर्षः, मार्ज्येतेति आर्षम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राणायामन्ततः कृत्वा मम चिन्तापरायणः।
कर्म्मणा विधिदृष्टेन कुर्य्यात्संसारमोक्षणम् ॥ १८ ।
त्रीणि* वारान् स्पृशेत्तत्र शिरो ब्रह्मणि संस्थितः।
त्रीणि वारान् पुनस्तत्र उभे ते कर्णनासिके॥ १९ ।
स्पृशेत† निष्कलस्तत्र योहि यत्र प्रतिष्ठितः।
विचिपेत्त्रीणि वाराणि‡ सलिलं प्रवरं त्रयम् ॥ २० ।
एवमुक्तस्य कर्त्तव्यं गमाभिगमनेषु च ।
उपस्पृश्य तनुं वामे§ यदीच्छेत प्रियं मम ॥ २१ ।
एवञ्च कुर्व्वतस्तस्य मम कर्म्मव्यवस्थितः।
अपराधं न विन्देत एवं देवि न संशयः ॥ २२ ।
ततो नारायणवचः श्रुत्वा देवी वसुन्धरा।
उवाच मधुरं वाक्यं सर्व्वभागवतां प्रियम् ॥ २३ ।

धरण्युवाच ।

उपस्पृश्य विधानेन यस्तु कर्म्माणि चाप्नुयात्।
तापनं शोधनञ्चैव तद्भवान्वक्तुमर्हसि ॥ २४ ।

वराह उवाच ।

शृणु तत्त्वेन मे भूमि इमं गुह्यमनिन्दिते।
यां गतिञ्च प्रपद्यन्ते मम कर्म्मवहिष्कृताः ॥ २५ ।
व्यभिचारञ्च मे कृत्वा यश्च मामुपसर्पति।
दशवर्षसहस्राणि दशवर्षशतानि च ।

---

* त्रीनिति साधु। एवं परत्रापि। † स्पृशेदिति साधु। स्पृशेत्तदिति (ग)।
‡ त्रीन् वारानिति साधु। § चान्ते इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कृमिर्भूत्वा यथान्यायं तिष्ठते* नात्र संशयः ॥ २६ ।
प्रायश्चित्तं प्रवक्ष्यामि तस्य मूर्खस्य माधवि ।
यच्च कृत्वा महाभागे कृतकृत्यः पुनर्भवेत् ॥ २७ ।
महासान्तपनङ्कृत्वा तप्तकृच्छ्रञ्च निष्कलम् ।
ब्राह्मणः क्षत्रियो वैश्यो मम ये च मते स्थिताः ॥२८।
अनेन विधिना कृत्वा प्रायश्चित्तं यशस्विनि ।
किल्बिषात्तु प्रमुक्तास्ते गच्छन्ति† परमां गतिम् ॥२९।
यस्तु क्रोधसमाविष्टो मम भक्तिपरायणः‡ ।
स्पृशेत मम गात्राणि चित्तङ्कृत्वा चलाचलम् ॥ ३० ।
न चाहं रागमिच्छामि क्रुद्धमेव यशस्विनि ।
इच्छामि च सदा दान्तं शुभं भागवतं शुचिम् ।
पञ्चेन्द्रियसमायुक्तं लाभालाभविवर्ज्जितम् ।
अहङ्कारविनिर्म्मुक्तं कर्म्मण्यभिरतं मम ॥ ३१।३२।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वरानने ।
मां यदा लभते क्रुद्धः शुद्धो भागवतः शुचिः ॥ ३३ ।
चिल्ली जातो वर्षशतं श्येनो वर्षशतं पुनः ।
भेकस्त्रिशतवर्षाणि§ यातुधानः पुनर्दश ॥ ३४ ।
अपुमान् षट् च वर्षाणि¶ रेतोभक्षस्तु जायते ।
अन्धो जायेत सुश्रोणि पञ्च सप्त तथा नव ॥ ३५ ।

---

* ? तिष्ठतीति साधु । † विप्रमुक्तास्तु गच्छेतेति (क), (ख) । ‡ मम कर्म्मपरायण इति (ग) । § मण्डूकी विंशवर्षाणीति (ग) । ¶ षष्टिवर्षाणीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गृध्रो द्वात्रिंशवर्षाणि चक्रवाको दशैव तु* ।
शैवालभक्षिता चैव ह्याकाशगमनन्तथा ॥ ३६ ।
ब्राह्मणो जायते भूमे क्रोधस्य च पथि स्थितः† ।
आत्मकर्म्मापराधेन प्राप्तः संसारसागरे ॥ ३७ ।

धरण्युवाच ।

अहो वै परमं गुह्यं यत्त्वया पूर्व्वभाषितम् ।
जातं मे विह्वलं चित्तं न स्थिरं जायते क्वचित् ॥ ३८ ।
यत्त्वया भाषितं ह्येदं भक्तानाञ्च दुरासदम् ।
श्रुत्वा सुदुस्तरं सारं भीतास्मि परिदेविता ॥ ३९ ।
नाहमाज्ञापयामि त्वां देवदेव जगत्पते ।
मम चैव प्रियार्थाय सर्व्वलोकसुखावहम् ॥ ४० ।
येन मुच्यन्ति‡ संशुद्धा बुधाः कर्म्मपरायणाः ।
अल्पसत्त्वा गतभया लोभमोहसमन्विताः ।
तरन्ति येन दुर्गाणि प्रायश्चित्तञ्च मे वद ॥ ४१ ।
ततः कमलपत्राक्षो वराहः सम्मुखे स्थितः§ ।
सनत्कुमारो मे भक्तो पुनर्नारायणोऽब्रवीत् ॥ ४२ ।
ततो भूम्या वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ।
सनत्कुमारो योगज्ञः प्रत्युवाच वसुन्धराम् ॥ ४३ ।
धन्या चैव सुभाग्या च यत्त्वया परिपृच्छितम् ।
वराहरूपी भगवान् सर्व्वमायाकरण्डकः ॥ ४४ ।

---

* दशैव चेति (ग) । † मण्डूकस्य पथि स्थित इति (ग) । ‡ मुच्यन्ते इति साधु ।
§ अत्र संस्थित इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किं त्वया भाषितो देवि सर्व्वयोगाङ्गयोगवित् ।
देवो नारायणस्तत्र सर्व्वधर्म्मविदां वरः ॥ ४५ ।
कुमारवचनं श्रुत्वा स महीं प्रत्यभाषत ।
शृणु तत्त्वेन मे ब्रह्मन्यन्मया परिपृच्छितम् ।
कार्य्यं क्रियाञ्च योगञ्च आध्यात्मं पार्थिवस्थितम् ॥ ४६ ।
एतन्मे पृच्छ्यते ब्रह्मन्देवो नारायणः प्रभुः ।
ततो मां भाषते ब्रह्मन्विष्णुर्मायाकरण्डकः ॥ ४७ ।
क्रुद्धा भागवता ब्रह्मन्येन शुद्ध्यन्ति किल्विषात् ।
कृत्वा तेन व्रतञ्चैव मम कर्म्मपरायणः ॥ ४८ ।
षष्ठे काले तु भुञ्जीत गृहभिक्षामनिन्दिताम् ।
अष्टौ भिक्षा यथान्यायं शुद्धभागवतां* गृहे ॥ ४९ ।
य एतेन विधानेन ब्रह्मकर्म्माणि कारयेत् ।
मुच्यते किल्विषात्तस्मादेवमाह जनार्द्दनः ॥ ५० ।
यदीच्छसि परां सिद्धिं विष्णुलोकं जनार्द्दनात्† ।
शीघ्रमाराधयेद्विष्णुं द्विजमुख्यो न संशयः ॥ ५१ ।
ततो भूमेर्वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ।
प्रत्युवाच विशालाक्षीं धर्म्मकामो वसुन्धराम् ॥ ५२ ।
अहो गुह्यं रहस्यञ्च यत्त्वया देवि भाषितम् ।
तस्य ये मुखनिष्क्रान्ता धर्म्मास्तान्वक्तुमर्हसि ॥ ५३ ।

धरण्युवाच ।

ततः स पुण्डरीकाक्षः शङ्खचक्रगदाधरः ।

---

* भागवतामिति आर्षं, भागवतानामिति साधु । † द्विजोत्तम इति (क) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराहरूपी भगवान् लोकनाथो जनार्द्दनः ।
उवाच मधुरं वाक्यं मेघदुन्दुभिनिःस्वनः ॥ ५४ ।
भक्तकर्म्मसुखार्थाय गुणवित्तसमन्विताम् ।
अनेनैव विधानेन आचारेण समन्वितः ।
देवि कारयेत* कर्म्म मम लोकाय गच्छति ॥ ५५ ।
क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च ।
मत्पूजनं विधानेन यदीच्छेत्परमां गतिम् ॥ ५६ ।
ये मां देवि यजिष्यन्ति क्रोधन्त्यक्त्वा जितेन्द्रियाः ।
संसारन्ते न गच्छन्ति अपराधविवर्ज्जिताः† ॥ ५७ ।

वराह उवाच ।

अकर्म्मण्येन पुष्पेण यो मामर्च्चयते भुवि ।
पातनन्तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ५८ ।
नाहं तत्प्रतिगृह्णामि न च ते वै मम प्रियाः ।
मूर्खा भागवता देवि मम विप्रियकारिणः ॥ ५९ ।
पतन्ति नरके घोरे रौरवे तदनन्तरम् ।
अज्ञानस्य च दोषेण दुःखान्यनुभवन्ति च ॥ ६० ।
वानरो दश वर्षाणि मार्ज्जारश्च त्रयोदश ।
मूकः पञ्च च वर्षाणि बलीवर्द्दश्च द्वादश ॥ ६१ ।
छागश्चैवाष्टवर्षाणि मासं वै‡ ग्रामकुक्कुटः ।
त्रीणि वर्षाणि महिषो भवत्येव न संशयः ॥ ६२ ।

* कारयेदिति साधु । † अतः परं (ग) पुस्तके इति क्षुद्रप्रायश्चित्तमित्यधिकः पाठो वर्त्तते । ‡ मासौ द्वाविति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं भद्रे पुष्पं यन्मे न रोचते ।
अकर्म्मण्यं विशालाक्षि पुष्पं ये च ददन्ति वै ॥ ६३ ।

धरण्युवाच ।

भगवन्यदि तुष्टोऽसि विशुद्धेनान्तरात्मना ।
येन शुध्यन्ति ते भक्तास्तव कर्म्मपरायणाः ॥ ६४ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मात्वं परिपृच्छसि ।
प्रायश्चित्तं महाभागे येन शुध्यन्ति मानवाः ॥ ६५ ।
एकाहारं ततः कृत्वा मासमेकं वरानने* ।
वीरासनविधींश्चैव कारयेत्सप्त सप्त च ॥ ६६ ।
चतुर्थभक्तमेकेन मासेन घृतपायसम् ।
यावकान्नं† दिनत्रीणि वायुभक्षो दिनत्रयम् ॥ ६७ ।
य एतेन विधानेन देवि कर्म्माणि कारयेत् ।
सर्व्वपापप्रमुक्तश्च मम लोकं स गच्छति ॥ ६८ ।

इति वराहपुराणे अकर्म्मण्यप्रायश्चित्तं नाम
चतुस्त्रिंशदधिकशततमोऽध्यायः ।

---

* वसुन्धरे इति (ग) । † श्यामाकान्नमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पञ्चत्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोक्षणम् ॥ १ ।
रजस्वलासु नारीषु रजो यत्तत्प्रवर्त्तते ।
तेनासौ रजसा पुष्टो कर्म्मदोषेण जानतः* ॥ २ ।
वर्षाणि दश पञ्चैव वसते तत्र निश्चयः ।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥ ३ ।
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम् ।
येन शुध्यन्ति ते भूमि पुरुषाः शास्त्रनिश्चिताः ॥ ४ ।
एकाहारन्ततः कृत्वा दिनानि दश सप्त च ।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः ॥ ५ ।
एवं स मुच्यते भूमि मम विप्रियकारकः ।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह ॥ ६ ।
एतत्ते कथितं भूमि रक्तवस्त्रविभूषिते ।
प्रायश्चित्तं महाभागे सर्व्वसंसारमोक्षणम्† ॥ ७ ।
यस्तु मामन्धकारेषु विना दीपेन सुन्दरि ।
स्पृशतिः‡ च विना शास्त्रं त्वरमाणो विमोहितः ।

---

* जानन्निति साधु । † अत्र (ग) पुस्तके रक्तवस्त्रपरिधानप्रायश्चित्तमित्यधिकः पाठो वर्त्तते । ततः परं वराह उवाच इत्यपि च । ‡ स्पृशतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पतनं तस्य वक्ष्यामि शृणुष्व त्वं वसुन्धरे ।
तेन क्लेशं समासाद्य क्लिश्यते च नराधमः ॥ ८।९ ।
अन्धो भूत्वा महाभागे एकं जन्म तमोमयः ।
सर्व्वाशी सर्व्वभक्षश्च मानवः सोऽभिजायते ।
अनन्यमानसो भूत्वा भूमि ह्येतत्प्रसाधयेत् ॥ १० ।
प्रायश्चित्तम्प्रवक्ष्यामि अन्धकारे तु यः पुरा ।
संस्पृशेत्सोऽपि धर्म्मात्मा येन लोकं मम व्रजेत् ॥ ११ ।
अच्णो*राच्छादनङ्कृत्वा दिनानि दश पञ्च च ।
एकाहारं ततः कृत्वा दिनविंशसमाहितः ॥ १२ ।
यस्य कस्यापि मासस्य एकामेव च द्वादशीम् ।
एकाहारस्ततो भूत्वा निषीदेच्च जलाशनः ॥ १३ ।
ततो यवान्नम्भुञ्जीत गोमूत्रेण तु पाचितम् ।
प्रायश्चित्तेन चैतेन मुच्यते पातकात्ततः† ॥ १४ ।
यः पुनः कृष्णवस्त्रेण मम कर्म्मपरायणः ।
देवि कर्म्माणि कुर्व्वीत तस्य वै पातनं शृणु ॥ १५ ।
घुणो वै पञ्चवर्षाणि लाजवास्तुसमाश्रयः ।
पञ्च वर्षाणि नकुलो दश वर्षाणि कच्छपः ॥ १६ ।
एवं भ्रमति संसारे मम कर्म्मपरायणः ।
पारावतेषु जायेत नव वर्षाणि पञ्च च ॥ १७ ।

---

* अक्ष्णामिति (क), (ख)। † अत्र (ग) पुस्तके अन्धकारप्रायश्चित्तं ततः वराह उवाच इत्यधिकः पाठो वर्त्तते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जातो ममापराधेन स्थितः पारावतो भुवि।
तिष्ठति मम पार्श्वेषु यत्रैवाहं प्रतिष्ठितः॥ १८।
प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोक्षणि।
येनासौ लभते सिद्धिं कृष्णवस्त्रापराधतः॥ १९।
सप्ताहं यावकं भुक्त्वा त्रिरात्रं सक्तुपिण्डिकाम्।
त्रीणि पिण्डांस्त्रिरात्रन्तु एवं मुच्येत किल्बिषात्॥२०।
य एतेन विधानेन देवि कर्म्माणि कारयेत्।
शुचिर्भागवतो भूत्वा मम मार्गानुसारतः*।
न स गच्छति संसारं मम लोकाय गच्छति†॥ २१।
वाससा चाविधौतेन यो मे कर्म्माणि कारयेत्।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः॥ २२।
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे।
पतन्ति येन संसारं वाससोच्छिष्टकारिणः॥ २३।
देवि भूत्वा गजो मत्तस्तिष्ठत्येकं खरो भुवि।
उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं वृकस्तथा॥ २४।
गोमायुरेकं जन्मापि जन्म चैकं हयस्तथा।
सारङ्गस्त्वेकजन्मा वै मृगो भवति वै ततः॥ २५।
सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः।
मद्भक्तश्च गुणज्ञश्च मम कर्म्मपरायणः।

---

* सारग इति (ग)। † अतः परं (ग) पुस्तके इति कृष्णवस्त्रापराधप्रायश्चित्तम्। वराह उवाच इत्यधिकः पाठो वर्त्तते।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

निरपराधी दक्षश्च अहङ्कारविवर्जितः ॥ २६ ॥

धरण्युवाच ।

श्रुतमेतन्मया देव यत्त्वया समुदाहृतम् ।
संसारं वाससोच्छिष्टा येन गच्छन्ति मानुषाः ॥ २७ ।
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्बिषाद्येन मुच्यन्ते तव कर्म्मपरायणाः ॥ २८ ॥

वराह उवाच ।

शृणु तत्त्वेन मे देवि कथ्यमानं मयाऽनघे ।
प्रायश्चित्तम्प्रवक्ष्यामि मम कर्म्मपरायणः ॥ २९ ।
यावकेन दिनं त्रीणि पिण्याकेन दिनत्रयम् ।
पर्णभक्षो दिनत्रीणि पयोभक्षो दिनत्रयम् ॥ ३० ।
पायसेन त्रिरात्रन्तु वायुभक्षो दिनत्रयम् ।
एवङ्कृत्वा महाभागे वाससोच्छिष्टकारिणः ।
अपराधन्न विन्देरन् संसारं न प्रयान्ति च* ॥ ३१ ।
श्वानोच्छिष्टन्तु† यो दद्यान्मम कर्म्मपरायणः ।
पापन्तस्य प्रवक्ष्यामि संसारे च महद्भयम् ॥ ३२ ।
श्वानो वै सप्त जन्मानि गोमायुः सप्त वै तथा ।
उलूकः सप्त वर्षाणि‡ पश्चाज्जायेत मानुषः ॥ ३३ ।
विशुद्धात्मा श्रुतिज्ञश्च मद्भक्तश्चैव जायते ।

---

* (ग) पुस्तके अतः परमधौतवासःप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठो वर्त्तते ।
† श्वानोच्छिष्टमिति आर्षं, शुनोच्छिष्टमिति साधु । ‡ सप्त जन्मानीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गृहे भागवतोत्कृष्टे अपराधविवर्ज्जितः ॥ ३४ ।
शृणु तत्त्वेन वसुधे प्रायश्चित्तं महौजसम्* ।
तरन्ति मानुषा येन त्यक्ता संसारसागरम् ॥ ३५ ।
मूलभक्षो दिनत्रीणि फलाहारो दिनत्रयम् ।
शाकभक्षो दिनत्रीणि पयोभक्षो दिनत्रयम् ॥ ३६ ।
दध्याहारो दिनत्रीणि पायसेन दिनत्रयम् ।
वाय्वाहारो दिनत्रीणि स्नानङ्कृत्वा दृढ़व्रतः ॥ ३७ ।
एवं दिनान्येकविंशत्कृत्वा वै शुभलक्षणम् ।
अपराधं न विन्देत मम लोकाय गच्छति ॥ ३८ ।
भुक्त्वा वराहमांसन्तु यश्च मामिह सर्पति ।
पातनं तस्य वक्ष्यामि यथा भवति सुन्दरि ॥ ३९ ।
वराहो दश वर्षाणि कृत्वानुचरते वने ।
व्याधो भूत्वा महाभागे समाः पञ्च च सप्त च† ॥ ४० ।
ततश्च मूषको भूत्वा वर्षाणि च चतुर्द्दश ।
एकोनविंशतिवर्षाणि‡ यातुधानश्च जायते ॥ ४१ ।
शल्लकी चाष्टवर्षाणि जायते भवने बहु ।
व्याघ्रस्त्रिंशच्च वर्षाणि जायते पिशिताशनः ॥ ४२ ।
एवं संसारिताङ्कृत्वा वराहामिषभक्षकः ।
जायते विपुले सिद्धे कुले भागवते तथा ॥ ४३ ।

---

* मयौजससमिति (ग) । † अतः परं (ग) पुस्तके भूत्वा समाः सप्त सप्त ति[illegible] तत्र पुष्कले इत्यधिकः पाठो वर्त्तते । ‡ अत्रैकाक्षराधिक्याच्छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

हृषीकेशवचः श्रुत्वा सर्व्वं सम्पूर्णलक्षणम् ।
शिरसा चाञ्जलिं कृत्वावाक्यञ्चेदमुवाच ह ॥ ४४ ।
एतन्मे परमं गुह्यं तव भक्तसुखावहम् ।
वराहमांसभक्षस्तु येन मुच्येत किल्बिषात् ॥ ४५ ।
तरन्ति मानुषा येन तिर्य्यक्संसारसागरात् ।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै ॥ ४६ ।
पानीयन्तु ततो भुक्त्वा तिष्ठेत्सप्तदिनं ततः ।
अक्षारलवणं सप्त सक्तुभिश्च तथा त्रयः ॥ ४७ ।
तिलभक्षो दिनान् सप्त पाषाणस्य च भक्षकः ।
पयो भुक्त्वा दिनं सप्त कारयेद्बुद्धिमान्नरः ॥ ४८ ।
क्षान्तं दान्तं तथा कृत्वा अहङ्कारविवर्ज्जितः ।
दिनान्येकोनपञ्चाशच्चरेत्कृतविनिश्चयः ॥ ४९ ।
विमुक्तः सर्व्वपापेभ्यः ससंज्ञो विगतज्वरः ।
कृत्वा मम च कर्म्माणि मम लोकाय गच्छति* ॥ ५० ।
जालपादं भक्षयित्वा यस्तु मामुपसर्पति ।
जालपादस्ततो भूत्वा वर्षाणि दश पञ्च च ॥ ५१ ।
कुम्भीरो दश वर्षाणि पञ्चवर्षाणि शूकरः ।
तावद्भ्रमति संसारे मम चैवापराधतः ॥ ५२ ।
कृत्वा तु दुष्करं कर्म्म जायते विपुले कुले ।

---

* (ग) पुस्तके इति वराहमांसभक्षणप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठो वर्त्तते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शुद्धो भागवतश्रेष्ठो ह्यपराधविवर्ज्जितः ।
सर्व्वकर्म्माण्यतिक्रम्य मम लोकाय गच्छति ॥ ५३ ।
प्रायश्चित्तं प्रवक्ष्यामि जालपादस्य भक्षणे ।
तरन्ति मनुजा येन घोरसंसारसागरात् ॥ ५४ ।
यावकान्नं दिनत्रीणि वायुभक्षी दिनत्रयम् ।
फलभक्षी दिनत्रीणि तिलभक्षी दिनत्रयम् ॥ ५५ ।
अक्षारलवणान्नाशी पुनस्तत्र दिनत्रयम् ।
पञ्चदश दिनान्येवं प्रायश्चित्तं समाचरेत् ॥ ५६ ।
जालपादापराधस्य एवं कुर्व्वीत शोधनम् ।
विनीतात्मा शुचिर्भूत्वा य इच्छेत्सुन्दरां गतिम् ॥ ५७ ।

इति वराहपुराणे जालपादभक्षणापराधप्रायश्चित्तं नाम
पञ्चत्रिंशदधिकशततमोऽध्यायः ।

षट्त्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

दीपं स्पृष्ट्वा तु यो देवि मम कर्म्माणि कारयेत् ।
तस्यापराधाद्वै भूमि* पातं प्राप्नोति मानवः ।
तच्छृणुष्व महाभागे कथ्यमानं मयाऽनघे ॥ १ ।
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुतः ।

---

* तस्यापराधेन भूमे इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चाण्डालस्य गृहे तत्र एवमेतन्न संशयः ॥ २ ।
एवं भुक्त्वा तु तत्कर्म्म मम क्षेत्रे मृतो यदि ।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥ ३ ।
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि ।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥ ४ ।
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥ ५ ।
दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्मपथे स्थितः ॥ ६ ।
एतत्ते कथितं भद्रे स्पर्शने दीपकस्य तु ।
संसारशोधनञ्चैव यत्कृत्वा लभते शुभम्* ॥ ७ ।
श्मशानं यो नरो गत्वा अस्नात्वैव तु मां स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत्फलम् ॥ ८ ।
जम्बूको जायते भूमौ वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्त वर्षाणि जायते खचरेश्वरः ॥ ९ ।
चरन्तौ मानुषं मांसमुभौ† तौ गृध्रजम्बुकौ ।
पिशाचो जायते तत्र वर्षाणि नव पञ्च च ।
ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ॥ १० ।
ततो नारायणाच्छ्रुत्वा धरणी वाक्यमब्रवीत् ।

---

* अतः परं (ख) पुस्तके दीपस्पर्शापराधप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठोऽस्ति ।   † मांसं भूमौ इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन।
परं कौतूहलन्देव निखिलं वक्तुमर्हसि॥ ११।
श्मशानं पुण्डरीकाच्च ईश्वरेण प्रशंसितम्।
किन्त्वत्र त्रिगुणन्देव पवित्रे शिवभाषिते॥ १२।
स तत्र रमते नित्यं भगवांस्तु महामतिः*।
कपालं गृह्य† देवोऽत्र दीप्तिमन्तं महौजसम्॥ १३।
प्रशंसितञ्च रुद्रेण भवता किं विनिन्दितम्।
श्मशानं पद्मपत्राच्च रुद्रस्य च निशि प्रियम्॥ १४।

वराह उवाच।

शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम्।
अद्यापि ते न जानन्ति अनघे शंसितव्रताः॥ १५।
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिं हरिम्।
हत्वा च बालान् वृद्धांश्च त्रिपुरे रूपिणीः स्त्रियः॥
तेन पापेन सम्बद्धो न शक्नोति विचेष्टितुम्।
प्रनष्टमानसैश्वर्य्यो नष्टा माया च योगिनः॥ १६।१७।
विवर्णवदनो भूत्वा तिष्ठते स महेश्वरः।
तत्र स्थाने शिवो भूमि गणैः सर्वैः समावृतः॥ १८।
नष्टमायं ततो देवि चिन्तयामि वसुन्धरे।
ततो ध्यातो मया देवि शङ्करः पुनरेष्यति॥ १९।
यावत्पश्यामि तन्देवं देवि दिव्येन चक्षुषा।

---

* महाद्युतिरिति (ग)। † गृहीत्वेति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नष्टं मायाबलं* रुद्रं सर्व्वभूतमहेश्वरम् ॥ २० ।
ततोऽहं तत्र गत्वा तु यष्टुकामन्त्रियम्बकम् ।
नष्टसंज्ञो हतज्ञानो नष्टयोगबलोऽबलः ॥ २१ ।
तत ईशो मया चोक्तो वाक्यमेवं सुखावहम् ।
किमिदन्तिष्ठसे रुद्र कश्मलेन समावृतः ॥ २२ ।
त्वं कर्त्ता च विकर्त्ता च विकाराकार एव च ।
त्वं वैशाख्यं† वियोगश्च त्वं योनिस्सर्व्वम्परायणम् ॥ २३ ।
त्वमुग्रदेवदेवश्चाद्रिस्त्वं साम त्वं तथा दिशः ।
किन्न बुध्यसि चात्मानं गणैः परिवृतो भवान् ॥ २४ ।
किमिदं देवदेवेश विवर्णः पृथुलोचनः ।
तन्ममाचक्ष्व तत्त्वेन यत्पृष्टोऽसि मया भवान् ॥ २५ ।
स्मर योगञ्च मायाञ्च पश्य विष्णोर्महात्मनः ।
तव चैव प्रियार्थाय येनाहमिह चागतः ॥ २६ ।
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥ २७ ।
शृणु तत्त्वेन मे देव कोऽन्योऽप्येवं करिष्यति ।
देवं नारायणञ्चैकं सर्व्वलोकमहेश्वरम् ॥ २८ ।
हे विष्णो त्वत्प्रसादेन देवत्वञ्चैव माधव ।
लब्धोयोगश्च साङ्ख्यञ्च जातोऽस्मि विगतज्वरः ॥ २९ ।
त्वत्प्रसादेन जातोऽस्मि पूर्णाम्बुरिव सागरः ।

---

* नष्टमायावनमिति (ग)। † त्वं वै सांख्यञ्च योगश्चेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अहन्त्वान्तु विजानामि मान्त्वं जानासि माधव ॥ ३० ।
आवयोरन्तरं कोऽपि न पश्यति जनार्द्दन ।
ब्रह्माणन्तु विजानाति नावयोरन्तरेण हि ।
साधु विष्णो महाभाग सर्व्वमायाकरण्डक ॥ ३१ ।
एवं मह्यं हरौ वाक्यमुक्ता भूतमहेश्वरः ।
मुहूर्त्तं ध्यानमास्थाय पुनः प्रोवाच माधवि ॥ ३२ ।
तव विष्णोः प्रसादेन मया तत्त्रिपुरं हतम् ।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥ ३३ ।
बालवृद्धा हतास्तत्र विस्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण* न शक्नोमि विचेष्टितुम् ॥ ३४ ।
प्रनष्टयोगमायश्च नष्टैश्वर्यश्च माधव ।
किङ्कर्त्तव्यं मया विष्णो पापावस्थेन सम्प्रति ॥ ३५ ।
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै कृतमात्रेण शुद्धो मुच्येय किल्विषात् ॥ ३६ ।
एवं चिन्तात्मनस्तस्य मया रुद्रस्य भाषितम् ।
कपालमालां गृहीत्वा समलं† गच्छ शङ्कर ॥ ३७ ।
ममैवं वचनं श्रुत्वा भगवान्परमेश्वरः ।
उवाच मां पुनर्व्यक्तं मां बोधय जगत्पते ।
कीदृशः समलो विष्णो यत्र गच्छामहे वयम् ॥ ३८ ।
ततस्तस्य वचः श्रुत्वा शङ्करस्य महेश्वरि ।

---

* तस्य पापेन दोषस्येति (ग) । † तं शमनमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्पापशोधनार्थाय मया वाक्यं प्रभाषितम् ॥ ३९ ।
श्मशानं समलं रुद्र पूतिको* व्रणगन्धिकः ।
स्वयं तिष्ठन्ति वै तत्र मनुजा विगतस्पृहाः ॥ ४० ।
तत्र गृह्यां† कपालानि रम तत्रैव शङ्कर ।
तत्र वर्षसहस्राणि दिव्यान्येव दृढ़व्रतः ॥ ४१ ।
ततो भक्षय मांसानि पापक्षयचिकीर्षुकः ।
हतानां चैव मांसानि ये च भोज्यास्तव प्रियाः‡ ॥ ४२ ।
एवं सर्व्वैर्गणैः सार्द्धं वस तत्र सुनिश्चितः ।
पूर्णे वर्षसहस्रे तु स्थित्वा त्वं समले§ पुनः ।
गच्छाश्रमपदं पश्चाद्गौतमस्य महामुनेः ॥ ४३ ।
तत्र ज्ञास्यसि चात्मानं गौतमाश्रमसंस्थितः ।
प्रासादाद्गौतममुनेर्भवता¶ गतकिल्विषः ॥ ४४ ।
सततं पापसम्पन्नं कपालं शिरसि स्थितम् ।
ऋषिः पातयितुं शक्तस्त्वत्प्रसादान्न संशयः ॥ ४५ ।
एवं रुद्रं वरं दत्त्वा तत्रैवान्तर्हितोऽभवम् ।
रुद्रोऽपि भ्रमति‖ तत्र श्मशाने पापसंवृते ॥ ४६ ।
अतो न रोचते भूमे श्मशानं मे कदाचन ।
यत्र रुद्रकृतम्पापं स्थितङ्किल भयावहम् ॥ ४७ ।
एतत्ते कथितम्भद्रे श्मशानं मे जुगुप्सितम् ।

---

* शमनमिति (ग)। † गृहीत्वेति साधु। ‡ अत्र पुंस्त्वमार्षं यानि भोज्यानीति साधु। § शमने इति (ग)। ¶ भूवितेति (ग)। ‖ भ्राम्यति, भ्रमति वा साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विना तु कृतसंस्कारोमम कर्म्मपरायणः।
प्रायश्चित्तम्प्रवच्यामि येन शुध्यति किल्बिषात्॥ ४८।
कृत्वा चतुर्थभक्तन्तु दिनानि दश पञ्च च।
आकाशशयनं कुर्य्यादेकवस्त्रः कुशासने॥ ४९।
प्रभाते पञ्चगव्यञ्च पातव्यं कर्म्मशोधनम्।
विमुक्तः सर्व्वपापेभ्यो मम लोकाय गच्छति*॥ ५०।

पिण्याकं भक्षयित्वा तु यो देवमुपसर्पति।
तस्य वै शृणु सुश्रोणि प्रायश्चित्तं सुशोधनम्॥ ५१।
उलूको दश वर्षाणि कच्छपस्तु समास्त्रयः।
जायते मानवस्तत्र मम कर्म्मपरायणः॥ ५२।
यांस्तु दोषान्प्रपश्यन्ते† संसारेऽस्मिन्वसुन्धरे।
तस्य वच्यामि सुश्रोणि प्रायश्चित्तं महौजसम्॥ ५३।
किल्बिषाद्येन मुच्येत संसारान्तच्च गच्छति।
यावकेन दिनैकन्तु गोमूत्रेण च कारयेत्॥ ५४।
रात्रौ वीरासनं कुर्य्यादाकाशशयने‡ वसेत्।
स न गच्छति संसारं मम लोकाय गच्छति§॥ ५५।

वराहमांसेन तु यो मम कुर्व्वीत प्रापणम्।
मूर्खः स पापकर्म्मा च मम कर्म्मपरायणः।
यांस्तु दोषान्प्रपद्येत संसारञ्च वसुन्धरे॥ ५६।

---

* अतः परं (ग) पुस्तके श्मशानप्रवेशापराधप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठो वर्त्तते। † प्रपश्यन्तीति साधु। ‡ कुर्य्यादाकाशशयने इति (ग)। § अतः परं (ग) पुस्तके पिण्याकभक्षणप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठो वर्त्तते।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यावद्रोम वराहस्य मम गात्रेषु संस्थितम् ।
तावद्वर्षसहस्राणि नरके पच्यते भुवि ॥ ५७ ।
अन्यच्च ते प्रवच्यामि तच्छृणुष्व वसुन्धरे ।
वराहेण तु मांसेन यस्तु कुर्व्वीत प्रापणम् ॥ ५८ ।
यावत्तत्तनुसंस्थन्तु भाजने तु प्रतिष्ठितम् ।
तावत्स पतते* देवि सौकरीं योनिमाश्रितः ॥ ५९ ।
अन्यच्च ते प्रवच्यामि तच्छृणुष्व वसुन्धरे ।
यां गतिं सम्प्रपद्येत मम कर्म्मपरायणः ॥ ६० ।
अन्धो भूत्वा ततो देवि जन्म चैवं प्रतिष्ठितम् ।
एवं गत्वा तु संसारं वराहमांसप्रापणात् ।
जायते विपुले सिद्धे कुले भागवते शुचिः ॥ ६१ ।
विनीतः कृतसंस्कारो मम कर्म्मपरायणः ।
द्रव्यवान् गुणवांश्चैव रूपवान् शीलवान् शुचिः ॥ ६२ ।
प्रायश्चित्तम्प्रवच्यामि तस्य कायविशोधनम् ।
किल्विषाद्येन मुच्येत मम कर्म्मपरायणः ॥ ६३ ।
फलाहारी दिनान्सप्त सप्त मूलाशनस्तथा ।
दिनानि सप्त तिष्ठेत सप्त वै पायसेन च ॥ ६४ ।
तक्रेण सप्त दिवसान् सप्त पावकभोजनः ।
प्रायश्चित्तान्महाभागे मम लोकाय गच्छति† ॥ ६५ ।

---

* पततीति साधु । † (ग) पुस्तकेऽतः परं वराहमांसप्रापणापराधप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठो दृश्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मद्यम्पीत्वा वरारोहे यस्तु मामुपसर्पति ।
तत्र दोषम्प्रवक्ष्यामि शृणु सुन्दरि तत्त्वतः ॥ ६६ ।
दशवर्षसहस्राणि दरिद्रो जायते पुनः ।
ततो भवेत्सुपूतात्मा मद्भक्तः स न संशयः ॥ ६७ ।
यस्तु भागवतोभूत्वा कामरागेण मोहितः ।
दीक्षितः पिवते मद्यम्प्रायश्चित्तं न विद्यते ॥ ६८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
अग्निवर्णां सुरां पीत्वा तेन मुच्येत किल्बिषात् ॥ ६९ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्यति पापेन संसारञ्च न गच्छति* ॥ ७० ।
कौसुम्भञ्चैव यः शाकं भक्षयेन्मम पूजकः ।
नरके पच्यते घोरे दश पञ्च च सूकरः† ॥ ७१ ।
ततोगच्छेच्छ्वयोनौ च त्रीणि वर्षाणि जम्बुकः ।
वर्षमेकं ततः शुध्येन्मत्कर्म्मणि रतः शुचिः‡ ।
मम लोकमवाप्नोति शुद्धोभूत्वा वसुन्धरे ॥ ७२।७३ ।
ततो भूमिर्वचः श्रुत्वा प्रत्युवाच पुनर्हरिम् ।
कुसुम्भशाकनैवेद्यप्रापणेन च किल्बिषात् ।
कथं मुच्येत देवेश प्रायश्चित्तं वद प्रभो ॥ ७४ ।

वराह उवाच ।

यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः ।

---

* (ग) पुस्तकेऽतः परं मद्यपानप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठो दृश्यते ।
† शूकर इति (ग) । ‡ मत्कर्म्मनिरतः शुचिरिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दशवर्षसहस्राणि नरके परिपच्यते ॥ ७५ ।
प्रायश्चित्तम्प्रवक्ष्यामि तच्च मे वदतः शृणु ।
भक्षणे तु कृते कुर्य्याच्चान्द्रायणमतन्द्रितः ।
प्रापणे तु कृते कुर्य्याद्द्वादशाहं पयोव्रतम् ॥ ७६ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्येत पापेन मम लोकञ्च गच्छति* ॥ ७७ ।
यः पारक्येण वस्त्रेण न धूतेन च माधवि ।
प्रायश्चित्तीभवेन्मूर्खो† मम कर्म्मपरायणः ॥ ७८ ।
करोति मम कर्म्माणि स्पृशते‡ मां तदा स्थितः ।
मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च ॥ ७९ ।
हीनपादेन जायेत चैकञ्जन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मद्भक्तश्चैव जायते ॥ ८० ।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥ ८१ ।
अष्टभक्तं ततः कृत्वा मम भक्तिपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥ ८२ ।
तिष्ठेज्जलाशये गत्वा शान्तो दान्तो यतव्रतः ।
अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥ ८३ ।
प्रभातायान्तु शर्व्वर्य्यामुदिते तु दिवाकरे ।

* (ग) पुस्तकेऽतः परं कुसुम्भशाकभक्षणप्रापणयोः प्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः । † प्रायश्चित्ताद्भवेन्मूर्ख इति (ग) । ‡ स्पृशतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पञ्चगव्यं ततः पीत्वा मम कर्म्माणि कारयेत् ॥ ८४ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वपापविनिर्मुक्तो मम लोकाय गच्छति* ॥ ८५ ।
अकृत्वा यो नवान्नानि मम कर्म्मपरायणः ।
ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च ॥ ८६ ।
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कदाचन ।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः ॥ ८७ ।
अन्यच्च ते प्रवक्ष्यामि येन तस्मात्प्रमुच्यते ।
प्रायश्चित्तं महाभागे मम भक्तसुखावहम् ॥ ८८ ।
उपवासं त्रिरात्रन्तु तत एकेन वा पुनः ।
आकाशशयनङ्कृत्वा चतुर्थेऽहनि शुध्यति ॥ ८९ ।
एवं तत्र विधिङ्कृत्वा उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्विषात् ॥ ९० ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति† ॥ ९१ ।
अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कुणपी जायते भूमि यातुधानो न संशयः ॥ ९२ ।
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।

---

* (ग) पुस्तकेऽतः परं परकीयवस्त्रापराधप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः ।

† (ग) पुस्तकेऽतः परं नवान्नभक्षणप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तिष्ठते*ऽत्र महाभागे एवमेतन्न संशयः ॥ ९३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रायश्चित्तम्प्रवक्ष्यामि येन मुच्येत किल्बिषात् ॥ ९४ ।
यस्य कस्यचिन्मासस्य शुक्लपक्षस्य द्वादशीम् ।
उपोष्य चाष्टभक्तन्तु दशैकादशमेव च ॥
प्रभातायान्तु शर्व्वर्य्यामुदिते रविमण्डले ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्यति† किल्बिषात्॥९५॥९६॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
तानि तानि तरन्त्येनं‡ सर्व्वे एव पितामहाः§ ॥ ९७ ।
वहन्नुपानहौ पद्भ्यां यस्तु मामुपचङ्क्रमेत् ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥ ९८ ।
तज्जन्मनः परिभ्रष्टः सूकरो जायते पुनः ।
सूकरत्वाद¶परिभ्रष्टः श्वा भवेच्च जुगुप्सितः ॥ ९९ ।
ततः श्वत्वात्परिभ्रष्टो मानुषेषूपजायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्ज्जितः ।
मुक्तस्तु सर्व्वसंसारान्मम लोकाय गच्छति ॥ १०० ।
य एतेन विधानेन वसुधे कर्म्म कारयेत् ।
न स लिप्येत पापेन एवमेतन्न संशयः‖ ॥ १०१ ।

---

* तिष्ठतीति साधु। † मुच्येत इति साधु। ‡ तरन्त्येवेति (ग)। § अतः परं (ग) पुस्तके गन्धमाल्यदानं विना धूपदाने प्रायश्चित्तम्। वराह-उवाच इत्यधिकः पाठः। ¶ शूकरत्वादिति (ग)। ‖ उपानहापराधप्रायश्चित्तम्। वराह उवाच इति (ग) पुस्तके अधिकः पाठः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरोजायते भूमि एकं जन्म न संशयः ॥ १०२ ।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं मम प्रियम् ।
किल्विषाद्येन मुच्येत भेरीताड़नमोहितः ॥ १०३ ।
यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशी ।
आकाशशयनङ्कृत्वा शीघ्रं मुच्येत किल्विषात् ॥ १०४ ।
य एतेन विधानेन वसुधे कर्म्म कारयेत् ।
अपराधन्न गच्छेत मम लोकाय गच्छति* ॥ १०५ ।
अन्नम्भुक्त्वा बहुतरमजीर्णेन परिप्लुतः ।
उद्गारेण समायुक्तः अस्नात उपसर्पति ॥ १०६ ।
एकजन्मनि श्वा चैव वानरश्चैव जायते ।
एकस्मिञ्जन्मनि च्छागः शृगालश्चैकजन्मनि ॥ १०७ ।
एकजन्म भवेदन्धो मूषिको जायते पुनः ।
तारितो ह्येष संसाराज्जायते विपुले कुले ॥ १०८ ।
शुद्धोभागवतः श्रेष्ठस्त्वपराधविवर्ज्जितः ।
प्रायश्चित्तम्प्रवक्ष्यामि मम भक्तसुखावहम् ॥ १०९ ।
किल्विषाद्येन मुच्येत मम भक्तिपरायणः ।
त्रिदिनं पावकाहारी मूलाहारी दिनत्रयम् ॥ ११० ।
पायसेन दिनत्रीणि त्रिदिनं शक्तुना तथा ।

---

* (ग) पुस्तकेऽतः परं भेरीताड़नापराधप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रिदिनं वायुभक्षोऽपि आकाशशयनस्त्रिकम् ॥ १११ ।
उत्थायापररात्रे तु कृत्वा वै दन्तधावनम् ।
पञ्चगव्यं पिवेच्चैव शरीरपरिशोधनम् ॥ ११२ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्येत पापेन मम लोकाय गच्छति ॥ ११३ ।
आख्यानानां महाख्यानं तपसाञ्च परन्तप: ।
अत्राहङ्कीर्त्तयिष्यामि ब्राह्मणेभ्यो महेश्वरि ॥ ११४ ।
एष धर्म्मश्च कीर्त्तिश्च आचाराणां महौजसाम् ।
गुणानाञ्च परं श्रेष्ठ ऋतीनाञ्च महाऋति:* ॥ ११५ ।
य एतत्पठते नित्यं कल्यमुत्थाय मानव: ।
स पितॄंस्तारयेज्जन्तुर्द्दश पूर्व्वान्दशापरान् ॥ ११६ ।
आरोग्याणां महारोग्यं मङ्गलानान्तु मङ्गलम् ।
रत्नानां परमं रत्नं सर्व्वपापप्रणाशनम् ॥ ११७ ।
यस्तु भागवतो नित्यं पठते च दृढ़व्रत: ।
कृत्वा सर्व्वापराधानि न स पापेन लिप्यते ॥ ११८ ।
एष जप्य: प्रमाणञ्च सन्ध्योपासनमेव च ।
कल्यमुत्थाय पठते मम लोकाय गच्छति ॥ ११९ ।
न पठेन्मूर्खमध्ये तु कुशिष्याणां तथैव च ।
दद्याद्भागवते श्रेष्ठे मम कर्म्मपरायणे ॥ १२० ।

* द्युतीनाञ्च महाद्युतिरिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितो देवि आचारस्य विनिश्चयः ।
पूर्व्वन्त्वया यत्पृष्टन्तु किमन्यच्छ्रोतुमिच्छसि ॥ १२१ ।

इति वराहपुराणे भगवच्छास्त्रे प्रायश्चित्तकर्म्मसूत्रं नाम
षट्त्रिंशदधिकशततमोऽध्यायः ।

सप्तत्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।
श्रुत्वा तु विपुलं ह्येतदपराधविशोधनम् ।
कर्म्म भागवतं श्रेष्ठं सर्व्वभागवतप्रियम् ॥ १ ।
अहो कर्म्म महाश्रेष्ठं भगवंस्तव भाषितम् ।
मम चैव प्रियार्थाय तव भक्तसुखावहम् ॥ २ ।*
श्रुतं ह्येव महाबाहो सर्व्वधर्म्मार्थसाधकम् ।
तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हति ॥ ३ ।
किमुच्यते व्रतञ्चैव शुभं कुब्जाम्रकं† महत् ।
कतरच्चापि तच्छ्रेष्ठं त्वेनभक्तसुखावहम् ॥ ४ ।
वराह उवाच ।
शृणु मे परमं गुह्यं यत्त्वया पृच्छितं‡ मम ।

---

* एष श्लोकः क-खयोः पुस्तकयोर्नास्ति । † कुब्जाम्रकं महदिति (ग) । ‡ पृष्टमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम क्षेत्रं परञ्चैव शुद्धं भागवतप्रियम् ॥ ५ ।
परं कोकामुखं स्थानं तथा कुब्जाम्रकं परम् ।
परं सौकरवं स्थानं सर्व्वसंसारमोक्षणम् ॥ ६ ।
यत्र संस्था च मे देवि ह्युद्धृतासि रसातलात् ।
यत्र भागीरथी गङ्गा मम सौकरवे स्थिता ॥ ७ ।

धरोवाच ।

केषु लोकेषु यान्तीश सौकरे ये मृताः प्रभो ।
किं वा पुण्यं भवेत्तत्र स्नातस्य पिबतस्तथा ॥ ८ ।
कति तीर्थानि पश्चाच्च क्षेत्रे सौकरवे तव* ।
धर्म्मसंस्थापनार्थाय तद्विष्णो वक्तुमर्हसि ॥ ९ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यत्त्वं माम्परिपृच्छसि ।
यां गतिन्ते प्रपद्यन्ते नराः सौकरवे मृताः ॥ १० ।
यत्र स्नातस्य यत्पुण्यं गतस्य च मृतस्य च ।
यत्र यानि च तीर्थानि मम संस्थानसंस्थिताः ॥ ११ ।
शृणु पुण्यं महाभागे मम क्षेत्रेषु सुन्दरि ।
प्राप्नुवन्ति महाभागे गत्वा सौकरवम्प्रति ॥ १२ ।
दश पूर्व्वापराश्चापि अपरे सप्त पञ्च च ।
स्वर्गं गच्छन्ति पुरुषास्तेषां ये तत्र वै मृताः† ॥ १३ ।
गमनादेव सुश्रोणि मुखस्य मम दर्शनात् ।

---

* तथेति (ग) । † मृता इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तजन्मान्तरे भद्रे जायते विपुले कुले ॥ १४ ।
धनधान्यसमृद्धेषु रूपवान् गुणवान् शुचिः ।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः ॥ १५ ।
एवं वै मानुषो भूत्वा अपराधविवर्ज्जितः ।
गमनन्तस्य क्षेत्रस्य मरणं तत्र कारणम् ॥ १६ ।
ये मृतास्तस्य क्षेत्रस्य सौकरस्य प्रभावतः ।
शङ्खचक्रगदापद्मधनुर्हस्ताश्चतुर्भुजाः ।
त्यक्त्वा कलेवरन्तूर्णं श्वेतद्वीपाय यान्ति ते ॥ १७ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थेषु तेषु स्नातश्च यां* प्राप्नोति परां गतिम् ॥ १८ ।
चक्रतीर्थं महाभागे यत्र चक्रं प्रतिष्ठति† ।
शृणु पुण्यं तत्र भद्रे प्राप्नोति परमं नरः ॥ १९ ।
चक्रतीर्थे नरो गत्वा नियतो नियताशनः ।
वैशाखद्वादशीम्प्राप्य स्नायाद्यो विधिपूर्व्वकम् ॥ २० ।
दश वर्षसहस्राणि दश वर्षशतानि च ।
धनधान्यसमृद्धो हि जायते विपुले कुले ॥ २१ ।
मद्भक्तश्चापि जायेत मम कर्म्मपरायणः ।
अपराधं वर्ज्जयति दीक्षितश्चैव जायते ॥ २२ ।
भूत्वा वै मानुषस्तत्र तीर्थे संसारसागरम् ।
तीर्त्वा चक्रगदाशङ्खपद्मपाणिश्चतुर्भुजः ॥ २३ ।

---

* तीर्थेषु स्नातश्च यां प्राप्नोति परमां गतिमिति (क), (ख) पुस्तकयोः पाठस्तत्र च छन्दोदोषः । † प्रतिष्ठितमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम रूपधरः श्रीमान्मम लोके महीयते ।
चक्रतीर्थे विशालाक्षि मरणे कृतकृत्यतः ॥ २४ ।
एतच्छ्रुत्वा वचस्तस्य श्रोतुकामा वसुन्धरा ।
शिरस्यञ्जलिमाधाय श्लक्ष्णमेतदुवाच ह ॥ २५ ।
तत्र सौकरवे तीर्थे चन्द्रमास्त्वामतोषयत् ।
एतदाचक्ष्व तत्त्वेन परं कौतूहलं हि मे ॥ २६ ।
वसुधाया वचः श्रुत्वा विष्णुर्मायाकरण्डकः ।
उवाच वाक्यं मेदिन्याः मेघदुन्दुभिनिःस्वनः ॥ २७ ।
शृणु भूमि प्रयत्नेन कथ्यमानं मयानघे ।
तस्य वै कारणं येन तेन चाराधितोऽस्म्यहम् ॥ २८ ।
तस्य प्रीतोऽस्म्यहं देवि विशुद्धेनान्तरात्मना ।
दर्शितश्च मया ह्यात्मा यो हि देवेषु दुर्लभः ॥ २९ ।
रूपं सोमेन तद्दृष्ट्वा विसंज्ञस्तदनन्तरम् ।
मह्यं* द्रष्टुं न शक्नोति मम तेजःप्रमोहितः ॥ ३० ।
ततो निमीलिताक्षेण कृत्वा शिरसि चाञ्जलिम् ।
न शक्नोति तथा वक्तुं भीरुः सन्त्रस्तलोचनः ॥ ३१ ।
एवमेतद्विचेष्टन्तं† ब्राह्मणानामपीश्वरम् ।
वाणीं सूक्ष्मां समादाय स सोमो नोदितो मया ॥ ३२ ।
किंवा फलं समुद्दिश्य तप्यसे सुमहत्तपः ।
ब्रूहि तत्त्वेन मे सोम यत्ते मनसि वर्त्तते ।

---

* मह्यमित्यत्र मामिति साधु । † विचेष्टन्तमित्यत्र विचेष्टमानमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS.

सर्व्वं सम्पादयिष्यामि त्वत्प्रसादान्न संशयः ॥ ३३ ।
मम वाक्यं ततः श्रुत्वा ग्रहाणां प्रवरेश्वरः ।
उवाच मधुरं वाक्यं सोमतीर्थमवस्थितः ॥ ३४ ।
भगवन्यदि तुष्टोऽसि मम चात्र ततः प्रभो ।
योगनाथोजगच्छ्रेष्ठः सर्व्वयोगीश्वरेश्वरः ॥ ३५ ।
यावल्लोका धरिष्यन्ति तावत्त्वयि जनार्द्दन ।
अतुला त्वयि मे भक्तिर्भवेन्नित्यं सुनिश्चला ॥ ३६ ।
यच्चापि मम तद्रूपं त्वया संस्थापितं प्रभो ।
सप्तद्वीपेषु दृश्येत तत्र तत्रैव संस्थितम् ॥ ३७ ।
सोम इत्येव यज्ञेषु पिबन्तु मम ब्राह्मणाः ।
गतिः परमिका तेषां दिव्या विष्णो भवेद्यथा ॥ ३८ ।
क्षीणस्तव त्वमावस्यां तत्र पिण्डपितृक्रिया ।
प्रवर्त्तन्ते यथान्यायं भवेयं सौम्यदर्शनः ॥ ३९ ।
अधर्म्मे च न मे बुद्धिर्भवेद्विष्णो कदाचन ।
पतित्वञ्चाथ गच्छेयमोषधीनां तथा कुरु ॥ ४० ।
यदि तुष्टो महादेव आदिमध्यान्तवर्ज्जितः ।
मम चैव प्रियार्थाय एतन्मे* दीयतां वरः ॥ ४१ ।
ततः सोमवचः श्रुत्वा तत्रैवान्तर्हितोऽभवम् ॥ ४२ ।
एवं तप्तं महाभागे तपः सोमेन निश्चयात् ।
प्राप्ता च परमा सिद्धिः सोमतीर्थेऽन्यदुर्लभा ॥ ४३ ।

---

* एतदित्यत्र एष इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्नायाद्यः सोमतीर्थे तु मम कर्म्मपरायणः ।
अष्टमेन तु भक्तेन मम कर्म्मविधौ स्थितः ।
फलन्तस्य प्रवच्यामि सोमतीर्थे नरस्य यत् ॥ ४४ ।
यत्र तप्तन्तपस्तेन सोमेन सुमहात्मना ।
पञ्चवर्षसहस्राणि एकपादेन तिष्ठता ।
पञ्चवर्षसहस्राणि तथैवोर्द्ध्वमुखः स्थितः ॥ ४५ ।
एवमुग्रन्तपः कृत्वा कान्तिमानभवच्च सः ।
ममापराधान्मुक्तश्च ब्राह्मणानां पतिस्तथा ॥ ४६ ।
एवमेव महाभागे सोमतीर्थे कृतोदकः ।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
जायते ब्राह्मणः सुभ्रु* वेदवेदाङ्गपारगः ॥ ४७ ।
द्रव्यवान् गुणवांश्चैव संविभागी यशस्विनि ।
मद्भक्तश्चैव जायेत अपराधविवर्ज्जितः ॥ ४८ ।
स एष ब्राह्मणोभूत्वा संसाराद्विप्रमुच्यते ।
तस्य चिह्नं प्रवक्ष्यामि सोमतीर्थस्य सुन्दरि ।
तत्तीर्थं येन विज्ञेयं मम मार्गानुसारिणा ॥ ४९ ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ।
प्रवृत्ते चान्धकारे तु यत्र कश्चिन्न दृश्यते ॥ ५० ।
सोमेन च विना भूमिर्दृश्यते चन्द्रसप्रभा ।
आलोकश्चैव दृश्येत सोमस्तत्र न दृश्यते ॥ ५१ ।

---

* शुभे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS .

एवन्त्वां वच्मि हे भद्रे एष वै विस्मयः परः ।
एतच्चिह्नं महाभागे पुच्छे सौकरवे मम ।
सोमतीर्थे विशालाक्षि येन मुच्यन्ति* जन्तवः ॥ ५२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रभावमस्य क्षेत्रस्य विस्मयम्परमं महत्† ॥ ५३ ।
अकामा तु मृता तीर्थे आत्मनः कर्म्मनिश्चयात् ।
मम क्षेत्रप्रभावेण शृगाली मानुषी भवेत् ॥ ५४ ।
राजपुत्री विशालाक्षी श्यामा सर्व्वाङ्गसुन्दरी ।
गुणवद्रूपसम्पन्ना चतुःषष्टिकलान्विता ॥ ५५ ।
तस्य पूर्व्वेण पार्श्वेन तीर्थं गृध्रवटं‡ स्मृतम् ।
यत्राकामो मृतो गृध्रो मानुषत्वमुपागतः ॥ ५६ ।
वाक्यं नारायणाच्छ्रुत्वा धरणी शुभलक्षणा ।
उवाच मधुरं वाक्यं विष्णुभक्तसुखावहम् ॥ ५७ ।
अहो तीर्थप्रभावो वै त्वया प्रोक्तो महात्मम ।
यस्य देव प्रभावेण तिर्य्यग्योनित्वमागतौ ।
गृध्रश्चैव शृगाली च प्राप्तौ वै मानुषीन्तनुम् ॥ ५८ ।
स्नानेन तत्र तीर्थे च मरणाद्वा जनार्द्दन ।
काङ्गतिं वै प्रपद्यन्ते तन्ममाचक्ष्व केशव ॥ ५९ ।
चिह्नञ्च कीदृशन्तेषां ज्ञायन्ते येन ते तथा ।

---

* मुच्यन्ते इति साधु । † महदिति आर्षं महान्तमिति साधु । ‡ गृध्रवट-मिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अकामावपि तौ चेत्रे प्राप्तौ तु परमां गतिम् ॥ ६० ।
ततोमहीवचः श्रुत्वा विष्णुर्धर्म्मविदां वरः ।
उवाच मधुरं वाक्यन्धर्म्मकामो वसुन्धराम् ॥ ६१ ।
शृणु तत्त्वेन मे भूमे यन्मात्त्वं परिपृच्छसि ।
उभौ तौ* कारणाद्यस्मात्प्राप्तौ वै मानुषीङ्गतिम् ॥ ६२ ।
तस्मिन् काले ह्यतिक्रान्ते मम कर्म्मविनिश्चयात् ।
त्रेतायुगे ह्युपक्रान्ते त्राते च युगसंस्थितौ ॥ ६३ ।
तत्र राजा महाभागः स्वधर्म्मकृतनिश्चयः ।
ब्रह्मदत्तेति† विख्यातः पुरं काम्पिल्लमास्थितः ॥ ६४ ।
तस्य पुत्त्रोमहाभागः सर्व्वधर्म्मेषु निष्ठितः ।
सोमदत्तेति विख्यातः कुमारः शुभलक्षणः ।
पित्रर्थे मृगयां यातोमृगलिप्सुर्वने तदा ॥ ६५ ।
अरण्ये स तदा गत्वा व्याघ्रसिंहनिषेविते ।
न तत्र लभते किञ्चित्पित्रकार्य्ये नराधिपः ॥ ६६ ।
एवं हि भ्रमतस्तस्य‡ शृगाली दक्षिणे तथा ।
अङ्गमध्ये तु विद्धा सा स्फुरन्ती सर्व्वमङ्गला ॥ ६७ ।
तथा सा वाणसन्तप्ता व्यथया च परिप्लुता ।
पीत्वा सा सलिलं तत्र वृक्षं शाकोटकङ्गता ॥ ६८ ।
आतपेन परिक्लान्ता वाणविद्धातुरा भृशम् ।

---

* उभौ तु इति (ग)। † ब्रह्मदत्त इतीति साधु। एवं परत्र सोमदत्त इतीति।
‡ एवं सम्भ्रमतस्तस्येति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अकामा मुञ्चती प्राणांस्तीर्थं सोमात्मकम्प्रति ॥ ६८ ।
एतस्मिन्नन्तरे भद्रे राजपुत्त्रः क्षुधार्द्दितः ।
प्राप्तो गृध्रवटं तीर्थं विश्राममत्र चाकरोत् ॥ ७० ।
अथ पश्यति गृध्रं स वटशाखां समाश्रितम् ।
एकेन स तु वाणेन तथा गृध्रो निपातितः ॥ ७१ ।
स तत्र पतितो गृध्रो वटमूले यशस्विनि ।
गतासुर्नष्टसंज्ञो वै वाणभिन्नस्तथा हृदि ॥ ७२ ।
तं दृष्ट्वा पतितं गृध्रं राजपुत्त्रस्तुतोष ह ।
तस्य च्छित्वा ततः पत्त्रौ गृहीत्वा राजनन्दनः* ।
वाणपत्त्रान्विधातुञ्च सोमदत्तो गृहान्ययौ ॥ ७३ ।
सोऽपि दीर्घेण कालेन अकामोऽपि मृतः खगः ।
जातः कलिङ्गराजस्य सुतो गुणविभूषितः ।
रूपवान् पण्डितश्चैव प्रजानन्दकरः सदा ॥ ७४ ।
तस्मिन्राजनि नायासं कोऽपि कुत्रापि विन्दति ॥ ७५ ।
या सा शृगाली सञ्जज्ञे काञ्चीराज्ञो† गृहे सुता ।
रूपयुक्ता गुणवती दक्षा‡ सर्व्वाङ्गसुन्दरी ॥ ७६ ।
चतुःषष्टिकलायुक्ता कोकिलेव सुखस्वरा ॥ ७७ ।
एवं प्रवर्त्तिते तत्र काञ्चीराज्ये कलिङ्गके ।
हार्द्दिक्यात्सौहृदात्प्रीतिरन्योऽन्यकुलनिश्चयात् ।

---

* राजसत्तम इति (क), (ख) । † कान्तीराज्ञ इति (ग) । एव परत्रापि ।
‡ दृष्टेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भूमे मम प्रसादेन सम्बन्धो जायते ततः ॥ ७८ ।
अथ दीर्घेण कालेन काञ्चीराजसुता तथा ।
कलिङ्गराजपुत्रेण विधिना तु विवाहिता ॥ ७९ ।
काञ्चीराजस्तयोः प्रीत्या नानारत्नानि चाददत् ।
भूषणानि च दिव्यानि गजाश्वमहिषीः स्त्रियः ॥ ८० ।
ततः कलिङ्गराजोऽपि सवधूकं निजं सुतम् ।
आदाय* स्वगृहं यातस्तेन राज्ञातिमानितः ॥ ८१ ।
एवं गच्छति काले वै दम्पत्योस्तुष्यमानयोः† ।
अव्युच्छिन्नाऽभवत्प्रीती रोहिणीचन्द्रयोरिव ॥ ८२ ।
रेमतुस्तौ‡ विहारेषु देवतायतनेषु च ।
वने चोपवने चैव ये केचिन्नन्दनोपमाः§ ॥ ८३ ।
भर्त्तारं सा न पश्येच्चेत्कदाचिदपि पार्श्वतः ।
नष्टं मन्येत चात्मानं राजपुत्री यशस्विनी ॥ ८४ ।
न चेत्पश्यति भार्य्यां स्वां सोऽपि राजन्यनन्दनः ।
आत्मानं मन्यते प्रीत्या नष्टप्रायं वसुन्धरे ॥ ८५ ।
दिने दिने तयोरेवं वर्द्धते प्रीतिरुत्तमा ।
नान्तरं पश्यति¶ कश्चित्पुरुषः पुण्यकर्म्मणोः ॥ ८६ ।
सोऽपि बुद्ध्या सुशीलेन व्रतेन च वसुन्धरे ।
कलिङ्गस्तोषयामास पौराञ्जानपदांस्तथा ॥ ८७ ।

---

* आहूयेति (ग)। † तुष्यतीरिति साधु। ‡ रेमतुरिति आर्षं रेमाते इति साधु। § यत्किञ्चिन्नन्दनोपममिति साधु। ¶ पश्यतीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्तःपुरे तु या नार्य्यः कलिङ्गेषु धरे तयोः।
ताभ्यां सन्तोषिताः सर्व्वाः शीलेन स्वगुणैस्तथा॥ ८८।
एवम्प्रवर्द्धिता ताभ्यां प्रीतिः पूर्व्वं यशस्विनि।
रमते तत्र चान्योऽन्यं शचीवासवयोरिव॥ ८९।
अथ प्रणयपूर्व्वं सा कान्तं सर्व्वाङ्गसुन्दरी।
व्यजिज्ञपद्राजसुतं सौहृदेन यशस्विनी॥ ९०।
किञ्चिदिच्छामि ते वक्तुं राजपुत्र यशोधन।
मम स्नेहात्प्रियञ्चैव तद्भवान्वक्तुमर्हति॥ ९१।
ततो भार्य्यावचः श्रुत्वा कलिङ्गस्य सुतः प्रभुः।
उवाच मधुरं वाक्यं पद्मपत्रनिभेक्षणः॥ ९२।
यद्वदिष्यसि भद्रे त्वं यच्च तेऽस्ति मनीषितम्।
सर्व्वन्ते कथयिष्यामि शपे सत्येन सुन्दरि॥ ९३।
सत्यं मूलं ब्राह्मणानां विष्णुः सत्ये प्रतिष्ठितः।
तस्य मूलं तपो राज्ञि राज्यं सत्ये प्रतिष्ठितम्॥ ९४।
नाहं मिथ्या प्रवक्ष्यामि कदाचिदपि सुन्दरि।
न मिथ्या पूर्व्वमुक्तं मे ब्रूहि किङ्करवाणि ते॥ ९५।
हस्त्यश्वरथरत्नानि यानानि च धनानि च।
अथवा परमशस्त्रन्तु पट्टबन्धङ्करोमि ते॥ ९६।
सा भर्त्तृवचनं श्रुत्वा काञ्चीराजस्य चात्मजा।
उभौ चरणौ संगृह्य भर्त्तारमिदमब्रवीत्॥ ९७।
न चैव रत्नानीच्छामि हस्त्यश्वरथमेव च।
पट्टबन्धेन कार्य्यञ्च यावद्म्रियति मे गुरुः॥ ९८।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शंका स्वपितुमिच्छामि मध्याह्ने तु तथाविधे ।
न चिरं वाल्यकालन्तु यथा कश्चिन्न पश्यति ॥ ९९ ।
श्वशुरो यदि वा श्वश्रूर्यथैवान्यो नराधिप ।
सुप्ता नैव च द्रष्टव्या व्रतमेतन्मुहूर्त्तकम् ॥ १०० ।
आत्मनो वै गृहजना ये केचित्स्वजने जनाः ।
ते मां प्रसुप्तां पश्येयुः कदाचिदपि संस्थिताम् ॥ १०१ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गैश्वर्य्यवर्द्धनः ।
वाढ़मित्येव तां वाक्यं प्रत्युवाच वसुन्धरे ॥ १०२ ।
विस्रब्धा भव सुश्रोणि कल्याणिन यशस्विनि ।
न त्वां वै द्रक्ष्यते कश्चिच्छयनीये महाव्रताम्* ॥ १०३ ।
एवं गच्छति काले तु तयोस्तु तदनन्तरे ।
कलिङ्गो जरया युक्तो पुत्रं राज्येऽभ्यषेचयत् ॥ १०४ ।
राज्यं दत्त्वा वरारोहे यथान्यायं कुलोद्भवम् ।
कृत्वा निष्कण्टकं राज्यं दत्त्वा पञ्चत्वमागतः ॥ १०५ ।
एवम्प्रभुस्ततोराज्यं पितुर्द्दत्तं यथोचितम्† ।
एकाकी स्वपते तत्र यत्र कश्चिन्न पश्यति ॥ १०६ ।
स तु दीर्घेण कालेन कलिङ्गवंशवर्द्धनः ।
सुतानजनयत्पञ्च आदित्यसमतेजसः ॥ १०७ ।
एवन्तु मानुषं लोकं मम मायाप्रमोहितम् ।
आत्मकर्म्मसु संयुक्तं चक्रवत्परिवर्त्तते ॥ १०८ ।

---

* शयनीयमहाव्रतामिति (क), (ख) । † यशोऽर्च्चितमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जातो जन्तुर्भवेद्बालो बालोस्तु तरुणो भवेत् ।
तरुणो मध्यमं याति पश्चाद्याति जरान्ततः ॥ १०९ ।
बालो वै यानि कर्म्माणि करोत्यज्ञानतः स्वयम् ।
न स लिप्यति* पापेन एवमेतन्न संशयः ॥ ११० ।
ततः करिष्यतीराज्यन्निष्कण्टकमनामयम् ।
सप्तसप्ततिवर्षाणि ह्यतीतानि यशस्विनि ॥ १११ ।
अष्टसप्ततिमे वर्षे एकान्ते तु नराधिपः ।
तमेव चिन्तयन्नर्थं मध्यसंस्थे दिवाकरे ॥ ११२ ।
माधवस्य तु मासस्य शुक्लपक्षे तु द्वादशी ।
बुद्धिः सम्पद्यते तस्य प्रियादर्शनलालसा ॥ ११३ ।
कोऽर्थस्तत्किं† व्रतञ्चास्या एषा स्वपिति निर्जने ।
न सुप्ताया‡ व्रतं किञ्चिद्दृश्यते धर्म्मसञ्चयः ॥ ११४ ।
न च विष्णुकृतं कर्म्म न चैवेश्वरचोदितम् ।
मनुना वै कृतोधर्म्म एष चैव न दृश्यते ॥ ११५ ।
न काप्यपकृतो§ धर्म्मो महानपि न योगिनाम् ।
न तत्र एष विद्येत यश्चरेद्व्रतमीदृशम् ॥ ११६ ।
वार्हस्पत्येषु धर्म्मेषु याम्येषु च न विद्यते ।
न एष विद्यते तत्र सुप्ता चरति यद्व्रतम् ॥ ११७ ।
भुक्ता तु कामभोगानि भुक्ता तु पिशितोदनम्¶ ।

---

* लिप्यते इति साधु । † कोऽर्थस्तच्चिन्तितचास्या इति (क), (ख) । ‡ सुप्ताया-मिति (ग) । § न काश्यपकृत इति बहुषु पाठः । ¶ आशितोदनमिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ताम्बूलं रक्तवस्त्रन्तु सुसूक्ष्मे पट्टवाससी ॥ ११८ ।
सुगन्धैर्भूषिता गात्रे सर्व्वरत्नसमायुता ।
मम कान्ता विशालाक्षी किमत्र चरते व्रतम् ॥ ११९ ॥
कुप्येतापि तु सन्तुष्टा प्रिया मे कमलेक्षणा ।
अवश्यमेव द्रष्टव्या चरति कीदृशं व्रतम् ॥ १२० ।
किन्नरैः सुप्रलक्ष्येत वशीकरणमुत्तमम् ।
अथ योगीश्वरी भूत्वा गच्छते यत्र रोचते ।
अथवा चान्यसंसृष्टा कामरोगेण चावृता* ॥ १२१ ।
एवञ्चिन्तयतस्तस्य अस्तं प्राप्तो दिवाकरः ।
संवृत्ता रजनी सुभ्रूः सर्व्वसार्थसुखावहा ॥ १२२ ।
ततो रात्र्यां व्यतीतायां प्रभातसमये शुभे ।
पठन्ति मागधा वन्दिसूता वैतालिकास्तथा ॥ १२३ ।
शङ्खदुन्दुभिनादैश्च बोधितो वसुधाधिपः ।
सर्व्वलोकहितार्थाय उदिते च दिवाकरे ॥ १२४ ।
यत्तदा चिन्तितं पूर्व्वं द्रष्टुकामेन तां प्रियाम् ।
सर्व्वचिन्तां परित्यज्य सा चिन्ता हृदि वर्त्तते ॥ १२५ ।
स्नातस्तु विधिना सोऽथ क्षौमाभ्यामुपसंवृतः ।
भूत्वा चोत्सारयामास आज्ञां दत्त्वा यथोचितम् ॥ १२६ ।
व्रतस्थं मान्तु यः स्पृशेन्नारी पुरुष एव च ।
धर्म्मयुक्तेन दण्डेन मम वध्यो भवेत्तु सः ॥ १२७ ।

---

* एष श्लोकः (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवमाज्ञापयित्वा तु कालिङ्गो नृपतिः किल ।
गतश्च त्वरया धीमान्प्रविष्टस्तत्र सुव्रते ॥ १२८ ।
पर्य्यङ्कस्य तले तत्र राजा दर्शनलालसः ।
विलोक्य तां वरारोहान्ततश्चिन्तापरायणाम् ॥ १२९ ।
ततः कमलपत्राक्षी वेदनायासपीड़िता ।
रुजार्त्ता रुरुदे तत्र शिरोवेदनताड़िता ॥ १३० ।
किम्मया तु कृतं कर्म्म पूर्व्वमेव सुदुष्करम् ।
येनाहमीदृशीं प्राप्ता दशां पुण्यपरिक्षयात् ।
भर्त्ता च मां न जानाति क्लिश्यमानामनाथवत् ॥ १३१ ।
अथ माङ्किं कथं भर्त्ता मन्यते स्वजनोऽपि वा ।
कथये किं शयाना तु सखीनां शयने स्थिता ॥ १३२ ।
एवमत्र न युज्येत यन्मया परिचिन्तितम् ।
किञ्च वात्मनि दुःखस्य सर्व्वमेतच्च* युज्यते ॥ १३३ ।
किञ्च मां वक्ष्यते भर्त्ता किञ्च मामितरे जनाः ।
अन्यायेन व्रतञ्चीर्णं सर्व्वतो विकृतं भवेत् ॥ १३४ ।
कदाचिदपि काले तु गच्छेत्सौकरवम्प्रति ।
ततो ब्रूयामिदं वाक्यं यन्मे हृद्यवतिष्ठते ॥ १३५ ।
ततः प्रियावचः श्रुत्वा समुत्थाय ततो नृपः ।
दोर्भ्यामालिङ्ग्य वै भार्य्यां वाक्यमेतदुवाच ह ॥ १३६ ।
किमिदं भाषसे† भद्रे आत्मानं न प्रशंससि ।

---

* सर्व्वमेतन्न युज्यते इति (क), (ख) । † किमिदं निन्दसे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अशीच्या शोचती या तु यच्च निन्दसि चात्मनि ॥ १३७ ।
भिषजः किं न विद्यन्ते अष्टकर्म्मसमाहिताः ।
ये तु संस्थापयेयुस्ते शिरसोवेदनां पराम् ॥ १३८ ।
त्वया पूर्व्वं व्रतमिषाद्वेदना यदि गोपिता* ।
येन वै क्लिश्यसे† भद्रे शिरस्यसुखपीड़िता ॥ १३९ ।
वायुना कफपित्तेन शोणितेन कफेन वा ।
सन्निपातस्य दोषेण येनेदम्पीड्यते शिरः ॥ १४० ।
काले विकाले कृत्वा वै पित्तोद्रेकं यशस्विनि ।
अश्नासि पिशितं चान्नन्तेनेदं दूष्यते शिरः ॥ १४१ ।
क्रियतेऽत्र शिराविधो रुधिरस्रावं एव च ।
दीयते चेच्छिरोऽभ्यङ्गः कथं तिष्ठति वेदना ॥ १४२ ।
किमेतद्गोपितं भद्रे मयि तन्न निवेदितम् ।
त्वया व्रतमिषेणायमात्मा संक्लिश्यते वृथा ॥ १४३ ।
या त्वं वै भाषसे वाक्यं सौकरे गमनं प्रति ।
तत्र गोप्यं किमस्तीति येन ते परिवेदना ॥ १४४ ।
ततः कमलपत्राक्षी सव्रीड़ा दुःखपीड़िता ।
भर्त्तुर्गृहीत्वा चरणौ सा पतिं प्रत्यभाषत ॥ १४५ ।
प्रसीद मे महाराज नेदं प्रष्टुन्त्वमर्हसि ।
मम पूर्व्वकथां वीर दुष्टकर्मानुसारिणीम् ॥ १४६ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ।

---

* परिगोपितेति (ग) । † क्लिश्यसीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उवाच मधुरं वाक्यं वहितेनान्तरात्मना* ॥ १४७ ।
किमिदं गोप्यते देवि ममाग्रे वरवर्णिनि ।
तथ्यमेव महाभागे पृच्छ्यमाना यशस्विनि ॥ १४८ ।
ततो भर्त्तृवचः श्रुत्वा विस्मयोत्फुल्ललोचना ।
उवाच मधुरं वाक्यं कलिङ्गानां महाधिपम् ॥ १४९ ।
भर्त्ता धर्म्मो यशो भर्त्ता भर्त्तैव प्रियमात्मनः ।
अवश्यमेव तद्वाच्यं यन्मां त्वं परिपृच्छसि ॥ १५० ।
तथापि नोत्सहे वक्तुं हृदि यत्परिवर्त्तते ।
तव पीड़ाकरमिति तन्मान्न प्रष्टुमर्हसि ॥ १५१ ।
एतद्दुःखं महाभाग हृदि मे परिवर्त्तते ।
सुखे हि वर्त्तसे नित्यं महाराजोऽसि सुन्दरः ॥ १५२ ।
बह्व्यो मत्सदृशा भार्य्यास्तिष्ठन्त्यन्तःपुरे तव ।
अश्नासि पिशितान्नञ्च प्रावारान् भूषणानि च ॥ १५३ ।
आच्छादयसि यानैश्च हस्त्यश्वरथपृष्ठगः ।
गच्छस्यनारतं राजन् किं स्थितञ्च मया विना ॥ १५४ ।
आज्ञा च तेऽप्रतिहता गन्धान् भोगांश्च सर्व्वशः ।
विभर्षि स्वेच्छया राजन्न मां संप्रष्टुमर्हसि ॥ १५५ ।
त्वं मे देवो गुरुः साक्षाद्भर्त्ता यज्ञः सनातनः ।
धर्म्मश्चार्थश्च कामश्च यशः स्वर्गश्च† मानद ॥ १५६ ।

---

* वहितेन अवहितेन। विहितेनान्तरात्मना इति (ग)। † यशैश्वर्य्यश्च मानसमिति (ग), यश ऐश्वर्य्यमिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पृष्टया मे सदा वाच्यं सर्व्वं सत्यं प्रियं तव।
पतिव्रतानां सर्व्वासामेष धर्म्मः सनातनः॥ १५७।
न संशये नियोक्तव्यः सुखस्थोहि पतिः स्त्रिया।
एतन्निश्चित्य मे पीड़ां न प्रष्टुन्त्वमिहार्हसि॥ १५८।
ततो भार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः।
उवाच मधुरं वाक्यं भार्य्यापीड़ाभिपीड़ितः॥ १५९।
शृणु तत्त्वेन मे भद्रे शुभं वा यदि वाशुभम्।
अवश्यमेव वक्तव्यं पृष्टया पतिना ध्रुवम्॥ १६०।
यानि गुह्यान्यगुह्यानि स्त्रियो धर्म्मपथे स्थिताः।
भर्त्तारञ्च समासाद्य रहस्तां गोपयन्ति न॥ १६१।
कृत्वा सुदुष्करं कर्म्म रागलोभप्रमोहिता।
या सुगोपायते गुह्यं सती सा नोच्यते बुधैः॥ १६२।
एवं चिन्त्य* महाभागे ब्रूहि सत्यं यशस्विनि।
अधर्म्मस्ते न भविता गुह्यार्थकथने मम॥ १६३।
ततो भर्त्तृवचः श्रुत्वा सा देवी परमप्रिया।
प्रत्युवाच प्रियं वाक्यं राजानं धर्म्मवादिनम्॥ १६४।
देवोराजा गुरूराजा सोमोराजेति पठ्यते†।
अवश्यमेव वक्तव्यमेष धर्म्मः सनातनः॥ १६५।
यदि गुह्यं न मे कार्य्यं‡ श्रूयतां राजसत्तम।
अभिषिञ्चस्व§ राज्ये स्वे ज्येष्ठं पुत्रं कुलोचितम्।

---

* चिन्त्येति आर्षं चिन्तयित्वेति साधु। † मन्यते इति (ग)। ‡ वाक्यमिति (ग)।
§ अभिषिञ्चेति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एहि नाथ मया सार्द्धं चैत्रं सौकरवम्प्रति ॥ १६६ ।
ततोभार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ।
बाढ़मित्येव वाक्येन छन्दयामास तां प्रियाम् ॥ १६७ ।
दास्यामि राज्यं पुत्राय वचनात्तव सुन्दरि ।
यथा पूर्व्वं मया लब्धं स्वपितुर्यद्यथाक्रमम् ॥ १६८ ।
इत्युक्ता तौ महाभागौ युक्तश्चैव परस्परम् ।
राजा च राजपुत्री च निष्क्रान्तौ तद्गृहात्ततः ॥ १६९ ।
ततः कञ्चुकिनं दृष्ट्वा प्रोवाचोच्चस्वरेण च ।
अपसारय सर्व्वं वै जनमावृत्य तिष्ठति ।
ज्ञानकौतूहलोयोऽत्र शीघ्रं गच्छत्विती वहिः ॥ १७० ।
ततोहलहलाशब्दः प्रवृत्तोऽन्तःपुरे महान् ।
किमिदं कारणं वृत्तं येन चोत्सारिता वयम्* ॥ १७१ ।
नात्रास्ति चिन्तालोलानामागतानां स्वकार्य्यतः ।
अश्रोतव्यं भवेन्नूनं येन चोत्सारिता वयम् ॥ १७२ ।
ततोभोज्यान्नपानानि भुक्त्वा रुच्या नृपः प्रियान् ।
समं महिष्या चाचम्य चणं विश्रम्य पार्थिवः ।
अमात्यानानयामास ह्यभिषेक्तुं निजं सुतम् ॥ १७३ ।
सम्प्राप्तान् सचिवांस्तत्र राजा वचनमब्रवीत् ।
संस्क्रियतां राजधानी मङ्गलाचारपूर्व्वकम् ॥ १७४ ।
वृद्धामात्यमुपास्याथ कलिङ्गो धर्म्मसंहितम् ।

* एष श्लोकः (ग) पुस्तके अत्र नास्ति, १७२ श्लोकादनन्तरमस्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नीतिशास्त्रार्थतत्त्वज्ञमुवाचाविक्लवं वचः ॥ १७५ ।
कल्यमिच्छाम्यहं तात पुत्रं राज्येऽभिषेचितुम्* ।
शीघ्रं सज्जं प्रकुर्व्वन्तु आभिषेचनिकं विधिम् ॥ १७६ ।
भूतमित्येव तम्प्राहुः सचिवास्तं नराधिपम्† ।
अस्माकमपि तच्चैव रोचते यत्प्रभाषसे ॥ १७७ ।
पुत्रस्ते राजशार्दूल सर्व्वलोकहिते रतः ।
प्रजानुरागवान्शूरो नीतिज्ञस्तु विचारकः ।
मनीषितं तव विभो सम्यङ्गौमनसः प्रियम् ॥ १७८ ।
एवमुक्त्वा गतामात्याः‡ सूर्य्यश्वास्तमुपागतः ।
सुखेन सा गता रात्रिर्गीतगान्धर्व्ववादितैः ॥ १७९ ।
बोधितः स च राजा तु सूतमागधवन्दिभिः ।
वैतालिकैश्च सुश्रोणि सर्व्वमङ्गलपाठकैः ॥ १८० ।
प्रभातायान्तु शर्व्वर्य्यामुदिते च दिवाकरे ।
मुहूर्त्ते शुभमासाद्य ह्यभिषिक्तः सुतः शुचिः ॥ १८१ ।
एवन्दत्त्वा तदा राज्यं मूर्द्ध्नि चाघ्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वरः ॥ १८२ ।
राज्यस्थेनापि ते पुत्र कर्त्तव्यं शृणु तन्मम ।
यदीच्छेः परमं§ धर्म्मं पितॄणां तारणं तथा ॥ १८३ ।
दातव्यं न च हन्तव्यं हन्तव्याः पारदारिकाः ।

---

* अभिषेक्तुमिति साधु । † अत्र तमित्यस्य पुनरुक्तिरस्ति, सचिवास्ते इति कृते न कोऽपि दोषः स्यात् । ‡ गता अमात्या इति साधु । § यदिच्छेत्परममिति बहुषु पाठः । तत्र प्रथमपुरुषप्रयोग आर्षः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust ; Delhi and eGangotri Funding : IKS

बालघाताश्च हन्तव्याः हन्तव्याः स्त्रीविघातकाः ॥ १८४ ।
न लोभः परभार्य्यासु ब्राह्मणीषु विशेषतः ।
सुरूपां परनारीन्तु दृष्ट्वा चक्षुर्निमीलयेः* ॥ १८५ ।
मा लोभः परद्रव्येषु अन्यायोपार्ज्जितेषु च† ।
न चिरं तिष्ठसि क्वापि कथञ्चन न पश्यसि‡ ॥ १८६ ।
रक्षणीयश्च ते देशः कुशलन्यायसज्जितः ।
नित्योद्युक्तेन स्थातव्यममात्यवचनङ्कुरु ॥ १८७ ।
अमात्यो यद्वचो ब्रूयात्तस्य कार्य्यं विमर्शनम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥ १८८ ।
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।
एवं ते पुत्र कर्त्तव्यं मम प्रियहितैषुणा ॥ १८९ ।
सप्तव्यसनवर्गोऽत्र§ दोषो राज्ञां महान् भवेत् ।
अर्थदूषणकञ्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूया यमिच्छेराजकर्म्मणि¶ ॥ १९० ।
नाहं निवारणीयस्ते गमनाय पथे स्थितः ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥ १९१ ।
ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनि ।
पितुः पादौ तु संगृह्य करुणम्प्रत्युवाच तम् ॥ १९२ ।

---

* एष श्लोकः (ग)पुस्तके नास्ति । † न लोभः परद्रव्येषु नोऽन्यायोपार्ज्जितेषु चेति (ग) । ‡ सर्व्वें वानाः कथञ्चनेति (ग) । § सप्तव्यसनर्गोत्रस्येति (ग) । ¶ अमात्येनाप्रियं ब्रूयाद्यमिच्छेद्राजकर्म्मणीति (ग), अत्रापि प्रथमपुरुषक्रियाप्रयोग आर्षः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम किं तात राज्येन कोशेन च बलेन च।
यस्त्वया रहितस्तात न शक्नोमि विचेष्टितुम् ॥ १९३ ।
अभिषिक्तं राजशब्दं मम संज्ञापितन्त्वया ।
एतन्न बहुमन्येऽहं विना तात त्वया ह्यहम् ॥ १९४ ।
क्रीड़ामेवाऽत्र जानामि येन क्रीड़न्ति बालकाः ।
राज्यचिन्तां न जानामि राजानो यान्तु कुर्व्वते* ॥१९५।
ततः पुत्रवचः† श्रुत्वा कलिङ्गानां महीपतिः ।
उवाच मधुरं वाक्यं सामपूर्व्वं यशस्विनि ॥ १९६ ।
यच्चेदं भाषसे पुत्र नाहं जानामि तद्वचः ।
पुत्र शिक्षापयिष्यन्ति पौरजानपदास्तव ॥ १९७ ।
एवं सन्दिश्य तं तत्र स राजा धर्म्मशास्त्रतः ।
गमनाय मतिञ्चक्रे चेत्रं सौकरवम्प्रति ॥ १९८ ।
तम्प्रयान्तं ततोदृष्ट्वा पौरजानपदास्तदा ।
सकलत्रसुताः सर्व्वेऽप्यनुयान्ति नराधिपम् ॥ १९९ ।
हस्त्यश्वरथयानानि स्त्रियश्चान्तःपुरस्थिताः ।
संहृष्टमनसः सर्व्वे अनुयान्ति नराधिपम्‡ ॥ २०० ।
अथ दीर्घेण कालेन प्राप्ता सौकरवम्प्रति ।
धनधान्यसमृद्ध्यादि प्रददौ तत्र माधवि ॥ २०१ ।
एवं गच्छति काले तु तयोस्तत्र वसुन्धरे ।

---

* येन कुर्व्वते इति (ग)। † तत्तु पुत्रवच इति (ग)। ‡ (ग) पुस्तके एष श्लोकः परश्लोकस्य च पूर्व्वार्द्धं न स्तः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रवर्त्तमानयोर्नित्यं धर्म्मे कर्म्मणि शुद्धयोः ॥ २०२ ।
ततः स पद्मपत्राक्षः कलिङ्गानां जनाधिपः ।
उवाच मधुरं वाक्यं काश्चीराजसुतां तदा ॥ २०३ ।
पूर्णं वर्षसहस्रं वै जीवितं मम सुन्दरि ।
ब्रूहि तत्परमं गुह्यं यन्मया पूर्व्वंपृच्छितम्* ॥ २०४ ।
ततो भर्त्तुर्वचः श्रुत्वा प्रहस्य रुचिरेक्षणा ।
उभौ तौ चरणौ गृह्य† राजानं वाक्यमब्रवीत् ॥ २०५ ।
एवमेतन्महाभाग यन्मात्वं परिपृच्छसि ।
उपोष्य तु त्रिरात्रन्त्वं पश्चाच्छ्रोष्यसि मानद ॥ २०६ ।
बाढ़मित्येव तां राजा प्रत्युवाच यशस्विनि ।
पद्मपत्रविशालाक्षि पूर्णचन्द्रनिभानने ।
यथा वदसि सुश्रोणि तथैव मम रोचते ॥ २०७ ।
दन्तकाष्ठं समादाय द्वादशाङ्गुलमायतम् ।
स्नात्वा सङ्कल्पयामास त्रिरात्रं नियमान्वितः ॥ २०८ ।
उपोष्य तौ‡ त्रिरात्रन्तु विधिना नियमान्वितौ ।
ततः स्नातौ शुची क्षौमे परिधाय तु वाससी ।
प्रणम्य भूषितौ विष्णुं दम्पती तदनन्तरम् ॥ २०९ ।
ततः सा सुन्दरी भूषां समुत्तार्य्य शुभेक्षणा ।
मह्यं निवेदयामास प्रोवाच च जनेश्वरम्§ ।

---

* पृष्टमिति साधु । † गृहीत्वेति साधु, एवं परत्र । ‡ उपोष्य तु इति (ग) ।
§ जनेश्वरीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एह्येहि नाथ गच्छावः पश्य गोप्यं मनीषितम्* ॥ २१० ।
ततो हस्ते पतिं गृह्य उद्वाहे इव सुन्दरी ।
उवाच मधुरं वाक्यं कलिङ्गाधिपतिं तथा ॥ २११ ।
शृगाली पूर्व्वमेवाहं तिर्य्यग्योनिव्यवस्थिता ।
विद्वास्मि सोमदत्तेन वाणेन मृगलिप्सुना ॥ २१२ ।
एतं शिरसि मे राजन् पश्य वाणं सुसंस्कृतम् ।
यस्य दोषेण मेऽप्येष रुजा शिरसि संस्थिता ॥ २१३ ।
काञ्चीराजकुले जन्म पित्रा दत्ता तव प्रिया ।
क्षेत्रप्रभावान्मे सैषा† जाता सिद्धिर्नमोऽस्तु ते ॥ २१४ ।
स ततः पद्मपत्राक्षः कलिङ्गानां जनाधिपः ।
श्रुत्वा राजा प्रियां वाक्यं प्रत्युवाच स्मृतिङ्गतः ॥ २१५ ।
अहं गृध्रो महाभागे तेनैव वनचारिणा ।
सोमदत्तेन वाणेन एकेनैव निपातितः ॥ २१६ ।
ततोजातोऽस्म्यहं भद्रे कलिङ्गानां जनाधिपः ।
जातोऽस्मि परमा व्युष्टिः प्राप्तं राज्यं मया महत्॥ २१७ ।
सिद्धिर्लब्धा‡ वरारोहे मया सर्व्वाङ्गसुन्दरि ।
अकामपतितेनापि पश्य क्षेत्रस्य वै फलम् ॥ २१८ ।
ये च भागवतश्रेष्ठा ये च नारायणप्रियाः ।
पौरजानपदाः सर्व्वे श्रुत्वा तु तदनन्तरम् ।
लाभालाभौ परित्यज्य सर्व्वकर्म्माण्यकारयन् ॥

* मनीषिभिरिति (ग)। † क्षेत्रप्रभावान्मय्येषेति (ग)। ‡ सिद्धिर्वद्धेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्रैव मरणम्प्रापुः* सर्व्वसङ्गविवर्ज्जिताः
श्वेतद्वीपं ततः प्राप्ताः सर्व्व एव चतुर्भुजाः ।
सर्व्वे शङ्खधराश्चैव सर्व्वे चायुधसंयुताः ॥ २१९।२२० ।
ताः स्त्रियश्च वरारोहे स्तुतिमान्या महौजसः ।
श्वेतद्वीपे प्रमोदन्ते सर्व्वभोगसमन्विताः ॥ २२१ ।
एवं ते कथितं भूमि व्युष्टिः सौकरवे महत् ।
अकामपतिताश्चैव श्वेतद्वीपमुपागताः ॥ २२२ ।
य एतेन विधानेन वासन्तीर्थे तु कारयेत् ।
मरणञ्च विशालाक्षि श्वेतद्वीपं स गच्छति ॥ २२३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
स्नानादाखोटके तीर्थे यत्फलं समुपाश्नुते ॥ २२४ ।
दशवर्षसहस्राणि दशवर्षशतानि च ।
नन्दनं समवाश्रित्य मोदन्ते चैव सर्व्वदा ॥ २२५ ।
ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले ।
मद्भक्तश्चैव जायेत एवमेतन्न संशयः ॥ २२६ ।
पुनरन्यत्प्रवक्ष्यामि स्नातो गृध्रवटे नरः ।
यत्फलं समवाप्नोति स्नानमात्रकृतोदकः ॥ २२७ ।
नववर्षसहस्राणि नववर्षशतानि च ।
इन्द्रलोकं समासाद्य मोदते दैवतैः सह ॥ २२८ ।
इन्द्रलोकात्परिभ्रष्टो मम तीर्थप्रभावतः ।

---

* एष श्लोकः (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वसङ्गं परित्यज्य मद्भक्तश्चैव जायते ॥ २२९ ।
एतत्ते कथितम्भद्रे स्नानमात्रस्य यत्फलम् ।
यत्त्वया पृच्छितं पूर्व्वं सर्व्वसंसारमोचणम् ॥ २३० ।
ततो नारायणाच्छ्रुत्वा पृथिवी शंसितव्रता ।
उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम् ॥ २३१ ।
केन कर्म्मविपाकेन तीर्थं पुनरवाप्यते ।
स्नानं वा मरणन्देव यथावद्वक्तुमर्हसि ॥ २३२ ।

वराह उवाच ।

शृणु देवि महाभागे पूर्व्वधर्म्मकृतो नराः ।
केनचित्कर्म्मदोषेण तिर्य्यग्योनिमवाप्य हि ॥ २३३ ।
जन्मान्तरार्ज्जितैः पुण्यैस्तीर्थस्नानजपादिभिः ।
महादानैश्च लभ्येत* तीर्थे पञ्चत्वमर्च्चकैः ॥ २३४ ।
जन्मान्तरकृतं कर्म्म यत्स्वल्पमपि वा बहु ।
तत्कदाचित्फलत्येवं न तस्य परिसङ्क्षयः ॥ २३५ ।
कदाचिद्वासहस्यो वै पुण्यतीर्थादिदर्शनात् ।
दुर्व्बलं प्रबलम्भूत्वा प्रबलं दुर्ब्बलम्भवेत् ॥ २३६ ।
पापान्तरं समासाद्य गहना कर्म्मणोगतिः ।
यदल्पमिव दृश्येय तन्महत्त्वाय कल्पते ॥ २३७ ।
अतएव मनुष्यत्वं प्राप्तो राजत्वमेव च ।
शृगाली चैव गृध्रश्च तीर्थस्यैव प्रभावतः ॥ २३८ ।

---

* तत्रैव मरणं प्राप्येति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मरणादेव सम्प्राप्य चीणपापौ स्मृतिं पुनः।
श्वेतद्वीपं ततः प्राप्तौ जानीहि त्वं वसुन्धरे ॥ २३९ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
तीर्थं वैवस्वतं नाम यत्रार्कस्तप्तवांस्तपः ॥ २४० ।
कदाचित्पुत्रकामेन मार्त्तण्डेन महत्तपः।
कृतं चान्द्रायणं तत्र दशवर्षसहस्रकम् ॥ २४१ ।
ततः सप्तसहस्राणि वायुभक्षस्तु संस्थितः।
ततस्तुष्टोऽस्म्यहं भद्रे सूर्य्यस्य सुमहौजसः ॥ २४२ ।
वरेण छन्दयामास आदित्यं तदनन्तरम्।
विवस्वन्तं महाभागं मम कर्म्मपरायणम्।
वरं वरय भद्रन्ते यस्ते मनसि वर्त्तते ॥ २४३ ।
ततो मम वचः श्रुत्वा कश्यपस्य सुतो बली।
मधुरं स्वरमादाय प्रत्युवाच महद्वचः ॥ २४४ ।
यदि देव प्रसन्नोऽसि अयं मे दीयतां वरः।
पुत्रमिच्छाम्यहं देव प्रसादात्ते सुरेश्वर ॥ २४५ ।
विवस्वद्वचनं श्रुत्वा तुष्टोऽहन्तस्य सुन्दरि।
तस्य शुद्धेन मनसा प्रोक्तवानस्मि सुन्दरि।
यमश्च यमुना चैव मिथुनं जनयिष्यसि ॥ २४६ ।
एवं तस्य वरं दत्त्वा आदित्यस्य वसुन्धरे।
आत्मयोगप्रभावेण तत्रैवान्तर्हितोऽभवम् ॥ २४७ ।
आदित्योऽपि गतो भद्रे वेश्म स्वञ्च महाधनम्।
पुण्यं सौकरवे कृत्वा सुदुष्करतरं महत् ॥ २४८ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अष्टमेन तु भक्तेन यस्तु स्नाति वसुन्धरे।
दशवर्षसहस्राणि सूर्य्यलोके महीयते ॥ २४९ ।
अथवा तत्र सुश्रोणि म्रियते पुण्यवान्नरः।
यमलोकं न गच्छेत* तीर्थस्यास्य प्रभावतः ॥ २५० ।
एतत्ते कथितं भद्रे स्नानस्य मरणस्य च।
फलञ्चैव यथावृत्तं तीर्थे सौकरवे मम ॥ २५१ ।
आख्यानानां महाख्यानं क्रियाणाञ्च महाक्रिया।
एष जप्यः प्रमाणश्च† सन्ध्योपासनमेव च ॥ २५२ ।
एष तेजश्च‡ मन्त्रश्च सर्व्वभागवतप्रियम्§ ।
पिशुनाय न दातव्यं मूर्खे भागवते न तु।
न च वैश्याय शूद्राय ये न जानन्ति मां परम् ॥ २५३ ।
पण्डितानां सभामध्ये ये च भागवता भुवि।
मठे ब्राह्मणमध्ये तु ये च वेदविदां वराः।
दीक्षिताय च दातव्यं ये च शास्त्राणि जानते ॥ २५४ ।
एतत्ते कथितम्भद्रे पुण्यं सौकरवे महत्।
य एतत्पठते सुभ्रु कल्य उत्थाय मानवः।
तेन द्वादश वर्षाणि चिन्तितोऽहं न संशयः ॥ २५५ ।

---

* गच्छेदिति साधु। † प्रमाणश्चेति सार्व्वत्रिकः पाठ इति अस्माभिरपि तथा उद्धृतः, वस्तुतः प्रमाणञ्चेति सम्यक्, यथा वेदाः प्रमाणमित्यादि। ‡ एष वेदाश्च मन्त्राश्चेति (ग)। § सर्व्वभागवतप्रियमिति सार्व्वत्रिकः पाठः, वस्तुतः सर्व्वभागवतप्रिय इति कृते तु सुष्ठु स्यात्, एष इत्यस्य पुंस्त्वेन निर्द्देशात्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न स जायेत गर्भेषु मुक्तिमाप्नोति शाश्वतीम् ।
यः पठेदेकमध्यायं तारयेत्स कुलान्दश ॥ २५६ ।

इति वराहपुराणे भगवच्छास्त्रे तीर्थमाहात्म्ये सौकरवे
गृध्रजम्बूकाख्यानादित्यवरप्रदानादिर्नाम
सप्तत्रिंशदधिकशततमोऽध्यायः ।

अष्टात्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

एतत्पुण्यतमं श्रुत्वा* रम्ये सौकरवे तदा ।
गुणस्तवञ्च माहात्म्यं जात्यानां परिवर्त्तनम् ॥
ततः कमलपत्राक्षी सर्व्वधर्म्मविदां वरा ।
विस्मयं परमङ्गत्वा निर्वृतेनान्तरात्मना ।
पुनः पप्रच्छ तन्देवं विस्मयाविष्टमानसा ॥ १।२ ।
अहो तीर्थस्य माहात्म्यं क्षेत्रे सौकरवे तव ।
अकामान्म्रियमाणस्य मानुषत्वमजायत ।
किं वान्यद्वृत्तमाख्याहि क्षेत्रे सौकरवे प्रति† ॥ ३ ।
शृण्वन्त्या मे महाजातं चित्ते कौतूहलं परम् ।
गायमानस्य किं पुण्यं वाद्यमानस्य किं फलम् ।

---

* एतत्पुण्यमतो भूत्वेति (क) (ख) । † क्षेत्रं सौकरवं प्रतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नृत्यतः किम्भवेत्सुखं जाग्रतो वा फलं नु किम् ॥ ४ ।
गोदातुरन्नदातुर्वा जलदातुस्तु किम्फलम् ।
सम्मार्ज्जने लेपने वा गन्धपुष्पादिदानतः ॥ ५ ।
धूपदीपादिनैवेद्यैः किम्फलं समुदीरितम् ।
अन्येन कर्म्मणा चैव जपयज्ञादिनाऽथवा ॥ ६ ।
कां गतिम्प्रतिपद्यन्ते ये शुद्धमनसो जनाः ।
तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हसि ॥ ७ ।
ततो मह्या वचः श्रुत्वा सर्व्वदेवमयो हरिः ।
उवाच मधुरं वाक्यं धर्म्मकामां वसुन्धराम् ॥ ८ ।

वराह उवाच ।

शृणु सुन्दरि तत्त्वेन यन्मान्त्वं परिपृच्छसि ।
सर्व्वन्ते कथयिष्यामि पुण्यकर्म्म सुखावहम् ॥ ९ ।
तस्मिन् सौकरवे पक्षी खञ्जरीटस्तु कीटकान् ।
बहून् भुक्त्वा हि वसुधे अजीर्णभृशपीड़ितः ।
मरणं समनुप्राप्तः पतितः स्वेन कर्म्मणा ॥ १० ।
सम्प्राप्तास्तत्र वै बालाः क्रीड़न्तस्तं मृतङ्गगम् ।
ग्रहीष्याम इति प्रोच्य धावन्तस्तत्र तत्र ह ॥ ११ ।
ममायं वै ममायं वै जिघृक्षन्तः परस्परम् ।
सङ्घर्षात्कलह*चक्रुर्भृशं क्रीड़नकौत्सुकाः ॥ १२ ।
तत एको गृहीत्वैनं गङ्गाम्भसि समाक्षिपत् ।

* सद्यः किल हनामिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

युष्माकमेव भवतु नानेनास्मत्प्रयोजनम् ॥ १३ ।
एवं स खञ्जरीटोऽपि गङ्गातोयाप्लुतस्तदा ।
आदित्यतीर्थसंक्लिन्नशरीरः स वसुन्धरे ॥ १४ ।
वैश्यस्य तु गृहे जातो ह्यनेकक्रतुयाजिनः* ।
धनरत्नसमृद्धे तु रूपवान् गुणवान् शुचिः ।
विबुद्धश्च पवित्रश्च मद्भक्तश्च वसुन्धरे ॥ १५ ।
जातस्य तस्य वर्षाणि जग्मुर्द्वादश सुव्रते ॥ १६ ।
कदाचिदुपविष्टौ तौ दृष्ट्वा बालो गुणान्वितः ।
मातरं पितरं चोभौ हर्षेण महतान्वितौ ।
प्रणम्य शिरसा भूमौ बद्धाञ्जलिरयाचत ॥ १७ ।
मत्प्रियं यदि कर्त्तव्यमेको मे दीयतां वरः ।
न चाहं वारणीयो वै पित्रा मात्रा कथञ्चन ।
सत्यं शपामि गुरुणा यथा ननु कृतम्भवेत् ॥ १८ ।
पुत्रस्य वचनं श्रुत्वा दम्पती तौ मुदान्वितौ ।
ऊचतुस्तत्प्रियं वाक्यं बालं कमललोचनम् ॥ १९ ।
यद्यत्त्वं वक्ष्यसे वत्स यद्यत्ते हृदि वर्त्तते ।
सर्व्वं तत्तत्करिष्यावोविस्रब्धं वद साम्प्रतम् ॥ २० ।
त्रिंशत्सहस्रङ्गावो हि सर्व्वाश्च शुभदोहनाः ।
यद्यत्र रोचते पुत्र देहि त्वमविचारितम् ॥ २१ ।
पुनरन्यत्प्रवक्ष्यामि† आवयोः पुत्र कारणात् ।

---

* अनेकक्रूरयाजिन इति (क), (ख) । † (ग) पुस्तके १८ श्लोकस्य चतुर्थः पादः, १९ श्लोकः, २० श्लोकस्य प्रथमपादश्च न सन्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

बाणिज्यं नः स्मृतङ्कर्म्म तत्ते पुत्र यदीप्सितम् ॥ २२ ।
तत्कुरुष्व यथान्यायं मित्रेभ्योदीयतां धनम् ।
धनधान्यानि रत्नानि देहि पुत्र अवारितः ॥ २३ ।
कन्या वै रमणीयाश्च सजातीयाः कुलोद्भवाः ।
आनयिष्याव भद्रन्ते उद्वाहेन क्रमेण ते ॥ २४ ।
यदीच्छसि पुनस्त्वान्ययज्ञैर्यष्टुं सुपुत्रक ।
विधिना पूर्व्वदृष्टेन वैश्या येन यजन्ति च ॥ २५ ।
अष्टौ सम्पूर्णधुर्य्याणां हलानां तावतां शतम् ।
वैश्यकर्म्म समादाय किं पुनः प्राप्तुमिच्छसि ॥ २६ ।
यावद्भोजनतृप्तान्वा* द्विजानिच्छसि तर्पितुम् ।
सर्व्वं निजेच्छया पुत्र कर्त्तुमर्हसि साम्प्रतम् ॥ २७ ।
पितृमातृवचः श्रुत्वा स बालो धर्म्मसंयुतः ।
चरणावुपसंगृह्य पितरौ पुनरब्रवीत् ॥ २८ ।
गोप्रदाने न मे कार्य्यं मित्रं वापि न चिन्तितम् ।
कन्यालाभे न मेच्छास्ति न च यज्ञफले तथा ॥ २९ ।
नाहं बाणिज्यमिच्छामि कृषिगोरक्ष्यमेव च ।
न च सर्व्वातिथित्वं वा मम चित्ते प्रसज्जति ॥ ३० ।
एकं मे परमं चिन्त्यं यन्ममेच्छा तपोधृतौ ।
चिन्ता नारायणश्चैवं गाढं सौकरवम्मति ॥ ३१ ।
ततः पुत्रवचः श्रुत्वा मम कर्म्मपरायणौ ।

---

* तृप्तान् हीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

करुणम्परिदेवन्तौ रुदन्तौ तावुभौ तथा ॥ ३२ ।
अद्य द्वादशवर्षाणि तव जातस्य पुत्रक ।
किमिदं चिन्तितं वत्स त्वया नारायणाश्रयम् ।
चिन्तयिष्यसि भद्रन्ते यदा तत्प्राप्नुया वयः ॥ ३३ ।
अद्यापि भोजनं गृह्य* धावमानास्मि पृष्ठतः ।
किमिदं चिन्तितं वत्स गमने सौकरम्प्रति† ॥ ३४ ।
अद्यापि मत्स्तनौ धन्यौ प्रस्नुतौ हि दिवानिशम् ।
पुत्र त्वत्स्पर्शनाशायाः किमेतच्चिन्तितं त्वया ॥ ३५ ।
रात्रौ सुप्तोऽसि वत्स त्वं शय्यासु परिवर्त्तितः ।
अम्बेति भाषसेऽद्यापि कथमेतद्विचिन्तितम् ॥ ३६ ।
स्पृशन्ति तव नार्य्योऽपि क्रीड़मानस्य पुत्रक ।
अपराधो न विद्येत पुत्र चेत्नगृहेष्वपि ॥ ३७ ।
न वा स्वजनभृत्याद्यैः परुषन्ते प्रभाषितम् ।
रुष्टेन वापि भीषायै गृह्यते चैव यष्टिका ।
पुत्र हेतुं न पश्येऽहं तव निर्व्वेदकारणम्‡ ॥ ३८ ।
इति मातुर्वचः श्रुत्वा स वैश्यकुलनन्दनः ।
उवाच मधुरं वाक्यं जननीं संशितव्रतः ॥ ३९ ।
उषितोऽस्मि त्वदङ्गेषु गर्भस्थः कुक्षिसम्भवः ।

---

* गृहीत्वेति साधु, एवं सर्व्वत्र । † गमने सौकरवं प्रतीति (क), (ख), तत्र छन्दो-दोषः । सौकरं प्रतीति पाठे च सौकरवेत्यस्य वकारलोप आर्षः । याने सौकरवं प्रतीत्येवं कृते तु न दोषः । ‡ तवेदं कारणं प्रतीति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्रीड़ितोऽस्मि यथान्यायं तवोत्सङ्गे यशस्विनि ॥ ४० ।
स्तनौ ह्येतौ मया पीतौ ललितेन विजृम्भितौ ।
अङ्गन्तव समारुह्य पांशुभिर्गुण्ठिता तनुः ॥ ४१ ।
अम्ब त्वं मयि कारुण्यं कुरुष्व खलु चोचितम् ।
मुञ्च पुत्रकृतं शोकं त्यज मातरनिन्दिते ॥ ४२ ।
आयान्ति च पुनर्यान्ति गता गच्छन्ति चापरे* ।
दृश्यन्ते च पुनर्नष्टा न दृश्यते पुनः क्वचित्† ॥ ४३ ।
कुतोजातः क्व सम्बद्धः कस्य माता पिताथवा ।
इमां योनिमनुप्राप्तो घोरे संसारसागरे ॥ ४४ ।
मातापितृसहस्राणि पुत्रदारशतानि च ।
जन्मजन्मनि वर्त्तन्ते कस्य ते कस्य वा वयम् ।
एवं चिन्तां समासाद्य मा शुचो जननि क्वचित् ॥ ४५ ।
एवं तौ पितरौ श्रुत्वा विस्मयात्पुनरूचतुः ।
अहोवत महद्गुह्यं किमेतत्तात कथ्यताम् ॥ ४६ ।
एतद्वचनमाकर्ण्य स वैश्यकुलबालकः ।
उवाच मधुरं वाक्यं जननीं पितरन्तथा ॥ ४७ ।
यदि श्रुतेन वः कार्य्यं गुह्यस्य परिनिश्चयात् ।
तत्पृच्छ्यतां‡ भवद्भ्यां हि गुह्यं सौकरवम्प्रति ॥ ४८ ।
तत्राहं कथयिष्यामि स्वस्य गुह्यं महौजसम् ।

---

* सागरे इति (क), (ख) । † दृश्यन्ते च पुनर्नष्टा दृश्यन्ते च पुनः क्वचिदिति (ग) । ‡ पृच्छतमिति (ग), स चार्षप्रयोगः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सूर्य्यतीर्थं समासाद्य यत्तात परिपृच्छसि ॥ ४९ ।
वाढ़मित्येव पुत्रं तौ दम्पती प्रोचतुश्च तम्* ।
गमने कृतसङ्कल्पा ततः सौकरवं प्रति ॥ ५० ।
सर्व्वद्रव्यसमायुक्तो गमने सौकरवम्प्रति† ।
ततः स पद्मपत्राच्च आभीराणां जनेश्वरः ।
गावोविंशसहस्राणि प्रेषयत्यग्रतोद्रुतम् ॥ ५१ ।
अग्रे प्रययुस्ताः सर्व्वा द्रव्येण च समायुताः ।
यच्च किञ्चिद्गृहे वास्ति‡ कृतं नारायणम्प्रति ॥ ५२ ।
ततः पूर्व्वार्द्धयामेन माघमासे त्रयोदशी ।
सर्व्वं स्वजनमामन्त्र्य सम्बद्धश्च यथाविधि ॥ ५३ ।
मुहूर्त्तेन च तेनैव गमनं कुरुते ततः ।
स्नात्वा च कृतशौचास्ते नारायणमुदावहाः ॥ ५४ ।
अथ§ दीर्घेण कालेन नारायणमुदावहाः ।
वैशाखस्य तु द्वादश्यां मम क्षेत्रमुपागताः ॥ ५५ ।
स्नाताः सन्तर्प्य च पितॄन्मम वस्त्रविभूषिताः ।
गावोविंशतिसाहस्रा याः पूर्व्वमुपकल्पिताः ॥ ५६ ।
तत्र भङ्गुरसो¶ नाम मम कर्म्मपरायणः ।
तेनैव ता गृहीता वै विधिदृष्टेन कर्म्मणा ॥ ५७ ।
ततः स प्रददौ तस्य विंशा गावो महाधनाः ।

---

* वाढ़मित्येव तं पुत्रं दम्पती प्रत्युवाच तमिति (ग), तत्र कर्त्तृद्वयस्य एकवचनान्तक्रिया तमित्यस्य पुनरुक्तिश्च । † अत्रापि पूर्व्ववत् छन्दोदोषः, याने सौकरवं प्रतीति कृते तु न दोषः । ‡ चास्तीति (ग) । § तेऽथेति (ग) । ¶ भागुरसो नामेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मङ्गल्याश्च पवित्राश्च सर्व्वाश्च वरदोहनाः ॥ ५८ ।
प्रददौ धनरत्नानि नित्यमेव दिने दिने ।
मोदते सह पुत्रेण भार्य्यया स्वजनेन च ॥ ५९ ।
एवन्तु वसतस्तस्य वर्षाकाल उपागतः ।
प्रावृड़ुपस्थिता तत्र सर्व्वशस्यप्रवर्द्धिनी ॥ ६० ।
पुष्पितानि कदम्बानि कुटजार्ज्जुनकानि च ।
एवं दुःखमनुप्राप्ताः स्त्रियो या रहिताः प्रियैः ॥ ६१ ।
गर्ज्जताङ्गुञ्जताञ्चैव धारापातनिपातिताः ।
मेघाः सविद्युतश्चैव बलाकाङ्गदभूषिताः ॥ ६२ ।
नदीनाञ्चैव निर्घोषो मयूराणाञ्च निस्वनः ।
कुटजार्ज्जुनगन्धाश्च कदम्बार्ज्जुनपादपाः ॥ ६३ ।
वाताः प्रवान्ति ते तत्र शिखिनाञ्च सुखावहाः ।
शोकेन कामिनीनाञ्च भर्त्रा च रहिताश्च याः ॥ ६४ ।
एवं स गच्छते* कालो मेघदुन्दुभिनादितः ।
ततः शरदनुप्राप्ता अगस्तिरुदितो महान् ॥ ६५ ।
तड़ागानि प्रसन्नानि कुमुदोत्पलवन्ति च ।
पद्मषण्डैः सुरम्याणि पुष्पितानि समन्ततः ॥ ६६ ।
प्रवान्ति तु सुखा वाताः सुगन्धाश्च सुशीतलाः ।
सप्तपर्णसुगन्धाश्च शीतलाः कामिवल्लभाः ॥ ६७ ।
एवं शरदि निर्वृत्ते कौमुदे समुपागते ।

---

* गच्छतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सा तस्मिन्मासे सुश्रोणि शुक्लपक्षान्तरे तदा ॥ ६८ ।
एकादश्यां ततः सुभ्रु स्नातौ क्षौमविभूषितौ ।
उभौ तौ दम्पती तत्र पुत्त्रमूचतुरात्मनः ॥ ६९ ।
उषितास्त्वत्र षण्मासान् सुखांश्च द्वादशी भवेत् ।
किन्नो न वक्ष्यसे* गुह्यं येन वै वारिता वयम् ॥ ७० ।
पित्रोस्तु वचनं श्रुत्वा स पुत्त्रो धर्म्मनिष्ठितः ।
उवाच मधुरं वाक्यं तयोस्तु कृतनिश्चयः ॥ ७१ ।
एवमेतन्महाभाग यत्त्वया परिभाषितम् ।
कल्यन्ते† कथयिष्यामि इदं गुह्यं महौजसम् ॥ ७२ ।
एषा वै द्वादशी तात प्रभुनारायणप्रिया ।
मङ्गला च विचित्रा च विष्णुभक्तसुखावहा ॥ ७३ ।
ददतेऽस्यां प्रहृष्टा च द्वादश्याङ्कौमुदे सिते ।
दीक्षितास्ते योगिकुले विष्णुभक्तिपरायणाः ॥ ७४ ।
तेन दानप्रभावेण विष्णुतोषकरेण च ।
तरन्ति दुस्तरन्तात घोरं संसारसागरम् ॥ ७५ ।
एवं कथयतान्तेषां प्रभाता रजनी शुभा ।
ततः सन्ध्यामुपास्याथ उदिते सूर्य्यमण्डले ।
शुचिर्भूत्वा यथान्यायं क्षौमवस्त्रविभूषितः ॥ ७६ ।
प्रणम्य शिरसा देवं शङ्खचक्रगदाधरम् ।
उभौ तच्चरणौ गृह्य पितरौ समभाषत ॥ ७७ ।

---

* वक्ष्यसीति साधु । † कल्ये ते इति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शृणु तात महाभाग यदर्थं समुपागतः ।
यद्भवान्पृच्छते* तात गुह्यं सौकरवम्प्रति ॥ ७८ ।
खञ्जरीटोह्यहं तात पक्षियोनिसमुद्भवः ।
भक्षिताश्च पतङ्गा मे अजीर्णेनातिपीड़ितः ॥ ७९ ।
अहन्तेनैव दोषेण न शक्नोमि विचेष्टितुम् ।
दृष्ट्वा मां विह्वलं बाला गृहीत्वा क्रीड़ितुं गताः ॥ ८० ।
हस्ताद्धस्तेन क्रीड़न्तश्चान्योऽन्यपरिहासया ।
त्वया दृष्टोर्मया दृष्टो ह्ययश्चेति कलिः कृतः ॥ ८१ ।
तत एकेन बालेन भ्रामयित्वाचयेऽम्भसि ।
न ममेति तवेत्युक्त्वा ह्यादित्यं तीर्थमुत्तमम् ।
क्रोधेनादाय तीव्रेण क्षिप्तो गङ्गाम्भसि त्वरा ॥ ८२ ।
तत्र मुक्ता मया प्राणाः सूर्य्यतीर्थे महौजसि ।
अकामेन विशालाक्षि तत्प्रभावादहं ततः† ।
जातस्तव सुतो मातस्तदेतद्दिनमुत्तमम् ॥ ८३ ।
अकामान्म्रियमाणस्य वर्षाण्यद्य त्रयोदश ।
व्यतीतानि च गुह्यन्ते कथनं मम चैव यत् ॥ ८४ ।
एतत्ते कथितन्तात गुह्यमागमनम्प्रति ।
अहङ्कर्म्म करिष्यामि गच्छ तात नमोऽस्तु ते ॥ ८५ ।
ततो माता पिता चैव पुत्त्रम्पुनरुवाच ह ।
विष्णुप्रोक्तानि कर्म्माणि यं यङ्कारयिता‡ भवान् ॥

---

* पृच्छतीति साधु । † तव इति (ग) । ‡ यद्यत्कारयितेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तान्वयञ्च करिष्यामो विधिदृष्टेन कर्म्मणा ।
घटमाना* यथान्यायङ्कर्म्म संसारमोचणम् ॥ ८६।८७ ।
तेऽपि दीर्घेण कालेन मम कर्म्मपरायणाः ।
कृत्वा तु विपुलं कर्म्म ततः पञ्चत्वमागताः ॥ ८८ ।
मम चेत्रप्रभावेण चात्मनः कर्म्मनिश्चयात् ।
विमुक्ताः सर्व्वसंसाराच्छ्वेतद्वीपमुपागताः† ॥ ८९ ।
योऽसौ परिजनः कश्चिद्गृहेभ्यश्च समागतः‡ ।
सर्व्वः श्रिया युत§स्तत्र रोगव्याधिविवर्ज्जितः ॥ ९० ।
सर्व्वे च योगिनस्तत्र सर्व्वे चोत्पलगन्धयः ।
मोदन्ते तु यथान्यायं प्रसादात्चेत्रजान्मम ॥ ९१ ।
एतत्ते कथितन्देवि महाख्यानं महौजसम् ।
पुनरन्यत्प्रवक्ष्यामि यद्वृत्तं सौकरे¶ मम ॥ ९२ ।
एषा व्युष्टिर्महाभागे चेत्रे यत्क्रियते महत् ।
तिर्य्यग्योनिविनिर्मुक्ताः श्वेतद्वीपमुपागताः ॥ ९३ ।
य एतत्पठते नित्यं कल्यमुत्थाय मानवः ।
स कुलांस्तारयेत्तूर्णं दश पूर्व्वान्दशावरान्‖ ॥ ९४ ।
न पठेन्मूर्खमध्ये तु पापिष्ठे शास्त्रदूषके ।
न पठेत्पिशुनानाञ्च एकाकी तु पठेद्गृहे ॥ ९५ ।

---

* पठमाना इति (क), (ख) ।   † प्रमुक्ताः सर्व्वसंसारान्मम कर्म्मपरायणाः । देवि चेत्रप्रभावेण श्वेतद्वीपमुपागताः इति (ग) ।   ‡ एतदर्द्धं (ग) पुस्तके नास्ति । § श्रियावृत इति (ग) ।   ¶ सौकरवे ममेति (क), (ख) । पाठेऽत्र एकाचराधिक्यम् । अन्यत्र वकारलोप आर्षः ।   ‖ दशापरानिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पठेद्ब्राह्मणमध्ये च ये च वेदविदां वराः ।
वैष्णवानाञ्च पुरतो* ये च शास्त्रगुणान्विताः ।
विशुद्धानां विनीतानां सर्व्वसंसारमोचणम् ॥ ८६ ।

इति वराहपुराणे खञ्जरीटोपाख्यानं नाम
अष्टात्रिंशदधिकशततमोऽध्यायः ।

ऊनचत्वारिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि लिप्यमानस्य यत्फलम् ।
सर्व्वन्ते कथयिष्यामि यथा प्राप्नोति मानवः ॥ १ ।
गृहीत्वा गोमयम्भूमिं मम वेश्मोपलेपयेत् ।
न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः ।
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ॥ २ ।
यदि द्वादशवर्षाणि लिप्यते मम कर्म्मसु ।
जायते विपुले शुद्धे धनधान्यसमाकुले ॥ ३ ।
दिव्यैर्नमस्कृतो देवि कुशद्वीपञ्च गच्छति ।
कुशद्वीपमनुप्राप्य सहस्राणि च जीवति ।
दश चैव तु वर्षाणां मम भक्तो महान् शुचिः ॥ ४ ।

---

* वैष्णवानाञ्च पूता ये इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कुशद्वीपात्परिभ्रष्टो मम कर्म्मपरायणः ।
राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः ॥ ५ ।
लेपनस्य प्रभावेण मम कर्म्मपरायणः ।
भक्तो व्यवस्थितश्चापि सर्व्वशास्त्राणि पृच्छति ॥ ६ ।
देवि कारयते सर्व्वं मम चायतनानि च ।
कारयित्वा यथान्यायं मम लोकाय गच्छति ॥ ७ ।
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति ।
समीपे यदि वा दूरे गत्वा नयति गोमयम् ॥ ८ ।
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम् ।
गोमयानयिता चैव स्वर्गलोके महीयते ॥ ९ ।
ततः स शाल्मले द्वीपे रमते च मुदा युतः ।
एकादशसहस्राणि एकादशशतानि च ॥ १० ।
शाल्मलात्तु परिभ्रष्टोराजा भवति धार्म्मिकः ।
मद्भक्तश्चैव जायेत सर्व्वधर्म्मविदां वरः ॥ ११ ।
अथ द्वादशवर्षाणि मच्छितः सुदृढ़व्रतः ।
वहते गोमयं सुभ्रु मम लोकाय गच्छति ॥ १२ ।
स्नानोपलेपने भूमिं सलिलं यो ददाति च ।
तस्य पुण्यं महाभागे शृणु तत्त्वेन निष्कलम् ॥ १३ ।
यावन्तो विन्दवस्तत्र पानीयस्य वसुन्धरे ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ १४ ।
स्वर्गलोकात्परिभ्रष्टः क्रौञ्चद्वीपञ्च गच्छति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्रौञ्चद्वीपात्परिभ्रष्टो राजा भवति धार्म्मिकः ।
तेनैव गुणयोगेन श्वेतद्वीपञ्च गच्छति ॥ १५ ॥
सम्मार्ज्जनम्प्रवच्यामि तच्छृणुष्व वसुन्धरे ।
यां गतिम्पुरुषा यान्ति स्त्रियो वा कर्म्मसु स्थिताः ॥ १६ ॥
शुचिर्भागवतः शुद्धो अपराधविवर्ज्जितः ।
यावन्तः पांशवो भूमेरुद्धीयन्ते तु चालिताः ।
तावद्वर्षशतान्याशु स्वर्गलोके महीयते ॥ १७ ॥
स्वर्गलोकात्परिभ्रष्टः शाकद्वीपाय गच्छति ।
तत्र स्थित्वा चिरङ्कालं राजा भवति धार्म्मिकः ॥ १८ ॥
ततोभुक्त्वा सर्व्वभोगान् स्थित्वा संसारसागरे ।
श्वेतद्वीपं ततो गच्छेन्मत्कर्म्मनिरतः शुचिः ॥ १९ ॥
अन्यच्च ते प्रवच्यामि शृणुष्व गदतोमम ।
गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः ।
तेषां यद्यत्फलभूमि शृणुष्व गदतोमम* ॥ २० ॥
गायमानस्य गीतस्य यावदच्चरपङ्क्तयः ।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥ २१ ॥
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः ।
नित्यम्पश्यति तत्रस्थोदेवराजं न संशयः ॥ २२ ॥
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः ।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः ॥ २३ ॥

---

* (ग) पुस्तके एतदर्द्धं परश्लोकश्च न स्तः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इन्द्रलोकात्परिभ्रष्टो मम गीतपरायणः।
नन्दनोपवने रम्ये रमन्* देवगणैः सह ॥ २४ ।
ततः स भूमौ जायेत वैष्णवैः सह संस्थितः।
गायन्मम यशो नित्यं भक्त्या परमया युतः।
मत्प्रसादात्स शुद्धात्मा मम लोकाय गच्छति ॥ २५ ।

सूत उवाच।

तस्य तद्वचनं श्रुत्वा माधवस्य यशस्विनी।
कृताञ्जलिपुटा भूयः प्रत्युवाच वसुन्धरा ॥ २६ ।

धरण्युवाच।

अहो गीतप्रभावो वै यस्त्वया कीर्त्तितो महान्।
के च गीतप्रभावेण सिद्धिं प्राप्ता महौजसः॥ २७ ।

वराह उवाच।

तत्रैव चाश्रमे भद्रे चाण्डालः कृतनिश्चयः†।
दूराज्जागरणे याति मम भक्तो व्यवस्थितः ॥ २८ ।
गायमानश्च गीतानि संवत्सरगणान् बहून्।
श्वपाकः स गुणज्ञश्च मद्भक्तश्चैव सुन्दरि ॥ २९ ।
कौमुदस्य तु मासस्य शुक्लपक्षे तु द्वादशी।
सुप्ते गते जने जाते वीणामादाय चङ्क्रमत्।
जाग्रंस्तत्र स चाण्डालोगृहीतोब्रह्मरक्षसा ॥ ३० ।
अल्पप्राणः श्वपाको वै बलवान् ब्रह्मराक्षसः।

---

* रमन् इति आर्षं रममाण इति साधु। † कृत्यनिश्चय इति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दुःखशोकेन सन्तप्तो न शक्नोति विचेष्टितुम् ॥ ३१ ।
तेन प्रोक्तः श्वपाकेन बलवान् ब्रह्मराक्षसः ।
किन्त्वया चेष्टितं मह्यं यस्त्वेवं परिधावसि ॥ ३२ ।
श्वपाकवचनं श्रुत्वा तेन वै ब्रह्मरक्षसा ।
ततः प्रोवाच तं श्वादं मानुषाहारलोलुपः ॥ ३३ ।
अथेह दशरात्रं मे निराहारस्य तिष्ठतः ।
विधात्रा विहितस्त्वञ्च आहारः पारणाविधौ ॥ ३४ ।
अद्य त्वां भक्षयिष्यामि सवसामांसशोणितम् ।
तृप्तिं यास्यामि परमां विधात्रा विहितां मम ॥ ३५ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाको गीतलालसः ।
राक्षसं छन्दयामास मम भक्त्या व्यवस्थितः ॥ ३६ ।
एवमेतन्महाभाग भक्ष्योऽहं समुपागतः ।
अवश्यमेतत्कर्त्तव्यं धात्रा दत्तं यथा तव ॥ ३७ ।
किन्त्वहं देवदेवस्य भक्त्या गातुञ्च जागरे ।
उद्यतस्तत्र गत्वाहमुपास्य विधिना हरिम् ।
पश्चात्खादस्व* मां रक्षो जागराद्विनिवर्त्तितम्† ॥ ३८ ।
विष्णोः सन्तोषणार्थाय यतोमि व्रतमास्थितम् ।
जागरे विनिवृत्ते मां भक्षय त्वं यदीच्छसि‡ ॥ ३९ ।
श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्द्दितः ।

---

* खाद खादयेति वा साधु । † विनिवर्त्तितमित्यत्र स्वार्थे णिच् । ‡ भक्षयस्व यदीच्छसीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उवाच परुषं वाक्यं श्वपाकस्तदनन्तरम् ॥ ४० ॥
मिथ्या किं भाषसे मूढ़ पुनरेष्यामि तेऽन्तिकम्।
मृत्योर्मुखमनुप्राप्य पुनर्ज्जीवति मानवः।
रक्षसोमुखविभ्रष्टः पुनरागन्तुमिच्छसि ॥ ४१ ॥
राक्षसस्य वचः श्रुत्वा चाण्डालस्तमथाब्रवीत्।
यद्यप्यहं हि चाण्डालः पूर्व्वकर्म्मविदूषितः।
सम्प्राप्तो मानुषम्भावं विहितेनान्तरात्मना ॥ ४२ ॥
शृणु मत्समयं रक्षो येनाहं पुनरागमम्।
दूराज्जागरणङ्कृत्वा लोकस्य द्विजराक्षस।
सत्येन पुनरेष्यामि मन्यसे यदि मुञ्च माम् ॥ ४३ ॥
सत्यमूलञ्जगत्सर्व्वं लोकाः सत्ये प्रतिष्ठिताः।
सत्येन सिद्धिम्प्राप्ता हि ऋषयो ब्रह्मवादिनः ॥ ४४ ॥
सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः।
सत्यं जयन्ति राजानस्त्रीख्येतान्यब्रुवन्नृतम् ॥ ४५ ॥
सत्येन गम्यते स्वर्गो मोक्षः सत्येन चाप्यते।
सत्येन तपते सूर्य्यः सोमः सत्येन रज्यते ॥ ४६ ॥
षष्ठ्यष्टमीममावास्यामुभे पक्षे चतुर्द्दशी।
अस्नातानाङ्गतिङ्गच्छे यद्यहं नागमे* पुनः ॥ ४७ ॥
गुरुपत्नीं राजपत्नीं योऽभिगच्छति मोहितः।
ताङ्गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ४८ ॥

---

* गच्छे इत्यार्षं गच्छेयमिति साधु। नागमे इत्यार्षं नागच्छेयमिति साधु। एवं परत्र।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

याजकानाञ्च ये लोका ये च मिथ्याभिभाषिणाम् ।
ताङ्गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ४९ ।
ब्रह्मघ्ने च सुरापे वा स्तेने भग्नव्रते तथा ।
तेषां गतिम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ५० ।
श्वपाकवचनं श्रुत्वा तुष्टो ब्राह्मणराक्षसः ।
उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते ॥ ५१ ।
ब्रह्मराक्षसमुक्ता तु श्वपाकः कृतनिश्चयः ।
पुनर्गायति मह्यं वै मम भक्तो व्यवस्थितः ॥ ५२ ।
अथ प्रभाते विमले गीते नृत्ये च जागरे ।
नमो नारायणायेति श्वपाकः परिवर्त्तते ॥ ५३ ।
ततस्त्वरितमागत्य पुमांस्तस्याग्रतः स्थितः ।
उवाच मधुरं वाक्यं चाण्डालङ्कृतनिश्चयम् ॥ ५४ ।
क्व यासि त्वरितः साधो न च त्वं गन्तुमर्हसि ।
जानन् कौणपपतिन्तञ्च न त्वं मर्त्तुमिहार्हसि ॥ ५५ ।
पुरुषस्य वचः श्रुत्वा चाण्डालः पुनरब्रवीत् ।
समयोऽमि कृतः पूर्व्वं राक्षसेन हि भक्षता ।
तेन तत्र गमिष्यामि सत्यं च परिपालयन् ॥ ५६ ।
ततः स पद्मपत्राक्षः श्वपाकम्प्रत्युवाच ह ।
मधुराङ्गिरमादाय विहितेनान्तरात्मना ॥ ५७ ।
मा गच्छ तत्र चाण्डाल यत्रासौ पापराक्षसः ।
जीवितार्थाय सत्यस्य न दोषः परिहापनात् ॥ ५८ ।
ततस्तस्य वचः श्रुत्वा श्वपाकः शंसितव्रतः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उवाच मधुरं वाक्यं मरणे कृतनिश्चयः ॥ ५९ ।
नाहमेवं करिष्यामि यन्मात्त्वं परिभाषसे ।
न चाहं नाशये सत्यमेतन्मे निश्चितं व्रतम् ॥ ६० ।
सत्यमूलं जगत्सर्व्वं कुलं सत्ये प्रतिष्ठितम् ।
सत्यमेव परोधर्म्म आत्मा सत्ये प्रतिष्ठितः ॥ ६१ ।
न चैवाहं तदुत्सृज्य असत्यः स्यां कदाचन ।
नाहं मिथ्या चरिष्यामि गच्छ तात नमोऽस्तु ते ॥ ६२ ।
एवमुक्त्वा श्वपाकोऽपि नित्यं सत्यव्रते स्थितः ।
राक्षसं समनुप्राप्तस्तमुवाचाथ पूजयन् ॥ ६३ ।
आगतोऽस्मि महाभाग मा विलम्बय भक्षय ।
त्वत्प्रसादादहं गत्वा वैष्णवं स्थानमुत्तमम् ॥ ६४ ।
एतानि मम गात्राणि भक्षयस्व यथेष्टतः* ।
पिबोष्णं रुधिरं मह्यं† पीड़ितोऽसि क्षुधा भृशम् ।
तर्पयस्व स्वमात्मानं कुरुष्व मम वै हितम् ॥ ६५ ।
श्वपाकस्य वचः श्रुत्वा ततः स ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं श्वपाकन्तदनन्तरम् ॥ ६६ ।
साधु तुष्टोऽस्म्यहं वत्स सत्यं धर्म्मञ्च पालितम् ।
चण्डालस्याविधिज्ञस्य यस्य ते मतिरीदृशी ॥ ६७ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः सत्यसङ्गरः ।
उवाच मधुरं वाक्यं ब्रह्मराक्षसमेव तु ॥ ६८ ।

---

* यथेच्छितमिति (ग) । † ममेत्यत्र मह्यमिति आर्षम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यद्यप्यहं वै चाण्डालः सर्व्वकर्म्मविवर्ज्जितः* ।
तथापि सत्यं वक्तव्यं ब्रह्मराक्षस नित्यशः ॥ ६९ ।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षो भयानकम् ।
उवाच मधुरं वाक्यं श्वपाकं संश्रितव्रतम् ॥ ७० ।
यत्त्वया गीयते रात्रौ विष्णोर्जागरणम्प्रति ।
फलङ्गीतस्य मे देहि यदीच्छेर्जीवितं स्वकम् ।
ततो मोक्ष्यामि कल्याण भक्षयामि न भीषण:† ॥ ७१ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः प्रत्युवाच ह ।
मनोऽज्ञातमिदं वाक्यं ब्रह्मरक्षो निभाषसे ।
भक्षयामीति चोक्त्वा मां गीतपुण्यं किमिच्छसि ॥ ७२ ।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षोऽब्रवीत्पुनः ।
एकयामीयं मे देहि पुण्यङ्गीतस्य वै परम् ।
ततोमोक्ष्यसि भक्ष्येण सङ्गतः पुत्रदारकैः ॥ ७३ ।
श्रुत्वा राक्षसवाक्यानि चाण्डालोगीतलोभितः ।
उवाच मधुरं वाक्यं राक्षसङ्कृतनिश्चयः ॥ ७४ ।
न गायनफलन्दद्मि ब्रह्मरक्षस्तवेप्सितम् ।
भक्षयस्व यथान्यायं रुधिरं पिव चेप्सितम् ॥ ७५ ।
श्वपाकवचनं श्रुत्वा राक्षसः पुनरब्रवीत् ।
एकगीतस्य मे देहि यत्त्वया विष्णुसंसदि ।
एतेन तारितोऽस्मीति तव गीतफलेन वै ॥ ७६ ।

---

* पाककर्म्मवहिष्कृत इति (ग) । † सशीर्षण इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

श्रुत्वा वाक्यानि चाण्डालो राक्षसस्य निवारयन्।
उवाच मधुरं वाक्यं चाण्डालो विस्मयान्वितः॥ ७७।
किन्त्वया विकृतं कर्म्म तद्ब्रूहि मम राक्षस।
कर्म्मणो यस्य दोषेण राक्षसत्वं समागतः॥ ७८।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षोमहायशाः।
उवाच मधुरं वाक्यं दुःखसन्तप्तमानसः॥ ७९।
नाम्ना वै सोमशर्म्माहं चरको ब्रह्मयोनिजः।
सूत्रमन्त्रपरिभ्रष्टो यज्ञकर्म्मसु निष्ठितः॥ ८०।
ततोऽहं याजयाम्यज्ञान् लोभमोहप्रपीड़ितः।
प्रवर्त्तमाने यज्ञे तु कदाचिद्दै वयोगतः।
उदरे जातशूलोऽहं तेन पञ्चत्वमागतः॥ ८१।
अथ पञ्चमहारात्रे ह्यसमाप्ते कृते तथा।
अस्य यज्ञस्य दोषेण मातङ्ग* शृणु मे वचः।
राक्षसत्वमनुप्राप्तस्तेन दुष्टेन कर्म्मणा॥ ८२।
मन्त्रहीनं मया तत्र स्वरहीनञ्च तत्कृतम्।
सूत्रहीनं तथा तत्र प्राग्वंशादि कृतं मया॥ ८३।
परिमाणञ्च रूपञ्च मया तत्रोपलक्षितम्।
कृतस्य तस्य दोषेण योनिम्प्राप्तोऽस्मि राक्षसीम्॥ ८४।
स्वगीतफलदानेन निस्तारयितुमर्हसि।
मोचयस्वाधमं पापाद्विष्णुगीतेन सत्वरम्॥ ८५।

---

* मतङ्ग इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः संशितव्रतः ।
बाढ़मित्येव तं वाक्यं राक्षसम्प्राब्रवीत्तदा ॥ ८६ ।
एतस्य मम गीतस्य सुस्वरस्य फलन्तु यत् ।
ददामि राक्षस त्वञ्चेन्मुच्यसे शुद्धमानसः ॥ ८७ ।
यस्तु गायति संयुक्तं गीतकं विष्णुसन्निधौ ।
स तारयति दुर्गाणीत्युक्त्वा तद्दत्तवान्फलम् ॥ ८८ ।
एवं तस्मात्फलम्प्राप्य श्वपाकाद्राक्षसस्तदा ।
जातः सुविमलो भद्रे शरदीव यथा शशी ॥ ८९ ।
श्वपाकश्चापि सुश्रोणि मम चैवोपगायकः ।
कृत्वा सुविपुलं कर्म्म स ब्रह्मत्वमुपागतः ॥ ९० ।
एतद्गीतफलन्देवि प्राप्नोति मनुजो भुवि ।
मद्यज्जागरतो भद्रे गीयमानं मनस्विनि ॥ ९१ ।
यस्तु गायति सुश्रोणि कौमुदीं द्वादशीं प्रति ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ९२ ।
यस्तु गायति गीतानि मम जागरणे सदा ।
सर्व्वसङ्गात्प्रमुक्तो वै मम लोकाय गच्छति ॥ ९३ ।
एतत्ते कथितन्देवि गायनस्य फलं महत् ।
यस्य गीतस्य शब्देन तरेत्संसारसागरम् ॥ ९४ ।
वादित्रस्य प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्राप्तवान्मानुषो येन देवेभ्यः सबलां* स्वयम् ॥ ९५ ।

---

* समतामिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शम्यातालप्रयोगेण सन्निपातेन वा पुनः ।
नववर्षसहस्राणि नववर्षशतानि च ।
कुवेरभवनङ्गत्वा मोदते वै यदृच्छया ॥ ९६ ।
कुवेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः ।
शम्यादितालसम्पातैर्मम लोकाय गच्छति ॥ ९७ ।
नृत्यमानस्य* वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मानवो येन गच्छेत† छित्वा संसारबन्धनम् ॥ ९८ ।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः ।
फलम्प्राप्नोति सुश्रोणि मम कर्म्मपरायणः ॥ ९९ ।
रूपवान्गुणवान् शूरः शीलवान् सत्पथे स्थितः ।
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥ १०० ।
यस्तु जागरते नित्यं गीतवाद्येन नर्त्तकः ।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते ॥ १०१ ।
सर्व्वकर्म्मसमायुक्तो रक्षिता वै महीपतिः ।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः ॥ १०२ ।
उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः ।
यो मामुपानयेद्भूमे मम कर्म्मपथे स्थितः ॥ १०३ ।
पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत् ।
स कृत्वा पुष्कलङ्कर्म्म मम लोकाय गच्छति ॥ १०४ ।

---

* नृत्यत इति साधु । † गच्छेदिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितन्देवि भक्तानान्तु महौजसाम् ।
मम भक्तसुखार्थाय सर्व्वसंसारमोचणम् ॥ १०५ ।
य एतत्पठति* भूमि कल्यमुत्थाय मानवः ।
स तु तारयते† जन्तुर्दश पूर्व्वान्दशापरान् ॥ १०६ ।
न पठेन्मूर्खमध्ये तु पिशुनानां पुरो न च ।
पठेद्भागवतानाञ्च मध्ये मुक्तिरतात्मनाम् ॥ १०७ ।
अश्रद्दधाने क्रूरे वा न पठेद्देवले तथा ।
यदीच्छेत्सिद्धिकल्याणं मङ्गलञ्च मम प्रियम् ॥ १०८ ।
धर्म्माणां परमं धर्म्मं क्रियाणाम्परमा क्रिया ।
मा पठेच्छास्त्रदूषाय अध्यायं वा कदाचन ।
यदीच्छेत्परमां सिद्धिं मम लोके महीयते ॥ १०९ ।

इति वराहपुराणे भगवच्छास्त्रे सौकरे चाण्डालब्रह्मराचससंवादे सौकरमाहात्म्यं नाम ऊनचत्वारिंशदधिकशततमोऽध्यायः ।

चत्वारिंशदधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतानि देवस्थानानि त्वया प्रोक्तानि यान्युत ।
कस्मिंस्तिष्ठसि नित्यन्त्वं तद्भवान्वक्तुमर्हसि ॥ १ ।
किञ्च ते परमं स्थानं यत्र मूर्त्याकृतिर्भवान् ।

* पठतीति साधु । † तारयतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कस्मिन्स्थाने कृतङ्कर्म्म येन यात्युत्तमां गतिम् ॥ २ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि भक्तानां भक्तवत्सले ।
येषु स्थानेषु तिष्ठामि कथ्यमानानिमान्* शृणु ॥ ३ ।
तव कोकामुखं नाम यन्मया पूर्व्वभाषितम् ।
वदरीति च विख्यातं गिरिराजशिलातलम् ॥ ४ ।
स्थानं लोहार्गलं नाम म्लेच्छराजसमाश्रितम् ।
क्षणञ्चापि न मुञ्चामि एवमेतन्न संशयः ॥ ५ ।
सचैत्यं पश्य मे स्थानं जगदेतच्चराचरम् ।
सर्व्वत्राहं वरारोहे न मन्यूनं हि जानते ॥ ६ ।
ये तु जानन्ति मां देवि गुह्यां कामगतिं मम ।
शीघ्रङ्कोकामुखं यान्तु मम कर्म्मपरायणाः ॥ ७ ।
ततो देववचः श्रुत्वा पृथिवी वाक्यमब्रवीत् ।
शिरस्यञ्जलिमाधाय निर्वृतेना†न्तरात्मना ॥ ८ ।

धरण्युवाच ।

सर्व्वतो लोकनाथेश परङ्कौतूहलं हि मे ।
कथङ्कोकामुखं श्रेष्ठं तद्भवान्वक्तुमर्हसि ॥ ९ ।

वराह उवाच ।

नास्ति कोकामुखात्क्षेत्रं श्रेष्ठङ्कोकामुखाच्छुचि‡ ।
नास्ति कोकामुखात्स्थानं नास्ति कोकामुखात्प्रियम् ॥ १० ।

---

* स्थानस्य क्लीवत्वात्कथ्यमानानीमानीति युक्तम् । † निभृतेनान्तरात्मनेति (ग) ।
‡ क्वचिदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यस्तु कोकामुखङ्गत्वा न भूयोविनिवर्त्तते ।
कर्म्माणि तत्र कुर्व्वीत यष्टम्भवति चात्मनि ॥ ११ ।
यानि यानि च क्षेत्राणि त्वया पृष्टं वसुन्धरे* ।
कोकामुखसमं स्थानं न भूतं न भविष्यति ॥ १२ ।
मम सा परमा मूर्त्तिर्यां न जानन्ति गोपिताम् ।
स्थितङ्कोकामुखं नाम एतत्ते कथितं मया ॥ १३ ।

धरण्युवाच ।

देव देव महादेव भक्तानामभयप्रद ।
यानि गुह्यानि सन्त्यत्र कोकायां वक्तुमर्हसि ॥ १४ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मान्त्वम्परिपृच्छसि ।
तस्मिन् कोकामुखं रम्यं कथ्यमानं मयाऽनघे ॥ १५ ।
जलविन्दुरिति ख्याता†त्पर्व्वतात्पत्तनाद्भुवि ।
तत्तु गुह्यमति देवि कृत्वा कर्म्म महौजसम् ।
सर्व्वसङ्गान्परित्यज्य मम लोकाय गच्छति ॥ १६ ।
विष्णुधारेति विख्याता कोकायां मम मण्डले ।
पर्व्वतात्पतिता भूमौ धारा मुसलसन्निभा ॥ १७ ।
अहोरात्रोषितो भूत्वा स्नायात्तत्र प्रयत्नतः ।
अग्निष्टोमसहस्राणां फलम्प्राप्नोति मानवः ॥ १८ ।
न मुह्यति स कर्त्तव्ये फलम्प्राप्नोति चोत्तमम् ।

---

* त्वया पृष्टानि सुन्दरीति साधुः । † जलविन्दुरिति विख्यातादिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जायते विपुले शुद्धे मम मार्गानुसारिणि ॥ १९ ।
तत्राथ मुञ्चते प्राणान्विष्णुधारां समाश्रितः ।
पश्यति परमां मूर्त्तिमेतां मम न संशयः ॥ २० ।
तत्र विष्णुपदं नाम स्थानङ्कोकामुखाश्रितम् ।
एतत्कश्चिन्न जानाति धरे वाराहसंश्रितम् ॥ २१ ।
तस्मिन् कृतोदको देवि रात्रावुपोषितो नरः ।
क्रौञ्चद्वीपे प्रजायेत मम भक्तिपरायणः ॥ २२ ।
तत्राथ मुञ्चते प्राणान् गुह्यस्थाने परे मम ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥ २३ ।
अस्ति विष्णुसरोनाम यत्त्वया सह क्रीड़ितम्* ।
यत्र दंष्ट्राप्रहारेण चाहतासि वसुन्धरे ॥ २४ ।
तत्र स्नानन्तु कुर्व्वीत प्रातःकाले वसुन्धरे ।
सर्व्वपापविशुद्धात्मा मम लोकाय गच्छति ॥ २५ ।
सोमतीर्थमिति ख्यातङ्कोकायां मम मण्डले ।
यत्र पञ्चशिलाभूमिर्विष्णुनाम्ना तथाङ्किता ॥ २६ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
गोमेदे जायते द्वीपे मम मार्गानुसारकः ॥ २७ ।
तत्राथ मुञ्चते प्राणान् गुह्यक्षेत्रे परे मम ।
सर्व्वपापविनिर्मुक्तः शुद्धात्मा मां स पश्यति ॥ २८ ।
तुङ्गकूटेति विख्यातं कोकायां मम मण्डले ।

---

* यत्र त्वया सह क्रीड़ितमिति (क), (ख) पुस्तकयोः पाठः, तत्र तु छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

धाराः पतन्ति चत्वारः पर्व्वतादुच्चसंश्रिताः ॥ २९ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
कुशद्वीपं समासाद्य मम लोकेषु तिष्ठति ॥ ३० ।
अनित्यमाश्रमं नाम क्षेत्रकर्म्मसुखावहम् ।
देवापि* यं न जानन्ति किम्पुनर्म्मनुजादयः ॥ ३१ ।
तत्र स्नात्वा वरारोहे अष्टोरात्रोषितो नरः ।
जायते पुष्करद्वीपे मम कर्म्मपरायणः ॥ ३२ ।
अथ तत्र मृतोभूमि पुण्यक्षेत्रे महाशुचिः ।
सर्व्वपापविनिर्मुक्तोमम लोकाय गच्छति ॥ ३३ ।
अस्त्यत्राग्निसरो नाम परङ्गुह्यं मम स्थितम् ।
पञ्च धाराः पतन्त्यत्र गिरिकुञ्जसमाश्रिताः ॥ ३४ ।
तत्र चापि कृतस्नानः पञ्चरात्रोषितोनरः ।
कुशद्वीपे च जायेत मम कर्म्मपरायणः ॥ ३५ ।
तत्राऽथ मुञ्चते† प्राणान्कृत्वा कर्म्म महौजसम् ।
कुशद्वीपात्परिभ्रष्टो ब्रह्मलोकञ्च गच्छति ॥ ३६ ।
अस्ति ब्रह्मसरोनाम गुह्यक्षेत्रं परं मम ।
यत्र धारा पतत्येका पुण्या भूमि शिलातले ॥ ३७ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चरात्रोषितो नरः ।
वसते सूर्य्यलोकेषु मम मार्गानुसारकः ॥ ३८ ।
अथाऽत्र मुञ्चते प्राणान् सूर्य्यधारां समाश्रितः ।

---

* देवा अपीति साधु । † मुञ्चतीति साधु, एवं परत्रापि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सूर्य्यलोकमतिक्रम्य मम लोकन्तु गच्छति ॥ ३९ ।
अस्ति धेनुवटं नाम गुह्यं क्षेत्रं परं मम ।
एका धारा पतत्यत्र देवि पूर्णा शिलोच्चयात्* ॥ ४० ।
तत्र स्नानम्प्रकुर्व्वीत एकमेकं दिनन्तथा ।
सप्तरात्रोषितोभूत्वा मम कर्म्मसमाश्रितः ॥ ४१ ।
स्नात्वा सप्तसमुद्रेषु लब्धसंज्ञः समाहितः ।
विहरेत्सप्तद्वीपेषु मम कर्म्मपरायणः ॥ ४२ ।
तत्राथ मुच्चते प्राणान्मम भक्तिसमन्वितः ।
सप्तद्वीपमतिक्रम्य मम लोकन्तु गच्छति ॥ ४३ ।
अस्ति धर्म्मोद्भवं नाम तस्मिन् क्षेत्रे परे मम ।
गिरिकुञ्जात्पतत्येका धारा भूमितले शुभा ॥ ४४ ।
तत्र स्नानम्प्रकुर्व्वीत एकरात्रोषितो नरः ।
स वैश्योजायते शूद्रो मम कर्म्मपरायणः ॥ ४५ ।
तत्राऽथ मुच्चते प्राणान् गुह्ये देवि शिलोच्चये ।
साङ्ख्यत्वं सदृशिष्यं भुक्का मां† प्रतिपद्यते ॥ ४६ ।
अस्ति कोटिवटं नाम क्षेत्रं गुह्यम्परं मम ।
एका धारा पतत्यत्र वटमूलमुपाश्रिता ॥ ४७ ।
तत्र स्नानन्तु कुरुते रात्रावुपोषितो नरः ।
यावन्ति वटपत्राणि तस्मिन् शृङ्गे परे मम ।
तावद्वर्षसहस्राणि रूपसम्पत्समन्वितः ।

---

* पूर्णशिलोच्चयादिति (ग)। † भक्तीमामिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तिष्ठति* तु वरारोहे मम मार्गानुसारिणि ॥ ४८।४९ ।
तत्राऽथ मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
अग्निवर्णस्ततोभूत्वा मम लोकाय गच्छति ॥ ५० ।
पापप्रमोचनं नाम गुह्यमस्मिन् परं मम ।
पतितैकतमा धारा स्थूला कुम्भसमा ततः ॥ ५१ ।
यस्तत्र कुरुते स्नानमहोरात्रोषितो नरः ।
जायते च चतुर्वेदी मम कर्म्मपरायणः ॥ ५२ ।
तत्राऽथ मुञ्चते प्राणान् कौशिकीमाश्रितो नदीम् ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
मोदते वासवे लोके मम मार्गानुसारिणि ॥ ५३ ।
तत्राथ मुञ्चते प्राणान्मम कर्म्मपरायणः ।
वासवं लोकमुत्सृज्य मम लोकञ्च† गच्छति ॥ ५४ ।
यमव्यसनकं नाम गुह्यमस्ति परं मम ।
स्रोतोवहति तत्रैकङ्कौशिकीमाश्रितं नदीम् ॥ ५५ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
न स गच्छति दुर्गाणि यमस्य व्यसनं महत् ॥ ५६ ।
अथ तत्र त्यजेत्प्राणान्मम कर्म्मपरायणः ।
विशुद्धोमुक्तपापोऽसौ मम लोकाय गच्छति ॥ ५७ ।
मातङ्गं नाम विख्यातं तस्मिन् क्षेत्रे परं मम ।
स्रोतोवहति तत्रैव आश्रितङ्कौशिकीं नदीम् ॥ ५८ ।

---

* तिष्ठतीति साधु । † मम लोकन्त्विति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्नानङ्कुर्व्वन्ति ये तत्र एकरात्रोषितो नरः ।
भेदङ्किम्पुरुषम्प्राप्य जायते नाऽत्र संशयः ।
विद्वान् शुचिश्च जायेत मम कर्म्मानुसारकः* ॥ ५९ ।
तत्राऽथ मुञ्चते प्राणान् गुह्ये देवि परे मम ।
मुक्त्वा किम्पुरुषभेदं मम लोकस्य गच्छति ॥ ६० ।
अस्ति वज्रभवं नाम गुह्ये तस्मिन् परं मम ।
स्रोतोवहति तत्रैकमाश्रितङ्कौशिकीं नदीम् ॥ ६१ ।
स्नानङ्करोति यस्तत्र एकरात्रोषितो नरः ।
जायते शक्रलोके तु मम कर्म्मानुसारकः ॥ ६२ ।
शरीरचक्रसञ्जाते वज्रहस्तः स्वरूपकः ।
तत्र स्नानप्रभावेण जायते नात्र संशयः ॥ ६३ ।
अथाऽत्र मुञ्चते प्राणान्मम चिन्तनतत्परः ।
शक्रलोकमतिक्रम्य मम लोकम्प्रपद्यते ॥ ६४ ।
तत्र त्रिक्रोशमात्रेण गुह्यं क्षेत्रम्परं मम ।
शक्ररुद्रेति† विख्यातं तस्मिन् कोकाशिलातले ॥ ६५ ।
स्नानङ्करोति यस्तत्र त्रिरात्रोपोषितो नरः ।
जम्बूद्वीपे प्रजायेत जम्बूर्यत्र प्रतिष्ठिता ।
जम्बूद्वीपं परित्यज्य जायते मम पार्श्वगः ॥ ६६ ।
अस्ति चान्यन्महद्भद्रे क्षेत्रे गुह्ये विशेषितम् ।
मनुजा येन गच्छन्ति मुक्त्वा संसारसागरम् ॥ ६७ ।

---

* सारतः इति (क), (ख) । † शक्ररुद्र इति सर्व्वं ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दंष्ट्राङ्कुरेति* विख्यातं यत्र कोका विनिःसृता ।
एतद्गुह्यं न जानन्ति यतोमुञ्चन्ति जन्तवः ॥ ६८ ॥
कृतोदकस्तत्र भद्रे अहोरात्रोषितो नरः ।
जायते शाल्मलिद्वीपे मम कर्म्मानुसारिणि ॥ ६९ ॥
तत्राऽथ मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
शाल्मलिद्वीपमुत्सृज्य मम पार्श्वे स तिष्ठति ॥ ७० ॥
तस्मिन्क्षेत्रे महागुह्ये परमस्ति फलोदयम् ।
विष्णुतीर्थमिति ख्यातं मम भक्तसुखावहम् ॥ ७१ ॥
ततः पर्व्वतमध्यात्तु कोकायाम्पतति† जलम् ।
त्रिस्रोतसं महाभागे सर्व्वसंसारमोचणम् ॥ ७२ ॥
तस्मिन् कृतोदकोभूमि छित्त्वा संसारबन्धनम् ।
वायोः स भवनम्प्राप्य वायुभूतस्तु तिष्ठति ॥ ७३ ॥
तत्राऽथ मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
वायुलोकमतिक्रम्य मम लोकं स गच्छति ॥ ७४ ॥
अस्ति तत्र वरं स्थानं सङ्गमङ्कौशिकोकयोः ।
सर्व्वकामिकेति विख्याता‡ शिला तिष्ठति चोत्तरे ॥ ७५ ॥
तत्र यः कुरुते स्नानमहोरात्रोषितोनरः ।
विस्तीर्णे जायते वंशे जातिं स्मरति चात्मनः ॥ ७६ ॥
स्वर्गे वा यदि वा भूमौ यं यङ्कामयते नरः ।
तं तं प्राप्नोति वै कामं स्नातमात्रः शिलातले ॥ ७७ ॥

---

* दंष्ट्राङ्कुरमिति साधु । † पततीति साधु । ‡ सर्व्वे कामिकेति (क), (ख) । चरणेऽत्र छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्राऽथ मुञ्चते प्राणाम्मम कर्म्मण्यवस्थितः ।
सर्व्वसङ्गं परित्यज्य मम लोकं स गच्छति ॥ ७८ ।
अस्ति मत्स्यशिला नाम गुह्यङ्कोकामुखे वरम् ।
धाराः पतन्ति तिस्रो वै कौशिकीमाश्रिता नदीम् ॥ ७९ ।
तत्र च स्नायमानस्तु* यदि मत्स्यं प्रपश्यति ।
ततोजानाम्यहं देवि प्राप्तोनारायणः स्वयम् ॥ ८० ।
तत्र मत्स्यं पुनर्दृष्ट्वा यजमानस्तु† सुन्दरि ।
दद्यादर्घ्यं ततो भद्रे मधुलाजसमन्वितम् ॥ ८१ ।
यस्तत्र कुरुते स्नानं देवि गुह्ये ततः परे ।
तिष्ठति‡ पद्मपत्रे तु सोत्तरे मेरुसंश्रिते ॥ ८२ ।
अथ संप्राप्य मुच्येत मत्स्यं गुह्यम्परं मम ।
मेरुशृङ्गं समुल्लङ्घ्य मम लोकाय गच्छति ॥ ८३ ।
पञ्चयोजनविस्तारं क्षेत्रङ्कोकामुखं मम ।
यस्त्वेतत्तु विजानाति न स पापेन लिप्यते ॥ ८४ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तस्मिन् कोकामुखे रम्ये तिष्ठामि दक्षिणामुखः ॥ ८५ ।
शिलाचन्दनसङ्काशं देवानामपि दुर्लभम् ।
वराहरूपमादाय तिष्ठामि पुरुषाकृतिः ॥ ८६ ।
वामोन्नतमुखङ्कृत्वा वामदंष्ट्रासमुन्नतम् ।
पश्यामि च जगत्सर्व्वं ये च भक्ता मम प्रियाः ॥ ८७ ।

* स्नांस्तु इति साधु । † स्नायमानतु इति (ग) । ‡ तिष्ठतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ये च मां स्मरते* भूमे पुरुषा मुक्तकिल्विषाः ।
तत्र कुर्व्वन्ति कर्म्माणि शुद्धाः संसारमोचणे ॥ ८८ ।
यदि कोकामुखङ्गच्छेत्कदाचित्कालपर्य्यये ।
मा ततो विनिवर्त्तेत यदीच्छेन्मम साम्यताम् ॥ ८९ ।
गुह्यानां परमङ्गुह्यमेतत्स्थानं परं महत् ।
सिद्धानाम्परमा सिद्धिर्गुह्यङ्कोकामुखम्परम् ॥ ९० ।
न च सांख्येन योगेन सिद्धिं यान्ति महत्पराम्† ।
याति कोकामुखङ्गत्वा रहस्यङ्कथितं मया ॥ ९१ ।
एवं श्रेष्ठं महाभागे यत्त्वया परिपृच्छितम्‡ ।
कथनङ्कथितं सर्व्वङ्किमन्यच्छ्रोतुमिच्छसि ॥ ९२ ।
य एतत्कथितम्भूमे कोकामुखमनुत्तमम् ।
तारिताः पितरस्तेन दश पूर्व्वास्तथा पराः ॥ ९३ ।
मृतो वा तत्र जायेत शुद्धे भागवते कुले ।
अनन्यमानसो भूत्वा मम मार्गप्रदर्शकः ॥ ९४ ।
यश्चेदं शृणुयान्नित्यङ्कल्य उत्थाय मानवः ।
सप्तपञ्चशतं जन्म मम भक्तश्च जायते ॥ ९५ ।
य एतत्पठते नित्यङ्कोकाख्यानन्तथोषसि ।
गच्छते परमं स्थानमेवमेतन्न संशयः ॥ ९६ ।

इति वराहपुराणे भगवच्छास्त्रे कोकामुखमाहात्म्यवर्णनं नाम
चत्वारिंशदधिकशततमोऽध्यायः ।

---

* स्मरन्तीति साधु । † महापरामिति साधु । ‡ परिपृष्टमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकचत्वारिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

तस्मिन्हिमवतः पृष्ठे परं गुह्यमतः* शृणु ।
वदरीति च विख्याता देवानामपि दुर्लभा ॥ १ ।
न तत्प्राप्नोति मनुजः कृत्वा कर्म्म सुदुष्करम् ।
प्राप्नुवन्ति च भक्ता ये वदरीं विश्वतारिणीम् ॥ २ ।
दुर्लभं तन्मम क्षेत्रं हिमकूटशिलातले ।
यस्तत्प्राप्नोति हि क्षेत्रं कृतकृत्यो भवेन्नरः ॥ ३ ।
ब्रह्मकुण्डमिति ख्यातमास्ते† तत्र शिलोच्चये ।
हिमसंस्थं तथात्मानङ्कृत्वा तिष्ठामि माधवि ॥ ४ ।
स्नानङ्करोति यस्तत्र त्रिरात्रोपोषितो नरः ।
अग्निष्टोमस्य यज्ञस्य फलम्प्राप्नोति मानवः ॥ ५ ।
मुञ्चेत्प्राणांस्तत्र यदि व्रतनिष्ठोजितेन्द्रियः ।
सत्यलोकमतिक्रम्य मम लोकञ्च गच्छति ॥ ६ ।
अग्निसत्यपदं नाम तस्मिन् क्षेत्रे परं मम ।
शृङ्गत्रयात्पतन्त्यत्र धारा मुसलसन्निभाः ॥ ७ ।
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
सत्यवादी भवेद्दची मम कर्म्मपरायणः ॥ ८ ।
यस्तत्र मुञ्चते प्राणान्यदि कृत्वा जलाशयम् ।

---

* गुह्यतमं शृणु इति (ग)। † शस्तं तत्रेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सत्यलोकमतिक्रम्य मम लोके स मोदते ॥ ९ ।
इन्द्रलोकमिति ख्यातं बदर्य्याञ्च ममाश्रमम् ।
तत्राहन्देवि शक्रेण निष्कलम्परितोषितः ॥ १० ।
तत्र चैव तु शृङ्गेभ्यः स्थूलधारा पतेत्पुनः ।
स्थूले शिलातले तत्र मम धर्म्मो व्यवस्थितः ॥
स्नानङ्करोति यस्तत्र एकरात्रोषितो नरः ।
सत्यव्वादी शुचिर्भूत्वा सत्यलोके महीयते ॥ ११।१२ ।
अथात्र मुञ्चते प्राणान् कृत्वा चानाशकं व्रतम् ।
सत्यलोकमतिक्रम्य मम लोकेषु तिष्ठति ॥ १३ ।
अस्ति पञ्चशिखं* नाम बदर्य्यामाश्रमम्प्रति ।
यत्र धाराः पतन्त्यत्र पञ्चशृङ्गसमाश्रिताः ॥ १४ ।
यस्तत्र कुरुते स्नानं पञ्चस्रोतसि मानवः ।
अश्वमेधफलम्प्राप्य दैवतैः सह मोदते ॥ १५ ।
यद्यत्र मुञ्चते† प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
स्वर्गलोकमतिक्रम्य मम लोके महीयते ॥ १६ ।
चतुःस्रोतमिति ख्यातं तस्मिन् क्षेत्रे परे मम ।
धाराः पतन्ति चत्वारि चतुरो‡ दिशमाश्रिताः ॥ १७ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
मोदते नाकपृष्ठे तु मम भक्तश्च§ जायते ॥ १८ ।

* पञ्चशिखा नामेति (क) । † मुञ्चतीति साधु, एवमन्यत्र । ‡ धारादिक्शब्दयोः स्त्रीलिङ्गत्वात् चत्वारि चतुर इति आर्षं, चतस्र इति साधु । § भक्तिश्चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथ प्राणान् परित्यज्य कृत्वा कर्म्म सुदुष्करम् ।
नाकपृष्ठमतिक्रम्य मम लोकं प्रपद्यते ॥ १८ ।
वेदधारमिति* ख्यातं तस्मिन् क्षेत्रे परे मम ।
यत्र ब्रह्ममुखाद्भ्रष्टा वेदाश्चत्वार एव च ॥ २० ।
तत्रैव हिमवत्पृष्ठे चतुःशृङ्गाद्दहत्तराः ।
धाराः पतन्ति चत्वारि विषमाश्च शिलोच्चये ॥ २१ ।
यस्तत्र कुरुते स्नानं चतूरात्रोषितो नरः ।
चतुर्णामपि देवानाङ्गहणे कारणम्भवेत् ॥ २२ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपथे स्थितः ।
देवलोकमतिक्रम्य मम लोके प्रतिष्ठते ॥ २३ ।
द्वादशादित्यकुण्डेति† तस्मिन् क्षेत्रे परे मम ।
यत्र ते द्वादशादित्या देवि संस्थापिता मया ॥ २४ ।
तत्र पर्व्वतशृङ्गे तु स्थूलमूले शिलातले ।
द्वादश पतति‡धारा मम कर्म्म सुखावहाः ॥ २५ ।
यस्तत्र कुरुते स्नानं यां काञ्चिद्द्वादशीं प्रति ।
यत्र ते द्वादशादित्यास्तत्र गच्छेन्न संशयः ॥ २६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मणि संस्थितः ।
समतिक्रम्य चादित्यान्मम लोके महीयते ॥ २७ ।
लोकपालमिति ख्यातं तस्मिन् क्षेत्रे परे मम ।
तत्र ते लोकपालास्तु मया संस्थापिताः पुरा ॥ २८ ।

---

* वेदधारा इतीति (ग) । † कुण्डमिति साधु। ‡ पतन्तीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र पर्व्वतमध्ये तु स्थलकुण्डं वृहन्मम ।
भित्त्वा पर्व्वतमुद्गीर्ण* यत्र सोमसमुद्भवः ॥ २९ ।
तत्र स्नानन्तु कुर्व्वीत ज्येष्ठमासस्य द्वादशीम् ।
मोदते लोकपालेषु मम भक्तश्च जायते ॥ ३० ।
अथात्र मुञ्चति प्राणान्मम कर्म्मसु तत्परः ।
लोकपालानतिक्रम्य मम लोकम्प्रपद्यते ॥ ३१ ।
अस्ति मेरोर्व्वरं नाम तस्मिन् गुह्यम्परं मम ।
तत्र स्थितेन भूमे तु मेरुः संस्थापितः स्वयम् ॥ ३२ ।
धारास्तिस्रः पतन्त्यत्र सुवर्णसदृशप्रभाः ।
पतेत्तु तज्जलम्भूमौ† व्यक्तिं नैवोपलभ्यते‡ ॥ ३३ ।
यस्तत्र कुरुते स्नानन्त्रिरात्रोपोषितो नरः ।
मोदते मेरुशृङ्गेषु मम भक्तश्च§ जायते ॥ ३४ ।
अथ तत्र मृतोदेवि तस्मिन् गुह्ये परे मम ।
मेरुपृष्ठमतिक्रम्य मम लोकाय गच्छति ॥ ३५ ।
मानसोद्भेदमिति च तत्रान्यत्तीर्थमुत्तमम् ।
पृथ्वीमुद्भिद्य मध्ये तु जलङ्गच्छति सत्वरम् ॥ ३६ ।
देवाप्येवं¶ न जानन्ति तं देशं तत्र संस्थितम् ।
मानुषा हि विजानन्ति भूम्यां पतति तज्जलम् ॥ ३७ ।
यस्तत्र कुरुते स्नानमहोरात्रोषितो नरः ।

---

* भित्त्वा पर्व्वतमुद्गार इति (ग) । † पतितं तज्जलमित्येवं कृते साधु स्यात् ।
‡ व्यक्तिर्नैवोपलभ्यते इति वहुषु पाठः । § मम भक्तिश्चेति (ग) । ¶ देवा अपीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मोदते मानसे दिव्ये मम भक्तश्च जायते ॥ ३८ ।
अस्ति पञ्चशिरं नाम तस्मिन्गुह्यं परं मम ।
ब्रह्मणा छिद्यते यत्र शिरश्चैव महाद्युति ॥ ३९ ।
तत्र वै पञ्च कुण्डानि स्थूलशीर्षशिलोच्चये ।
पञ्चात्र शिरसः* स्थाने बहुधारासमन्विताः ॥ ४० ।
यत्र तन्मध्यमं कुण्डं छिन्नमिव स्वयम्भुवा ।
तत्र रक्तजला भूमिर्दृश्यते धारसङ्कुला ॥ ४१ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
मोदते ब्रह्मलोकस्थो मम भक्तश्च जायते ॥ ४२ ।
तथात्र मुञ्चते प्राणान्गुह्ये पञ्चशिरे मम ।
जलचान्द्रायणङ्कृत्वा† मम कर्म्मसु निष्ठितः ॥ ४३ ।
बुद्धिमान्मतिमांश्चैव रागमोहविवर्ज्जितः ।
ब्रह्मलोकमतिक्रम्य मम लोकाय गच्छति ॥ ४४ ।
अस्ति सोमाभिषिकेति‡ तीर्थमन्यत्परं मम ।
राजत्वे ब्राह्मणानान्तु मया सोमोऽभिषेचितः§ ॥ ४५ ।
तत्राहं तोषितस्तेन अत्रिपुत्रेण माधवि ।
नवपञ्चककोट्यस्तु¶ कृत्वा कर्म्म सुदुष्करम् ।
प्राप्तश्च परमां सिद्धिं मत्प्रासादाद्वसुन्धरे ॥ ४६ ।
तदायत्तं जगत्सर्व्वं व्रीहयः परमौषधीः‖ ।

---

* शिरसामिति (ग)। † जलं चान्द्रायणमिति (ग)। ‡ सोमाभिषेकमिति साधु।
§ अभिषेचित इति स्वार्थे णिच्। ¶ नवपञ्चककोटीस्तु, नवपञ्चककोटिं तु वा साधु।
‖ औषध्यः औषधय इति वा साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जायन्तेऽस्मिन्प्रलीयन्ते स्कन्देन्द्राः समरुद्गणाः ।
भूमि सोममयं सर्व्वं मम संस्थम्भविष्यति ॥ ४७ ।
तत्र सोमगिरिर्नाम यत्र धारा पतेद्भुवि ।
कुण्डेऽरण्ये विशाले तु एतत्ते कथितं मया ॥ ४८ ।
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
मोदते सोमलोकेषु एवमेतन्न संशयः ॥ ४९ ।
अथात्र म्रियते देवि कृत्वा कर्म्म सुदुष्करम् ।
सोमलोकमतिक्रम्य मम लोकम्प्रपद्यते ॥ ५० ।
अस्ति चोर्वशिकुण्डेति* गुह्यक्षेत्रे परं मम ।
यत्र चैवोर्वशी भित्त्वा दक्षिणोरुमजायत ॥ ५१ ।
तत्र तप्याम्यहन्देवि देवानामपि कारणात् ॥ ५२ ।
न मां कश्चिद्विजानाति स्वात्मानो हि विजानते ।
ततोमि तप्यमानस्य बहुवर्षव्यतिक्रमात् ।
देवा अपि न जानन्ति वज्रिब्रह्ममहेश्वराः ॥ ५३ ।
एकैकेन फलेनाऽत्र वदर्य्यान्तु सुनिश्चितम् ।
बहुवर्षसहस्रन्तु तपश्चीर्णं मया भुवि ॥ ५४ ।
तत्राहं दशकोट्यस्तु दशवर्षं दशार्वुदम् ।
दश भूमि तथान्यानि पद्मानि तपसि स्थितः ॥ ५५ ।
ततस्ते मां न पश्यन्ति देवा गुह्यपथे स्थितम् ।
विस्मयं परमं जग्मुर्देवा दुःखपरायणाः ॥ ५६ ।

---

* उर्व्वशीकुण्डमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अहम्पश्यामि सर्व्वं वै तपःसंस्थो वसुन्धरे ।
न मां सर्व्वे प्रपश्यन्ति योगमायासमावृताः ॥ ५७ ।
ततस्ता देवताः सर्व्वाः प्रत्यूचुश्च पितामहम् ।
विष्णुना च विना लोके शान्तिर्नैव लभामहे ॥ ५८ ।
देवानान्तु वचः श्रुत्वा ब्रह्मा लोकपितामहः ।
योगमायापटच्छन्नङ्कथयामास मां तदा ॥ ५९ ।
ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः ।
तत्र जग्मुर्महाभागे तुष्यन्तः परमं मुदा ।
विभावयन्ति मां तत्र देवा इन्द्रपुरोगमाः ॥ ६० ।
त्वया नाथ परित्यक्ता दुःखिताः शर्म्मवर्ज्जिताः ।
त्रायस्व नो हृषीकेश परमानुग्रहेण वै ॥ ६१ ।
एतत्कृत्वा विशालाक्षि देवान् प्रणतिपूर्व्वकम् ।
मया विलोकिताः सर्व्वे परां निर्वृतिमागताः ॥ ६२ ।
एतस्मिन्नुर्व्वशीकुण्डे एकरात्रोषितो नरः ।
यः स्नाति सर्व्वपापेभ्यो मुच्यते नात्र संशयः ।
उर्व्वशीलोकमासाद्य क्रीड़ते कालमक्षयम् ॥ ६३ ।
यस्तत्रोत्सृजते* प्राणान्मम कर्म्मपरायणः ।
पुण्यपापविनिर्मुक्तो याति मल्लयताम्प्रिये ॥ ६४ ।
वदरीमाश्रमं पुण्यं यत्र यत्र स्थितः स्मरेत् ।
स याति वैष्णवं स्थानं पुनरावृत्तिवर्ज्जितः ॥ ६५ ।
य इदं शृणुयान्नित्यं मद्भक्तः सततम्पठेत् ।

* उत्सृजतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ब्रह्मचारी जितक्रोधः सत्यवादी जितेन्द्रियः।
ध्यानयोगरतो नित्यं स मुक्तिफलभाग्भवेत् ॥ ६६ ।
यस्यैतद्विदितं सर्व्वं ध्यानयोगं वसुन्धरे ।
योऽवगच्छति चात्मानं स गच्छेत्परमाङ्गतिम् ॥ ६७ ।

इति वराहपुराणे भगवच्छास्त्रे बदरिकाश्रममाहात्म्यवर्णनं नाम एकचत्वारिंशदधिकशततमोऽध्यायः ।

द्वाचत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

ततो देववचः श्रुत्वा धर्म्मकामा वसुन्धरा ।
कृताञ्जलिपुटा भूत्वा प्रसादयति माधवम् ॥ १ ।

धरण्युवाच ।

दास्यां मे प्रणयङ्कृत्वा विज्ञाप्यं शृणु माधव ।
मृदुना च स्वभावेन वच्यामि त्वां जनार्द्दन ॥ २ ।
अल्पप्राणबला नार्य्यो यत्त्वया परिभाषितम् ।
अशक्ताः सहितुं* ह्येताः क्षुधामनशनेऽबलाः ॥ ३ ।
भुञ्जमाना नरा ह्यत्र रजसा यान्ति शं परम् ।
अन्नं ह्यनुग्रहन्देव येन ते कर्म्मसंश्रिताः ॥ ४ ।
तस्यास्तद्वचनं श्रुत्वा माधव्याः स तु माधवः ।

---

* सोढुमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रहस्य भावशुद्धात्मा तत एवम्प्रभाषति* ॥ ५ ।

वराह उवाच ।

साधु देवि वरारोहे मम कर्म्मव्यवस्थिते ।
पृष्टोऽहं परमङ्गुह्यं मम भक्तसुखावहम् ॥ ६ ।
स्पृष्टा या रजसा देवि मम कर्म्मपरायणा ।
मां संस्पृशन्तु तत्रस्थं यत्र तिष्ठामि सुन्दरि ॥ ७ ।
यदि भावस्तदा कश्चिद्भोजने कायसाधने ।
चित्तन्यस्य† मयि चौणि भोक्तव्यञ्च न संशयः ॥ ८ ।
न सा लिप्यति दोषेण भुञ्जमाना रजस्वला ।
अञ्जलिं शिरसा कृत्वा मयोक्तं मन्त्रमुत्तमम् ॥ ९ ।
अनादिमध्यान्तमजं पुराणं
रजस्वला देववरं नमामि ।
तत एतेन मन्त्रेण भुक्त्वा देवि रजस्वला ।
करोति यानि कर्म्माणि न सा दुष्येत कर्हिचित् ॥ १० ।
स्नात्वा सा तु महाभागे पञ्चमात्तु दिनात्पुनः ।
यथार्हङ्कुरुते कर्म्म मच्चित्ता मत्परायणाः ।
प्राप्नुयात्पुरुषत्वञ्च न्यस्तसंसारचिन्तनात् ॥ ११ ।

धरण्युवाच ।

पुरुषा वा स्त्रियो वापि न पुमांसो न वा‡ स्त्रियः ।
कथन्दोषेण मुच्यन्ते जन्मसंसारबन्धनात् ॥ १२ ।

---

* प्रभाषते इति साधु । † चित्तन्यस्येति (क), (ख) । ‡ न चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच ।

इन्द्रियाणि निगृह्याथ* चित्तमप्यनुवेश्य च ।
मयि सन्न्यासयोगेन मम कर्म्मपरायणः ।
मम योगेषु सन्न्यासमेकचित्तो दृढ़व्रतः† ॥ १३ ।
एवं कुर्व्वन्महाभागे स्त्रियोवा पुन्नपुंसकम् ।
ज्ञानसन्न्यासयोगं वा यदीच्छेत्परमाङ्गतिम् ॥ १४ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मनो बुद्धिश्च चित्तञ्च ते ह्यनीशाः शरीरिणाम् ।
एकचित्तं मनः कृत्वा ज्ञानेन पृथुलोचने ।
समचित्तं प्रपद्यन्ते न ते लिप्यन्ति मानवाः ॥ १५।१६ ।
सर्व्वभक्ष्याणि भक्षन्तः पेयापेयांस्तथैव च ।
समं चित्तं‡ मयि यदि तदा तस्य न च क्रिया ॥ १७ ।
चित्तं मनश्च बुद्धिश्च मत्संस्थञ्च समं यदि ।
यत्किञ्चित्कुर्व्वतः कर्म्म पद्मपत्रमिवाम्भसि ।
संयोगान्न च लिप्येत समत्वादेव नान्यथा ॥ १८ ।
रात्रिन्दिवं मुहूर्त्तं वा क्षणं वा यदि वा कला ।
निमेषं वा त्रुटिं वाथ§ देवि चित्तं समङ्कुरु ॥ १९ ।
सदा दिवानिशोश्चैव कुर्व्वन्तः कर्म्मसङ्करम् ।
तेऽपि यान्ति परां सिद्धिं यदि चित्तं व्यवस्थितम् ॥ २० ।
जाग्रतः स्वपतो वापि शृखतः पश्यतोऽपि वा ।

* निगृह्यार्थेति (ग) । † अत्र तिष्ठेत्किमप्यन्यद्वा क्रियापदमूह्यम् । ‡ समचित्तमिति (ग) । § वापीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

योमां चित्ते चिन्तयति मच्चिन्तस्य च किम्भयम्* ॥ २१ ।
दुर्वृत्तमपि चाण्डालं ब्राह्मणं चाऽपथि स्थितम् ।
तन्तु देवि प्रशंसामि नान्यचित्तं कदाचन ॥ २२ ।
यजन्तः सर्व्वधर्म्मज्ञा ज्ञानसंस्कारसंस्कृताः ।
मयि चित्तं समाधाय मम कर्म्मपरायणाः ॥ २३ ।
ये मत्कर्म्माणि कुर्व्वन्ति मया हृदि समाश्रिताः ।
सुखनिद्रां समादाय स्वपन्तः कर्म्मसंस्थिताः ॥ २४ ।
येषां प्रसङ्गतश्चित्तं तेऽपि देवि मम प्रियाः ।
सर्व्वमात्मनि कर्म्म स्वं शुभं वा यदि वाऽशुभम् ॥ २५ ।
प्राप्नुवन्ति च दुःखानि भ्रमच्चित्ता नराधमाः ।
चित्तं नाशोहि लोकस्य चित्तं मोक्षस्य कारणम्† ॥२६।
तस्माच्चित्तं समादाय माम्प्रपद्यस्व मेदिनि ।
न्यस्य ज्ञानञ्च योगञ्च एकचित्ता भजस्व माम् ॥ २७ ।
मच्चित्तः सततं यो मां भजेत नियतव्रतः ।
मत्पार्श्वम्प्राप्य परमं मद्भावायोपपद्यते ॥ २८ ।
मया चैव पुरा सृष्टं प्रजार्थेन वसुन्धरे ।
मासे मासे तु गन्तव्यमृतुकाले व्यवस्थितम् ।
एकचित्तं समादाय यदीच्छेत मम प्रियम् ॥ २९ ।
न गच्छेद्यदि मासे तु ऋतुकालव्यवस्थितम् ।

---

* (ग) पुस्तके मम चित्तस्य च किम्भयमिति पाठोऽत्र एकाक्षराधिक्यं वर्त्तते ।

† मोक्षस्य कर्म्मण इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पितरस्तस्य हन्यन्ते दश पूर्व्वा दशापराः ॥ ३० ।
न तत्र कामलोभेन मोहेन च वसुन्धरे ।
त्यक्त्वानङ्गञ्च मोहञ्च पित्रर्थाय स्त्रियं व्रजेत् ॥ ३१ ।
द्वितीयान्न स्पृशेन्नारीं लोभमोहात्कथञ्चन ।
न संस्पृशेत्तृतीयान्तु चतुर्थीं न कदाचन ॥ ३२ ।
कृते सम्भोगधर्म्मे तु कृतकौतुकसंस्थितः ।
शयने न स्त्रियं पश्येद्यदीच्छेच्छुद्धिमुत्तमाम् ॥ ३३ ।
कौतुके कृतकृत्ये तु मम कर्म्मपरायणाः ।
जलस्नानं ततः कुर्य्यादन्यवस्त्रपरिग्रहम् ॥ ३४ ।
अपूर्णे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम् ।
रेतःपाः पितरस्तस्य एवमेतन्न संशयः ॥ ३५ ।
एकान्तु पुरुषो याति द्वितीयाङ्कामसोहितः ।
तृतीयां वा चतुर्थीं वा तदा स पुरुषाधमः ॥ ३६ ।
सर्व्वस्यैव तु लोकस्य समयोऽयं हि मत्कृतः ।
ऋतुकाले तु सर्व्वासां पित्रर्थंभोग इष्यते ।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः ॥ ३७ ।
न गच्छति च यः क्रोधान्मोहाद्वा पुरुषाधमः ।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषश्चरन् ॥ ३८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
ज्ञानन्तु चित्तयोगस्य कर्म्मयोगस्य यत्क्रिया* ॥ ३९ ।

* एवं हि समापकक्रियान्तरमपेक्षते, यत् क्रियामिति कृते तस्य च शृणुष्वेत्यनेनान्वये न दोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कर्म्मणा यान्ति मत्स्थानं यान्ति मद्ध्याननिष्ठिताः ।
यान्ति योगविदः स्थानं नास्ति चान्या परा गतिः ॥ ४० ।
ज्ञानं योगश्च साङ्ख्यञ्च नास्ति चित्तव्यपाश्रितम् ।
लभन्ते पुष्कलां सिद्धिं मम मार्गानुसारिणः ॥ ४१ ।
यस्तु भागवती भूत्वा ऋतुकाले व्यवस्थितः ।
वायुभक्षस्ततस्तिष्ठेद्भूमे त्रीणि दिनानि च ॥ ४२ ।
अथ तत्र चतुर्थे तु दिने प्राप्ते वसुन्धरे ।
कृत्वा वै सिद्धिकर्म्माणि न गच्छत्यपराणि च ॥ ४३ ।
ततः स्नानेन कुर्व्वीत शिरसोमलशोधनम् ।
शुक्लाम्बरधरोभूत्वा चित्तङ्कृत्वा समाहितम् ॥ ४४ ।
ततोबुद्धिं मनश्चैव समङ्कृत्वा वसुन्धरे ।
पश्चात्कुर्व्वन्ति कर्म्माणि सदा ते मे हृदि स्थिताः ॥ ४५ ।
मम प्रापणकङ्कृत्वा ततः कुर्व्वन्ति भोजनम् ।
अञ्जलिं शिरसा कृत्वा मयोक्तं कर्म्म सस्मितम्* ॥ ४६ ।
तत्र मन्त्रः—आदिर्भवान्गुप्तमनन्तमध्यो
रजस्वला देव वयं नमामः ।
उपोषितास्त्रीणि दिनानि चैवं
मुक्तौ रतं† वासुदेवं नमामः ॥ ४७ ।
तत एतेन मन्त्रेण शुद्धा भूमे रजस्वलाः ।
ये तु कुर्व्वन्ति कर्म्माणि स्नातास्नातानि भागशः ॥ ४८ ।

---

* कर्म्म संज्ञितमिति (ग) । † सूक्तौ रतमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं न दुष्यते देवि नारी वा पुरुषोऽपि वा ।
कुर्व्वन्ति मम कर्म्माणि ते यथावन्मम प्रियाः ॥ ४९ ।
सर्व्वाण्यनुदिनक्षद्रे मम चित्तानुसारिणः ।
प्राप्नुयात्पुरुषः स्त्री वा रजसा दूषिता अपि ॥ ५० ।
एकचित्तस्ततो भूत्वा भूमि चेन्द्रियनिग्रहात् ।
मम योगिष्टसन्न्यासं यदीच्छेत्परमाङ्गतिम् ॥ ५१ ।
एवङ्कुर्व्वन्ति ये नित्यं स्त्रियः पुंसोनपुंसकाः ।
ज्ञाने सत्यप्ययोगानां मम कर्म्मसु कर्म्मिणाम् ॥ ५२ ।
अद्यापि मां न जानन्ति नराः संसारसंस्थिताः ।
ते वै भूमि विजानन्ति* ये मद्भक्त्या व्यवस्थिताः ॥ ५३ ।
मातापितृसहस्राणि पुत्रदारशतानि च ।
चक्रवत्परिवर्त्तन्ते यन्मोहान्मां न जानते ॥ ५४ ।
अज्ञानेनावृतो लोको मोहेन च वशीकृतः ।
सङ्गैश्च बहुभिर्बद्धस्तेन चित्तं न सन्न्यसेत् ॥ ५५ ।
अन्यत्र गच्छते† माता पिता चान्यत्र गच्छति ।
पुत्राश्चान्यत्र गच्छन्ति दासश्चान्यत्र गच्छति ॥ ५६ ।
जायन्ते चात्मनः स्थाने स्वस्वकर्म्मसमुद्भवे ।
ज्ञानमूढ़ा वरारोहे नराः संसारमोहिताः ॥ ५७ ।
अल्पकालं परश्चैव माससंवत्सरेति च ।
भविष्यन्ति पुनः कृत्वा न मे मूर्त्त्यां सहासते ॥ ५८ ।

---

* विजानन्त इति (क) (ख) । † गच्छतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यस्यैतद्विदितं सर्व्वं न्यासयोगं वसुन्धरे ।
योगि न्यस्य सदात्मानं मुच्यते न च संशयः ॥ ५९ ।
य एतच्छृणुयान्नित्यं कल्यमुत्थाय मानवः ।
पुष्कलां लभते सिद्धिं मम लोकञ्च गच्छति ॥ ६० ।
एतत्ते कथितम्भद्रे रहस्यम्परमं महत् ।
त्वया पृष्टञ्च यद्देवि मम भक्तसुखावहम् ॥ ६१ ।

इति वराहपुराणे भगवच्छास्त्रे गुह्यकर्म्ममाहात्म्यवर्णनं नाम
द्विचत्वारिंशदधिकशततमोऽध्यायः ।

त्रयश्चत्वारिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि एकान्तं शृणु सुन्दरि ।
स्थानं मे परमं गुह्यं मद्भक्तानां सुखावहम् ॥ १ ।
जाह्नव्या दक्षिणे कूले विन्ध्यपृष्ठसमाश्रितम् ।
मन्दारेति* च विख्यातं सर्व्वभागवतप्रियम् ॥ २ ।
तत्र त्रेतायुगे भूमे रामो नाम महाद्युतिः† ।
भविष्यति न सन्देहः स च मां स्थापयिष्यति ॥ ३ ।

---

* मन्दारमितीति साधु, एवं परत्र । † महाकृतिरिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारायणमुखाच्छ्रुत्वा धर्म्मकामा वसुन्धरा ।
उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम् ॥ ४ ।

धरण्युवाच ।

देव देव महादेव हरे नारायण प्रभो ।
मन्दारेति त्वया प्रोक्तं देव धर्म्मार्थसंयुतम् ॥ ५ ।
मन्दारे कानि कर्म्माणि कुर्व्वन्ति च ततो नराः ।
कांश्च लोकान् प्रपद्यन्ते तत्र कर्म्मकृतो नराः ॥ ६ ।
मन्दारे कानि गुह्यानि रहस्यञ्चिञ्च तत्र वै ।
वक्तुमर्हस्यशेषेण परङ्कौतूहलं मम ॥ ७ ।

वराह उवाच ।

शृणु सुन्दरि यत्नेन यन्मान्त्वम्परिपृच्छसि ।
कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम् ॥ ८ ।
क्रीड़मानोऽस्म्यहं तत्र मन्दारे पुष्पिते तदा ।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥ ९ ।
ततो ममाभवच्चिन्ता मन्दारे पर्व्वतस्थिते ।
तत्रैकादशकुण्डानि निःसृतानि गिरौ धरे ॥ १० ।
विन्ध्ये च मत्प्रभावेण मन्दारश्च महाद्रुमः ।
स्थितोऽहं तत्र सुभगे भक्त्यानुग्रहकामया ॥ ११ ।
दर्शनीयतमं स्थानं मनोज्ञञ्च शिलातलम् ।
यत्र तिष्ठाम्यहं देवि मन्दारद्रुममाश्रितः ॥ १२ ।
विस्मयं शृणु सुश्रोणि मन्दारेऽस्मिन्महाद्रुमे ।
द्वादश्याञ्च चतुर्द्दश्यां स पुष्पति महाद्रुमः ॥ १३ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र मध्याह्नवेलायां वीक्ष्यमाणोजनैस्ततः।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन॥ १४।
तस्मिन्मन्दारकुण्डे तु एकभक्तोषितो नरः।
स्नानङ्करोति शुद्धात्मा स गच्छेत्परमाङ्गतिम्॥ १५।
अथ प्राणान्प्रमुच्येत कुण्डे मन्दारसंस्थिते।
तपः कृत्वा वरारोहे मम लोकाय गच्छति॥ १६।
तस्य चोत्तरपार्श्वे च प्रापणं नाम तद्गिरिम्।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः॥ १७।
स्नानकुण्डमिति ख्यातं तस्मिन् क्षेत्रे परं मम।
दक्षिणे पतति* धारा स्रवते चोत्तरामुखम्॥ १८।
तत्र स्नातो वरारोहे एकरात्रोषितो नरः।
मोदनं दक्षिणे शृङ्गे तस्मिन्मेरौ शिलोच्चये॥ १९।
तत्राथ मुञ्चयेत्प्राणान्मम† कर्म्मपरायणः।
सर्व्वसङ्गम्परित्यज्य मम लोकाय गच्छति॥ २०।
तस्य पूर्व्वोत्तरे पार्श्वे गुह्यं वैकुण्ठकारणम्।
यत्र धारा पतत्येका हरिद्रावर्णसन्निभा॥ २१।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः।
नाकपृष्ठं समासाद्य मोदते सह दैवतैः॥ २२।
तथाऽत्र‡ मुञ्चते प्राणान् कृतकृत्यः सुनिश्चितः।

* पततीति साधु, एवं परत्र। † मोचयेदिति साधु। मुञ्चते प्राणान्ममेति (ग)।
‡ तत्राथेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तारयित्वा कुलं सर्व्वं मम लोकम्प्रपद्यते ॥ २३ ।
तस्य दक्षिणपूर्व्वेण समस्रोतो वराङ्गने ।
पतते विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः ॥ २४ ।
तत्र स्नानन्तु कुर्व्वीत एकभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥ २५ ।
अथात्र मुञ्चते प्राणान्मम चित्तव्यवस्थितः ।
छित्त्वा वै सर्व्वसंसारं मम लोकाय गच्छति ॥ २६ ।
मन्दारस्य तु पूर्व्वेण गुह्यकोटरसंस्थितम् ।
यत्र धारा पतत्येका मुसलेन समन्विता ॥ २७ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे च मेरौ तस्मिञ्छिलोच्चये ॥ २८ ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति ॥ २९ ।
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र मुसलेन समन्विताः ॥ ३० ।
तत्र स्नानम्प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे महामेरौ शिलोच्चये ॥ ३१ ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं परित्यज्य मम लोकम्प्रपद्यते* ॥ ३२ ।
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ।

* मेरुशृङ्गं परित्यज्य मम लोकञ्च गच्छतीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अत्र धारा पतत्येका आदित्यसमतेजसा ॥ ३३ ।
तत्र स्नानं प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते ॥ ३४ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मव्यवस्थितः ।
सर्व्वपापविनिर्मुक्तो मम लोके च मोदते ॥ ३५ ।
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम् ।
चक्रावर्त्तमिति ख्यातमगाधश्च महाह्रदः ॥ ३६ ।
स्नानङ्करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते मेरुशृङ्गेषु स्वच्छन्दगमनालयः ॥ ३७ ।
अथ वै मुञ्चते प्राणांश्चक्रवर्त्ती महायशाः ।
शृङ्गान्सर्व्वान् परित्यज्य मोदते मम सन्निधौ ॥ ३८ ।
दिशं वायव्यमाश्रित्य तस्मिन्विन्ध्यशिलोच्चये ।
तिस्रो धाराः पतन्त्यत्र मुसलाकृतयः शुभाः ॥ ३९ ।
तत्र स्नानम्प्रकुर्व्वीत मम चित्तव्यवस्थितः ।
मोदते सर्व्वशृङ्गेषु एकचित्तं समाश्रितः ॥ ४० ।
अथात्र मुञ्चते प्राणांस्तस्मिन् गुह्ये यशस्विनि ।
सर्व्वसङ्गम्परित्यज्य मम लोकाय गच्छति ॥ ४१ ।
तस्य विक्रोशमात्रेण दक्षिणां दिशमाश्रितः ।
गुह्यो गभीरको नाम अगाधश्च महाह्रदः ॥ ४२ ।
तत्र स्नानम्प्रकुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते सर्व्वद्वीपेषु स्वच्छन्दगमनालयः ॥ ४३ ।
अथ वै मुचते प्राणान्मम कर्म्मव्यवस्थितः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वद्वीपान् परित्यज्य मम लोकम्प्रपद्यते ॥ ४४ ।
तस्य पश्चिमपार्श्वे तु गुह्यं वै परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः ॥ ४५ ।
तत्र स्नानम्प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते शक्रलोके तु स्वच्छन्दगमनालयः ॥ ४६ ।
अथ वै मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
सर्व्वसङ्गम्परित्यज्य मम लोकम्प्रपद्यते ॥ ४७ ।
मण्डलं तस्य चैत्रस्य कथ्यमानं मया शृणु ।
समन्तपञ्चकञ्चैव मन्दारस्य गिरौ मम ।
तत्र तिष्ठामि सुश्रोणि विन्ध्यस्य गिरिमूर्द्धनि ॥ ४८ ।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये ।
दक्षिणे संस्थितञ्चक्रं वामे स्थाने च वै गदा ॥ ४९ ।
य एतच्छृणुयान्नित्यं गुह्यं मन्दारसंस्थितम् ।
लाङ्गले मुसलञ्चैव शङ्खस्तिष्ठति चाग्रतः ।
तव चैव प्रियार्थाय मम भक्तसुखावहम् ॥ ५० ।
एतन्न जानते केचिन्मम मायाविमोहिताः ।
मुच्य* भागवताञ्छुद्धान्ये च वाराहसंश्रिताः ॥ ५१ ।

इति वराहपुराणे भगवच्छास्त्रे मन्दारमहिमवर्णनी नाम
त्रयश्चत्वारिंशदधिकशततमोऽध्यायः ।

---

* मुक्तेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।
श्रुत्वा मन्दारमाहात्म्यं धर्म्मकामा वसुन्धरा ।
विस्मयम्परमङ्गत्वा पुनः पप्रच्छ माधवम् ॥ १ ।
धरण्युवाच ।
मया देवप्रसादेन श्रुतं मन्दारवर्णनम् ।
मन्दारात्परमं स्थानं विष्णो तद्वक्तुमर्हसि ॥ २ ।
वराह उवाच ।
शृणु तत्त्वेन मे देवि यन्मान्त्वं परिपृच्छसि ।
कथयिष्यामि मे गुह्यं शालग्राममिति स्मृतम् ॥ ३ ।
द्वापरे तु युगे भूमे यदूनाङ्कुलसङ्कुले ।
तत्र शूर इति ख्यातो यदूनां वंशवर्द्धनः ॥ ४ ।
तस्य पुत्त्रो महाभागे सर्व्वकर्म्मपरायणः ।
वसुदेवो गृहे जातो यादवानां कुलोद्वहः ॥ ५ ।
तस्य भार्य्या च वसुधे सर्व्वावयवसुन्दरी ।
देवकी नाम नाम्ना च मनोज्ञा शुभदर्शना ॥ ६ ।
तस्या गर्भे महाभागे भविष्यामि न संशयः ।
वासुदेव इति ख्यातो देवानामरिमर्द्दनः ॥ ७ ।
ततोऽपि संस्थिते तत्र यादवानां कुलोद्वहे ।
तत्र ब्रह्मर्षिपरमः सालङ्कायन एव च ॥ ८ ।
ममैवाराधनार्थाय भ्रमते स दिशो दश ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुत्त्रार्थं स तपस्तेपे मेरुशृङ्गे समाहितः ॥ ९ ॥
ततः पिण्डाकरे गत्वा मम क्षेत्रे वसुन्धरे।
लोहार्गले ततो गत्वा सहस्रञ्चैव तिष्ठति ॥ १० ।
ईश्वरेण समं पूर्व्वं* सर्व्वयोगेश्वरं स्थितम्।
न च मां पश्यते† देवि मार्गमाण इतस्ततः ॥ ११ ।
ईश्वरेण समम्पूर्व्वमहमासं वसुन्धरे।
तस्यैव तप्यमानस्य सालङ्कायनकस्य ह ॥ १२ ।
तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः।
शालग्रामे गिरौ तस्मिञ्छिलारूपेण तिष्ठति ॥ १३ ।
अहन्तिष्ठामि तत्रैव गिरिरूपेण नित्यदा।
तस्मिञ्छिलाः समग्रास्तु मत्स्वरूपा न संशयः।
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ॥ १४ ।
लिङ्गरूपेण च हरस्तत्र देवालये गिरौ।
शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः ॥ १५ ।
सोमेश्वराधिष्ठितस्तु शिवरूपी गिरिः स्मृतः।
सोमेन तत्र संस्थाप्य स्वनाम्ना लिङ्गमुत्तमम्।
वर्षाणान्तु सहस्रं वै स्वशापस्य निवृत्तये ॥ १६ ।
ततः शापात्‡द्विनिर्मुक्तः तेजसा च परिप्लुतः।
स्वकं तेजो बलम्प्राप्य तुष्टाव गिरिजापतिम्।
सोमेश्वराच्च वरदमाविर्भूतन्त्रियम्बकम् ॥ १७ ।

---

* पुत्त्रमिति (ग)। † पश्यतीति साधु। ‡ ततः चयादिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सोम उवाच ।
शिवं सौम्यमुमाकान्तभक्तानुग्रहकातरम् ।
नतोऽस्मि पञ्चवदनं नीलकण्ठं त्रिलोचनम् ॥ १८ ।
शशाङ्कशेखरन्दिव्यं सर्व्वदेवनमस्कृतम् ।
पिनाकपाणिं देवेशं भक्तानामभयप्रदम् ॥ १९ ।
त्रिशूलिनं डमरुणा लसद्धस्तं वृषध्वजम् ।
नानामुखैर्गणैर्जुष्टं नानारूपैर्भयानकैः ॥ २० ।
त्रिपुरघ्नं महाकालमन्धकारिनिषूदनम् ।
गजाजिनावृतं स्थाणुं व्याघ्रचर्म्मविभूषितम् ॥ २१ ।
नागभोगोपवीतञ्च रुद्रमालधरम्प्रभुम् ।
अरूपमपि सर्व्वेशं भक्तेच्छोपात्तविग्रहम् ॥ २२ ।
वह्निसोमार्कनयनं मनोवाचामगोचरम् ।
जटाजूटप्रकटितं गङ्गासम्मार्ज्जितांहसम् ।
कैलासनिलयं शम्भुं हिमाचलकृताश्रमम् ॥ २३ ।
एवं स्तुतस्तदा शम्भुरिन्दुं वचनमब्रवीत् ।
वरं वरय भद्रन्ते यत्ते मनसि वर्त्तते ।
दुर्लभं दर्शनं यस्मात्प्राप्तवानसि गोपते ॥ २४ ।
सोम उवाच ।
वरन्ददासि चेद्देव मम लिङ्गे सदा वस ।
एतल्लिङ्गस्य भक्तानां पूरयस्व मनोरथम् ॥ २५ ।
देवदेव उवाच ।
विष्णुसान्निध्यमप्यत्र सदैव निवसाम्यहम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दिग्भिषतस्त्वदीयेऽस्मिन्नद्यप्रभृति गोपते।
ममैवान्या परा मूर्त्तिस्त्वं शशाङ्क न संशयः ॥ २६ ।
एतल्लिङ्गार्च्चकानाञ्च भक्तानां मम सर्व्वदा ।
वरान्दास्यामि भद्रन्ते देवानामपि दुर्लभान् ॥ २७ ।
सालङ्कायनकाख्यस्य मुनेस्तु तपसो बलात् ।
विष्णुना सह संमन्त्र्य स्थितावावां कलानिधे ॥ २८ ।
शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः ।
तयोः पर्व्वतयोर्या वै शिला विष्णुशिवाभिधाः ॥ २९ ।
रेवया च कृतं पूर्व्वन्तपः शिवस्तुतिष्टिदम् ।
मम त्वत्सदृशः पुत्रो भूयादिति विभूतया* ॥ ३० ।
अहङ्कस्यापि न सुतः किङ्करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ।
निश्चित्यैवं तदा प्रोक्तः प्रसन्नेनान्तरात्मना ॥ ३१ ।
लिङ्गरूपेण ते देवि गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये ॥ ३२ ।
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन आवामेकत्र संस्थितौ ॥ ३३ ।
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्याते ततःप्रभृति गोपते ॥ ३४ ।
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधौ ।

---

* विभो तया इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शीर्णपर्णाशनङ्कृत्वा वायुभक्षाऽप्यनन्तरम् ।
दिव्यवर्षशतं तेपे* विष्णुं चिन्तयती तदा ॥ ३५ ।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः ।
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ॥ ३६ ।
गण्डकि त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे ।
अनविच्छिन्नया भक्त्या वरं वरय सुव्रते ।
किं देयन्तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि ॥ ३७ ।
गण्डक्यापि पुरा दृष्ट्वा शङ्खचक्रगदाधरम् ।
दण्डवत्प्रणता भूत्वा ततः स्तोतुम्प्रचक्रमे ॥ ३८ ।
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि ।
त्वया सर्व्वमिदं सृष्टं जगत्स्थावरजङ्गमम् ॥ ३९ ।
तदनु त्वम्प्रविष्टोऽसि पुरुषस्तेन चोच्यसे ।
त्वन्नीलोन्मीलिते विश्वे कः स्वतन्त्रोऽस्ति वै पुमान् ॥ ४० ।
अनाद्यन्तमपर्य्यन्तं यद्ब्रह्म श्रुतिबोधितम् ।
तदेव त्वं महाविष्णो यस्त्वां वेद स वेदवित् ॥ ४१ ।
तवैवाद्या जगन्माता या शक्तिः परमा स्मृता ।
तां योगमायाप्रकृतिम्प्रधानमिति चक्षते ॥ ४२ ।
निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपो निरञ्जनः ।
आनन्दरूपः शुद्धात्मा ह्यकर्त्ता निर्विकारकः ॥ ४३ ।
स्वां योगमायामाविश्य कर्त्तृत्वम्प्राप्तवानसि ।

---

* तत्रेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रकृत्या सृज्यमानेऽस्मिन्द्रष्टा साक्षी निगद्यसे ॥ ४४ ।
प्रकृतेस्त्रिगुणैरस्मिन् सृज्यमानेऽपि नान्यथा ।
सान्निध्यमात्रतो देव त्वयि स्फुरति कारणे ॥ ४५ ।
स्फटिके हि यथा स्वच्छे जवाकुसुमरागतः ।
प्रकाश्यते त्वप्रकाशाज्ज्योतीरूपं नताऽस्मि तत् ॥ ४६ ।
ब्रह्मादयोऽपि कवयो न विदन्ति यथार्थतः ।
तत्कथं वेद्म्यहं मूढ़ा तव रूपं निरञ्जनम् ॥ ४७ ।
मूढ़स्य जगतो मध्ये स्थिता किञ्चिदजानती ।
त्वया धृता* कृता चास्मि योग्यायोग्यमविन्दती ॥ ४८ ।
तेन लोके महत्त्वञ्च त्वत्प्रसादेन चेच्छिता† ।
ययाचेऽन्नतयोदार तन्मे दातुं त्वमर्हसि ।
दयालुरसि दीनेषु नेति मां न वद प्रभो ॥ ४९ ।
ततः प्रोवाच भगवान्देवि यद्यत्त्वमिच्छसि ।
तद्याचय वरारोहे अदेयमपि सर्व्वथा ॥ ५० ।
यद्दुर्लभं मनुष्याणां शीघ्रं याचय मां प्रति ।
मद्दर्शनमनुप्राप्य को वाऽपूर्णो मनोरथः ॥ ५१ ।
ततो हिमांशो सा देवी गण्डकी लोकतारिणी ।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥ ५२ ।
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्त्रतां व्रज ॥ ५३ ।

---

* त्वया धृतेति (ग) । † इच्छतीति (ग), वस्तुत इच्छन्तीति कृते सङ्गतिः स्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततः प्रसन्नो भगवांश्चिन्तयामास गोपते ।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ।
दास्यामि याचितं येन लोकानां भवमोचनम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ।
गण्डकीमवदत्प्रीतः शृणु देवि वचो मम ॥ ५४ ।
शालग्रामशिलारूपी तव गर्भगतः सदा ।
स्थास्यामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥ ५५ ।
मत्सान्निध्यान्नदीनान्त्वमतिश्रेष्ठा भविष्यसि ।
दर्शनात्स्पर्शनात्स्नानात्पानाच्चैवावगाहनात् ।
हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ॥ ५६ ।
यः स्नास्यति विधानेन देवर्षिपितृतर्पकः ।
तर्पयेत्स्वपितॄंश्चापि तारयित्वा दिवं नयेत् ।
स्वयं मम प्रियो भूत्वा ब्रह्मलोकङ्गमिष्यति ॥ ५७ ।
यदि त्वय्युत्सृजेत्प्राणान्मम कर्म्मपरायणः ।
सोऽपि याति मम स्थानं यत्र गत्वा न शोचति ॥ ५८ ।
एवं दत्त्वा वरान्देव्यै तत्रैवान्तरधीयत ॥ ५९ ।
ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिञ्छशलाञ्छन ।
अहञ्च भगवान्विष्णुर्भक्तेच्छोपात्तविग्रहः ॥ ६० ।
एवमुक्त्वा द्विजपतिमन्वगृह्णात्* हरः प्रभुः ।
प्रभासयन्नुडुपतेरङ्गानि प्रममार्ज्ज ह ॥ ६१ ।

---

* अनुगृह्येति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शङ्करेण करेणापि नीरुजानि विधाय च ।
पश्यतस्तस्य तु विधीस्तत्रैवान्तरधीयत ॥ ६२ ।
सोमेशाद्दक्षिणे भागे वाणेनाद्रिं विभिद्य वै ।
रावणेन प्रकटिता जलधाराऽतिपुण्यदा ।
वाणगङ्गेति विख्याता या स्नाता अघहारिणी ॥ ६३ ।
सोमेशात्पूर्व्वदिग्भागे रावणस्य तपोवनम् ।
यत्र स्थित्वा त्रिरात्रेण तपसः फलमश्नुते ॥ ६४ ।
यत्र नृत्येन देवेशस्तुष्टस्तस्मै वरं ददौ ।
तेन रावणनृत्येन प्रख्यातो नर्त्तनाचलः ॥ ६५ ।
स्नात्वा तु वाणगङ्गायां दृष्ट्वा वाणेश्वरं प्रभुम् ।
गङ्गास्नानफलम्प्राप्य मोदते देववद्दिवि ॥ ६६ ।
सालङ्कायनकोऽप्याशु तेपे तस्मिन्परं मम ।
शालग्रामे महातीव्रमास्थितम्परमन्तपः ॥ ६७ ।
अन्यच्च ते प्रवक्ष्यामि परङ्गुह्यं वसुन्धरे ।
तप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ।
प्राप्यामीति परं भावं ज्ञात्वा देवो महेश्वरः ।
सुन्दरन्त्वपरं रूपं धृत्वा दृष्टिसुखावहम् ।
सालङ्कायनपुत्त्रत्वं योगमायामुपाश्रितः ॥ ६८।६९ ।
प्राप्तोऽपि तं न जानाति दक्षिणम्पार्श्वमास्थितः* ।
मायायोगबलोपेतस्त्यक्तो वै शूलपाणिधृक् ।

---

*. आश्रित इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः ।
स तं न ज्ञायते* जातं ममैवाराधने स्थितः ॥ ७०।७१ ।
अथ नन्दी प्रहस्याह महादेवाज्ञया मुनिम् ।
उत्तिष्ठ मुनिशार्दूल सफलस्ते मनोरथः ।
त्वद्वीर्याङ्गाज्जातोऽस्मि पुत्रस्ते शाधि मां प्रभो ॥ ७२ ।
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मह्यं† सदृशोऽन्यो न कश्चन ।
विचार्य्येति तवाहं वै जातोऽस्मि स्वयमेव च ॥ ७३ ।
तपसाराधयन्देवं शङ्खचक्रगदाधरम् ।
प्राप्तोऽसि परमां सिद्धिं त्वत्पुत्रोऽहं यतः स्थितः ॥ ७४ ।
श्रुत्वा तन्नन्दिनो वाक्यं प्रहृष्टवदनो मुनिः ।
विस्मितस्तु तदोवाच कथं नाद्यापि मे हरिः ।
दृग्गोचरत्वमायाति जातश्चेत्तपसः फलम् ॥ ७५ ।
यावत्तं न समीक्षिष्ये तावन्न विरतस्तपः ।
अहमत्रैव वत्स्यामि यावदच्युतदर्शनम् ॥ ७६ ।
पुत्र त्वमपि योगेन मथुरां व्रज सत्वरम् ।
मदाश्रमे तत्र पुण्ये धनं गोव्रजसङ्कुलम् ।
आमुष्यायणमादाय शीघ्रमत्र समानय ॥ ७७ ।
ततस्त्वाज्ञां समादाय नन्दी सत्वरमाव्रजत् ।
गत्वा च मथुरां तस्य ऋषेराश्रममीक्ष्य‡ च ।
दृष्ट्वामुष्यायणं तत्र पृष्ट्वा नाम तमच्युत ।

* न जानातीति साधु । † मम स्थाने मह्यमिति आर्षम् । ‡ ईक्षित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गृहे वित्ते च कुशलमपृच्छद्गोधनेषु च ॥ ७८ ।
सालङ्कायनशिष्योऽपि आमुष्यायणसंज्ञितः ।
सर्व्वत्र कुशलं साधो प्रभावात्तु गुरोर्मम ।
गुरोश्च कुशलं ब्रूहि कुत्रास्ते स तपोधनः ॥ ७९ ।
भवान् कुतः समायातः किमत्रागमकारणम् ।
तन्मे विस्तरतो ब्रूहि अर्घ्यञ्चैवोपगृह्यताम् ॥ ८० ।
इत्युक्तः सोऽर्घ्यमादाय विश्रम्य च ततो गुरोः ।
वृत्तान्तं कथयामास स्वागमस्य च कारणम् ॥ ८१ ।
ततस्तेनैव सहितो गोधनं तत्प्रगृह्य च ।
दिनैः कतिपयैश्चैव गण्डकीतीरमाश्रितः ॥ ८२ ।
शनैरुत्तीर्य्य च ततस्त्रिवेणीं प्राप्य हर्षितः* ।
देविका नाम देवानाम्प्रभावाच्च तपस्यताम् ।
नियमार्थं समुद्भूता गण्डक्या मिलिता शुभा ॥ ८३ ।
आश्रमादपरा चासीत्पुलस्त्यपुलहाश्रमात् ।
गण्डक्या मिलिता सापि त्रिवेणी गण्डकीत्यभूत् ॥ ८४ ।
कामिकं तन्महातीर्थं पितॄणामतिवल्लभम् ।
तत्र स्थितं महालिङ्गं त्रिजलेश्वरसंज्ञितम् ।
मुक्तिभुक्तिप्रदं देवि दर्शनादघनाशनम् ॥ ८५ ।

धरण्युवाच ।

प्रयागे या त्रिवेणीति यत्र देवीमहेश्वरः ।
शूलटङ्क इति ख्यातः सोमेश इति चापरः ॥ ८६ ।

---

* हृष्टौ, हर्षितौ वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वेणिमाधवनाम्नाऽपि यत्र विष्णुः स्वयं स्थितः।
गङ्गा च यमुना चैव सरस्वत्यपरा नदी ॥ ८७ ।
सर्व्वेषाञ्चैव देवानामृषीणां सरसामपि।
सर्व्वेषाञ्चैव तीर्थानां समाजस्तत्र मे श्रुतः ॥ ८८ ।
यत्राप्लुता दिवं यान्ति मृता मुक्तिं प्रयान्ति च।
तीर्थराज इति ख्यातं तत्तीर्थङ्शिवप्रियम्।
सैव त्रिवेणी विख्याता किमपूर्व्वाम्प्रशंससि ॥ ८९ ।
एतद्गुह्यतमम्प्रोक्तं त्वया विष्णो न संशयः।
तत्कथ्यतां महाभाग लोकानां हितकाम्यया।
मय्यनुक्रोशबुद्ध्या च कृपां कुरु दयानिधे ॥ ९० ।

वराह उवाच।

शृणुष्व देवि भद्रं ते यद्गुह्यम्परिपृच्छसि।
अत्र ते कीर्त्तयिष्यामि सेतिहासाङ्कथां शुभाम् ॥ ९१ ।
पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया।
हिमालये गिरौ रम्ये देवतागणसेविते ॥ ९२ ।
ततो बहुतिथे काले याते* सति तपस्यतः।
तीव्रन्तेजः प्रादुरासीद्येन लोकाश्चराचराः ॥ ९३ ।
तस्योष्मणा समुद्भूतः स्वेदपूरस्तु गण्डयोः।
तेन जाता धुनी दिव्या लोकानामघहारिणी ॥ ९४ ।
महर्लोकादयः सर्व्वे विस्मिताः सर्व्वतो दिशम्।

---

* गते सतीति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्य प्रभवमिच्छन्तो ज्ञातुं नेशुः कथञ्चन ॥ ९५ ।
देवाः सर्व्वे ततो जग्मुर्ब्रह्माणम्प्रति चोत्सुकाः ।
पप्रच्छुः प्रभवन्तस्य प्रणम्य च पुनः पुनः ॥ ९६ ।
ब्रह्मापि हि न जानाति मोहितस्तस्य मायया ।
ततो देवैः समं ब्रह्मा शङ्करम्प्रत्युपस्थितः ॥ ९७ ।
तं दृष्ट्वा सहसा देवैः समेतं प्रत्युपस्थितम् ।
पप्रच्छ तं महादेवस्तदागमनकारणम् ॥ ९८ ।
ब्रह्मा तञ्च महादेवम्पप्रच्छ प्रणतः स्थितः ।
अत्यद्भुतं महत्तेजः किमुद्भूतं महेश्वर ॥ ९९ ।
येन प्रत्याहता ह्याऽसौ जगद्यातिकरावहत् ।
किन्तु स्यात्कथमेतत्स्यात्कश्चास्य प्रभवो विभो ॥ १०० ।
शिवः क्षणं ततो ध्यात्वा ब्रह्माद्यान् प्रत्युवाच ह ।
महसोऽस्य समुत्पत्तिं महतो दर्शयामि वः ॥ १०१ ।
जगाम देवसहितः सोमः सहगणः प्रभुः ।
यत्रास्ते भगवान्विष्णुर्महता तपसान्वितः ॥ १०२ ।
उवाच परमप्रीतस्तदा शम्भुः स्मयन्निव* ।
तपस्यसि किमिच्छन्त†स्त्वं कर्त्ता जगताम्प्रभुः ।
सर्व्वाधारोऽखिलाध्यक्षस्तत्किं यत्तव दुर्ल्लभम् ॥ १०३ ।
एवमुक्तः प्रत्युवाच प्रणम्य जगताम्प्रभुः ।
अहं लोकहितार्थाय तपस्तप्तुं समुद्यतः ॥ १०४ ।

---

* स्मयमान इवेति साधु । † इच्छन्निति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्वत्तो वरानभीप्सन्वै त्वद्दर्शनसमुत्सुकः ।
त्वद्दर्शनमनुप्राप्य कृतार्थोऽस्मि जगत्पते ॥ १०५ ।

शिव उवाच ।

मुक्तिक्षेत्रमिदं देव दर्शनादेव मुक्तिदम् ।
गण्डस्वेदोद्भवा यत्र गण्डकी सरितां वरा ।
भविष्यति न सन्देहो यस्या गर्भे भविष्यसि ॥ १०६ ।
त्वयि स्थिते जगन्नाथे तव सान्निध्यकारणात् ।
अहं ब्रह्मा च देवाश्च ऋषिभिः सह केशव ।
सर्वे वेदाश्च यज्ञाश्च सर्वतीर्थानि चाप्युत ।
वसिष्यामः सदैवात्र गण्डक्यां जगताम्पते ॥ १०७।१०८ ।
कार्त्तिकं सकलं मासं यः स्नास्यति नरः प्रभो ।
सर्वपापविनिर्मुक्तो मुक्तिभागी न संशयः ॥ १०९ ।
तीर्थानां परमं तीर्थं मङ्गलानाञ्च मङ्गलम् ।
यत्र स्नानेन लभ्येत गङ्गास्नानफलं नरैः ॥ ११० ।
स्मरणाद्दर्शनात्स्पर्शान्निष्पापो जायते नरः ।
यस्यास्तत्समताङ्गान्या लभेद्गङ्गां विना नदीम् ॥ १११ ।
यत्र सा परमा पुण्या गण्डकी भुक्तिमुक्तिदा ।
अपरा देविका नाम्ना* गण्डक्या सह सङ्गता ॥ ११२ ।
पुलस्त्यपुलहौ पूर्वं तेपाते परमन्तपः ।
यत्र सृष्टिविधानार्थङ्कृत्वाश्रमपदं पृथक् ।

---

* नाम्नीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सृष्टेर्विधानसामर्थ्यं यत्र लब्धं ततः परम् ॥ ११३ ॥
ततोऽभूद्ब्रह्मतनया पुण्या सा सरितां वरा* ।
गण्डक्या यत्र मिलिता ब्रह्मपुत्री यशस्विनी† ॥ ११४ ॥
त्रिवेणी सा महापुण्या देवानामपि दुर्लभा ।
धरे जानीहि तत्क्षेत्रं योजनम्परमार्च्चितम् ॥ ११५ ॥
पुरा वेदनिधेः पुत्रौ जयो विजय एव च ।
यजनाय गतौ राज्ञा वृतौ तौ कर्द्दमात्मजौ ।
तृणविन्दोः सुतौ पापौ जातौ दृष्ट्वैव सुव्रतौ ॥ ११६ ॥
यज्ञविद्यासुनिपुणौ वेदवेदाङ्गपारगौ ।
पूजयन्तौ हरिम्भक्त्या तन्निष्ठेन्द्रियमानसौ ॥ ११७ ॥
ययोः पूजयतोर्नित्यं सान्निध्यं किल केशवः ।
ददाति पूजाऽवसरे भक्त्या किल वशीकृतः ॥ ११८ ॥
मरुत्तेन कदाचित्तावाहूतौ कुशलौ द्विजौ ।
राज्ञा समाप्तयज्ञेन पूजयित्वा पुरस्कृतौ ॥ ११९ ॥
दक्षिणाभिस्तोषयित्वा विसृष्टौ गृहमागतौ ।
विभागङ्कर्त्तुमारब्धौ पस्पर्द्धाते परस्परम् ॥ १२० ॥
समो विभागः कर्त्तव्य इति ज्येष्ठोऽभ्यभाषत ।
विजयश्चाब्रवीच्चैनं येन लब्धं हि तस्य तत् ॥ १२१ ॥
जयोऽब्रवीदसामर्थ्यं मन्वानो मां ब्रवीषि किम् ।
न ददासि गृहीत्वा यत्तस्माद्ग्रहत्वमाप्नुहि ॥ १२२ ॥

---

* पुरा पुण्या सरिद्वरेति (ग) । † सर्व्वदेवसमन्विता इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विजयोऽप्यब्रवीन्नूनमन्धीभूतोऽसि किन्धनैः।
गजो भव मदान्धस्त्वं यो मामिवम्प्रभाषसे ॥ १२३ ।
एवन्तौ ग्राहमातङ्गावभूतां शापतः पृथक्।
गण्डक्यामिव सञ्जातो ग्राहः पूर्व्वस्मृतिर्द्विजः॥ १२४ ।
त्रिवेणीक्षेत्रमध्ये तु जयोऽभूद्वै महान् गजः।
करिशावैर्गजाभिश्च क्रीड़मानो वने वसन् ॥ १२५ ।
बह्वन्यब्दसहस्राणि व्यतीतानि तयोस्तदा।
वने विहरतोर्भूमे शापमोहितयोः सतोः॥ १२६ ।
कदाचित्स गजः स्नातुं करेणुगणसंवृतः।
त्रिवेणीमभितो यातोऽवगाहनपरायणः॥ १२७ ।
सिञ्चन् करेणूस्ताभिश्च सिच्यमानो जलम्पिवन्।
स्वयञ्च पाययंस्ताश्च चिक्रीड़ प्रीतमानसः॥ १२८ ।
एवं संक्रीड़तस्तत्र दैवयोगेन तस्य हि।
ग्राहः सम्प्रेरितः पूर्व्वं वैरयोगमनुस्मरन्।
जग्राह सुदृढ़म्पादं गजोऽपि च विषाणतः।
ग्राहं विव्याध सोऽप्येनमाकर्षयत तज्जले ॥ १२९।१३०।
तयोर्युद्धं समभवदनेकाब्दं विकर्षणैः।
आकर्षणैश्च बहुभिर्दन्तभेदैः परस्परम् ॥ १३१ ।
प्रयुद्धयोस्तयोरेवं मत्सरग्रस्तयोः सतोः।
सत्त्वानि पीड़ितान्यासन्ननेकानि क्षयं ययुः॥ १३२ ।
ततो जलेश्वरो राजा भगवन्तं व्यजिज्ञपत्।
तेन विज्ञापितो देवो भगवान् भक्तवत्सलः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सुदर्शनेन चक्रेण ग्राहास्यं समपाटयत् ॥ १३३ ।
क्षिप्तं पुनः पुनस्तत्तु शिलाः सङ्घट्टयन्धरे ।
सङ्घट्टनात्तु चक्रस्य शिलाश्चक्रेण लाञ्छिताः ॥ १३४ ।
बाहुल्येन बभूवुर्हि तस्मिन् क्षेत्रे परे मम ।
वज्रकीटैश्च ज्ञातानि सन्ततानि विलोकय ॥ १३५ ।
न सन्देहस्त्वया कार्य्यस्त्रिवेणीं प्रति सुन्दरि ।
त्रिवेणीक्षेत्रमहिमा एवन्ते परिकीर्त्तितः ॥ १३६ ।
यदा च भरतो राजा पुलस्त्यस्याश्रमान्तिके ।
शिला पर्य्यचरद्दिष्णुं त्रिजलेशमपूजयत् ॥ १३७ ।
ततःप्रभृति तस्यासीद्भरतेनारतिस्फुटम् ।
पुनश्च मृगदेहान्ते जड़ः स भरतोऽभवत् ॥ १३८ ।
तेनैव पूजितो यस्माज्जलेश्वर इति स्मृतः ।
यस्य सम्पूजनाद्भक्त्या योगसिद्धिः प्रजायते ॥ १३९ ।
शालग्रामे परे क्षेत्रे यदाहं सुभगे स्थितः ।
तत्र ज्ञात्वा जलेशेन स्तुतोऽहं वसुधे महि ॥ १४० ।
ततो भक्तकृपावेशात् क्षिप्तवांस्तत्सुदर्शनम् ।
प्रथमं पतितं यत्र तत्र तीर्थं ततोऽभवत् ॥ १४१ ।
तत्र स्नानेन तेजस्वी सूर्य्यलोके महीयते ।
यदि प्राणैर्वियुज्येत मम लोके महीयते ॥ १४२ ।
भक्तसंरक्षणार्थाय मयाक्षिप्तं सुदर्शनम् ।
यत्र यत्र भ्रमति तत्तत्र तत्र शिलाङ्किताः ।
एवं तद्वै भ्रमात्क्षिप्तं सर्व्वं चक्रमयन्त्वभूत् ॥ १४३ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततः स पञ्चरात्राणि स्थित्वा वै विधिपूर्व्वकम्।
गोधनान्यग्रतः कृत्वा हरिक्षेत्रं जगाम ह॥ १४४।
हरिणाधिष्ठितक्षेत्रं पूजनीयं ततः स्मृतम्।
यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः।
स्थितवांस्तद्दिनादेतत् ख्यातं हरिहरप्रभम्*।
देवानामटनाच्चैव देवाट इति संज्ञितम्॥ १४५।
तस्य देवस्य महिमा केन वक्तुं हि शक्यते।
स शूलपाणिर्देवेशो भक्ताभयविधायकः।
मुनिभिर्देवगन्धर्व्वैः सेव्यतेऽचिन्त्यशक्तिमान्॥ १४६।
तस्मिन् स्थाने महादेवः सालङ्कायनकस्य हि।
पुत्त्रत्वं नन्दिरूपेण प्राप्तः साक्षाच्छिवः प्रभुः॥ १४७।
स्वयञ्चैव महायोगी योगसिद्धिविधायकः।
आस्थितः परमम्पीठं तीर्थे चैव त्रिधारके॥ १४८।
त्रिजटाभ्योऽभवन्धारास्तिस्रो वै परमाद्भुताः।
गङ्गा च यमुना चैव पुण्या चैव सरस्वती।
एतत्त्रैधारिकन्तीर्थन्त्रिजटाभ्यः समुत्थितम्॥ १४९।
यत्र शम्भुः स्थितः साक्षान्महायोगी महेश्वरः।
शालग्रामाभिधे क्षेत्रे हरिशीलनतत्परः।
दिशन् ज्ञानं स्वभक्तानां संसाराद्येन मुच्यते॥ १५०।
तीर्थे त्रिधारे यः स्नात्वा सन्तर्प्य पितृदेवताः।

---

* हरिहरात्मकमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

महांयोगिनमभ्यर्च्य न भूयोजन्मभाग्भवेत् ॥ १५१ ।
तस्यैव पूर्व्वदिग्भागे हंसतीर्थमिति स्मृतम् ।
तत्रैकङ्कौतुकं वृत्तन्तच्छृणुष्व महत्तरम् ॥ १५२ ।
कदाचिच्छिवरात्र्यान्तु भक्तैः पूजामहोत्सवे ।
नैवेद्यैर्विविधैः स्पष्टैः पूजयित्वा तु योगिनम् ।
तत्र काकाः समुत्पेतुरन्ने तस्मिन् बुभुक्षिताः ।
गृहीत्वान्नन्तु तत्काकस्तेन उड्डीय निर्गतः ।
तद्ग्रहीतुम्परः काकस्तेनायुध्यत चाम्बरे ॥ १५३ ।
तावुभौ युध्यमानौ तु कुण्डे तस्मिन्निपेततुः ।
तत्र हंसौ ततोभूत्वा निर्गतौ चन्द्रवर्चसौ ॥ १५४ ।
तद्दृष्ट्वा महदाश्चर्य्यं तत्र ये मिलिता जनाः ।
हंसतीर्थमिति प्रोचुस्ततः प्रभृति सत्तमे* ।
ततः प्रभृति तत्तीर्थं हंसतीर्थमिति स्मृतम्† ॥ १५५ ।
पूर्व्वं यक्षकृतन्तत्तु यक्षतीर्थमिति स्मृतम् ।
तत्र स्नातोनरःशुद्धोयक्षलोके महीयते ॥ १५६ ।
तत्राऽथ मुञ्चते प्राणान् शिवभक्तिपरायणः ।
यक्षलोकमतिक्रम्य मम लोकं प्रपद्यते ॥ १५७ ।
एवम्प्रभावन्तत्तीर्थं महायोगिप्रभावतः ।
अहं शिवश्च लोकानामनुग्रहपरायणौ ॥ १५८ ।
एतत्ते सर्व्वमाख्यातङ्क्षेत्रं गुह्यं वसुन्धरे ।

---

* स्वच्छं देवि तथाऽनघमिति (क), (ख) । † एतदर्द्धं (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आरभ्य मुक्तिक्षेत्रं* तत्क्षेत्रं द्वादशयोजनम् ।
शालग्रामस्वरूपेण मया यत्र स्थितं स्वयम् ।
स्वभक्तानां विशेषेण परमानन्ददायकम् ।
गुह्यानां परमङ्गुह्यङ्किमन्यच्छ्रोतुमिच्छसि ॥ ॥ १५९।१६० ।

इति वराहपुराणे भगवच्छास्त्रे सोमेश्वरादिलिङ्गमहिम-मुक्तिक्षेत्रत्रिवेण्यादि-महिमकथनं नाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।

पञ्चचत्वारिंशदधिकशततमोऽध्यायः ।

धरण्युवाच ।
भगवन्देवदेवेश सालङ्कायनको मुनिः ।
किञ्चकार तपः कुर्व्वंस्तव क्षेत्रे विमुक्तिदे ॥ १ ।
वराह उवाच ।
अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ।
तप्यमानोयथान्यायं पश्यते* शालमुत्तमम् ॥ २ ।
अभिन्नमतुलच्छायं विशालं पुष्पितन्तथा ।
मनोज्ञञ्च सुगन्धञ्च देवानामपि दुर्लभम् ॥ ३ ।

---

* आराममुक्तिक्षेत्रमिति क्वचित्पाठः ।

* पश्यतीति साधु । एवं परत्रापि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऋषिर्ज्ञानपरिश्रान्तः सालङ्कायनकोऽद्भुतम् ।
पश्यते च पुनः शालं शुभानां शुभदर्शनम् ॥ ४ ।
ततो दृष्ट्वा महाशालं परिश्रान्तो महामुनिः ।
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ॥ ५ ।
शालस्य तस्य पूर्व्वेण स्थितः पश्चान्मुखो मुनिः ।
मायया मम मूढ़ात्मा शक्तोद्रष्टुं न मामभूत् ॥ ६ ।
ततः पूर्व्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥ ७ ।
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥ ८ ।
मत्तेजसा ताड़िताचः शनैरुन्मील्य लोचने ।
यावत्पश्यति मां तत्र स्तुवन् स तपसान्वितः ।
वृचस्य दच्चिणे पार्श्वे गतस्तावदहन्धरे* ॥ ९ ।
पूर्व्वस्थानं परित्यज्य स ऋषिः शंसितव्रतः ।
स्थित्वा मत्प्रमुखे चैव स्तुवन्नेवं मम प्रियम् ॥ १० ।
ततोऽहं स्तूयमानो वै ऋग्वेदस्यैव ऋग्गतैः ।
स्तोत्रैः सम्पूज्यमानो हि गतोऽस्मि पश्चिमान्दिशम् ॥ ११ ।
ततः पश्चिमपार्श्वे तु स्थितस्तत्रैव माधवि ।
यजुर्वेदोक्तमन्त्रेण संस्तुतः पश्चिमाङ्गतः ॥ १२ ।
स्तुवतीत्थं मुनौ देवि गतोऽहमुत्तरान्दिशम् ।

---

* गतस्तावदहसुन्धरे इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्रापि* सामवेदोक्तैर्मन्त्रैस्तुष्टाव मां मुनिः॥ १३ ।
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।
प्राप्तश्च परमाम्प्रीतिं तमवोचमृषिं तदा॥ १४ ।
साधु ब्रह्मन्महाभाग सालङ्कायन सत्तम ।
तपसानेन सन्तुष्टः स्तुत्या चैवानया तव ।
वरं वरय भद्रं ते संसिद्धस्तपसा भवान्॥ १५ ।
एवमुक्तः स तु मया सालङ्कायनकोमुनिः ।
शालवृक्षं समाश्रित्य निभृतेनान्तरात्मना॥ १६ ।
ततो मां भाषते देवि स ऋषिः संशितव्रतः ।
तवैवाराधनार्थाय तपस्तप्तं मया हरे॥ १७ ।
पर्य्यटामि महीं सर्व्वां सशैलवनकाननाम्।
इदानीं खलु दृष्टोऽसि चक्रपाणे महाप्रभो॥ १८ ।
यदि तुष्टोऽसि मे देव सर्व्वशान्तिकरः परः ।
यदि देयोवरोमह्यं तपसाराधितेन च ।
तदा देहि जगन्नाथ ममेश्वरसमं सुतम्।
एष एव वरोमह्यं दीयतां मधुसूदन॥ १९।२० ।
एवं वरं याचितोऽस्मि मुनिना भीमकर्म्मणा ।
पुत्रकामेन विप्रेण दीर्घकालन्तपस्यता॥ २१ ।
एवं तस्य वचः श्रुत्वा ब्राह्मणस्य तपस्विनः ।
मधुराङ्गिरमादाय प्रत्यवोचमृषिम्प्रति॥ २२ ।

---

* तत्राऽसाविति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

च्चिरकालं व्रतस्थेन यत्त्वया चिन्तितं मुने ।
स कामस्तव सञ्जातः सिद्धोऽसि तपसा भवान् ॥ २३ ।
ईश्वरस्य परा*मूर्त्तिर्नाम्ना वै नन्दिकेश्वरः ।
त्वद्दक्षिणाङ्गादुद्भूतः पुत्त्रस्तव मुनीश्वर ।
संहरस्व तपो ब्रह्मन् शान्तिङ्गच्छ महामुने ॥ २४ ।
अथ चैतस्य जातस्य कल्पा वै सप्त सप्त च ।
त्वं न जानासि विप्रर्षे स जातो नन्दिकेश्वरः ।
मायायोगबलोपेतो गोव्रजं स मया स्थितः ॥ २५ ।
मथुरायाः समानीय आमुष्यायणसंज्ञितम् ।
तव शिष्यं पुरस्कृत्य शूलपाणिरवस्थितः ॥ २६ ।
तत्राश्रमे महाभाग स्थित्वा त्वं तपसान्निधे ।
पुत्त्रेण परमप्रीतो मत्क्षेत्रेऽस्मत्समो भव ॥ २७ ।
अन्यच्च† गुह्यं वक्ष्यामि सालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि येनैतत्क्षेत्रमुत्तमम् ।
शालग्राममिति ख्यातं तन्निबोध मुने शुभम् ॥ २८ ।
योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ।
एतत्कोऽपि न जानाति विना देवं महेश्वरम् ।
माययाऽहं निगूढोऽस्मि त्वत्प्रसादात्प्रकाशित ॥ २९ ।
एवं तस्मै वरन्दत्त्वा सालङ्कायनकाय वै ।
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवम् ॥ ३० ।

---

* ईशस्य परमा मूर्त्तिरिति (क), (ख) । † अन्यत्ते इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूर्वं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥ ३१ ।
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥ ३२ ।
तत्र गुह्यानि मे भूमे वक्ष्यमाणानि मे शृणु ।
तरन्ति मनुजा येभ्यो घोरं संसारसागरम् ॥ ३३ ।
गुह्यानि तत्र वसुधे तीर्थानि दश पञ्च च ।
नाद्यापि किञ्चिज्जानन्ति मुच्यन्ते यैरिह स्थिताः ॥ ३४ ।
तत्र विल्वप्रभं नाम गुह्यक्षेत्रं मम प्रियम् ।
क्रुञ्जानि तत्र चत्वारि क्रोशमात्रे यशस्विनि ।
दृश्यन्तत्परमङ्गुह्यं भक्तकर्म्मसुखावहम् ॥ ३५ ।
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितोनरः ।
चतुर्णामश्वमेधानाम्फलम्प्राप्नोति मानवः ॥ ३६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
अश्वमेधफलम्भुक्त्वा मम लोके स मोदते ॥ ३७ ।
चक्रस्वामीति विख्यातं तस्मिन् क्षेत्रे परं मम ।
चक्राङ्कितशिलास्तत्र दृश्यन्ते च इतस्ततः ॥ ३८ ।
चक्राङ्कितशिला यत्र तिष्ठते* वरवर्णिनि ।
तदेतद्विद्धि वसुधे समन्ताद्योजनत्रयम् ॥ ३९ ।
तत्र स्नानन्तु कुर्व्वीत त्रिरात्रोपोषितो नरः ।
त्रयाणामपि तन्त्राणां फलम्प्राप्नोति निश्चितम् ॥ ४० ।

---

* तिष्ठतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
वाजपेयफलं भुक्त्वा मम लोकञ्च गच्छति ॥ ४१ ।
तत्र* विष्णुपदं नाम क्षेत्रं गुह्यम्परं मम ।
तिस्रो धाराः पतन्त्यत्र हिमकूटसमाश्रिताः ॥ ४२ ।
तत्र स्नानन्तु कुर्व्वीत त्रिरात्रोपोषितो नरः ।
त्रयाणामपि रात्रीणां फलम्प्राप्नोति निष्कलम् ॥ ४३ ।
तथैव मुञ्चते प्राणान्मुक्तसङ्गो गतक्लमः ।
अतिरात्रफलम्भुक्त्वा मम लोके महीयते ॥ ४४ ।
तत्र कालीह्रदं नाम गुह्यक्षेत्रम्परं मम ।
अत्र चैव ह्रदस्रोतो वदरीवृक्षनिःसृतः ॥ ४५ ।
तत्र स्नानन्तु कुर्व्वीत षष्टिकालोषितो नरः ।
नरमेधस्य यज्ञस्य फलम्प्राप्नोति मानवः ॥ ४६ ।
अथात्र मुञ्चते प्राणान्मुक्तरागो गतक्लमः ।
नरमेधफलम्भुक्त्वा मम लोके च मोदते ॥ ४७ ।
अन्यच्च ते प्रवक्ष्यामि महाश्चर्य्यं वसुन्धरे ।
तत्र शङ्खप्रभं नाम गुह्यक्षेत्रम्परं मम ।
श्रूयते शङ्खशब्दश्च द्वादश्यामर्द्धरात्रके ॥ ४८ ।
गदाकुण्डमिति ख्यातं तस्मिन्क्षेत्रे परं मम ।
यत्र वै कम्पते स्रोतो दक्षिणान्दिशमाश्रितम् ॥ ४९ ।
तत्र स्नानन्तु कुर्व्वीत† त्रिरात्रोपोषितो नरः ।

---

* यत्रेति (ग) । † स्नानं प्रकुर्व्वीतेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वेदान्तगानां विप्राणां फलम्प्राप्नोति मानवः ॥ ५० ।
अथ वै मुञ्चते प्राणान्कृतकृत्योगुणान्वितः।
गदापाणिर्महाकायो मम लोकम्प्रपद्यते ॥ ५१ ।
पुनश्चाग्निप्रभं नाम गुह्यक्षेत्रं परं मम।
धारा पतति तत्रैका पूर्व्वोत्तरसमाश्रिता ॥ ५२ ।
यस्तत्र कुरुते स्नानं चतुर्भक्तोषितोनरः ।
अग्निष्टोमात्पञ्चगुणं फलम्प्राप्नोति मानवः ॥ ५३ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः।
अग्निष्टोमफलम्भुक्त्वा मम लोकम्प्रपद्यते ॥ ५४ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु।
हेमन्ते चोदकमुष्णं ग्रीष्मे भवति शीतलम् ॥ ५५ ।
गुह्यं सर्व्वायुधं नाम तत्र क्षेत्रे परं मम।
पतन्ति सप्त स्रोतांसि हिमवन्निःसृतानि वै ॥ ५६ ।
तत्र स्नानम्प्रकुर्व्वीत सप्तरात्रोषितो नरः।
राजा भवति सुश्रोणि सर्व्वायुधकलान्वितः ॥ ५७ ।
अथ वै मुञ्चते प्राणान्मम कर्म्मविनिश्चितः।
स भुक्त्वा राज्यभोज्यानि मम लोकञ्च गच्छति ॥ ५८ ।
तत्र देवप्रभं नाम गुह्यक्षेत्रं परं मम।
धाराः पञ्चमुखास्तत्र पतन्ति गिरिसंश्रिताः ॥ ५९ ।
तत्र स्नानन्तु कुर्व्वीत अष्टकालोषितोनरः।
चतुर्णामपि देहिनां याति पारं न संशयः ॥ ६० ।
अथात्र मुञ्चते प्राणाँल्लोभमोहविवर्ज्जितः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वेदकर्म्म समुत्सृज्य मम लोके महीयते ॥ ६१ ।
गुह्यं विद्याधरं नाम तत्र क्षेत्रे परं मम ।
पञ्च धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ ६२ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
याति वैद्याधरं लोकङ्कृतकृत्यो न संशयः ॥ ६३ ।
अथात्र मुञ्चते प्राणान्वीतरागो गतक्लमः ।
भुक्त्वा वैद्याधरान्भोगान्मम लोकाय गच्छति ॥ ६४ ।
तत्र पुण्यनदी नाम गुह्यक्षेत्रे परे मम ।
शिला कुञ्जलताकीर्णा गन्धर्व्वाप्सरसेविता* ॥ ६५ ।
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः ।
भ्रमति† सप्तद्वीपेषु स्वच्छन्दगमनालयः ॥ ६६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मानुसारकः‡ ।
सप्तद्वीपान्समुत्सृज्य मम लोकं स गच्छति ॥ ६७ ।
गन्धर्व्वेति च विख्यातं तस्मिन्क्षेत्रं परं मम ।
एकधारा पतन्त्यत्र पश्चिमां दिशमाश्रिता ॥ ६८ ।
तत्र स्नानन्तु कुर्व्वीत चतूरात्रोषितोनरः ।
मोदते लोकपालेषु स्वच्छन्दगमनालयः ॥ ६९ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः§ ।

* अप्सरःसेवितेति साधु । तथा कृते छन्दोदोषः स्यात् । † भ्राम्यति, भ्रमति वा साधु ।
‡ मम कर्म्मविनिश्चित इति (ग) । § मम भक्त्या व्यवस्थित इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

लोकपालान् परित्यज्य* मम लोकाय गच्छति ॥ ७० ।
तत्र देवह्रदं नाम मम क्षेत्रं वसुन्धरे ।
यत्र कान्तासि मे भूमे बलेर्यज्ञविनाशनात् ॥ ७१ ।
स ह्रदो वरदः श्रेष्ठो मनोज्ञः सुखशीतलः ।
अगाधः सौख्यदश्चापि देवानामपि दुर्लभः ॥ ७२ ।
तस्मिन् ह्रदे महाभागे मम वै नियमोदके ।
मत्स्याश्चक्राङ्किताश्चैव पर्य्यटन्ते† इतस्ततः ॥ ७३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
महाश्चर्य्यं विशालाक्षि यत्र तत्परिवर्त्तते ।
श्रद्दधानस्तु पश्येत‡ न पश्येत्पापपूरुषः ॥ ७४ ।
तस्मिन्देवह्रदे पुण्यं चतुर्विंशतिर्द्वादश ।
सौवर्णानि च पद्मानि दृश्यते भास्करोदये ॥ ७५ ।
तावत्पश्यन्ति भूतानि यावन्मध्यन्दिनम्भवेत् ।
यत्र स्नाता दिवं यान्ति शुद्धा वाक्कायजैर्मलैः ॥ ७६ ।
तत्र स्नानम्प्रकुर्व्वीत दशभक्तोषितो नरः ।
दशानामश्वमेधानां प्राप्नोत्यविकलम्फलम् ॥ ७७ ।
अथाऽत्र मुञ्चते प्राणान्मम चिन्ताव्यवस्थितः ।
अश्वमेधफलम्भुक्त्वा भूमे मत्समतां व्रजेत् ॥ ७८ ।
अन्यच्च ते प्रवक्ष्यामि क्षेत्रं गुह्यं परं मम ।
सम्भेदो देवनद्यास्तु समस्तसुखवल्लभः ॥ ७९ ।

---

* लोकपालान् समुत्सृज्येति (ग) ! † पर्य्यटन्तीति साधु । ‡ पश्येदिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दिवोऽवतीर्य्य तिष्ठन्ति देवा यत्र सहप्रियाः ।
गन्धर्व्वाप्सरसश्चैव नागकन्याः सहोरगैः ॥ ८० ।
देवर्षयश्च मुनयः समस्तसुरनायकाः ।
सिद्धाश्च किन्नराश्चैव स्वर्गादवतरन्ति हि ॥ ८१ ।
नेपाले यच्छिवस्थानं समस्तसुखवल्लभम् ।
तेभ्यस्तेभ्यश्च स्थानेभ्यस्तीर्थेभ्यश्च विशेषतः ॥ ८२ ।
महादेवजटाजूटान्नीलकण्ठाच्छिवालयः ।
श्वेतगङ्गेति या प्रोक्ता तया सम्भूय सादरम् ।
नानानद्यः समायाता दृश्याऽदृश्यतया स्थिताः ॥ ८३ ।
गण्डक्या कृष्णया चैव या कृष्णस्य तनूद्भवा ।
तया सम्भेदमापन्ना या सा शिवतनूद्भवा ।
त्रिशूलगङ्गेत्याख्याता सापि तत्र महानदी ॥ ८४ ।
एवं नदीसमुद्भेदः सर्व्वतीर्थकदम्बकम् ।
मम क्षेत्रे समाख्यातं पुण्यं परमपावनम् ।
वसुधे त्वं विजानीहि देवानामपि दुर्लभम् ॥ ८५ ।
यश्च सिद्धाश्रम इति विख्यातः पुण्यवर्द्धनः ।
शम्भोस्तपोवनं* तत्र सर्व्वाश्रमवरम्प्रति ॥ ८६ ।
नानापुष्पफलोपेतङ्कदलीखण्डमण्डितम् ।
निचुलैश्चैव पुन्नागैः केसरैश्च विराजितम् ॥ ८७ ।
खर्ज्जूराशोकवकुलैश्चूतैश्चैव प्रियालकैः ।

* भृगोस्तपोवनमिति (क) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारिकेलैश्च पूगैश्च चम्पकैर्जम्बुभिर्धवैः ॥ ८८ ।
नारङ्गैर्वदरीभिश्च जम्बीरैर्मातुलुङ्गकैः ।
केतकीमल्लिकाजातीयूथिकाराजिराजितम् ॥ ८९ ।
कुन्दैः कुरवकैर्नागैः कुटजैर्दाड़िमैरपि ।
आगत्य यत्र क्रीड़न्ति देवानां मिथुनानि च ॥ ९० ।
तस्मिन्ह्रदे महापुण्ये पुण्यनद्योस्तु सङ्गमे ।
स्नानाच्छताश्वमेधानां फलम्प्राप्नोति मानवः ॥ ९१ ।
स्नात्वा तत्र तु वैशाखे गोसहस्रफलम्भवेत् ।
माघमासे पुनः स्नात्वा प्रयागस्नानजम्फलम् ॥ ९२ ।
कार्त्तिके मासि यः स्नाति तुलासंस्थे दिवाकरे ।
विधिना नियतः सोऽपि मुक्तिभागी न संशयः ॥ ९३ ।
यस्त्रिरात्रमुषित्वा तु नियते नियताशनः ।
राजसूयफलम्प्राप्य मोदते देववद्दिवि ॥ ९४ ।
यज्ञस्तपोऽथवा दानं श्राद्धमिष्टस्य पूजनम् ।
यत्किञ्चित्क्रियते कर्म्म तदनन्तफलम्भवेत् ।
भूमि तस्यापराधांश्च सर्व्वानेव क्षमाम्यहम् ॥ ९५ ।
गङ्गायमुनयोर्यद्वत्सङ्गमो मर्त्त्यदुर्ल्लभः ।
तथैवायं देवनद्योः सङ्गमः समुदाहृतः ॥ ९६ ।
एतद्गुह्यं परन्देवि मम क्षेत्रे वसुन्धरे ॥ ९७ ।
अहमस्मिन्महाक्षेत्रे धरे पूर्व्वमुखः स्थितः ।
शालग्रामे महाक्षेत्रे भूमि भागवतप्रियः ॥ ९८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्तर्गुह्यं परं श्रेष्ठं* यन्न जानन्ति मोहिताः ॥ ९९ ।
शिवो मे दक्षिणस्थानं तिष्ठते† विगतज्वरः ।
लोकानाम्प्रवरः श्रेष्ठः सर्व्वलोकवरो हरः ॥ १०० ।
तं ये विन्दन्ति ते देवि नूनं मामेव विन्दति‡ ।
ये मां विदन्ति देवेशि ते विदन्ति शिवम्परम् ॥ १०१ ।
अहं यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ।
तत्राहमपि तिष्ठामि आवयोर्नान्तरं क्वचित् ॥ १०२ ।
शिवं यो वन्दिते भूमे स हि मामेव वन्दते ।
लभते पुष्कलां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥ १०३ ।
एवमेतन्महाभागे क्षेत्रं हरिहरात्मकम् ।
मृता येऽत्र गतिं यान्ति मम कर्म्मानुसारिणः ॥ १०४ ।
मुक्तिक्षेत्रं प्रथमतो रुरुखण्डन्ततः परम् ।
सम्भेदो देवनद्योश्च त्रिवेणी च ततः परम् ।
क्षेत्रं प्रमाणं§ विज्ञेयं गण्डकीसङ्गतं परम् ॥ १०५ ।
एवं सा गण्डकी देवि नदीनामुत्तमा नदी ।
गङ्गया मिलिता यत्र भागीरथ्या महाफला ।
अपरन्तन्महत्क्षेत्रं हरिक्षेत्रमिति स्मृतम् ॥ १०६ ।
आदौ सा गण्डकी पुण्या भागीरथ्या च सङ्गता ।
तस्य तीर्थस्य महिमा ज्ञायते न सुरैरपि ॥ १०७ ।

---

* क्षेत्रमिति (ग)। † तिष्ठतीति साधु। ‡ विन्दतीति आर्षं, विन्दन्ति विदन्तीति वा साधु। § प्रथममिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितम्भद्रे शालग्रामस्य सुन्दरि।
गण्डक्याश्चैव माहात्म्यं सर्व्वकल्मषनाशनम्।
पूर्व्वपृष्टन्त्वया यच्च पुण्यं भागवतप्रियम् ॥ १०८।
आख्यानानां महाख्यानं द्युतीनां परमा द्युतिः।
पुण्यानां परमं पुण्यं तपसाञ्च महत्तपः ॥ १०९।
गुह्यानां परमङ्गुह्यं गतीनाम्परमा गतिः।
महालाभस्तु लाभानां नास्त्यस्मादपरं महत् ॥ ११०।
पिशुनाय न दातव्यं न शठाय गुरुद्रुहे।
ये च पापा कृतघ्नाश्च द्विजदेवापराधिनः।
कुशिष्याय न दातव्यं न दद्याच्छास्त्रदूषके।
नीचाय न च दातव्यं ये न जानन्ति सेवितुम् ॥ १११।११२।
सुशिष्याय च दातव्यं धीराय शुभबुद्धये।
लोभमोहमदाद्यैर्य्ये वर्ज्जिताः पुण्यबुद्धयः ॥ ११३।
य एतत्पठते नित्यङ्कल्यमुत्थाय मानवः।
कुलानि तारितान्येवं सप्त सप्त च सप्त च ॥ ११४।
एवं मरणकाले तु न कदाचिद्विमुह्यते।
यदीच्छेत्परमां सिद्धिं मम लोकाय गच्छति ॥ ११५।
शालग्रामस्य क्षेत्रस्य माहात्म्यं परमं मया।
कथितं ते महादेवि किमन्यच्छ्रोतुमिच्छसि ॥ ११६।

इति वराहपुराणे भगवच्छास्त्रे शालग्रामक्षेत्रमाहात्म्यवर्णनं नाम
पञ्चचत्वारिंशदधिकशततमोऽध्यायः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

षट्चत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

शालग्रामस्य माहात्म्यं श्रुत्वा गुह्यं महौजसम् ।
विस्मयं परमं गत्वा हृष्टा वचनमब्रवीत् ॥ १ ।

धरण्युवाच ।

अहो क्षेत्रस्य माहात्म्यं यत्त्वया भाषितं हरे ।
एतच्छ्रुत्वा महाभाग जातास्मि विगतज्वरा ॥ २ ।
रुरुखण्डमिति प्रोक्तं यत्त्वया परमार्च्चितम् ।
रुरुर्नाम कथं को वा आसीत्पूर्व्वं जनार्द्दन ॥ ३ ।
यन्नाम्ना परमङ्क्षेत्रं हृषीकेश त्वयाश्रितम् ।
कथयस्व जगन्नाथ यद्यनुग्राह्यता मयि ॥ ४ ।

वराह उवाच ।

आसीत्पुरा महाभागो देवदत्त इति द्विजः ।
भृगुवंशे समुत्पन्नो वेदवेदाङ्गपारगः ।
यज्ञविद्यासु कुशलो व्रतनिष्ठोऽतिथिप्रियः ॥ ५ ।
तत्राश्रमपदं पुण्यं पुण्यद्रुमलतान्वितम् ।
शान्तैर्मृगगणैः कीर्णं कन्दमूलफलान्वितम् ॥ ६ ।
तत्र तीव्रं तपोऽतप्यद्देवदत्तो मुनीश्वरः ।
वर्षाणामयुतं साग्रं तत इन्द्रो व्यचिन्तयत् ॥ ७ ।
कामं वसन्तसहितं गन्धर्व्वान् ससखीन् पुनः* ।

* ससखान् पुर इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उवाच मधुरं वाक्यं क्षुब्धेन्द्रियमनाः प्रभुः ॥ ८ ।
अहो सखायः किञ्चिन्मे महत्कार्य्यमुपस्थितम् ।
तस्य मे चिन्तयानस्य यूयमेव परा गतिः ।
भवत्प्रसादात्सुस्थोऽहं निर्भयस्तद्विचिन्त्यताम् ॥ ९ ।
तदिन्द्रस्य वचः श्रुत्वा ते काममलयानिलाः ।
प्रत्यूचुर्देवराजान*माज्ञापय निजप्रियम् ॥ १० ।
जितेन्द्रियस्यापि मनः कस्य संक्षोभयामहे ।
कं वा सुतीव्रात्तपसो भ्रंशयामः सुपेशलम्† ।
आज्ञाप्रसादन्ते लब्ध्वा वद शीघ्रं सुखी भव ॥ ११ ।
इत्युक्तः शतमन्युर्वै प्रत्युवाचाऽथ मानयन् ।
तदैव मे गता चिन्ता भवतां दर्शनं यदा ।
जातमेवाऽखिलङ्कार्य्यं मे वै त‡च्छृणुताखिलाः ॥ १२ ।
हिमशैले महारम्ये हृषीकेशाश्रितो मुनिः ।
देवदत्त इति ख्यातस्तपस्यति महत्तपः ।
जिघृक्षुर्मे पदं नूनं तत्तपो विनिवर्त्त्यताम् ॥ १३ ।
इत्युक्तास्ते तदाज्ञां वै गृहीत्वा शिरसा द्रुतम् ।
प्रस्थानाय मतिञ्चक्रुः कामदेवपुरःसराः ।
प्रस्थाप्याग्रे वसन्तञ्च मलयानिलमेव च ॥ १४ ।
ततः सुरपतिः शक्रः प्रम्लोचान्नाम नामतः ।
प्रशस्य प्रणयात्पूर्व्वं मानयन्निदमब्रवीत् ॥ १५ ।

---

* देवराजानमिति आर्षं देवराजमिति साधु । † सुपेशसमिति (ग) । ‡ ममैतदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गच्छ स्वस्तिमती देवि विजयाय मुनेर्भुवि ।
यत्राश्रमपदन्तस्य देवदत्तस्य वै मुनेः ।
ललितैः स्वैर्विलासैस्तं मोहयित्वा वशङ्कुरु ॥ १६ ।
यथा मत्प्रीतिरतुला त्वं मे कार्य्यकरी सदा ।
तथा कुरुष्व भद्रन्ते हृषीकेशसमीपतः ॥ १७ ।
इन्द्रस्याज्ञां समादाय ययौ तस्याश्रमम्प्रति ।
समीपोपवने रम्ये नानाद्रुमलताकुले ।
मधुरालापबहुले कोकिलानां कुलाकुले ।
रसालमञ्जरीव्याप्तरसामोदालिसङ्कुले ।
गुञ्जन्मत्तालिसन्नादस्तुतिश्रुतिधारान्विते ।
गन्धर्व्वगीतसंमिश्रे मलयानिलशीतले ।
सम्फुल्लपङ्कजवने सुनिर्म्मलजलाशये ।
मुनिप्रभावसन्त्यक्तक्रौर्य्यस्थलजलालये ।
मधुरामोदमधुरे चित्तक्षोभविधायिनि ॥ १८।१९।२०।२१ ।
प्रविश्य सा वरारोहा गीतं सुमधुरं जगौ ।
यदा ध्यानादुपरतः समाधेर्विरतश्चिरात् ।
गान्धर्व्वम्प्रारभंस्ते* तु गन्धर्व्वाः सुरसम्मताः ॥ २२ ।
तस्मिन्नेव क्षणे लब्ध्वाऽवसरं पञ्चसायकः ।
विचकर्ष धनुः पौष्पं सायकान्समयूयुजत् ।
संलक्ष्य तं मुनिं शान्तं भाविदैवबलात्क्षतम् ॥ २३ ।

* प्रारभन्त इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

श्रुत्वा तन्मधुरं गीतं पञ्चमालापसुन्दरम्।
क्षुब्धचित्तः समभवत्स मुनिः संशितव्रतः॥ २४।
चकर्ष च धनुः कामः पुनः पुनरतन्द्रितः।
देवव्रतोऽपि स मुनिः क्षुब्धात्मा नियतोऽपि सन्॥ २५।
विचचाराश्रमपदं पश्यन् सन्तुष्टमानसः।
दूराद्ददर्श तन्वङ्गीं क्रीड़न्तीं कन्दुकेन ताम्॥ २६।
दृष्ट्वैव तान्तु चार्व्वङ्गीं विद्धः कामेन पत्रिणा।
तस्याः समीपमगमत् स्मयमानो महामुनिः॥ २७।
सापि दृष्ट्वा देवदत्तं सज्जन्ती हरिणेक्षणा।
कटाक्षयन्ती सहसा लज्जमाना विगूहति॥ २८।
करेण कन्दुकं घ्नन्ती चञ्चलाक्षी सुपेशला।
स्रंसता केशपाशेन गलत्पुष्पेण राजता।
मनोहरन्ती तस्यर्षेर्ललितैर्विभ्रमोद्भवैः॥ २९।
एतस्मिन्नन्तरे तस्या दक्षिणः पवनोऽहरत्।
वासः सूक्ष्मञ्चलन्नीवि काञ्चीदामगुणान्वितम्॥ ३०।
पुष्पवाणोऽप्यविध्यत्तं दृष्ट्वाऽवसरमन्तिके।
सम्मोहितः स तु मुनिर्गत्वान्तिकमथाब्रवीत्॥ ३१।
का त्वङ्कस्यासि सुभगे वनेऽस्मिन्किञ्चिकीर्षसि।
मादृशान् किं मृगयसे वाहुपाशेन वा मृगान्।
बद्ध्वा गृहीत्वा वामोरु किं वाऽस्मान् कर्त्तुमिच्छसि॥ ३२।
सर्व्वथाऽस्मांस्तवाधीनान् यद्यद्वा कारयिष्यसि*।

* किञ्चिद्वा कारयिष्यसीति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वर्त्तत्कुम्भौ वयं नित्यं त्वदधीनाः स्म सर्व्वथा ॥ ३३ ।
अथ तां हसमानाञ्च गृहीत्वा दक्षिणे करे ।
समालिङ्ग्य विषज्जन्तीं रमयामास मोहितः ॥ ३४ ।
रममाणस्तया सार्द्धं भुञ्जन्* भोगान्मनोरमान् ।
तपःप्रभावोपनतान्दिवारात्रमतन्द्रितः ॥ ३५ ।
बहूनहर्गणानेवं रममाणो यदृच्छया ।
सुप्तोत्थित इवाकस्माद्विवेकेन समन्वितः ।
निर्वेदम्प्राप्तवान् सद्यस्तदोवाच भृगातुरः ॥ ३६ ।
अहो भागवती माया ययाहं भृगमोहितः ।
जानन्नपि तपोभ्रंशं प्राप्तो दैवबलात्कृतः ॥ ३७ ।
अग्निकुण्डसमा नारी घृतकुम्भसमः पुमान् ।
इति प्रवादो मूर्खाणां विचारान्महदन्तरम् ॥ ३८ ।
घृतकुम्भोऽग्नियोगेन द्रवते न तु दर्शनात् ।
पुमान्स्त्रीदर्शनादेव द्रवते यद्विमोहितः ॥ ३९ ।
नापराधस्त्वतोऽनार्य्याः स्वयं यदजितेन्द्रियः ।
इत्युक्त्वाऽसौ निवृत्तात्मा विससर्ज्ज सुराङ्गनाम् ।
प्रम्लोचान्देववशगो मनस्येतदचिन्तयत् ॥ ४०।४१ ।
उपसर्गो महानत्र तपसोभ्रंशकारकः ।
त्यक्त्वाश्रममिमं चान्यत्स्थानङ्गत्वा समाहितः ।
तपस्तीव्रं समास्थाय शोषयिष्ये कलेवरम् ॥ ४२ ।
इति निश्चित्य मनसा गत्वा भृग्वाश्रमम्प्रति ।

* भुञ्जान इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गण्डकीसङ्गमे स्नात्वा सन्तर्प्य पितृदेवताः ।
विष्णुं शिवञ्च सम्पूज्य तपःस्थानं विचिन्तयन् ।
पश्यन् भृग्वाश्रमं रम्यमुत्तरङ्गतवान् शनैः ॥ ४३।४४ ।
गण्डक्याः पूर्व्वभागे तु विविक्तं विजनं शुभम् ।
दृष्ट्वा तीरेषु विश्रान्तस्तपोभूमिमचिन्तयत् ॥ ४५ ।
भृगुतुङ्गं समासाद्य शङ्कराराधने रतः ।
अतप्यत तपोघोरं शिवदर्शनलालसः ॥ ४६ ।
अथ दीर्घेण कालेन सन्तुष्टः स महेश्वरः ।
लिङ्गरूपधरः साक्षादुपर्य्यपि तथा ह्यधः ।
तिर्य्यक् च जलधाराभिर्युक्तस्तत्तापशान्तिकृत् ।
उवाच च प्रसन्नात्मा मुने पश्यस्व* मां शिवम् ।
मामेवावेहि विष्णुं त्वं मा पश्यस्वान्तरं मम ॥४७।४८ ।
पूर्व्वमन्तरभावेन दृष्टवानसि यन्मम ।
तेन विघ्नोऽभवद्येन गलितन्त्वत्तपो महत् ।
आवामेकेन भावेन पश्यंस्त्वं सिद्धिमाप्स्यसि ॥ ४९ ।
तपःप्रभावाल्लिङ्गानि प्रादुर्भूतानि यत्र वै† ।
समङ्गमिति विख्यातमेतत् स्थानं भविष्यति ॥ ५० ।
स्नात्वाऽत्र‡ गण्डकीतीर्थे मम लिङ्गानि योऽर्च्चयेत् ।
तस्य योगफलं सम्यग्भविष्यति न संशयः ॥ ५१ ।
इति दत्त्वा वरं शम्भुस्तत्रैवान्तरधीयत ॥ ५२ ।

---

* पश्यस्वेति आर्षं पश्येति साधु। एवं परत्रापि। † तत्र वै इति (ग)।
‡ स्थित्वेति (क, ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दैवदत्तोऽपि स मुनिः सम्प्राप्य ज्ञानमुत्तमम् ।
शिवोपदिष्टमार्गेण सायुज्यं परमं गतः ॥ ५३ ।
प्रम्लोचापि मुनेर्गर्भं सम्प्राप्याश्रममन्तिकात् ।
प्रसूता कन्यकां त्यक्त्वा स्वर्गमेव जगाम ह ।
पुनर्जातमिवात्मानं मन्यमाना शुचिस्मिता ॥ ५४ ।
सापि कन्या मृगैस्तत्र रुरुभिर्वर्द्धिता सती ।
रुरुरित्येव विख्याता पितुरेवाश्रमे स्थिता ।
युवभिः प्रार्थ्यमानापि चित्ते कञ्चन नाध्यगात् ॥ ५५ ।
ततः सुनिश्चयङ्कृत्वा तपसे धृतमानसा ।
चिन्तयन्ती जगन्नाथं भगवन्तं रमापतिम् ।
मासे सा प्रथमे बाला फलाहारपरायणा ।
एकान्तरं दिनम्प्राप्य द्वितीये त्रिदिनान्तरे ।
तृतीये पञ्चमदिने चतुर्थे सप्तमान्तरे ।
पञ्चमे नवरात्रेण षष्ठे पञ्चदशाहके ।
मासेन सप्तमे नैव शीर्णपर्णाशनाष्टमे ।
त्यक्त्वा तान्यपि सा बाला वाय्वाहारा बभूव ह ॥
५६।५७।५८।५९ ।
सैवं वर्षशतं स्थित्वा हराविकाग्रमानसा ।
समाधिना समा भूत्वा स्थाणुवन्निश्चलाऽभवत् ॥ ६० ।
द्वन्द्वानि नाविदच्चापि* आत्मभूतान्तरं विना ।
पराङ्काष्ठां समापन्ना प्रकाशमयकान्तिधृक् ॥ ६१ ।

* नाविददिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्तेजसा वृतं सर्व्वं तदा दृष्ट्वा वसुन्धरे।
अहं विस्मयमापन्नस्तस्याः प्रत्यक्षतां गतः॥ ६२।
सन्निरुद्धेन्द्रियग्रामा नाचक्षत* वहिःस्थितम्।
तदा हृषीकाण्याविश्य संहृत्य स्वं हृदो वहिः।
स्थितोऽहं वसुधे देवि अक्ष्णोः प्रत्यक्ष्यतां गतः॥ ६३।
हृषीकाणि नियम्याहं यतः प्रत्यक्षतां गतः।
हृषीकेश इति ख्यातो नाम्ना तत्रैव संस्थितः॥ ६४।
सा मां यदैव नापश्यदुन्मील्य नयने ततः।
वहिः स्थितञ्च मां दृष्ट्वा प्रणनाम कृताञ्जलिः॥ ६५।
गद्गदस्वरसंयुक्ता अश्रुक्लिन्नविलोचना।
रोमाञ्चिततनुश्चासीत्कदम्बमुकुलाकृतिः॥ ६६।
तथाभूतान्तु तां दृष्ट्वा प्रावोचमहमङ्गनाम्।
अयि बाले विशालाक्षि तुष्टोऽहं तपसस्तव॥ ६७।
वरं याचय मत्तस्त्वं यत्ते मनसि वर्त्तते।
अदेयमपि ते दद्मि यदन्येषां सुदुर्ल्लभम्॥ ६८।
इति श्रुत्वा प्रभोर्वाक्यं प्रणम्य च पुनः पुनः।
स्तुत्वा तं देवदेवेशं† प्रबद्धकरसम्पुटा॥ ६९।
ददासि चेद्वरं मह्यं देवदेव जगत्पते।
अनेनैव स्वरूपेण भगवन् स्थातुमर्हसि॥ ७०।

---

* नाचष्टेति साधु। † पुनः स्तुत्वा तं देवेशमिति (क), ख)। एतत्पाठे तु छन्दोदोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्थितोऽस्म्यत्रैव भद्रन्ते अपरं वरयाशु मे ।
दुर्लभन्ते वरं दद्मि तपसाऽहं प्रतोषितः ॥ ७१ ।
इत्युक्ता मां प्रणम्याह रुरुः सा शंसितव्रता ।
यदि प्रसन्नो देवेश तदा मां कुरु पावनीम् ।
मन्नाम्ना चेत्रमेतच्च ख्यातं भवतु नान्यथा ॥ ७२ ।
तामहं देवि सुभगे प्रावोचं पुनरेव हि ।
तीर्थानां परमं तीर्थं तव देहोभवत्त्वयम् ।
तव नाम्ना च विख्यातमेतत् चेत्रं भविष्यति ॥ ७३ ।
तव तीर्थे कृतस्नानस्त्रिरात्रोपोषितो नरः ।
विलोक्य मां भवेत्पूतो मम वाक्यान्न संशयः ॥ ७४ ।
ब्रह्महत्यादिपापानि ज्ञात्वाऽज्ञात्वा कृतान्यपि ।
यास्यन्ति विलयं चिप्रमेवमेतन्न संशयः ॥ ७५ ।
इति दत्त्वा वरांस्तस्यै तत्रैवान्तर्हितः स्थितः ।
सापि कालेन सञ्जाता तीर्थभूता तथाऽभवत् ॥ ७६ ।
एतत्ते कथितं देवि रुरुमाहात्म्यमुत्तमम् ।
रुरुचेत्रस्य प्रभवमेतद्गुह्यं परं मम ॥ ७७ ।

इति वराहपुराणे भगवच्छास्त्रे रुरुचेत्रहृषीकेशमहिमवर्णनं नाम
षट्चत्वारिंशदधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तचत्वारिंशदधिकशततमोऽध्यायः ।

धरण्युवाच ।

अत्याश्चर्य्यं श्रुतं ह्येतद्गुरुक्षेत्रसमुद्भवम् ।
हृषीकेशस्य महिमा त्वया य उपवर्णितः ॥ १ ।
अन्यच्च यत्परं गुह्यं क्षेत्रं परमपावनम् ।
वक्तुमर्हसि देवेश परङ्कौतूहलं मम ॥ २ ।

वराह उवाच ।

शृणु भूमि प्रयत्नेन कारणं परमं मम ।
गुह्यमस्त्यपरञ्चैव हिमशृङ्गशिलोच्चये ॥ ३ ।
गोनिष्क्रमणकं नाम गावो यत्र प्रतारिताः* ।
यथा निष्क्रमणम्प्राप्य सुरभीणां वसुन्धरे ॥ ४ ।
सप्ततिर्यत्र कल्पानि और्वो यत्र प्रजापतिः ।
तपश्चचार परमं मम मायाबलान्वितः ॥ ५ ।
तस्यैवं वर्त्तमानस्य याति काले महत्तरे ।
एवं हि तप्यमानस्य सर्व्वलोकस्य संशयः ॥ ६ ।
न वरं प्रार्थयत्येष लाभालाभसमन्वितः ।
सूचकोऽपि न विद्येत बलिकर्म्मसुसंयतः ॥ ७ ।
अथ दीर्घस्य कालस्य कश्चिद्ब्रह्मयतिस्तदा ।
तपस्तपस्यति मुनौ तस्मिन् शैलोच्चये धरे ।

* प्रजापतेरिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ईश्वरोऽपि महाभागे तत्पार्श्वं समुपागतः* ।
गोनिष्क्रमिति विख्याते तस्मिंस्तीर्थे महौजसि ॥ ८।९।
तत्र त्वौर्व्वो महाभागे तप्यते समदर्शनः ।
यज्ञानाङ्गारणादौर्वो गङ्गाद्वारमुपागतः ॥ १० ।
तन्निर्गतं ततो ज्ञात्वा और्व्वं सर्व्वे तपस्विनः ।
महेश्वरोमहातेजाः सम्भ्रमं समुपागतः ॥ ११ ।
फलपुष्पसमाकीर्णा लक्ष्मीश्चैवोपजायते ।
आश्रमं रूपसम्पन्नं फलपुष्पोपशोभितम् ।
तच्च वै भस्मसाद्भूतं महारुद्रस्य तेजसा ॥ १२ ।
दग्ध्वा तच्चाश्रमं पुण्यमौर्व्वस्य सुमहत्प्रियम् ।
ईश्वरोऽपि ततः प्राप्तः शीघ्रमेव हिमालयम् ॥ १३ ।
एतस्मिन्नन्तरे देवि गृह्य† पुष्पकरण्डकम् ।
आश्रमं समनुप्राप्त और्व्वोऽपि मुनिपुङ्गवः ।
शान्तो दान्तः क्षमाशीलः सत्यव्रतपरायणः ॥ १४ ।
दृष्ट्वा स्वमाश्रमं दग्धं बहुपुष्पफलोदकम् ।
मन्युना परमाविष्टो दुःखेन च परिप्लुतः ।
उवाच क्रोधरक्ताक्षो वचनं निर्दहन्निव ॥ १५ ।
येनैष चाश्रमो दग्धो बहुपुष्पफलोदकः ।
सोऽपि दुःखेन सन्तप्तः सर्व्वलोकान् भ्रमिष्यति ॥ १६ ।

---

* अत्याश्चर्य्यमुपागत इति (क), (ख) । † गृहीत्वेति साधु । अथवा सन्ध्यावधूं गृह्य करेण गाढ़मितिवत् साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवमौर्व्वेण दत्ते तु शापे तस्मिन्महौजसि।
महाभयात्तु लोकानां न कश्चित्पर्य्यवीरयत्॥ १७।
तत्क्षणादेव देवेशि ईशोऽपि जगतोविभुः।
महादाहेन सन्तप्तः शम्भुर्देवीमुवाच ह॥ १८।
और्व्वस्य तु तपो दृष्ट्वा भीतैर्देवैरुदाहृतम्।
दह्यते स्म जगत्सर्व्वं स तु किञ्चिन्न चेच्छति।
को वा प्रतिविधिस्तत्र यथा सर्व्वस्य सम्भवेत्॥ १९।
एवमुक्ते मया क्रोधादीक्षितस्तस्य चाश्रमः।
दग्धोऽभवत्क्षणेनैव वयं तस्माद्विनिर्गताः॥ २०।
एतद्दुःखेन सन्तप्तोमन्युना च परिप्लुतः।
और्व्वः शशाप रोषेण तेन तप्ता वयं शिवे॥ २१।
ततोऽभ्रमद्विरूपाक्षः शन्न प्राप्नोति कर्हिचित्।
अहञ्च परितप्तोऽस्मि आत्मत्वादीश्वरस्य च।
तेन दाहेन सन्तप्तो न शक्नोमि विचेष्टितुम्॥ २२।
पार्व्वत्या च ततः प्रोक्तः आवां नारायणं प्रति।
गच्छावस्तस्य वाक्येन सुखं यत्र भविष्यति॥ २३।
ततोनारायणं गत्वा सह तेन तमौर्व्वकम्।
विज्ञापयामो रुद्रस्य शापोऽयं विनिवर्त्तताम्।
सन्तप्ताः स्म वयं सर्व्वे तस्माच्छापं निवर्त्तय॥ २४।
और्व्वोऽप्युवाच नोक्तं मे अनृतन्तु कदाचन।
सुरभीगणमानीय गत्वैतं स्नापयन्तु वै।
रुद्रशापो निवृत्तः स्यात्तेनैव किल्ल नान्यथा॥ २५।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतस्मिन्नन्तरे देवि मया गावोऽवतारिताः ।
सप्तसप्तति कल्याणि सौरभेया महौजसः ॥ २६ ।
तेनाप्लावितदेहाश्च परां निर्वृतिमागताः ।
तच्च गोनिष्क्रमं नाम तीर्थं परमपावनम् ॥ २७ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितोनरः ।
गोलोकञ्च समासाद्य मोदते नात्र संशयः ॥ २८ ।
अथात्र मुञ्चते प्राणान्कृत्वा कर्म्म सुदुष्करम् ।
शङ्खचक्रगदायुक्तो मम लोके महीयते ॥ २९ ।
पञ्च धाराः पतन्त्यत्र मूले मूलवटस्य हि ।
तत्र स्नानं प्रकुर्व्वीत पञ्चरात्रोषितो नरः ।
पञ्चानामपि यज्ञानां फलमाप्नोति मानवः ॥ ३० ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
पञ्चयज्ञफलं भुक्त्वा मम लोकं प्रपद्यते ॥ ३१ ।
अस्ति पञ्चपदं नाम तस्मिन्क्षेत्रे परं मम ।
मम पूर्व्वेण पार्श्वेण दृढाः पञ्च महाशिलाः ।
मत्पूर्व्वां दिशमाश्रित्य तत्र ब्रह्मपदद्वयम् ॥ ३२ ।
मध्ये तु तस्य कुण्डस्य शिलाविस्तीर्णसंश्रिता ।
ऊर्द्धं नालपरीणाहं तत्र विष्णुपदं मम ॥ ३३ ।
तत्र स्नानन्तु कुर्व्वीत पञ्चरात्रोषितोनरः ।
याति शुद्धानि लोकानि* ये च भागवतप्रियाः ॥ ३४ ।
अथात्र मुञ्चते प्राणान्युक्तः पञ्चपदे नरः ।

* लोकानीति क्लीवत्वमार्षम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विमुक्तः सर्व्वसंसारान्मम लोकञ्च गच्छति ॥ ३५ ।
ततो ब्रह्मपदं नाम क्षेत्रङ्गुह्यं परं मम ।
यत्र धारा पतत्येका पश्चिमां दिशमाश्रिता ॥ ३६ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितोनरः ।
ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ३७ ।
कौमुदस्य तु मासस्य शुक्लपक्षस्य द्वादशी ।
यज्ञानां वाजपेयानां फलम्प्राप्नोति मानवः ॥ ३८ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
वाजपेयफलं भुक्त्वा मम लोके प्रमोदते ॥ ३९ ।
अस्ति कोटिवटं नाम तस्मिन्क्षेत्रे परं मम ।
पञ्चक्रोशं ततो गत्वा वायव्यां दिशि संस्थितः ॥ ४० ।
तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितो नरः ।
बहुयज्ञस्य कोटीनां फलं प्राप्नोति निष्कलम् ॥ ४१ ।
अथात्र मुञ्चते प्राणान् भूमि कोटिवटे शुभे ।
यज्ञकोटिफलम्भुक्त्वा मम कोटिं* प्रपद्यते ॥ ४२ ।
अस्ति विष्णुसरोनाम तस्मिन् क्षेत्रे परं मम ।
पूर्व्वोत्तरेण पार्श्वेन पञ्चक्रोशं न संशयः ॥ ४३ ।
मत्सरः पद्मपत्राक्षि अगाधं परिसंस्थितम् ।
पञ्चक्रोशस्य विस्तारः पर्व्वतः परिमण्डलः ॥ ४४ ।
तत्र भ्रमति योभद्रे कुर्य्याच्चैव प्रदक्षिणम् ।
उपवासं त्रिरात्रन्तु कृत्वा कर्म्म सुदुष्करम् ॥ ४५ ।

* मम लोकं प्रपद्यते इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यावन्ति भ्रममाणस्य पदानि ननु सुन्दरि।
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते॥ ४६।
अथाऽत्र मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः।
ब्रह्मलोकं समुत्सृज्य मम लोके महीयते॥ ४७।
तस्मिन् क्षेत्रे महाभागे आश्चर्य्यं शृणु सुन्दरि।
गवां वै श्रूयते शब्दो मम कर्म्मसुखावहः॥ ४८।
अथात्र ज्येष्ठमासस्य शुक्लपक्षस्य द्वादशी।
श्रूयते सुमहाञ्छब्दः स्वयमेतन्न संशयः॥ ४९।
एवङ्गोस्थलके पुण्ये महाभागवतः शुचिः।
करोति शुभकर्म्माणि शीघ्रं मुच्येत किल्बिषात्॥ ५०।
एवं तेन महाभागे ईश्वरेण यशस्विनि।
शापदाहो विनिर्मुक्तः सर्व्वैः सह मरुद्गणैः॥ ५१।
एतद्गोस्थलकं नाम सर्व्वशान्तिकरं परम्।
कथितं देवि कार्त्स्न्येन तवानुग्रहकाम्यया॥ ५२।
एषोऽध्यायो महाभागे सर्व्वमङ्गलकारकः।
मम मार्गानुसाराणां मम च प्रीतिवर्द्धनः॥ ५३।
श्रेष्ठानां परमं श्रेष्ठं मङ्गलानाञ्च मङ्गलम्।
लाभानां परमो लाभोधर्म्माणां धर्म्म उत्तमः॥ ५४।
लभन्ते पठमाना वै मम मार्गानुसारिणः।
तेजः श्रियञ्च लक्ष्मीञ्च सर्व्वकामान्यशस्विनि॥ ५५।
यावन्ति चाक्षराणि स्युरत्राध्याये मनस्विनि।
तावद्वर्षसहस्राणि मम लोके महीयते॥ ५६।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पतनञ्च न विद्येत पठमाना दिने दिने।
तारितानि कुलान्येभिः सप्त सप्त च सप्त च॥ ५७।
पिशुनाय न दातव्यं न मूर्खाय शठाय च।
देयं पुत्राय शिष्याय यश्च जानाति सेवितुम्॥ ५८।
एतन्मरणकाले तु न कदाचित्तु विस्मरेत्।
श्लोकं वा यदि वा पादं यदीच्छेत्परमाङ्गतिम्॥ ५९।
तत्क्षेत्रन्तु महाभागे पञ्चयोजनमण्डलम्।
तिष्ठामि परया प्रीत्या दिशं पूर्व्वामुपाश्रितः॥ ६०।
पश्चिमेन वहेद्गङ्गां निष्कामेण वसुन्धरे।
एवं रहस्यं गुह्यञ्च सर्व्वकर्म्मसुखावहम्॥ ६१।
एतत्ते परमं भद्रे गुह्यं धर्म्मसमन्वितम्।
मम क्षेत्रं महाभागे यत्त्वया परिपृच्छितम्॥ ६२।

इति वराहपुराणे भगवच्छास्त्रे गोनिष्क्रमणमाहात्म्यवर्णनं नाम
सप्तचत्वारिंशदधिकशततमोऽध्यायः।

अष्टाचत्वारिंशदधिकशततमोऽध्यायः।

सूत उवाच।

गोनिष्क्रमणमाहात्म्यं श्रुत्वा गुह्यमनुत्तमम्।
विस्मयम्परमङ्गत्वा सर्व्वरत्नविभूषिता॥ १।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

धरण्युवाच ।

अहो गवां हि माहात्म्यं तव चैवं श्रुतं मया ।
यच्छ्रुत्वाऽहं जगन्नाथ जातास्मि परिनिर्वृता ॥ २ ।
एवमेव परङ्गुह्यं ब्रूहि नारायण प्रभो ।
अस्मात् चेत्रात्परं देव* यदि चेत्तं विशिष्यते ॥ ३ ।

वराह उवाच ।

अहं नारायणो देवः सर्व्वधर्म्मव्यपाश्रयः ।
मात्सर्य्यञ्चैव मे नास्ति तेनाहं परमः प्रभुः ॥ ४ ।
एतच्छास्त्रं महाभागे प्रयुक्तं लीलया मया ।
वराहरूपमादाय सर्व्वभागवतप्रियम् ॥ ५ ।

धरण्युवाच ।

यथा यथा भाषसे धर्म्मकारण-
मिदं वचो धर्म्मविनिश्चयं महत् ।
तथा तथा देववराऽप्रमेयं
हृद्यं मनो भावयसे जनार्द्दन ॥ ६ ।
ततो महीवचः श्रुत्वा धर्म्मश्रेष्ठोमहामनाः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ७ ।

वराह उवाच† ।

साधु भूमे महाभागे मम कर्म्मव्यवस्थिते ।
कथयिष्याम्यहं ह्येवं गुह्यं लोकसुखावहम् ॥ ८ ।

---

* देवीति (ग), तदसङ्गतमेव । † वाराह उवाचेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्रुतस्वामीति विख्यातं गुह्यं चैत्रं परं मम।
द्वापरं युगमासाद्य तत्र स्थास्यामि सुन्दरि॥ ९।
पुत्त्रोऽहं वसुदेवस्य देवक्या गर्भसम्भवः।
वासुदेव इति ख्यातः सर्व्वदानवसूदनः॥ १०।
पञ्च तस्य सुशिष्याश्च भविष्यन्ति विचक्षणाः।
ऋषयो धर्म्मसंयुक्ता मत्प्रसादाद्बलान्विताः।
ते मां संस्थापयिष्यन्ति धर्म्ममूर्त्तिं महीङ्गतम्॥ ११।
शाण्डिल्यो जाजलिश्चैव कपिलश्चोपसायकः।
भृगुश्चैव महाभागा मम मार्गानुसारिणः॥ १२।
ते च प्रसन्नमनस आत्मदृष्टान्तदर्शिनः।
स्वयं ज्ञानप्रभावेण भासयिष्यन्ति मां सदा॥ १३।
सङ्कर्षणो वासुदेवः प्रद्युम्नो ह्यनिरुद्धकः।
गच्छता बहुकालेन मम कर्म्मपरायणाः॥ १४।
ततो दीर्घेण कालेन इज्यापूर्व्वस्थितेन च।
वरन्तेषां प्रदास्यामि यो यस्य हृदि संस्थितः॥ १५।
ते प्रवक्ष्यन्ति मां देवि आत्मशास्त्रव्यवस्थिताः।
आत्मशास्त्रम्प्रतिष्ठेत यत्र धर्म्मः सुनिष्ठितः।
भवत्वेतन्निश्चयेन न तु मिथ्या कदाचन।
तव देव प्रसादेन इह लोकः* प्रवर्त्तताम्॥ १६।१७।
तानप्येवं वदिष्यामि शिष्याय भवतां प्रियम्।

---

* लोके इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भविष्यति न सन्देहो यतो यूयं मम प्रियाः ॥ १८ ।
सुशिष्या वाढ़मित्येवं भविष्यन्ति न संशयः ।
तद्देते प्रवदिष्यन्ति सर्व्वभागवतप्रियम् ॥ १९ ।
यथा च मथ्यमानाद्वै दध्नश्चोद्ध्रियते घृतम् ।
एवं सर्व्वेषु शास्त्रेषु वाराहं घृतसम्मितम् ॥ २० ।
वाराहं ज्ञानमुत्सृज्य महाभागं महौजसम् ।
एवं समं मया चैव आत्मना परिभाषितम् ।
ते प्रमाणं करिष्यन्ति सिद्धिं प्राप्स्यन्ति वै पराम् ॥ २१ ।
महाज्ञानमिदं सूक्ष्मं भूमि भक्तेषु दृश्यते ।
शास्त्राणां परमं शास्त्रं सर्व्वसंसारमोचणम् ॥ २२ ।
किञ्चिदन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
शास्त्रमेतन्महाभागे स्थूलकर्म्म महौजसम् ॥ २३ ।
केचित्तरन्ति ज्ञानेन केचित्कर्म्मणि निष्ठिताः ।
केचिद्यथेष्टं सुश्रोणि केचिद्दानेन कर्मणा ॥ २४ ।
केचिद्योगबलं भुक्त्वा* पश्यन्ति मम संस्थितिम् ।
विधिपूर्व्वन्तु मे किञ्चिन्नराः पश्यन्ति निष्ठिताः ॥ २५ ।
सर्व्वधर्म्मकराः केचित्सर्व्वाशाः सर्व्वविक्रयाः† ।
ते मां पश्यन्ति वै भूमि एकचित्तव्यवस्थिताः ॥ २६ ।
एवमेतन्महाशास्त्रं देवि संसारमोचणम् ।
मम भक्तव्यवस्थायै प्रयुक्तं परमं प्रियम्‡ ॥ २७ ।

---

* भक्ता इति (ग)। † (ग) पुस्तके सर्व्वाशी सर्व्वविक्रयीत्येकवचनान्तः पाठः ।
‡ मयेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ते तथा च प्रवक्ष्यन्ति यच्च यस्याभिरोचते* ।
अन्यथान्यस्य दृष्टानामृषिभिर्यत्प्रयोजितम् ।
तद्युगस्य प्रभावेण भूमि कुर्व्वन्ति मानवाः ॥ २८ ।
तैः स्वशिष्यैः समं देवि ये शास्त्रविनियोजिताः ।
मत्प्रसादेन ते सर्व्वे सिद्धिं यास्यन्ति मत्पराम् ॥ २९ ।
मम शिष्येषु येषाञ्च मात्सर्य्योपहतात्मनाम् ।
मच्छास्त्रे च भवेद्दोषस्तेषामत्र पुनर्भवः ॥ ३० ।
मात्सर्य्यं ये च कुर्व्वन्ति मद्धर्म्मपरमे जने ।
तेषान्नायं परोलोको मात्सर्य्योपहतात्मनाम् ॥ ३१ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मम मार्गानुसारेण परङ्गुह्यं मम प्रिये ॥ ३२ ।
शास्त्रवन्तो विनीताश्च बहुदोषविवर्ज्जिताः ।
ते तु मात्सर्य्यदोषेण नष्टाचाराः पतन्त्यधः ॥ ३३ ।
मात्सर्य्यं सर्व्वनाशाय मात्सर्य्यं धर्म्मनाशकम् ।
यस्तु मात्सर्य्यसंयुक्तो न स पश्यति मां क्वचित् ॥ ३४ ।
बहुकर्म्मसमायुक्ता दानाध्ययननिष्ठिताः ।
तपसा ज्ञानयुक्ता वा नित्यकर्म्मसु चोद्यताः ।
अनेन हि स्वभावेन मात्सर्य्यञ्चैव कुर्व्वते† ।
न ते पश्यन्ति मां भूमि मायया परिदूषिताः ॥ ३५।३६ ।

---

* यस्याभिरोचते इत्यत्र यस्येति सम्बन्धविवक्षायां षष्ठी । यस्मै अभिरोचत इत्येव सम्यक् । † वर्त्तते इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न कर्त्तव्यं ततः सर्व्वैर्मात्सर्य्यं धर्म्मघातकम् ।
मम शास्त्रपरैरिह यदीच्छेत्परमाङ्गतिम् ॥ ३७ ।
एतद्गुह्यं महाभागे न जानन्ति मनीषिणः ।
मात्सर्य्यस्य तु दोषेण बहवो निधनङ्गताः ॥ ३८ ।
एतच्छास्त्रं महाभागे प्रयुक्तं विधिना* मया ।
वराहरूपमादाय सर्व्वभागवतप्रियम् ॥ ३९ ।
तत्राश्चर्य्यं महाभागे शृणु भूतगिरौ मम ।
आयसी प्रतिमा तत्र अभेद्या चैव दृश्यते ॥ ४० ।
ब्रुवन्ति केचित्कांस्येति आयसीत्यपरेऽब्रुवन् ।
पाषाणीत्यपरे केचिदन्ये वज्रमयीति च ॥ ४१ ।
ऊर्द्धं वा यदि वाऽधोवा ये कुर्व्वन्ति ममार्च्चनम् ।
तथापि संस्पृशन्ति मां शिरोमध्ये तु सुन्दरि ॥ ४२ ।
ये तु पश्यन्ति मां भूमि मणिपूरगिरौ स्थितम् ।
स्तुवन्त्याचार्य्यवन्तश्च मत्प्रसादात्सुसंयताः ॥ ४३ ।
आचार्य्याणां गुणान् भुक्त्वा मम कर्म्मपथे स्थिताः ।
सर्व्वकिल्बिषमुक्ताश्च यान्ति ते परमाङ्गतिम् ॥ ४४ ।
तस्मिन् क्षेत्रे महाभागे अस्ति गुह्यम्परं मम ।
पञ्चारुमेति विख्यातं उत्तरां दिशमाश्रितम् ॥ ४५ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चकालोषितो नरः ।
मोदते नन्दने दिव्ये अप्सरोभिः समाकुले ॥ ४६ ।

---

* विधया म(न?)या इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथात्र मुञ्चति प्राणान्कृतकृत्यो भवेन्नरः।
नन्दनं वनमुत्सृज्य मम लोकञ्च गच्छति ॥ ४७ ।
भृगुकुण्डेति विख्यातमत्र गुह्यं परं मम।
मम दक्षिणपार्श्वे तु अदूरादर्द्धयोजनात् ॥ ४८ ।
तत्र स्नानन्तु कुर्व्वीत मम मार्गानुसारकः।
भूपृष्ठे न तु जायेत कालेन विजितेन्द्रियः ॥ ४९ ।
ध्रुवो यत्र तु तिष्ठेत मेरुशृङ्गे शिलोच्चये।
तत्र मोदति* सुश्रोणि अप्सरोभिर्यथासुखम् ॥ ५० ।
अथात्र मुञ्चति प्राणान्मम कर्म्मपथे स्थितः।
ध्रुवलोकं परित्यज्य मम लोके महीयते ॥ ५१ ।
मणिकुण्डेति विख्यातं तत्र गुह्यम्परं मम।
मणयो यत्र दृश्यन्ते अनेकालयसंस्थिताः ॥ ५२ ।
अगाधं तं ह्रदम्भद्रे देवानामपि दुर्लभम्।
विस्मयं किं पुनस्तत्र मलयश्चञ्चलस्थिताः ॥ ५३ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चकालोषितो नरः।
रत्नभागी भवेद्धीरराजलक्षणसंयुतः† ॥ ५४ ।
अथात्र मुञ्चति प्राणान्मम कर्म्मपथे स्थितः।
छित्त्वा वै सर्व्वसंसारं मम लोकम्प्रपद्यते ॥ ५५ ।
सुगुह्यम्पूर्व्वपार्श्वेण मम क्षेत्रस्य सुन्दरि।
अदूरात्त्रीणि क्रोशानि‡ परिमाणं विधीयते ॥ ५६ ।

---

* मोदते इति साधु। † मम शास्त्रेण संयुत इति (क). (ख)। ‡ क्रोशानीति क्लीवत्वमार्षं, त्रीन् क्रोशानिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नानन्तु कुर्व्वीत मम लोकाय गच्छति ॥ ५७ ।
धूतपापेति विख्यातं तत्र गुह्यं परं मम ।
अदूरात्पञ्च क्रोशा वै मम क्षेत्रस्य पश्चिमे ॥ ५८ ।
तत्र कुण्डं महाभागे मम तद्रोचते जलम् ।
मारकतं सुवर्णाभमगाधं निर्म्मितं मया ॥ ५९ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
धुन्वानो दुष्करं कर्म्म पञ्चभूतात्मनिष्ठितम् ॥ ६० ।
तत्र कृतोदको भद्रे धूतपापो यशस्विनि ।
गत्वेन्द्रलोकं सुश्रोणि देवैः सह स मोदते* ॥ ६१ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
इन्द्रलोकम्परित्यज्य मम लोकं प्रपद्यते† ॥ ६२ ।
तत्राश्चर्य्यं महाभागे धूतपापे शृणुष्व मे ।
वर्त्तते च विशालाक्षि मणिपूरे गिरौ मम ॥ ६३ ।
तावन्न‡ पतते धारा यावत्पापं न धूयते ।
धूते पापे च सुश्रोणि धारा च पतते§ मही ॥ ६४ ।
एवं तत्र विशालाक्षि वृक्षमश्वत्थमिश्रितम् ।
धूतपापं न प्रविशेन्नरे शुद्धे प्राविशतिश¶ ॥ ६५ ।
तस्मिन् क्षेत्रे वरारोहे समन्तात्पञ्चयोजने‖ ।
यत्र तिष्ठाम्यहं देवि पश्चिमां दिशमाश्रितः ॥ ६६ ।

---

* सुमोदते इति (ग) । † मम लोके महीयते इति (ङ) । ‡ यावदिति (ग) । § पततीति साधु । ¶ अत्र षष्ठलघुत्वात् छन्दोदोषः । ‖ पञ्चयोजनमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र चामलकम्भद्रे अदूरादर्द्धयोजनात् ।
मम चैव प्रभावेण सर्व्वकामफलोदयम् ॥ ६७ ।
तत्र कश्चिन्न जानाति पापकर्म्मा नराधमः ।
भक्तं भागवतं शुद्धं मम कर्म्मव्यवस्थितम् ॥ ६८ ।
उपोष्य च त्रिरात्राणि श्रद्दधानो जितेन्द्रियः ।
तत्र गत्वा वरारोहे उदिते च दिवाकरे ।
अथ मध्याह्नवेलायां यदि वास्तगतेऽपि वा ।
एकचित्तेन गन्तव्यं धृतिङ्कृत्वा सुपुष्कलाम् ॥ ६९।७० ।
यत्तत्र लभते भद्रे फलमामलकं शुभम् ।
पञ्चरात्रेण लभते तस्मिन् भूतगिरौ मम ॥ ७१ ।
ततो हरिवचः श्रुत्वा सा मही संशितव्रता ।
पुनर्नारायणन्तत्र प्रोवाच विनयान्विता ॥ ७२ ।
स्तुतस्वामी श्रुतोऽसि त्वं तत्र स्थानानि यानि च ।
एतन्नामनिरुक्तिन्त्वं वक्तुमर्हसि साम्प्रतम् ॥ ७३ ।

वराह उवाच ।

भूमि हत्वा तु संसारान्ये चान्ये देवकण्टकाः ।
द्वापरं युगमासाद्य यत्र स्थास्यामि सुन्दरि ॥ ७४ ।
ततोऽमरैश्च ब्रह्माद्यैर्बहुभिर्मन्त्रवादिभिः ।
स्तुतिः कर्त्तुं समारब्धा मणिपूराश्रितस्य मे ॥ ७५ ।
ततो मां नारदो देवि असितो देवलस्तथा ।
पर्व्वतश्च महाभागे मम भक्त्या व्यवस्थितः ।
नाम कुर्व्वन्ति मे तत्र मणिपूरगिरौ ततः ॥ ७६ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्तुतस्वामीति विख्यातं मम कर्म्मव्यपाश्रितम् ॥ ७७ ।
एतत्ते कथितम्भद्रे निरुक्तिकरणं मया ।
त्वया पृष्टं हि यद्भद्रे सर्व्वभागवतप्रियम् ॥ ७८ ।
एतत्स्तुतगिरेर्द्देवि माहात्म्यङ्कथितं मया ।
द्वापरं युगमासाद्य यत्र स्थास्यामि सुन्दरि ॥ ७९ ।
एतानि भूमि गुह्यानि तत्र भूतगिरौ मम ।
अश्रद्दधानेन मर्त्त्येन श्रोतव्यं नात्र संशयः ॥ ८० ।
एतत्ते कथितम्भद्रे सर्व्वधर्म्मव्यपाश्रयम् ।
श्रीस्तुतस्वामिमाहात्म्यङ्किमन्यत्परिपृच्छसि ॥ ८१ ।

इति वराहपुराणे भगवच्छास्त्रे स्तुतस्वामिमाहात्म्यं नाम
अष्टाचत्वारिंशदधिकशततमोऽध्यायः ।

ऊनपञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रीस्तुतस्वामिमाहात्म्यं श्रुत्वा धर्म्मपरायणा ।
परितुष्टमना देवी वाक्यमेतदुवाच ह ॥ १ ।

धरण्युवाच ।

एतच्छ्रुत्वा तु माहात्म्यं देवदेववर प्रभो ।
मम चित्तस्य परमा ज्ञाता शान्तिरनुत्तमा ॥ २ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नाराचधारावरणासिधारी
सुररिपुवधकारी धरणीधरः ।
धृतशङ्खगदाब्जचक्रपाणिः
स्वयमिह शास्त्रमुदावहत्प्रधानम्* ॥ ३ ।
एवं हि गुणमाहात्म्यं स्रुतस्वामिनि मच्छ्रुतम् ।
अस्माच्चेदं परं श्रेष्ठं तन्मे वद कृपानिधे ॥ ४ ।

वराह उवाच ।

एवम्भूमि वरं श्रेष्ठि फुल्लपङ्कजमालिनि ।
कथयिष्यामि चान्यत्ते गुह्यम्पापभयापहम् ॥ ५ ।
द्वापरं युगमासाद्य यादवानां कुलोद्वहः ।
सौरीति तत्र विख्यातो भविष्यति पिता मम ॥ ६ ।
द्वारकेति च विख्याता पुरी तत्र स्थिताऽभवत् ।
या च देवपुरीरम्या विश्वकर्म्मविनिर्म्मिता ॥ ७ ।
पञ्चयोजनविस्तारा दशयोजनमायता ।
वसाम्यत्र वरारोहे शतपञ्चसमास्तथा† ॥ ८ ।
भारावतरणङ्कृत्वा देवानां सुमहत्प्रियम् ।
पुनरप्यागमिष्यामि स्वर्लोकम्प्रति सुन्दरि ॥ ९ ।
भविष्यति वरारोहे ईश्वरः सदृशो मम ।
दुर्वासा इति विख्यातः शपिष्यति कुलं मम ॥ १० ।
तस्य शापाभिसन्तापाद्द्वारकावासिनो धरे ।

* (ग) पुस्तके श्लोकस्यास्य पादविपर्य्यासो दृश्यते । † स्थिता इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वृष्णयन्धकाश्च भोजाश्च गमिष्यन्ति यमक्षयम् ॥ ११ ।
चन्द्रपाण्डुरसङ्काशो वनमाली हलायुधः ।
हलेनाकृष्य नगरं समुद्रङ्गमयिष्यति ॥ १२ ।
नारायणवचः श्रुत्वा धर्म्मकामा वसुन्धरा ।
उभौ तौ चरणौ गृह्य* पुनः पप्रच्छ माधवी ॥ १३ ।

धरण्युवाच ।

लोकनाथोऽसि सर्व्वेषां देव मायाकरण्डक ।
शपिष्यति कथं तत्र दुर्व्वासास्तद्वदस्व मे ॥ १४ ।

वराह उवाच ।

तत्र जाम्बवती नाम मम पत्नी भविष्यति ।
रूपयौवनसम्पन्ना मम भोगसमन्विता ॥ १५ ।
तस्याः पुत्त्रो महाभागे रूपयौवनदर्पितः ।
साम्ब इत्यभिविख्यातो ममैव सततम्प्रियः ॥ १६ ।
तेनैव क्रीड़मानेन† कृत्वा गर्भमतथ्यतः ।
स पृष्टः परमश्रेष्ठ ऋषिरेषा प्रसोष्यति ।
पुत्त्रकामा स्त्रियं बाला मुने तत्प्रब्रवीहि मे ॥ १७ ।
साम्बोऽयमिति च ज्ञात्वा स मुनिः कोपमूर्च्छितः ।
उवाच तर्हि ते गर्भान्मुसलं कुलनाशनम् ।
येन वृष्णयन्धकाः सर्व्वे गमिष्यन्ति यमक्षयम् ॥ १८ ।
श्रुत्वा दुर्व्वाससः शापन्ते च सर्व्वे कुमारकाः ।
शापेन सन्तप्तधियो मामूचुर्भयसंयुताः ॥ १९ ।

---

* गृहीत्वेति साधु । † क्रीड़तेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततस्तानागतान्दृष्ट्वा कुमारान् हृष्टवाहनम्।
ते च मामब्रुवन् सर्व्वे यथावृत्तं समुत्सुकाः॥ २०॥
तच्च तेषां वचः श्रुत्वा प्रोक्तवानस्मि तच्छृणु।
भविष्यति न सन्देहो दुर्व्वासा यदुवाच ह॥ २१॥
एवन्ते कथितं भूमि वृष्णादिशापकारणम्।
तत्र स्थानानि मे भूमि कथ्यमानानि वै शृणु॥ २२॥
द्वारकायां महाभागे वैष्णवानां सुखावहे।
अस्ति पञ्चसरो नाम गुह्यं क्षेत्रं परं मम।
समुद्रतीरमुत्सृज्य मम कर्म्मसुखावहम्॥ २३॥
तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितोनरः।
मोदते नाकपृष्ठे तु अप्सरोगणसङ्कुले॥ २४॥
अथात्र मुञ्चति प्राणान् क्षेत्रे पञ्चसरे मम।
देवलोकं समुत्सृज्य मम लोके महीयते॥ २५॥
प्लक्षो वै तत्र सुश्रोणि शतशाखोमहाद्रुमः।
सुफलैः शोभनैः कुम्भाकृतिभिर्बहुभिः फलैः*॥ २६॥
बहवस्तत्र गच्छन्ति लाभलोल्येन† मानवाः।
फलं न लभते कश्चिन्मुक्त्वा भागवतं नरम्॥ २७॥
लभन्ते ये फलं तत्र मुक्ताः पापेन कर्म्मणा।
ते लभन्ते परां सिद्धिं मम कर्म्मणि संस्थिताः॥ २८॥

---

* चतुर्विंशतिद्वादशीसुबहुफलितोभिः फलैरिति (ग)। † लाभालाभेन मानवा इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रभासमिति विख्यातं तस्मिंस्तीर्थं* परे मम ।
मनुजा यं न पश्यन्ति रागलोभसमन्विताः ॥ २९ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते सप्तद्वीपेषु गुह्यानि च स गच्छति ॥ ३० ।
अथ चेन्मुञ्चते प्राणान् प्रभासे गतकिल्बिषः ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ३१ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
प्रभासे यत्र शृण्वन्ति सागरे न मरम्प्रति† ॥ ३२ ।
मकरास्तत्र दृश्यन्ते भ्रममाणास्ततस्ततः ।
न किञ्चिदपराध्यन्ति स्नायमाना जले ततः ॥ ३३ ।
अथात्र प्रक्षिपेत्पिण्डान् प्रसन्ने सलिले नरः‡ ।
असम्प्राप्ते च गृह्णन्ति एवमेतन्न संशयः ॥ ३४ ।
पापकर्म्मरतस्यापि न गृह्णन्ति जलम्प्रति ।
धर्म्मात्मनाञ्च गृह्णन्ति पिण्डमेव न संशयः ॥ ३५ ।
पञ्चपिण्डमिति ख्यातं तस्मिन् गुह्यं परं मम ।
अगाधस्याप्यपारस्य क्रोशविस्तार एव च ॥ ३६ ।
तत्राभिषेकङ्कुर्व्वीत पञ्चकालोषितोनरः ।
मोदते शक्रलोके स एवमेतन्न संशयः ॥ ३७ ।
अथात्र मुञ्चते प्राणान् पञ्चकुण्डे यशस्विनि ।

---

* तीर्थे इति (क), (ख) । † नगरं प्रतीति (क), (ख) । ‡ सलिले न तु इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शक्रलोकम्परित्यज्य मम लोकं स गच्छति ॥ ३८ ।
तत्राश्चर्यं महाभागे कथ्यमानं मया शृणु ।
न पश्येत्पापकर्म्मा वै शुभकर्म्मैव पश्यति ॥ ३९ ।
चतुर्विंशतिद्वादश्यां मध्याह्ने च दिवाकरे ।
रौप्यं सुवर्णकम्पन्नं दृश्यते नात्र संशयः ॥ ४० ।
क्षेत्रं सङ्गमनं नाम तस्मिंस्तीर्थे परं मम ।
धाराः पतन्ति चत्वारि* मणिपूरगिरौ श्रिताः ॥ ४१ ।
तत्राभिषेकं कुर्व्वीत चतुर्भक्तोषितोनरः ।
वैखानसेषु लोकेषु मोदते नाऽत्र संशयः ॥ ४२ ।
अथाऽत्र मुञ्चते प्राणान् मम भक्तिपरायणः ।
त्यक्त्वा वैखानसाँल्लोकान्मम लोकं स गच्छति ॥ ४३ ।
तत्रापि परमाश्चर्यं कथ्यमानं शृणुष्व मे ।
दृश्यन्ते यानि कुण्डेषु मणिपूरगिरौ तथा ॥ ४४ ।
प्रक्षीयमाणे पापे तु नयते तज्जलं भुवि ।
स्नायमानेषु पापेषु न पतेत्तद्यथा पुरा ॥ ४५ ।
हंसकुण्डेति विख्यातं तस्मिन् क्षेत्रे परे मम ।
धारा चैका पतत्यत्र मणिपूरगिरौ श्रिता ॥ ४६ ।
तत्राभिषेकं कुर्व्वीत षष्ठकालोषितोनरः ।
मुक्तसङ्गो महाभागे मोदते वरुणालये ॥ ४७ ।
अथाऽत्र मुञ्चते प्राणान् हंसकुण्डे वरानने ।

---

* चतस्र इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वारुणं लोकमुत्सृज्य मम लोके महीयते ॥ ४८ ।
तत्राश्चर्यं प्रवक्ष्यामि हंसकुण्डे यशस्विनि ।
शुद्धाः पश्यन्ति मनुजाः पापकर्म्मा न पश्यति ॥ ४९ ।
चतुर्विंशतिद्वादश्यां मध्याह्ने च दिवाकरे ।
हंसाश्चैवाऽत्र दृश्यन्ते चन्द्रकुन्दसमप्रभाः ॥ ५० ।
यस्तत्र पश्यते* हंसान् भ्रममाणानितस्ततः ।
लभन्ते ते परां सिद्धिं धरे नास्त्यत्र संशयः ॥ ५१ ।
कदम्बमिति विख्यातं तस्मिन् क्षेत्रे परं मम ।
तृणयो यत्र वै शुद्धाः संप्राप्ताश्च ममालयम् ॥ ५२ ।
तत्राभिषेकं कुर्व्वीत चतुःकालोषितो नरः ।
मोदते ऋषिलोकेषु पुण्यात्मा वै न संशयः ॥ ५३ ।
अथाऽत्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ ५४ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं शृणुष्व मे ।
कदम्बात्पतते† धारा तत्र पूर्व्वं विनिःसृता ॥ ५५ ।
स कदम्बो महाभागे माघमासस्य द्वादशी ।
पुष्पाणि वै प्रकटयत्युदयस्थे दिवाकरे ॥ ५६ ।
ये वा लभन्ते तत्पुष्पं मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ ५७ ।
चक्रतीर्थमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।

---

* पश्यतीति साधु । † पततीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri Funding : IKS

पञ्च धाराः पतन्त्यत्र मणिपूरसमाश्रिताः ॥ ५८ ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः ।
दशवर्षसहस्राणि स्वर्गलोके स मोदते ॥ ५९ ।
अथाऽत्र मुञ्चते प्राणाँल्लोभमोहविवर्ज्जितः ।
सर्व्वान् स्वर्गान् समुत्सृज्य मम लोकाय गच्छति ॥ ६० ।
तत्राश्चर्य्यं प्रवक्ष्यामि कथ्यमानं शृणुष्व मे ।
अन्यथैतन्न पश्यन्ति मम कर्म्मपरायणाः ॥ ६१ ।
चतुर्विंशतिद्वादश्यामर्द्धरात्रे यशस्विनि ।
श्रूयते तत्र निर्घोषो मनःकर्णसुखावहः ॥ ६२ ।
सुगन्धीवहते वायुर्बहुमाल्यसमन्वितः ।
दुर्लभः पापिनाञ्चैव सुलभः पुण्यकर्म्मिणाम् ॥ ६३ ।
तस्य चोत्तरपार्श्वेन अशोकस्य महाद्रुमः ।
पुष्पते सोऽथ तत्रापि सूर्य्ये चाभ्युदिते* सति ॥ ६४ ।
ये तत्र लभते पुष्पं मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिं एवं भूमे न संशयः ॥ ६५ ।
अस्ति रैवतकं नाम तस्मिन् क्षेत्रे परं मम ।
सर्व्वलोकेषु विख्यातं यत्र विक्रीड़ितं मया ॥ ६६ ।
बहुगुल्मलताकीर्णं बहुपुष्पैश्च शोभितम् ।
बहुवर्णशिलापङ्का गुहाश्चापि दिशो दश ।
वाप्यश्च कन्दराश्चैव देवानामपि दुर्लभाः ॥ ६७ ।

---

* अभ्युद्यते इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्राभिषेकं कुर्व्वीत षष्ठकालोषितोनरः ।
गच्छते* सोमलोकाय कृतकृत्यो न संशयः ॥ ६८ ।
अथाऽत्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
सोमलोकं समुत्सृज्य मम लोकं प्रपद्यते ॥ ६९ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
पश्यन्ति मनुजाः सर्व्वे धर्म्मकामा न संशयः ॥ ७० ।
पतन्ति सर्व्ववृक्षाणां पत्राणि सुबहून्यपि ।
एकञ्चापि न दृश्येत प्रसन्नं याति तज्जलम् ।
स च पूर्व्वेण पार्श्वेण शोभते वै महाद्रुमः ॥ ७१ ।
अपरो मम पार्श्वेण देवानामपि दुर्ल्लभः ।
पञ्चक्रोशसुविस्तारः शोभते वै महाद्रुमः ॥ ७२ ।
पद्मैश्चैवोत्पलैश्छन्नं सुगन्धिकुसुमैः सह ।
बहुमत्स्यजलाकीर्णं सर्व्वतस्तु फलान्वितम् ।
शिलातलगुल्माच्छन्नं सुगन्धिकुसुमैः सह ॥ ७३ ।
तत्राभिषेकं कुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते नन्दने दिव्ये अप्सरोभिः समन्विते ॥ ७४ ।
अत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
पश्यन्ति मनुजाः सर्व्वे धर्म्मकामा न संशयः ॥ ७५ ।
मध्याह्ने च पुनः पूर्णश्चार्द्धरात्रे समोवहेत् ।
वर्द्धते क्षीयते चैव यथैव च महोदधिः ॥ ७६ ।

---

* गच्छतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्य पश्चिमपार्श्वे तु विल्वश्चैव महाद्रुमः।
चतुर्विंशतिद्वादश्यां स पुष्पति च निष्फलम् ॥ ७७ ।
पश्यते शुभकर्म्मा च पापकर्म्मा न पश्यति ।
दृश्यते च महाभागे अस्तमिते दिवाकरे ॥ ७८ ।
यस्तत्र लभते पुष्पं मम मार्गानुसारकः ।
स लभेत परां सिद्धिमेवम्भूम्भि न संशयः ॥ ७९ ।
विष्णुसंक्रमणं नाम तस्मिन् क्षेत्रे परे मम ।
विद्धोऽस्मि यत्र व्याधेन स्वमूर्त्तिं चास्थितः पुनः ॥ ८० ।
तत्र कुण्डं महाभागे मणिपूरगिरौ श्रुतम् ।
धारा चैका पतत्यत्र लाभालाभविवर्जितः ।
सूर्य्यलोकं समुत्सृज्य मम लोके महीयते ॥ ८१ ।
तत्राश्चर्य्यं प्रवक्ष्यामि विष्णुं शत्रुगणेश्वरम् ।
पापिनां यस्तु दुर्द्दर्शः सुदृश्यः पुण्यचारिणाम् ॥ ८२ ।
तस्य दक्षिणपार्श्वेन अश्वत्थो वै महाद्रुमः ।
चतुर्विंशतिद्वादश्यां मध्याह्ने तु दिवाकरे ।
फलते स यथान्यायं सर्व्वभागवतप्रियम् ।
उच्चश्चैव विशालश्च मनोज्ञश्चैव शीतलः ॥ ८३।८४ ।
ये लभन्ते फलं तत्र मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ ८५ ।
तस्मिन् क्षेत्रे महाभागे तिष्ठामि चोत्तरामुखः ।
सर्व्वभागवतप्रीतिं समुद्रतटमाश्रितः ।
अहं रामेण सहितः सा च एकादशी शुभा ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रीणि तत्रैव तिष्ठामो द्वारकायां यशस्विनि ॥ ८६।८७ ।
तस्मिन् क्षेत्रे महाभागे त्रयो मोदामहे वयम् ।
त्रिंशद्योजनविस्तारः सर्व्वतस्तु दिशो दश ॥ ८८ ।
तत्र गत्वा वरारोहे ये मां द्रक्ष्यन्ति भक्तितः ।
अदीर्घेणैव कालेन प्राप्नुवन्ति पराङ्गतिम् ॥ ८९ ।
आख्यानानां महाख्यानं शान्तीनां शान्तिरुत्तमा ।
धर्म्माणां परमो धर्म्मो द्युतीनां परमा द्युतिः ॥ ९० ।
लाभानां परमो लाभः क्रियाणां परमा क्रिया ।
श्रुतीनां परमं श्रेष्ठं तपसाञ्च परं तपः ॥ ९१ ।
एतन्मरणकालेऽपि मा कदाचित्तु विस्मरेत् ।
यदीच्छेत्परमां सिद्धिं मम लोकाय गच्छति ॥ ९२ ।
य एतत्पठते भद्रे कल्यमुत्थाय मानवः ।
सकुल्यास्तारितास्तेन सप्त सप्त च सप्त च ॥ ९३ ।
एतत्ते कथितम्भद्रे द्वारकायाः सुनिश्चयम् ।
उचितेनोपचारेण किमन्यत्परिपृच्छसि ॥ ९४ ।

इति वराहपुराणे भगवच्छास्त्रे द्वारवतीमाहात्म्यवर्णनो नाम

ऊनपञ्चाशदधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

द्वारकायास्तु माहात्म्यं श्रुत्वा ह्येतत्सुभाषितम् ।
हृष्टोवाच तदा देवं धर्म्मकामा वसुन्धरा ॥ १ ।

धरण्युवाच ।

अहो देव प्रसादस्य यत्त्वया परिकीर्त्तितम् ।
श्रुत्वैतत्परमं पुण्यं प्राप्तास्मि परमां श्रियम् ॥ २ ।
एतस्मादपि चेद्गुह्यं लोकनाथ जनार्द्दन ।
यद्यस्ति प्रोच्यतां मह्यङ्कृपा चेत्परमाऽपि ते ॥ ३ ।
ततो महीवचः श्रुत्वा विष्णुः कमललोचनः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ४ ।

वराह उवाच ।

सानन्दूरेति विख्यातं भूमि गुह्यम्परं मम ।
उत्तरे तु समुद्रस्य मलयस्य तु दक्षिणे ॥ ५ ।
तत्र तिष्ठामि वसुधे उदीचीं दिशमाश्रितः ।
प्रतिमा वै मदीयास्ति नात्युच्चा नातिनीचका ॥ ६ ।
आयसीन्तां वदन्त्येके अन्ये ताम्रमयीन्तथा ।
कांस्यां रीतिमयीमन्ये केचित्सीसकनिर्म्मिताम् ।
शिलामयीमित्यपरे महदाश्चर्य्यरूपिणीम् ॥ ७ ।
तत्र स्थानानि वै भूमि कथ्यमानानि वै शृणु ।
मनुजा यत्र मुच्यन्ते गताः संसारसागरम् ॥ ८ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्राश्चर्यं प्रवच्यामि सानन्दूरे यशस्विनि ।
सौवर्णं दृश्यते पद्मं मध्याह्ने तु दिवाकरे ॥ ९ ।
यत्र रामगृहं नाम मम गुह्यं यशस्विनि ।
तत्रापि शृणु चाश्चर्यं यश्चापि परिवर्त्तते ॥ १० ।
एका तत्र लता वृचे उच्चैस्थूलो महाद्रुमः ।
समुद्रमध्ये तिष्ठन्तं कोऽपि तत्र न पश्यति ॥ ११ ।
अन्यच्च ते प्रवच्यामि महाश्चर्यं वसुन्धरे ।
मम भक्ता हि पश्यन्ति तिष्ठमानाः स्वकर्म्मणा ।
बहुमत्स्यसहस्राणि कोट्योह्यर्व्वुदमेव च ॥ १२ ।
चिप्तः पिण्डश्च तन्मध्ये येन केन विकर्म्मिणा ।
एकस्तत्र स्थूलमत्स्यो भूमे चक्रेण चाङ्कितः ।
तावत्कश्चिन्न गृह्णाति यावत्तेन न भचितः ॥ १३ ।
तत्र रामसरो नाम गुह्यक्षेत्रं परं मम ।
अगाधञ्चाप्यपारञ्च रक्तपद्मविभूषितम् ॥ १४ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितो नरः ।
बुधस्य भवनङ्गत्वा मोदते नात्र संशयः ॥ १५ ।
अथ प्राणान् प्रमुच्येत तस्मिन् सरसि सुन्दरि ।
बुधस्य भवनं त्यक्त्वा मम लोकम्प्रपद्यते ॥ १६ ।
तस्मिन्रामसरस्युच्चैराश्चर्यं शृणु सुन्दरि ।
मनुजास्तन्न पश्यन्ति मम कर्म्मरता न ये ॥ १७ ।
तत्सरः क्रोशविस्तारं बहुगुल्मलतावृतम् ।
मनोज्ञं रमणीयञ्च जलजैश्चापि संवृतम् ॥ १८ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र रूढ़ानि पद्मानि द्योतयन्ति दिशो दश ।
एकन्तु दृश्यते श्वेतमब्जं रुक्ममयं तथा ॥ १९ ।
तत्र ब्रह्मसरस्युच्चैरुत्तरम्पार्श्वमाश्रिता ।
धारा चैका प्रपतति स्थूला मुसलसन्निभा ॥ २० ।
तत्र स्नानं प्रकुर्व्वीत षष्ठकालोषितोनरः ।
ब्रह्मलोकं समासाद्य मोदते नात्र संशयः ॥ २१ ।
अथात्र मुञ्चते प्राणैर्भूमे ब्रह्मसरस्यपि ।
ब्रह्मणा समनुज्ञातो मम लोकञ्च गच्छति ॥ २२ ।
तत्राश्चर्य्यं महाभागे रम्ये ब्रह्मसरे* शृणु ।
मङ्क्ता यत्र† पश्यन्ति घोरसंसारमोचणम् ॥ २३ ।
चतुर्विंशतिद्वादश्यां सा धारा पृथुलेक्षणे ।
मध्याह्ने पतति‡ भूमि यावत्सूर्य्यस्तु तिष्ठति ॥ २४ ।
परिवृत्ते तु मध्याह्ने सा धारा न पतेद्भुवि ।
एवं तत्र महाश्चर्य्यं पुण्यब्रह्मसरोवरे ॥ २५ ।
अस्ति सङ्गमनं नाम गुह्यक्षेत्रं परं मम ।
समुद्रश्चैव रामश्च समेयेते वराङ्गने ॥ २६ ।
तत्र कुण्डं महाभागे प्रसन्नविमलोदकम् ।
बहुगुल्मलताकीर्णं शोभितञ्च विहङ्गमैः ॥ २७ ।
समुद्रस्य तु पार्श्वेण अदूरात्तत्र योजनात् ।
मण्डितं कुमुदैः पद्मैः सुगन्धैश्चोत्तमैस्तथा ॥ २८ ।

---

* ब्रह्मसरसीति साधु । † यानि पश्यन्तीति (ग) । ‡ पततीति साधु, एवमन्यत्रापि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितोनरः ।
समुद्रभवनङ्गत्वा मम लोकम्प्रपद्यते ॥ २९ ।
तत्राश्चर्य्यं प्रवक्ष्यामि कुण्डं रामस्य सङ्गमे ।
यद्दृष्ट्वा मनुजास्तत्र भ्रमन्ति विगतज्वराः ॥ ३० ।
यानि कानि च पर्णानि पतन्ति जलसंसदि ।
एकमप्यत्र पश्यन्ति न केऽपि वसुधे नराः ॥ ३१ ।
अच्छिद्राणि च पत्राणि तस्मिन्नामस्य सङ्गमे ।
प्रपन्नेनापि मार्गं तच्छिद्रं तत्र न पश्यति ॥ ३२ ।
अस्ति शक्रसरो नाम गुह्यक्षेत्रं परं मम ।
तत्र पूर्व्वेण पार्श्वेण अदूरादर्द्धयोजनात् ।
तस्य कुण्डस्य सुश्रोणि चतस्रो विषमाश्रिताः* ।
धाराः पतन्ति कल्याणि प्रसन्नसलिलास्तथा ॥ ३३।३४ ।
तत्र स्नानं प्रकुर्व्वीत चतुष्कालोषितो नरः ।
चतुर्णां लोकपालानां लोकानाप्नोति चोत्तमान् ॥ ३५ ।
अस्मिंश्च शक्रसरसि यदि प्राणान् प्रमुञ्चति ।
लोकपालान् समुत्सृज्य मम लोकेषु मोदते ॥ ३६ ।
तत्राश्चर्य्यं महाभागे दृश्यते तच्छृणुष्व मे ।
शुद्धैर्भागवतैर्भूमि सर्व्वसंसारमोचणम् ॥ ३७ ।
ता धाराश्चतुरो भद्रे पतन्ति चतुरो दिशः ।
न च तद्वर्द्धते चाम्भो न चैव परिहीयते ॥ ३८ ।

---

* दिगुपाश्रिता इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मासे भाद्रपदे चैव शुक्लपक्षे तु द्वादशी ।
श्रूयते गीतनिर्घोषः श्रुतिकर्म्ममनोहरः ॥ ३९ ।
अस्ति सूर्पारकं नाम गुह्यं क्षेत्रं परं मम ।
जामदग्न्यस्य रामस्य आश्रमोऽथ भविष्यति ॥ ४० ।
तत्र तिष्ठाम्यहं देवि समुद्रतटमाश्रितः ।
शाल्मलीश्चाग्रतः कृत्वाधिष्ठितश्चोत्तरामुखः ॥ ४१ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चकालोषितो नरः ।
ऋषिलोकं ततो गत्वा पश्यते चाप्यरुन्धतीम् ॥ ४२ ।
अथ प्राणान्विमुञ्चेत कृत्वा कर्म्म सुदुष्करम् ।
ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ ४३ ।
तत्राश्चर्य्यं महाभागे नमस्कारं च कुर्व्वते ।
वर्षाणि द्वादशैतेन नमस्कारः कृतोभवेत् ॥ ४४ ।
तस्मिन् क्षेत्रे महाभागे पश्यन्ति परिनिष्ठिताः ।
पापात्मानो न पश्यन्ति मम मायाविमोहिताः ॥ ४५ ।
चतुर्विंशतिद्वादश्यां समुपायान्ति शाल्मलीम् ।
तत्र पश्यन्ति सुश्रोणि शुद्धा भागवता नराः ॥ ४६ ।
तस्मिन् क्षेत्रे महाभागे अस्ति गुह्यम्परं मम ।
जटाकुण्डमिति ख्यातं वायव्यां दिशि संस्थितम् ॥ ४७ ।
तत्कुण्डस्य महाभागे समन्ताद्दशयोजनम् ।
मलयस्य दक्षिणेन समुद्रस्योत्तरे तथा ॥ ४८ ।
तत्र स्नानन्तु कुर्व्वीत पञ्चकालोषितो नरः ।
अगस्तिभवनं गत्वा मोदते नात्र संशयः ॥ ४९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथ प्राणान् प्रमुञ्चेत मम चिन्तापरायणः ।
अगस्तिभवनं त्यक्त्वा मम लोकन्तु गच्छति ॥ ५० ।
तस्य कुण्डस्य सुश्रोणि नव धारा न किञ्चन ।
विस्तारश्च महाभागे अगाधश्च महार्णवः ॥ ५१ ।
आश्चर्यं सुमहत्तत्र कथ्यमानं मया शृणु ।
यच्च पश्यति सुश्रोणि समन्तादितरो जनः ॥ ५२ ।
चतुर्विंशतिद्वादश्यां रवावभ्युदिते सति ।
न वर्द्धति* ततश्चाम्भो यावत्तिष्ठति तत्पुनः ॥ ५३ ।
एतत्ते कथितं भद्रे सानन्दूरेति तन्मया ।
आश्चर्यञ्च प्रमाणञ्च भक्तिकीर्त्तिविवर्द्धनम् ॥ ५४ ।
गुह्यानां परमङ्गुह्यं स्थानानां परमं महत् ।
यस्तु गच्छति सुश्रोणि अष्टभक्तपथे स्थितः ।
प्राप्नोति परमां सिद्धिं ममैव वचनं यथा ॥ ५५ ।
य एतत्पठते नित्यं यश्चैवं शृणुयान्मुदा ।
कुलानि तेन तीर्णानि षट् च षट् च पुनश्च षट् ॥ ५६ ।
एतन्मरणकाले न विस्मर्त्तव्यङ्कदाचन ।
यदीच्छेद्विष्णुलोके हि निष्कलङ्गमनं नरः ॥ ५७ ।
एतत्ते कथितम्भद्रे त्वया पृष्टञ्च मां प्रति ।
उक्तं भागवतार्थाय किमन्यत्परिपृच्छसि ॥ ५८ ।

इति वराहपुराणे भगवच्छास्त्रे सानन्दूरमाहात्म्यवर्णनो नाम
पञ्चाशदधिकशततमोऽध्यायः ।

---

* वर्द्धते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकपञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

सानन्दूरस्य माहात्म्यमितच्छ्रुत्वा वसुन्धरा ।
कृताञ्जलिपुटा भूत्वा वराहं पुनरब्रवीत् ॥ १ ।

धरण्युवाच ।

श्रुतमेतज्जगन्नाथ विष्णो गुह्यमनुत्तमम् ।
यच्छ्रुत्वा सुमहाभाग जाताऽस्मि विगतज्वरा ॥ २ ।
अपरं वाऽस्ति चेत्किञ्चिद्गुह्यं क्षेत्रं शुभावहम् ।
सानन्दूरात्परङ्गुह्यक्षेत्रमस्ति न वा परम् ॥ ३ ।

सुरवरण नृसिंह लोकनाथ
युतससुरासुरधीरदेववीर ।
कमलदलसहस्रनेत्ररूपो
जयति कृतान्तसमानकालरूपः ॥ ४ ।

गद्गदं वचनं श्रुत्वा पृथिव्याः स जनार्द्दनः ।
उवाच मधुरं वाक्यं सर्व्वलोकार्त्तिहा हरिः ॥ ५ ।

वराह उवाच ।

शृणु देवि च तत्त्वेन यन्मात्त्वं परिपृच्छसि ।
गुह्यमन्यत्प्रवक्ष्यामि मद्व्रतः कर्म्मणोजनिः ॥ ६ ।
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥ ७ ।
तत्र लोहार्गले क्षेत्रे निवासो विहितः शुभः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गुह्यं पञ्चदशायामं समन्तात्पञ्चयोजनम् ॥ ८ ।
दुर्गमं दुःसहञ्चैव पापैः सर्व्वत्र वेष्टितम् ।
सुलभं पुण्ययुक्तानां मम चिन्तानुसारिणाम् ॥ ९ ।
तत्र तिष्ठाम्यहं भद्रे उदीचीं दिशमाश्रितः ।
हिरण्यप्रतिमां कृत्वा जातरूपां न संशयः ॥ १० ।
ततो मे दानवाः सर्व्वे क्रामन्तो लोकमुत्तमम् ।
मया चैवान्तरङ्कृत्वा कृत्वा मायां च वैष्णवीम् ॥ ११ ।
तत्र ब्रह्मा च रुद्राश्च स्कन्देन्द्रसमरुद्गणाः ।
आदित्या वसवो वायुरश्विनौ च महौजसौ ॥ १२ ।
सोमो बृहस्पतिश्चैव ये चान्ये वै दिवौकसः ।
तेषाञ्चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ।
शतकोटिसहस्राणि शीघ्रमेव निपातितम् ॥ १३ ।
ततश्च देवताः सर्व्वास्तुष्यमाणा* इतस्ततः ।
एवं लोहार्गलं नाम क्षेत्रं नाम मया कृतम् ॥ १४ ।
ततो देवासुरे युद्धे हत्वा त्रिदशकण्टकान् ।
तेषां संस्थापनं तत्र कृतञ्चैव महौजसाम् ॥ १५ ।
यो मां पश्यति तत्रस्थं प्रयत्नेन कदाचन ।
सोऽपि भागवतो भूमे भवत्येव सुनिष्ठितः ॥ १६ ।
तस्मिन् कुण्डेति† सुश्रोणि यः स्नाति नियतो नरः ।
उपोष्य च त्रिरात्रन्तु विधिदृष्टेन कर्म्मणा ।
ततः स्वर्गसहस्रेषु मोदते नात्र संशयः ॥ १७ ।

---

* तुष्यन्त इति साधु । † कुण्डे इति सन्धिरार्षः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथाऽत्र मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः।
सर्व्वान् स्वर्गान् परित्यज्य मम लोकं प्रपद्यते ॥ १८ ।
अन्यच्च ते प्रवक्ष्यामि यत्र तत्परमाद्भुतम् ।
लोकविस्मापनार्थाय मया तत्र च यत्कृतम् ॥ १९ ।
चतुर्विंशतिद्वादश्यां मासेन विधिना मम ।
बलिः प्रदीयते तत्र सर्व्वकामविशोधनः ॥ २० ।
अश्वो मे कल्पितस्तत्र सर्व्वरत्नविभूषितः ।
श्वेतः कुमुदवर्णाभः शङ्खकुन्दसमप्रभः ॥ २१ ।
मार्गणा मे धनुस्तत्र अक्षसूत्रं कमण्डलुः ।
आसनं विततं दिव्यं दीयतेऽश्वोपरि स्थिरम् ॥ २२ ।
श्वेतपर्व्वतमारुह्य पतमानः कुरून् बहून् ।
पतितस्तत्र दृश्येत क्षतं तत्र न दृश्यते ॥ २३ ।
अनेकान्येव रूपाणि पातयित्वा नभस्तलात् ।
शान्तो दान्तः परिक्लिष्टः स चाश्वादिवि वर्त्तते ॥ २४ ।

सूत उवाच ।

ततो भूम्या वचः श्रुत्वा ब्रह्मपुत्रो महामुनिः ।
विस्मयं परमम्प्राप्तो विष्णुमायोपवृंहितः ॥ २५ ।
ततः स विस्मयाविष्टो ब्रह्मपुत्रो महामतिः ।
सनत्कुमारो भगवान् पुनरेव प्रभाषत* ॥ २६ ।

सनत्कुमार उवाच ।

धन्यासि देवि सुश्रोणि सुपुण्यासि वरानने ।

---

* प्राभाषतेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

देवि यल्लोकनाथस्य साचाद्दर्शनमागता ॥ २७ ।
पद्मपत्रविशालाची यत्त्वया परिभाषितः ।
तेनोक्तं शंस सकलं सर्व्वेषां सुखवर्द्धनम् ॥ २८ ।
यथा यथा वदसि च धर्म्मसंहितं
गुह्यं परं देववरप्रणीतम् ।
गुणोत्तमङ्कारणसम्प्रयुक्तं
तथा तथा भावयसे मनो मम ॥ २९ ।
ततः स पुण्डरीकाचः किमाचष्ट ततः परम् ।
कर्म्मणा विधिदृष्टेन सर्व्वभागवतप्रिय ॥ ३० ।

सूत उवाच ।

तस्य तद्वचनं श्रुत्वा कुमारस्य महौजसः ।
उवाच मधुरं वाक्यमाभाष्य ब्रह्मणः सुतम् ।
शृणु वत्स जगन्नाथो यथा मामाह नोदितः ॥ ३१ ।

वराह उवाच ।

एवं तत्रैव कर्म्माणि क्रियन्ते विधिपूर्व्वकम् ।
शोधकानि च पापानां मृदूनि च शुभानि च ॥ ३२ ।
अश्वानां तत्कुलीनानामावहन्ति सुमध्यमे ।
नान्यं वहन्ति ते चाश्वा मम वाहा दुरत्ययाः ॥ ३३ ।
कुण्डं पञ्चसरो नाम गुह्यं क्षेत्रं परं मम ।
धाराः पतन्ति चत्वारि* शङ्खवर्णा मनोजवाः ॥ ३४ ।

---

* चतस्र इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नानन्तु कुर्व्वीत चतुर्भुक्तोषितो नरः।
लोकञ्चैत्राङ्गदङ्गत्वा गन्धर्व्वैः सह मोदते ॥ ३५ ।
अथ चेन्मुञ्चति प्राणांस्तस्मिन् क्षेत्रे परे मम।
गन्धर्व्वलोकमुत्सृज्य मम लोकाय गच्छति ॥ ३६ ।
ततो नारदकुण्डेति मम क्षेत्रे परं महत्।
पञ्च धाराः पतन्त्यत्र तालवृक्षसमोपमाः ॥ ३७ ।
तत्र स्नानन्तु कुर्व्वीत एकभक्तोषितो नरः।
देवर्षिं नारदं पश्येन्मोदते तेन वै समम् ॥ ३८ ।
अथात्र मुञ्चति प्राणान्मम गुह्यविनिश्चितः।
प्रमुच्य नारदं दिव्यं मम लोकञ्च गच्छति ॥ ३९ ।
ततो वसिष्ठकुण्डेति तस्मिन् क्षेत्रं परं मम।
धाराः पतन्ति तिस्रस्तु न स्थूला नाति वै कृशाः ॥ ४० ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः।
वासिष्ठं लोकमासाद्य मोदते नात्र संशयः ॥ ४१ ।
अथात्र मुञ्चति प्राणान्मम कर्म्मसु निष्ठितः।
वासिष्ठं लोकमुत्सृज्य मम लोकं प्रपद्यते ॥ ४२ ।
पञ्चकुण्डेति विख्यातं तस्मिन् क्षेत्रे परं मम।
पञ्च धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ ४३ ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः।
स तत्र गच्छते* भूमे यत्र पञ्चशिखो मुनिः ॥ ४४ ।

---

* गच्छतीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथात्र मुञ्चते प्राणान्मम भक्तो जितेन्द्रियः ।
पञ्चचूडं समुत्सृज्य स याति परमाङ्गतिम् ॥ ४५ ।
सप्तर्षिकुण्डं विख्यातमस्मिन् क्षेत्रे परं मम ।
सप्त धाराः पतन्त्यत्र हिमवत्पर्व्वतस्थिताः ॥ ४६ ।
तत्राभिषेकं कुर्व्वीत सप्तभक्तोषितो नरः ।
मोदते ऋषिलोकेषु ऋषिकन्याभिसंवृतः ॥ ४७ ।
अथात्र मुञ्चते प्राणान्रागलोभविवर्ज्जितः ।
सप्तर्षीन् स समुत्सृज्य मोदते मम संस्थितः ॥ ४८ ।
शरभङ्गस्य कुण्डं वै क्षेत्रे गुह्यं परे मम ।
तत्र धारा पतत्येका शरभङ्गाश्रिता नदी ॥ ४९ ।
स्नानं यस्तत्र कुर्व्वीत षष्ठभक्तोषितो नरः ।
मोदते तस्य लोकेषु ऋषिकन्याप्रमोदितः ॥ ५० ।
अथात्र मुञ्चते प्राणान् सर्व्वसङ्गविवर्ज्जितः ।
शरभङ्गं समुत्सृज्य मम लोके महीयते ॥ ५१ ।
कुण्डमग्निसरो नाम सर्व्वमायाभिसंवृतम् ।
भूमिं नीत्वा जलं तत्र तिष्ठते* च वरानने ॥ ५२ ।
तत्र स्नानम्प्रकुर्व्वीत अष्टकालोषितो नरः ।
गच्छत्यङ्गिरसो लोकं सुखभागी न संशयः ॥ ५३ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
अग्निलोकं समुत्सृज्य मम लोकं स गच्छति ॥ ५४ ।

* तिष्ठतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कुण्डं वृहस्पतेर्भूमे सर्व्ववेदोदकाश्रितम्।
धारा चैका पतत्यत्र हिमकूटसमाश्रिता ॥ ५५।
तत्र स्नानम्प्रकुर्व्वीत षष्ठकालोषितो नरः।
गत्वा वृहस्पतेर्लोकं मुनिकन्याभिमोदितः ॥ ५६।
अथात्र मुञ्चते प्राणान्मम लोकसमाश्रितः।
सोऽपि याति परां सिद्धिं समुत्सृज्य वृहस्पतिम् ॥ ५७।
वैश्वानरस्य कुण्डेति गुह्यक्षेत्रं परं मम।
धारा चैका पतत्यत्र दृश्यते हिमसङ्कयात् ॥ ५८।
तत्राभिषेकं कुर्व्वीत षष्ठभक्तोषितो नरः।
गत्वा वृहस्पतेर्लोकं मुनिकन्याभिमोहितः।
वैश्वानरेषु लोकेषु मोदते नाऽत्र संशयः ॥ ५९।
अथाऽत्र मुञ्चते प्राणान्मम कर्म्मपरायणः।
वैश्वानरं समुत्सृज्य मम लोकं स गच्छति ॥ ६०।
कार्त्तिकेयस्य कुण्डेति गुह्यक्षेत्रं परं मम।
यत्र पञ्चदशा* धाराः पतन्ति हिमपर्व्वतात् ॥ ६१।
तत्र स्नानम्प्रकुर्व्वीत षष्ठकालोषितोनरः।
कुमारम्पश्यते व्यक्तं षण्मुखं शुभदर्शनम् ॥ ६२।
अथाऽत्र मुञ्चते प्राणान् कृत्वा चान्द्रायणं शुचिः।
कार्त्तिकेयं समुत्सृज्य मोदते मम मण्डले ॥ ६३।
उमाकुण्डेति विख्यातं तस्मिन् क्षेत्रे परं मम।
सा गौरी यत्र चोत्पन्ना महादेववराङ्गना ॥ ६४।

---

* पञ्चदशा इत्यार्षम्, पञ्चदश इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नानन्तु कुर्वीत दशरात्रोषितो नरः ।
गौरीं स पश्यते देवीं तस्या लोके च मोदते ॥ ६५ ।
अथ प्राणान् प्रमुञ्चेत दशरात्रोषितो नरः ।
उमालोकं समुत्सृज्य मम लोकम्प्रपद्यते ॥ ६६ ।
महेश्वरस्य वै कुण्डं यत्र चोद्दाहिता उमा ।
कादम्बैश्चक्रवाकैश्च हंससारससेवितम् ॥ ६७ ।
तिस्रो धाराः पतन्त्यत्र हिमवत्पर्वताश्रिताः ।
स्थूलाश्च रमणीयाश्च न ह्रस्वाश्चातिनिर्म्मलाः ॥ ६८ ।
तत्र स्नानन्तु कुर्वीत द्वादशाहोषितो नरः ।
मोदते रुद्रलोकेषु रुद्रकन्याभिरावृतः ॥ ६९ ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
रुद्रलोकं समुत्सृज्य मम लोकञ्च गच्छति ॥ ७० ।
प्रख्यातं ब्रह्मकुण्डेति वेदा यत्र समुत्थिताः ।
चतुरो* वेदधारास्तु पतन्ति च हिमालयात् ॥ ७१ ।
ततः पूर्व्वेण पार्श्वेन समा धारा पतेच्छुभा ।
उच्चा च रमणीया च पाण्डरोदकशोभिता ॥ ७२ ।
पुनरस्योत्तरे पार्श्वे सुवर्णसदृशोपमा ।
ऋग्वेदः पतते धारा प्रसन्ना विमलोदका ॥ ७३ ।
अथ पश्चिमपार्श्वेन यजुर्वेदेन संयुता ।
अथ दक्षिणपार्श्वेन आथर्व्वणसमन्विता ॥ ७४ ।
एका धारा पतत्यत्र इन्द्रगोपकसन्निभा ॥ ७५ ।

* चतस्र इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ।
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ॥ ७६ ।
अथात्र मुञ्चति प्राणानहङ्कारविवर्ज्जितः ।
ब्रह्मलोकं परित्यज्य मम लोकम्प्रपद्यते ॥ ७७ ।
गुह्याख्यानि महाभागे क्षेत्रे लोहार्गले मम ।
सिद्धिकामेन मर्त्त्येन गन्तव्यं नात्र संशयः ॥ ७८ ।
समन्तात्पञ्चविंशन्तु योजनानि वरानने ।
न तस्य कर्म्म विद्येत स एवमपि संस्थितः ॥ ७९ ।
आख्यानानां महाख्यानं धर्म्माणां धर्म्म उत्तमः ।
पवित्राणां पवित्रन्तु न देयं यस्य कस्यचित् ॥ ८० ।
ये पठन्ति महाभागे शृखन्ति मत्परे स्थिताः ।
तारितानि कुलानि स्युरुभयत्र दशापि च ॥ ८१ ।
एतन्मरणकाले तु न कदाचित्तु विस्मरेत् ।
यदिच्छेत्परमां सिद्धिं सर्व्वसंसारमोचणीम् ॥ ८२ ।
एतत्ते कथितं भद्रे लोहार्गलमनुत्तमम् ।
माहात्म्यं पञ्चपञ्चाचि गुह्यं यच्च महौजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥ ८३ ।

इति वराहपुराणे भगवच्छास्त्रे लोहार्गलमाहात्म्यवर्णनी
नाम एकपञ्चाशदधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्वापञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा देवस्य माहात्म्यं लोहार्गलनिवासिनः ।
त्रैलोक्यनाथाधिपतेर्विस्मयं परमङ्गता ॥ १ ।

धरण्युवाच ।

पद्मपत्रविशालाक्ष लोकनाथ जगत्पते ।
त्वत्प्रसादाच्च देवेश श्रुतं शास्त्रं महौजसम् ॥ २ ।
तव शिष्या च दासी च त्वामहं शरणङ्गता ।
जगद्धाता जगज्ज्योतिर्जगत्प्रभुरतन्द्रितः ॥ ३ ।
तव सम्भावनाद्देव* जातास्मि कनकोज्ज्वला ।
अलङ्कृता च शस्ता च सर्व्वशास्त्रेण मानद ॥ ४ ।
जगद्धातुर्जगच्छास्त्रकृतेन हि परिश्रमः ।
त्वय्यायत्तं जगत्सर्व्वं यच्च किञ्चित्प्रवर्त्तते ॥ ५ ।
इति कृत्वा च मे देव साक्षाद्दोहृदि वर्त्तसे ।
लोहार्गलात्परं श्रेष्ठं गुह्यं परमदुर्लभम् ॥ ६ ।
तीर्थं तद्वद कल्याणं तीर्थानामुत्तमोत्तमम् ।
यदस्ति दुर्लभं तीर्थं तत्त्वं कथय मे प्रभो ॥ ७ ।

वराह उवाच ।

न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समानं मथुराया हि प्रियं मम वसुन्धरे ॥ ८ ।

---

* तव सम्भाषणादिति (ग) पुस्तके पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सूत उवाच।

तच्छ्रुत्वा वचनं तस्य प्रियञ्च वसुधा तदा।
प्रणम्य शिरसा देवी वराहं पुनरब्रवीत्॥ ९।

पृथिव्युवाच।

पुष्करं नैमिषञ्चैव पुरीं वाराणसीं तथा।
एतान् हित्वा महाभाग मथुरां किं प्रशंससि॥ १०।

वराह उवाच।

शृणु कार्त्स्न्येन वसुधे कथ्यमानं मयानघे।
मथुरेति च विख्यातं तस्मान्नास्ति परं मम।
सा रम्या च सुशस्ता च जन्मभूमिस्तथा मम॥ ११।
शृणु देवि यथा स्तौमि मथुरां पापहारिणीम्।
तत्र वासी नरो याति मोक्षं नास्त्यत्र संशयः॥ १२।
महामाघ्यां प्रयागे तु यत्फलं लभते नरः।
तत्फलं लभते देवि मथुरायां दिने दिने॥ १३।
पूर्णं वर्षसहस्रन्तु वाराणस्यान्तु यत्फलम्।
तत्फलं लभते देवि मथुरायाङ्क्षणेन हि॥ १४।
कार्त्तिक्याञ्चैव यत्पुण्यं पुष्करे तु वसुन्धरे।
तत्फलं लभते देवि मथुरायां जितेन्द्रियः॥ १५।
मथुरान्तु परित्यज्य योऽन्यत्र कुरुते रतिम्।
मूढ़ो भ्रमति संसारे मोहितोमम मायया॥ १६।
यः शृणोति वरारोहे माथुरं मम मण्डलम्।
अन्येनोच्चारितं शश्वत्सोऽपि पापैः प्रमुच्यते॥ १७।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पृथिव्यां यानि तीर्थानि आसमुद्रं सरांसि च ।
मथुरायां प्रयान्त्यत्र सुप्ते चैव जनार्द्दने ॥ १८ ।
मथुरामण्डलं प्राप्य श्राद्धङ्कृत्वा यथाविधि ।
तृप्तिं प्रयान्ति पितरो यावत्स्थित्यग्रजन्मनः ॥ १९ ।
ये वसन्ति महाभागे मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥ २० ।
कुब्जाम्रके सौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मत्प्रसादान्न संशयः ॥ २१ ।
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो देवास्ते नरविग्रहाः ॥ २२ ।
भविष्यामि वरारोहे द्वापरे युगसंस्थिते ।
ययातिभूपवंशाच्च क्षत्रियः कुलवर्द्धनः ।
भविष्यामि वरारोहे मथुरायां न संशयः ॥ २३ ।
मूर्त्तिं चतुर्विंशाङ्कृत्वा स्थास्यामि ऋषिभिः स्तुतः ।
वत्सराणां शतं तत्र युद्धेषु कृतनिश्चयः ॥ २४ ।
एका चन्दनसङ्काशा द्वितीया कनकप्रभा ।
अशोकसदृशा चान्या अन्याचोत्पलसन्निभा ॥ २५ ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ।
पुण्यानि च पवित्राणि संसारच्छेदनानि च ॥ २६ ।
यत्राहङ्घातयिष्यामि द्वात्रिंशतिर्वसुन्धरे ।
दैत्यान् घोरान्महाभागे कंसादीन्धर्म्मदूषकान् ॥ २७ ।
यमुना यत्र सुवहा न्नित्यसन्निहिता ध्रुवम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वैवस्वतसुता रम्या यमुना यत्र विश्रुता ।
गङ्गां प्राप्य प्रयागे या वेणीति प्रथिता भुवि ।
गङ्गाशतगुणा पुण्या माथुरे मम मण्डले ।
यमुना विश्रुता देवि नात्र कार्य्या विचारणा ॥ २८।२९ ।
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ।
येषु स्नाने नरो देवि मम लोके महीयते ॥ ३० ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
न जायते स मर्त्त्येषु जायते च चतुर्भुजः ॥ ३१ ।
अविमुक्ते नरः स्नातो मुक्तिम्प्राप्नोत्यसंशयम् ।
तथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३२ ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ ३३ ।
सर्व्वतीर्थेषु यत्स्नानं सर्व्वतीर्थेषु यत्फलम् ।
तत्फलं लभते देवि दृष्ट्वा देवं गतश्रमम् ॥ ३४ ।
न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत्फलं लभते स्नातो यथा विश्रान्तिसंज्ञके ॥ ३५ ।
कालत्रयन्तु वसुधे यः पश्यति गतश्रमम् ।
कृत्वा प्रदक्षिणे द्वे तु विष्णुलोकं स गच्छति ॥ ३६ ।
अस्ति चान्यत्परं गुह्यं सर्व्वसंसारमोक्षणम् ।
यस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ ३७ ।
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
यस्मिन् स्नातो नरोदेवि अग्निष्टोमफलं लभेत् ॥ ३८ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इन्द्रलोकं समासाद्य नरोऽसौ देवि मोदते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३९ ।
तथा कनखलं नाम तीर्थं गुह्यम्परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥ ४० ।
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं नाम नामतः ।
तस्मिन् स्नातो नरो देवि मम लोके महीयते ॥ ४१ ।
अस्मिंस्तीर्थे पुरा वृत्तं तच्छृणुष्व वसुन्धरे ॥ ४२ ।
पाञ्चालविषये देवि काम्पिल्यञ्च पुरोत्तमम् ।
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ॥ ४३ ।
तस्मिंस्तु वसते देवि तिन्दुको नाम नापितः ॥ ४४ ।
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बञ्च क्षयङ्गतम् ॥ ४५ ।
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीड़ितः ।
सर्व्वसङ्गं परित्यज्य सोऽगच्छन्मथुरां तदा ॥ ४६ ।
ब्रह्मणावसथे सोऽपि वसमानो* वसुन्धरे ।
तस्य कर्म्मशतङ्कृत्वा स्नात्वैव यमुनां नदीम् ।
नित्यं स यमुनां स्नाति चिरकालं दृढ़व्रतः ॥ ४७ ।
ततः कालेन महता पञ्चत्वं समुपागतः ।
स च तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥ ४८ ।
तस्मिन्वरगृहे देवि ब्राह्मणोयोगिनां वरः ।

---

* वसन्निति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ।
तत्तीर्थस्य प्रभावेण जाता मुक्तिः सुदुर्ल्लभा ॥ ४९ ।
ततः परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सूर्य्यस्त्वाराधितः पुरा ।
भ्रष्टराज्येन हि तथा धनकामेन सुन्दरि ॥ ५० ।
ऊर्द्ध्वबाहुर्निराहारस्तताप परमन्तपः* ।
साग्रं संवत्सरं देवि ततः काममवाप्तवान् ॥ ५१ ।
तस्य प्रसन्नो भगवान् द्युमणिः प्रत्यभाषत ।
किङ्कारणं बले ब्रूहि तपस्यति† महत्तपः ॥ ५२ ।

बलिरुवाच ।

भ्रष्टराज्योऽस्मि देवेश पाताले निवसाम्यहम् ।
वित्तेनापि विहीनस्य कुटुम्बभरणङ्कुतः ॥ ५३ ।
मुकुटात्तस्य वै सूर्य्यो ददौ चिन्तामणिं ततः ।
चिन्तामणिं समासाद्य पातालमगमद्बलिः ॥ ५४ ।
तस्मिंस्तीर्थे नरः स्नातः सर्व्वपापैः प्रमुच्यते ।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति ॥ ५५ ।
आदित्याहनि संक्रान्तौ‡ ग्रहणे चन्द्रसूर्य्ययोः ।
तस्मिन् स्नातो नरो देवि राजसूयफलं लभेत्§ ॥ ५६ ।
ध्रुवेण यत्र सन्तप्तं स्वेच्छया परमं तपः ।

---

* स तेपे परमन्तप इति साधु । † भवानिति कर्त्तृपदस्य व्यवहारः कर्त्तव्यः अन्यथा तपस्यसीति कर्त्तव्यम् । ‡ संप्राप्ते इति (ग) । § लभेतेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र वै स्नानमात्रेण ध्रुवलोके महीयते ।
तत्राथ मुञ्चते प्राणान्मम लोके महीयते ॥ ५७ ।
ध्रुवतीर्थे तु वसुधे यः श्राद्धं कुरुते नरः ।
पितॄंस्तारयते सर्व्वं पितृपक्षे विशेषतः ॥ ५८ ।
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।
तस्मिन् स्नाते नरो देवि मम लोकम्प्रपद्यते ॥ ५९ ।
तद्दक्षिणे महादेवि ऋषितीर्थं परं मम ।
तत्र स्नातो नरो देवि ऋषिलोकम्प्रपद्यते ।
अथात्र मुञ्चते प्राणान्मम लोके महीयते ॥ ६० ।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम ।
तत्र वै स्नानमात्रेण मोक्षमेव प्रपद्यते ॥ ६१ ।
तत्र वै कोटितीर्थं हि देवानामपि दुर्लभम् ।
तत्र स्नानेन दानेन मम लोके महीयते ॥ ६२ ।
कोटितीर्थे नरः स्नात्वा सन्तर्प्य पितृदेवताः ।
तारिताः पितरस्तेन तथैव प्रपितामहाः ॥ ६३ ।
कोटितीर्थे नरः स्नात्वा ब्रह्मलोके महीयते ॥ ६४ ।
तत्रैव वायुतीर्थन्तु पितॄणामपि दुर्लभम् ।
पिण्डदानात्तु तत्रैव पितृलोकं स गच्छति ॥ ६५ ।
गयापिण्डप्रदानेन यत्फलं लभते नरः ।
तत्फलं लभते देवि ज्येष्ठे दानान्न न संशयः ॥ ६६ ।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च ।
स्नानं दानं जपं होमं सहस्रगुणितम्भवेत् ॥ ६७ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एषां स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ।
तीर्थानाञ्चैव माहात्म्यं श्रुत्वा कामानवाप्नुयात् ॥ ६८ ।

इति वराहपुराणे मथुरातीर्थप्रशंसा नाम
द्विपञ्चाशदधिकशततमोऽध्याय: ।

त्रय:पञ्चाशदधिकशततमोऽध्याय: ।

वराह उवाच ।

उत्तरे शिवकुण्डाच्च तीर्थानां नवकं स्मृतम् ।
नवतीर्थात्परं तीर्थं न भूतं न भविष्यति ॥ १ ।
तत्रैव स्नानमात्रेण सौभाग्यं जायते परम् ।
रूपवन्तः प्रजायन्ते स्वर्गलोके न संशयः ।
तस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ २ ।
तत्र संयमनं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नातो मृतो वापि मम लोकं स गच्छति ॥ ३ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व* वसुन्धरे ।
तस्मिन्संयमने तीर्थे यद्यद्वृत्तं पुरातनम् ॥ ४ ।
कश्चित्पापसमाचारो निषादो दुष्टमानसः ।

---

* शृणुष्वेति आर्षम्, शृणु इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वसति* नैमिषारण्ये सुप्रतीते सुपापकृत् ॥ ५ ।
केनचित्त्वथ कार्य्येण सोऽगच्छन्मथुरां प्रति ।
तत्र प्राप्य च कालिन्दीं कृष्णपचे चतुर्द्दशीम् ।
स निषादस्तर्त्तुकामस्तस्याञ्चैव तिथौ ततः ।
ततार यमुनां सोऽथ प्राप्य संयमनं शुभे ।
ममज्जासौ ततः पापस्तस्मिंस्तीर्थे वरे शुभे ।
मग्नमात्रस्ततः पापः सद्यः प्राणैर्व्ययुज्यत ॥ ६।७।८ ।
तत्तीर्थस्य प्रभावेण जातोऽसौ पृथिवीपतिः ।
सौराष्ट्रविषये देवि चत्त्रियोऽभूद्धनुर्द्धरः ।
नाम्ना यज्ञधनुर्नाम सोऽभवत्प्रियदर्शनः ।
पालयामास वसुधां चत्त्रधर्म्मसमाश्रितः ॥ ९।१० ।
तेनोढ़ा काशीराजस्य पीवरी नामतः शुभा ।
पत्नी शीतानां मुख्यानां प्रवरा सा वसुन्धरे ॥ ११ ।
ताञ्चैव रमयामास उद्यानेषु वनेषु च ।
प्रासादेषु च रम्येषु नदीनां पुलिनेषु च ॥ १२ ।
प्रजाः पालयतस्तस्य दानानि ददतस्तथा ।
कालोगच्छति राजा तु भोगासक्तिञ्च विन्दति† ॥ १३ ।
भोगासक्तस्य वसुधे वर्षाणि‡ सप्तसप्ततिः ।
पुत्राः सप्त तथा जाताः कन्याः पञ्च सुशोभनाः ॥ १४ ।
राज्ञां पञ्चसु ता दत्ताः कन्याः कमललोचनाः ।

---

* वसतीति साधु । † राज्ञस्तु भोगासक्तिञ्च विन्दतीति बहुषु पाठः । ‡ वर्षाणामिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुत्रान् संस्थापयामास स्थानेषु वसुधाधिपान् ॥ १५ ।
पीवर्य्या सह सुप्त: स रात्रौ च वसुधाधिप: ।
तत्र प्रबुद्धो नृपतिर्हा हेति वदते मुहु: ।
स्मृत्वा तु मथुरां देवि स्मृत्वा संयमनं परम् ॥ १६ ।
तत: सा पीवरीत्याह किमेवं भाषसे नृप* ।
प्रियाया वचनं श्रुत्वा राजा वचनमब्रवीत् ।
मत्त: सुप्त: प्रमत्तश्च असम्बद्धं प्रभाषते ।
निद्रावशस्य वचनं न सम्प्रष्टुन्त्वमर्हसि ॥ १७।१८ ।

पीवर्य्युवाच ।

कथयस्व ममाद्य त्वं यद्यहं वल्लभा तव ।
प्राणांस्त्यक्ष्याम्यहं देव गोपयिष्यसि मे यदि ॥ १९ ।
प्रियाया वचनं श्रुत्वा प्रत्युवाच नराधिप: ।
अवश्यं यदि वक्तव्यं गच्छावो मथुरां पुरीम् ।
तत्र गत्वा यथातत्त्वं वदिष्यामि शुभानने ॥ २० ।
ददस्व विपुलं दानं ब्राह्मणेभ्य: सुलोचने ।
पुत्रान् संस्थाप्य दौहित्रान् स्वे स्वे स्थाने शुभान् प्रिये ।
कोशं रत्नानि ग्रामांश्च पुत्रान्वीक्ष्य पुन: पुन: ॥ २१ ।
तत: सम्मानयामास जनं पुरनिवासिनम् ।

---

* तत: सा पीवरी राज्ञी भर्त्तारं पर्य्यपृच्छत । किं त्वया भाषितं राजन् मथुरेति पुन: पुन: ॥ एवं सा पृच्छते देवी भर्त्तारं शुभलोचना । इति (ग) पुस्तकेऽत्र पाठभेद: । अत्र प्रच्छधातोरात्मनेपदमार्षम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पितृपैतामहं राज्यं पालनीयं यथाक्रमम् ।
राज्ये पुत्रान्नियोक्ष्यामि यदि वो रोचतेऽनघाः ॥ २२ ।
राज्यपुत्रकलत्राणि बन्धुवर्गं तथैव च ।
नित्यमिच्छन्ति वै लोको यमस्येच्छानि* चान्यथा ।
एवं ज्ञात्वा प्रपन्नेन कर्त्तव्यञ्चात्मनो हितम् ।
तस्मात्सर्व्वप्रयत्नेन गच्छामी मथुरां पुरीम् ॥ २३।२४ ।
अहो कष्टं यदस्माभिः पुरा राज्यमनुष्ठितम् ।
इदानीन्तु मया ज्ञातं त्यागान्नास्ति परं सुखम् ॥ २५ ।
नास्ति विद्यासमञ्चक्षुर्नास्ति चक्षुःसमं बलम् ।
नास्ति रागसमं दुःखं नास्ति त्यागात्परं सुखम् ॥ २६ ।
यः कामान्कुरुते सर्व्वान्यश्चैतान् केवलांस्त्यजेत् ।
प्रायेण सर्व्वकामानां परित्यागो विशिष्यते ॥ २७ ।
अभिषिच्य सुतं ज्येष्ठमनुयोज्य परान्बहून् ।
ततः पौरजनं दृष्ट्वा चतुरङ्गबलान्वितः ।
ततः कालेन महता सम्प्राप्तो मथुरां पुरीम् ॥ २८ ।
तेन दृष्टा पुरी रम्या वासवस्य पुरी यथा ।
तीर्थैर्द्वादशभिर्युक्ता पुण्या पापहरा शुभा ॥ २९ ।
रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम् ।
तं दृष्ट्वा मनुजो देवि कृतकृत्यो हि जायते ॥ ३० ।
एकादशी शुक्लपक्षे मासि भाद्रपदे तथा† ।
तस्यां‡ स्नातो नरो देवि कृत्यकृत्यो हि जायते ॥ ३१ ।

* इच्छानीति क्लीवत्वमार्षम् । † हि या इति (ग) । ‡ तस्मिन्निति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वनं कुन्दवनं नाम तृतीयञ्चैवमुत्तमम्।
तत्र गत्वा नरोदेवि कृतकृत्यो हि जायते॥ ३२।
एकादशी कृष्णपक्षे मासि भाद्रपदे हि या।
तत्र स्नातो नरो देवि रुद्रलोके महीयते॥ ३३।
चतुर्थङ्काम्यकवनं वनानां वनमुत्तमम्*।
तत्र गत्वा नरो देवि मम लोके महीयते॥ ३४।
विमलस्य च कुण्डे तु सर्व्वपापैः प्रमुच्यते।
यस्तत्र मुञ्चते प्राणान्मम लोकं स गच्छति॥ ३५।
पञ्चमम्बकुलवनं नाम वनानामुत्तमं वनम्।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति॥ ३६।
यमुनायाः परे पारे देवानामपि दुर्ल्लभम्।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम्॥ ३७।
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तद्वनस्य प्रभावेण नागलोकं स गच्छति॥ ३८।
सप्तमन्तु वनं भूमि खादिरं लोकविश्रुतम्।
तत्र गत्वा नरोभद्रे मम लोकं स गच्छति॥ ३९।
महावनञ्चाष्टमन्तु सदैव तु मम प्रियम्।
यत्र गत्वा तु मनुज इन्द्रलोके महीयते॥ ४०।
लोहजङ्घवनं नाम लोहजङ्घेन रचितम्।
नवमन्तु वनं नाम सर्व्वपातकनाशनम्॥ ४१।

---

* चतुर्थं बहुलवनं नाम वनानामुत्तमं वनमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वनं विल्ववनं नाम दशमं देवपूजितम् ।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥ ४२ ।
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम् ।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति ॥ ४३ ।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम् ।
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ॥ ४४ ।
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम् ।
मम चैव प्रियं भूमे महापातकनाशनम् ॥ ४५ ।
वृन्दावनञ्च गोविन्दं ये पश्यन्ति वसुन्धरे ।
न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम् ॥ ४६ ।

इति वराहपुराणे भगवच्छास्त्रे मथुरातीर्थमाहात्म्यवर्णनं नाम
त्रयःपञ्चाशदधिकशततमोऽध्यायः ।

चतुःपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

एवंविधाञ्च मथुरां दृष्ट्वा तौ मुदमापतुः ।
एवन्तु वसतस्तस्य राज्ञस्तत्र वसुन्धरे ।
पप्रच्छ च तदा भार्य्या यद्दुष्टं पूर्व्वभाषितम् ॥ १ ।
पुरस्थेन तदा राज्ञा वक्ष्यामि मथुराम्प्रति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तन्मे वद महाराज यन्नोप्यं पूर्व्वभाषितम् ॥ २ ।
राजाप्युवाच तां राज्ञीं त्वयाप्युक्तं पुरा मम ।
तद्वदस्व स्वकं गुह्यं पश्चाद्वच्याम्यहन्तव ॥ ३ ।
इत्युक्ता पीवरी ज्ञात्वा प्रहस्य तु गुणालया ।
प्रोवाच चैव राजानं मनसः प्रीतिकारणम् ॥ ४ ।
अहन्तु पीवरी नाम गङ्गातीरनिवासिनी ।
आगतेमां पुरीं द्रष्टुं कुमुदस्य तु हादशीम् ॥ ५ ।
नावमारुह्य यान्तीह पतिता यमुनाजले ।
सद्यः प्राणैर्वियुक्ता च तत्तीर्थस्य प्रभावतः ॥ ६ ।
काशीराजपतेः कन्या जातास्मि वसुधाधिप ।
त्वया विवाहिता राजन्न च मां विजहात् स्मृतिः ॥ ७ ।
एतत्तीर्थप्रभावेण धर्म्मयुक्ता तथाऽनघ ।
धारापतनके तीर्थे त्यक्ता जीवितमात्मनः ॥ ८ ।
एतच्छ्रुत्वा ततो राजा कथां प्राग्जन्मसम्भवान् ।
स्वाश्चाप्यकथयत्तस्यै यथा संयमने मृतः ॥ ९ ।
एवं तौ मथुराम्प्राप्य स्नात्वा यामुनतीर्थयोः ।
मां पश्यन्तौ नियमतस्तत्रैव निधनं गतौ ।
मतौ सर्व्वपरित्यक्तौ गतौ मम सलोकताम् ॥ १० ।
एतत्ते कथितं देवि आश्चर्य्यं यदभून्महत् ।
त्यक्ता चात्मतनुं तीर्थे धारापतनसंज्ञके ।
नाकलोकमवाप्नोति त्यक्तपापो न संशयः ॥ ११ ।
यमुनेश्वरमासाद्य त्यक्ता जीवितमात्मनः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विष्णुलोकमवाप्नोति दिव्यमूर्त्तिश्चतुर्भुजः ॥ १२ ।
धारापतनके स्नात्वा वैनाकलोके समोदते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १३ ।
अतः परं नागतीर्थं तीर्थानामुत्तमोत्तमम् ।
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ १४ ।
घण्टाभरणकं तीर्थं सर्व्वपापप्रमोचनम् ।
यस्मिन्स्नातो नरो याति सूर्य्यलोकं न संशयः ।
अथाऽत्रं मुञ्चति प्राणान्मम लोकं स गच्छति ॥ १५ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थानामुत्तमं तीर्थं ब्रह्मलोकेषु विश्रुतम् ॥ १६ ।
तत्र स्नात्वा च पीत्वा च नियतो नियताशनः ।
ब्रह्मणा समनुज्ञातो मम लोकं स गच्छति ॥ १७ ।
सोमतीर्थं तु वसुधे पवित्रे यमुनाम्भसि ।
यत्र मां पश्यते सोमो द्वापरे युगसंस्थिते ॥ १८ ।
तत्राभिषेकं कुर्व्वीत स्वकर्म्मपरिनिष्ठितः ।
मोदते सोमलोके तु एवमेव न संशयः ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १९ ।
सरस्वत्याश्च पतनं सर्व्वपापहरं शुभम् ।
तत्र स्नातो नरो देवि अवर्णोऽपि यतिर्भवेत् ॥ २० ।
पुनरन्यत्प्रवक्ष्यामि माथुरे मम मण्डले ।
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
स्नानमात्रेण मनुजो मुच्यते ब्रह्महत्यया ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ २१।२२ ।
दशाश्वमेधमृषिभिः पूजितं सर्व्वदा मुदा ।
तत्र ये स्नान्ति नियतास्तेषां स्वर्गो न दुर्लभः ॥ २३ ।
मथुरापश्चिमे पार्श्वे सततमृषिपूजितम् ।
ब्रह्मणा सृष्टिकाले तु मनसा निर्म्मितं पुरा ।
मानसं नाम तीर्थन्तु ऋषिभिः पूजितं पुरा ।
तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ २४।२५ ।
तीर्थन्तु विघ्नराजस्य पुण्यं पापहरं शुभम् ।
तत्र स्नातान्मनुष्यांश्च विघ्नराजोन पीड़येत् ॥ २६ ।
अष्टम्याञ्च चतुर्द्दश्यां चतुर्थ्यान्तु विशेषतः ।
तस्मिंस्तीर्थवरे स्नातं न पीड़यति विघ्नराट् ॥ २७ ।
विद्यारम्भेषु सर्व्वेषु यज्ञदानक्रियासु च ।
अविघ्नं कुरुते तस्य सततं पार्व्वतीसुतः ।
तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ २८ ।
ततः परे कोटितीर्थं पवित्रं परमं स्मृतम् ।
तत्र वै स्नानमात्रेण गवां कोटिफलं लभेत् ॥ २९ ।
तथात्र* मुञ्चते प्राणाँल्लोभमोहविवर्ज्जितः ।
सोमलोकमतिक्रम्य मम लोकञ्च गच्छति ॥ ३० ।
अतःपरं शिवक्षेत्रमर्द्धक्रोशन्तु दुष्करम् ।
तत्र स्थितो हरो देवो मथुरां रक्षते† सदा ॥ ३१ ।

---

* तत्राथेति (ग) । † रक्षतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नात्वा च पीत्वा च माथुरं लभते फलम् ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३२ ।

इति वराहपुराणे यमुनातीर्थप्रभाववर्णनी नाम
चतुःपञ्चाशदधिकशततमोऽध्यायः ।

पञ्चपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि मर्त्त्यलोके सुदुर्लभम्* ।
अनन्तं विदितं तीर्थमचलं ध्रुवमव्ययम् ॥ १ ।
तत्र नित्यं स्थितो देवि लोकानां हितकाम्यया ।
मां दृष्ट्वा मनुजा देवि मुक्तिभाजो भवन्ति ते ॥ २ ।
अयने विषुवे चैव तथा विष्णुपदीषु च ।
अनन्तं तं समासाद्य मुच्यते सर्व्वपातकैः ॥ ३ ।
अक्रूरेति च विख्यातं मम क्षेत्रं वसुन्धरे ।
तत्र स्नात्वा महाभागे राहुग्रस्ते दिवाकरे ।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ ४ ।
तीर्थराजं हि चाक्रूरं गुह्यानां गुह्यमुत्तमम् ।
तत्स्नानात्फलमाप्नोति प्रयागस्नानजं फलम् ॥ ५ ।

---

* मर्त्त्यलोकेषु दुर्लभमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे।
नाम्ना तु सुधनो नाम मम भक्तः सदैव हि।
धनधान्यसमायुक्तः सुतयुक्तः* सदैव हि॥ ६।
बन्धुपुत्त्रकलत्रैश्च गृहे प्रीतिरनुत्तमा।
पुत्त्रदारसमेतस्य मयि भक्तिर्वसुन्धरे॥ ७।
गच्छन्ति दिवसास्तस्य मासाः संवत्सरास्तथा।
करोति गृहकृत्यानि धनोपायेन नित्यशः।
मानकूटं तुलाकूटं न करोति स कर्हिचित्†॥ ८।
एवञ्च वसतस्तस्य बहवो वत्सरा गताः।
नित्यकालञ्च कुरुते हरिपूजनमुत्तमम्।
पुष्पदीपप्रदानेन चन्दनेन सुगन्धिना।
उपहारेण दिव्येन धूपेन च सुगन्धिना॥ ९।
एकादश्यान्तु कुरुते पक्षयोरुभयोरपि।
उपवासं तु कुरुते रात्री जागरणं तथा॥ १०।
स गच्छति यथाकालमक्रूरं तीर्थमुत्तमम्।
तत्रागत्य ममाग्रेऽसौ नृत्यते‡ शुभदर्शनः॥ ११।
सुधनस्तु वणिक्श्रेष्ठः कदाचिद्रात्रिजागरे।
गच्छमानो§ गृहीतस्तु चरणे ब्रह्मरक्षसा॥ १२।
कृष्णवर्णो महाकाय ऊर्द्ध्वकेशो भयङ्करः।

---

* बन्धुयुक्तः सदैव हीति (ग)।　† स कदाचिदिति (क), (ख)।　‡ नृत्यतीति साधु।　§ गच्छन्निति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पादे गृहीत्वा वसुधे इदं वचनमब्रवीत् ॥ १३ ।
राक्षसोऽहं वणिक्श्रेष्ठ वसामि वनमाश्रितः ।
त्वामद्य भक्षयिष्यामि तृप्तिं यास्यामि शाश्वतीम् ॥ १४ ।

सुधन उवाच ।

प्रतीक्षस्व क्षणं मेऽद्य* दास्यामि तव पुष्कलम् ।
भक्षयिष्यसि मे गात्रं मिष्टमन्नपरिपोषितम् ॥ १५ ।
जागरं देवदेवस्य कर्त्तुमिच्छामि राक्षस ।
मम व्रतं सार्व्वकालं यज्जागर्मि हरेः पुरः ॥ १६ ।
तत्र जागरणङ्कृत्वा प्रभाते तव सन्निधौ ।
आगमिष्याम्यहं शीघ्रमादित्योदयनम्प्रति ॥ १७ ।
ततः खादिष्यसे† गात्रं विनिवृत्तस्य जागरात् ।
विष्णुतुष्ट्यै व्रतमिदमारब्धं सर्व्वकामदम् ॥ १८ ।
मा कुरु व्रतभङ्गं मे रक्षो नारायणस्य हि ।
जागरे विनिवृत्ते तु मां भक्षय यथेप्सितम् ॥ १९ ।
सुधनस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्द्दितः ।
उवाच मधुरं वाक्यं वणिजं प्रति सादरम् ॥ २० ।
मिथ्या प्रभाषसे साधो त्वं पुनः कथमेष्यसि ।
को हि रक्षोमुखाद्भ्रष्टो मानुषो यो निवर्त्तते ॥ २१ ।
राक्षसस्य वचः श्रुत्वा स वणिग्वाक्यमब्रवीत् ।
सत्यमूलं जगत्सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम् ।

---

* दिनं मेऽद्येति (ग)। † खादिष्यसीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सिद्धिं लभन्ते सत्येन ऋषयो वेदपारगाः॥ २२।
यद्यहञ्च बणिक् पूर्व्वं कर्म्मणा न हि दूषितः।
प्राप्तश्च मानुषी भावो विहितेनान्तरात्मना।
शृणु मत्समयं रत्नो येनाहं पुनरागमम्* ॥ २३।
कृत्वा जागरणं तत्र नृत्यङ्कृत्वा यथासुखम्।
पुनरेष्याम्यहं रत्नो नासत्यं विद्यते मयि॥ २४।
सत्येन दीयते कन्या सत्यं जल्पन्ति† ब्राह्मणाः।
सत्योत्तीर्णा हि राजानः सत्येन वसुधा धृता॥ २५।
स्वर्गमिच्छन्ति सत्येन मोक्षः सत्येन लभ्यते।
सत्येन सूर्य्यस्तपति सोमः सत्येन राजते॥ २६।
यमः सत्येन हरति सत्यादिन्द्रो विराजते।
तत्सत्यं मम नश्येत‡ यद्यहं नागमे§ पुनः॥ २७।
परदारांस्तु यो गच्छेत्कामसोहप्रपीड़ितः।
तस्य पापेन लिप्येऽहं यदि नायामि ते पुनः॥ २८।
यो वै रजस्वलाङ्गच्छेत्काममोहप्रपीड़ितः।
तेन पापेन लिप्येऽहं¶ यदि नायामि ते पुरः॥ २९।
दत्त्वा च भूमिदानं यो ह्यपकारङ्करोति च।
तेन पापेन लिप्येऽहं‖ यद्यहं नागमे पुनः॥ ३०।

---

* पुनरागमिष्यामीति साधु। † (ग) पुस्तकेऽतः परं सार्द्धं चरणपञ्चकं नास्ति। ‡ नश्येदिति साधु। § नागच्छेयमिति साधु, एवं परत्रापि। ¶ लिप्येयमिति (ग)। ‖ लिप्येयमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूर्व्वं भुक्त्वा स्त्रियं यस्तु सुखमाप्य विहृत्य च ।
द्वेषात्तां यदि चेज्जह्यात्तस्याघं मे भवत्वलम् ॥ ३१ ।
पङ्क्तिभेदन्तु यः कुर्य्यादेकपङ्क्त्याश्रिनां ध्रुवम् ।
तस्य पापेन लिप्येऽहं नागन्ता* यदि ते पुरः ॥ ३२ ।
अमावस्यां महारत्नः श्राद्धङ्कृत्वा स्त्रियं व्रजेत् ।
तेन पापेन लिप्येऽहं† यद्यहं नागमे पुनः ॥ ३३ ।
षष्ठ्यष्टमी त्वमावस्या उभे पक्षे चतुर्द्दशी ।
अस्नातानां गतिं गच्छेम्‡ यद्यहं नागमे पुनः ॥ ३४ ।
गुरोर्भ्रातुः सुतस्यापि सख्युर्वै मातुलस्य च ।
व्यवस्यति च यन्नारीं यो मोहेन विमोहितः§ ।
अभिगच्छति मन्दात्मा तत्पापं मे भवेत्तदा ॥ ३५ ।
राजपत्नीं ब्रह्मपत्नीं विधवां योऽभिगच्छति ।
तस्य पापेन लिप्येऽहं यद्यहं नागमे पुनः¶ ॥ ३६ ।
यस्तु कन्यां सकृद्दत्त्वा अन्यस्मै चेत्पुनर्द्ददेत्‖ ।
तेन पापेन लिप्येऽहं** यद्यहं नागमे पुनः ॥ ३७ ।
राजयाजकयाज्याश्च ये च वै ग्रामयाजकाः ।
तेषां पापेन लिप्येऽहं†† यद्यहं नागमे पुनः ॥ ३८ ।
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ।

---

* नागत इति (क), (ख) । † लिप्येयमिति (ग) । ‡ गच्छेयमिति साधु । § पितृव्यपत्नीं यो गच्छेन्मोहेन हि विमोहित इति (ग) । ¶ लिप्येयं यदि नायामि तेऽन्तिकमिति (ग) । ‖ दद्यादिति साधु । ** लिप्येयमिति (ग) । †† लिप्येयमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

या गतिस्तां प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ३९ ।

वराह उवाच ।

सुधनस्य वचः श्रुत्वा सन्तुष्टो ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते ॥ ४० ।
ब्रह्मराक्षसमुक्तोऽसौ बणिक् तु दृढ़निश्चयः ।
पुनर्नृत्यति चैवाग्रे मम भक्तौ व्यवस्थितः ॥ ४१ ।
अथ प्रभातसमये नृत्यचित्तोऽतिकोविदः ।
पुनः पुनर्वै उच्चार्य्य नमो नारायणाय च ।
निवृत्ते जागरे सोऽथ कालिन्दीसलिलाप्लुतः ।
दृष्ट्वा मां दिव्यरूपन्तु गतोऽसौ मथुरां पुरीम् ॥ ४२।४३ ।
दृष्टश्चाग्रे त्वहं तेन पुरुषो दिव्यरूपवान् ।
स च पृष्टो मया देवि क्व भवान्प्रस्थितो द्रुतम् ॥ ४४ ।
पुरुषस्य वचः श्रुत्वा सुधनो वाक्यमब्रवीत् ।
अहङ्गच्छामि त्वरितो ब्रह्मराक्षससन्निधौ ॥ ४५ ।
निवारयामास तदा न गन्तव्यं त्वयानघ ।
जीवतो धर्म्ममाहात्म्यं मृते धर्म्मः कुतो यशः ॥ ४६ ।
पुरुषस्य वचः श्रुत्वा स बणिग्वाक्यमब्रवीत् ।
तत्र सत्यं वदिष्यामि यास्ये* राक्षससन्निधौ ॥ ४७ ।
आगतोऽहं महाभाग नर्त्तयित्वा यथासुखम् ।
विष्णवे लोकनाथाय आगतो† हरिजागरात् ॥ ४८ ।

---

* यास्यामीति साधु । † आयात इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इदं शरीरं मे रक्षो भक्षयस्व यथेप्सितम् ।
यथान्यायं विधानेन यथा वा तव रोचते ॥ ४९ ।
नोक्तपूर्व्वं मयाऽसत्यं कदाचिदपि राक्षसः ।
तेन सत्येन मां भुङ्क्ष्व ब्रह्मराक्षस दारुण ॥ ५० ।
बणिजस्तु वचः श्रुत्वा ततोऽसौ ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं सुधनं तदनन्तरम् ॥ ५१ ।
साधु तुष्टोऽस्मि भद्रन्ते सत्यं धर्म्मश्च पालितः ।
वणिक् त्वञ्चातिविज्ञस्तु यस्य ते गतिरीदृशी ॥ ५२ ।
जागरस्य समस्तस्य मम पुण्यं प्रयच्छ वै ।
सत्य*पुण्यप्रभावेण यथाहं मुक्तिमाप्नुयाम् ॥ ५३ ।

सुधन उवाच ।

नाहं दास्यामि† ते पुण्यं नृत्यस्य नरभोजन ।
अर्द्धं वाथ समस्तं वा प्रहरं चार्द्धमेव वा ॥ ५४ ।
सुधनस्य वचः श्रुत्वा अब्रवीद्ब्रह्मराक्षसः ।
एकनृत्यस्य मे पुण्यं दद‡ त्वं बणिजोत्तम§ ॥ ५५ ।

सुधन उवाच ।

नाऽहं दास्यामि ते पुण्यं यथोक्तञ्च समाचर ।
केन त्वं कर्म्मदोषेण राक्षसत्वमुपागतः ।
यत्ते गुह्यं महाभाग सर्व्वं तत्कथयस्व मे ॥ ५६ ।
सुधनस्य वचः श्रुत्वा विहसित्वा¶ह राक्षसः ।

---

* तस्येति (ग) । † ददामीति (ग) । ‡ देहीति साधु । § वणिगुत्तमेति साधु ।
¶ विहस्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किं त्वं माञ्च विजानासि प्रतिवासी ह्यहं तव।
अग्निदत्तस्तु वै नाम छान्दसो ब्राह्मणोत्तमः॥ ५७।
इष्टकांस्तु हरन्नित्यं परकीयांश्च सर्व्वदा।
मृतस्तु गृहकामेन राक्षसत्वमुपागतः॥ ५८।
मया त्वं हि यथाप्राप्त उपकारं कुरुष्व मे।
एकविश्रामपुण्यं मे देहि त्वं बणिजोत्तम॥ ५९।
कृपया तु समायुक्तो बणिग्वचनमब्रवीत्।
साधु राक्षस दत्तन्ते एकनृत्यं मया तव।
एकनृत्यप्रभावेण राक्षसो मुक्तिमागतः॥ ६०।

वराह उवाच।

सुधनस्तु ततो देवि विश्वरूपं जनार्द्दनम्।
अग्रतस्तु स्थितं देवं दृष्ट्वाऽसौ धरणीं गतः॥ ६१।
उवाच मधुरं वाक्यं देवदेवो जनार्द्दनः।
चतुर्भुजो दिव्यतनुः शङ्खचक्रगदाधरः॥ ६२।
विमानवरमारुह्य मम लोकं व्रजस्व च*।
इत्युक्त्वा माधवो देवस्तत्रैवान्तरधीयत॥ ६३।
सुधनः सशरीरोऽपि सकुटुम्बो दिवं ययौ।
विमानवरमारुह्य विष्णोर्लोकं जगाम ह॥ ६४।
एष तीर्थप्रभावो वै कथितस्ते वसुन्धरे।
अक्रूराच्च परं तीर्थं न भूतं न भविष्यति।
तस्य तीर्थप्रभावेण सुधनो मुक्तिमाप्तवान्॥ ६५।

* व्रज इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्वादशी शुक्लपक्षे तु कुमुदस्य च या भवेत् ।
तस्मिन् स्नातस्य वसुधे राजसूयफलं भवेत् ॥ ६६ ।
कार्त्तिकीं समनुप्राप्य तत्तीर्थे तु वसुन्धरे ।
वृषोत्सर्गं नरः कुर्वंस्तारयेत्स्वकुलोद्भवान् ॥ ६७ ।
श्राद्धं यः कुरुते सुभ्रु कार्त्तिक्यां प्रयतोनरः ।
पितरस्तारितास्तेन सदैव प्रपितामहाः ॥ ६८ ।

इति वराहपुराणे मथुरामाहात्म्ये अक्रूरतीर्थप्रभावो नाम
पञ्चपञ्चाशदधिकशततमोऽध्यायः ।

षट्पञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

वत्सक्रीड़नकं नाम तीर्थं वक्ष्ये परं* मम ।
तत्र रक्तशिलाबद्धं रक्तचन्दनभूषितम् ।
स्नानमात्रेण तत्रैव वायुलोकं व्रजेन्नरः ।
तत्राऽथ मुञ्चते प्राणान्मम लोके महीयते ॥ १।२ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
अस्ति भाण्डीरकं नाम यत्तीर्थं परमुत्तमम् ।
शालैस्तालैश्च तरुभिस्तमालैरर्ज्जुनैस्तथा ।

---

* चैत्रे परमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इङ्गुदैः पीलुकैश्चैव करीरैरक्तपुष्पकैः ॥ ३।४ ।
तस्मिन् भाण्डीरके स्नातो नियतो नियताशनः ।
सर्व्वपापविनिर्मुक्त इन्द्रलोकं स गच्छति ।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति ॥ ५ ।
पुनरन्यत्प्रवक्ष्यामि क्षेत्रं वृन्दावनं मम ।
तत्राहं क्रीड़यिष्यामि गोभिर्गोपालकैः सह ।
रम्यञ्च* सुप्रतीतञ्च देवदानवदुर्ल्लभम् ॥ ६ ।
तत्र कुण्डे महाभागे बहुगुल्मलतावृते ।
तत्र स्नानम्प्रकुर्व्वीत एकरात्रोषितोनरः ।
गन्धर्व्वैरप्सरोभिश्च क्रीड़मानः स मोदते ।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति ॥ ७।८ ।
पुनरन्यत्प्रवक्ष्यामि महापातकनाशनम् ।
तत्र वृन्दावने तीर्थे यत्र केशी निपातितः ।
तीर्थं शतगुणं† पुण्यं यत्र केशी निपातितः ।
केश्यः शतगुणं पुण्यं यत्र विश्रमते हरिः ।
तस्माच्छतगुणम्पुण्यं नात्र कार्य्या विचारणा ॥ ९।१० ।
तत्रापि च विशेषोऽस्ति केशीतीर्थे वसुन्धरे ।
तस्मिन्पिण्डप्रदानेन गयातुल्यफलं भवेत् ।
स्नाने दाने तथा होमे अग्निष्टोमफलम्भवेत्‡ ॥ ११ ।
सूर्य्यतीर्थेषु वसुधे द्वादशादित्यसंज्ञके ।

---

* सुरम्यमिति (ग) । † गङ्गाशतगुणमिति (ग्र) । ‡ शुभे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कालियो रमते तत्र कालिन्द्याः सलिले शुभे ॥ १२ ।
कालियो दमित*स्तत्र आदित्याः स्थापिता मया ।
वरं वृणुध्वं भद्रं वो यद्दो मनसि वर्त्तते ॥ १३ ।

आदित्या ऊचुः ।

वरं ददासि नो देव वरार्हा यदि वा वयम् ।
अस्मिंस्तीर्थवरे स्नानमस्माकं सम्प्रदीयताम्† ॥ १४ ।
आदित्यानां वचः श्रुत्वा क्रीड़ां कृत्वा वसुन्धरे ।
स्नानमात्रेण तत्रैव मुच्यते सर्व्वकिल्विषैः ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १५ ।
उत्तरे हरिदेवस्य दक्षिणे कालियस्य तु ।
अनयोर्देवयोर्मध्ये ये मृतास्तेऽपुनर्भवाः ॥ १६ ।

इति वराहपुराणे मथुरामाहात्म्ये मथुराप्रादुर्भावो नाम
षट्पञ्चाशदधिकशततमोऽध्यायः ।

सप्तपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

यमुनापारमुल्लङ्घ्य तत्रैव च महामुने ।
मलयार्ज्जुनकं तीर्थं कुण्डं तत्र च विद्यते ॥ १ ।

---

* आदित्योदमित इति (क), (ख) । † सम्प्रदायितमिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पर्यस्तं तत्र शकटं भिन्नभाण्डकुटीघटम्।
तत्र स्नानोपवासाभ्यामनन्तं फलमश्नुते ॥ २ ।
द्वादश्यां शुक्लपक्षस्य ज्यैष्ठमासे वसुन्धरे।
तत्र स्नानेन दानेन महापातकनाशनम् ॥ ३ ।
ज्यैष्ठस्य शुक्लद्वादश्यां स्नात्वा सुनियतेन्द्रियः।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमाङ्गतिम् ॥ ४ ।
यमुनासलिले स्नातः शुचिर्भूत्वा जितेन्द्रियः।
समभ्यर्च्याच्युतं सम्यक् प्राप्नोति परमाङ्गतिम् ॥ ५ ।
अपि चास्मत्कुले जातः कालिन्दीसलिले प्लुतः।
अर्च्चयिष्यति गोविन्दं मथुरायामुपोषितः।
इति गायन्ति पितरः परलोकगताः* सदा ॥ ६ ।
ज्यैष्ठमासे तु द्वादश्यां समभ्यर्च्य जनार्द्दनम्।
धन्योऽसौ पिण्डनिर्वापं यमुनायां करिष्यति ॥ ७ ।
तत्रैव तु महातीर्थे वने बहुलसंज्ञके।
तत्र स्नातो नरो देवि रुद्रलोके महीयते ॥ ८ ।
चैत्रमासे तु द्वादश्यां शुक्लपक्षे वसुन्धरे।
तत्र स्नातो नरो याति मम लोकं न संशयः ॥ ९ ।
अस्ति भाण्डह्रदं नाम परपारेषु दुर्लभम्।
दृश्यन्तेऽहरहस्तत्र आदित्याः शुभकारिणः ॥ १० ।
तत्र चार्कस्थले कुण्डे स्नानं यः कुरुते नरः।

---

* परलोकं गता इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वपापविनिर्मुक्तः सूर्य्यलोकं* व्रजेन्नरः ।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ११ ।
अर्कस्थलसमीपे तु कूपन्तु विमलोदकम् ।
सप्तसामुद्रकं नाम देवानामपि दुर्लभम् ॥ १२ ।
तत्र स्नानेन वसुधे स्वच्छन्दगमनालयः ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १३ ।
तत्र वीरस्थलं नाम क्षेत्रं गुह्यं परं मम ।
आसन्नसलिलञ्चैव पद्मोत्पलविभूषितम् ॥ १४ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
स मत्प्रसादात्सुश्रोणि वीरलोके महीयते ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १५ ।
कुशस्थलञ्च तत्रैव पुण्यं पापहरं शुभम् ।
तत्र स्नातो नरो देवि ब्रह्मलोके महीयते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १६ ।
तत्र पुष्पस्थलं नाम शिवक्षेत्रमनुत्तमम् ।
तत्र स्नानेन मनुजः शिवलोके महीयते ॥ १७ ।
एते पञ्चस्थलाख्याता† महापापविनाशनाः ।
तेषु स्नानेषु वसुधे ब्रह्मणा सह मोदते ।
तत्र गोपीश्वरीनाम महापातकनाशनः ॥ १८ ।
कृष्णस्य रमणार्थं हि सहस्राणि च षोड़श ।

---

* सूर्य्यलोके इति (ग) । † एतत्पञ्चस्थलाख्यानमिति बहुषु पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गोप्योरूपाणि चक्रे च तत्र क्रीड़नके हरिः॥
यदा बालेन कृष्णेन भग्नार्जुनयुगं तथा।
शकटञ्च तदा भिन्नं घटभाण्डकुटीरकम्॥ १९।२०।
ताभिस्तत्रैव गोविन्दं क्रीड़न्तञ्च यदृच्छया।
परिष्वज्य* हि धर्म्मेण व्याजेन च सुगोपितम्।
मातलिस्तत्र चागत्य देवैरुक्तं यथोदितम्।
गोपवेशधरं देवमभिषेकञ्चकार ह॥ २१।२२।
आनीय सप्त कलशान्सर्वौषधिपरिष्णुतान्।
गोपीमण्डलपातेन स्नापितो हेमकुण्डलः।
गोप्यो गायन्ति नृत्यन्ति कृष्ण कृष्ण इति ब्रुवन्†॥ २३।
तत्र गोपीश्वरं देवं मातलिः स्थाप्य‡ पूजितम्।
कूपञ्च स्थापयामास माङ्गल्यैः कलशैः§ शुभैः।
सप्तसामुद्रिकं नाम कूपन्तु विमलोदकम्॥ २४।
देवस्याग्रे तु वसुधे गोपा यस्य महात्मनः।
पितरश्चापि नन्दन्ति पानीयं पिण्डमेव च॥ २५।
सप्तसामुद्रिके कूपे यः श्राद्धं सम्प्रदास्यति।
पितरस्तारितास्तेन कुलानां सप्तसप्ततिः॥ २६।
सोमवारे त्वमायां वै पिण्डदानङ्करोति यः।
पितरस्तस्य तृप्यन्ति कोटिवर्षशतान्यलम्॥ २७।
गोविन्दस्य च देवस्य तथा गोपीश्वरस्य च।

---

* परिष्वक्तमिति (ग)। † ब्रुवत्य इति साधु। ‡ स्थापयित्वेति साधु। § कवचैरिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मध्ये तु मरणं यस्य शक्रस्येति सलोकताम्।
तथा बहुलरुद्रस्य गोविन्दस्यैव मध्यतः।
तद्वद्ब्रह्माणमाशास्य गोपीशस्यैव मध्यतः॥ २८।२९।
एतेषु स्नानदानेन पिण्डपातेन भामिनि।
नरस्तारयते पुंसां दश पूर्व्वान्दशापरान्॥ ३०।
एषु स्नातो नरो देवि देवैश्च सह मोदते।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति॥ ३१।
वसुपत्रं महातीर्थं पुण्यं परममुत्तमम्।
मथुरादक्षिणे पार्श्वे चेत्रं फाल्गुनकं तथा।
तत्र स्नात्वा च पीत्वा च परलोके महीयते॥ ३२।
तत्र फाल्गुनके चैव तीर्थे परमदुर्लभे।
वृषभाञ्जनकं नाम चेत्रं मे दुर्लभं महत्॥ ३३।
तत्राभिषेकं यः कुर्य्यात्स देवैः सह मोदते।
तत्र यो मुञ्चते प्राणान्मम लोकं स गच्छति॥ ३४।
अस्ति तालवनं नाम धेनुकासुररक्षितम्।
मथुरापश्चिमे भागे अदूरादर्द्धयोजनम्॥ ३५।
तत्र कुण्डं स्वच्छजलं नीलोत्पलविभूषितम्।
तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात्॥ ३६।
अस्ति सम्पीठकं नाम अस्मिन् चेत्रे परं मम*।
तत्र कुण्डं विशालाक्षि प्रसन्नसलिलं शुभम्॥ ३७।

---

* (क), (ख) पुस्तकयोरत्र तीर्थमृषिवर्णार्चितमिति पाठोऽस्ति, तत्र चातः परं चरण-चतुष्टयं नास्ति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र स्नानं च ये कुर्य्युरेकरात्रोषिता नराः ।
अग्निष्टोमफलञ्चैव लभन्ते नात्र संशयः ।
अथाऽत्र मुञ्चति प्राणान्मम लोकं स गच्छति ॥ ३८ ।
देवकीगर्भसम्भूतो* वसुदेवगृहे शुभे ।
तत्र पुत्त्रेण हि मया रविराराधितः शुभः ।
लब्धः प्राज्ञो मया पुत्त्रो रूपवांश्च गुणान्वितः ॥ ३९ ।
तत्रैवं तु ततो दृष्टः पद्महस्तो दिवाकरः ।
मासि भाद्रपदे देवि तिग्मतेजा विभावसुः ।
सप्तम्यां कृष्णपक्षस्य रविस्तिष्ठति सर्व्वदा ॥ ४० ।
तस्मिन्नहनि यः स्नानं कुर्य्यात्कुण्डे समाहितः ।
न तस्य दुर्ल्लभं लोके सर्व्वदाता दिवाकरः ॥ ४१ ।
आदित्येऽहनि सम्प्राप्ते सप्तम्यान्तु वसुन्धरे ।
नरो वाप्यथवा नारी प्राप्नोत्यविकलम्फलम् ॥ ४२ ।
तत्रैव तु तपस्तप्तं राज्ञा शान्तनुना पुरा ।
आदित्यन्तु पुरः स्थाप्य† प्राप्तो भीष्मो महाबलः ॥ ४३ ।
शान्तनुः प्राप्य तं पुत्त्रं गतोऽसौ हस्तिनापुरम् ।
तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात् ॥ ४४ ।

इति वराहपुराणे मथुरामाहात्म्ये सप्तपञ्चाशदधिक-
शततमोऽध्यायः ।

---

* देवकीगर्भसम्भूत इति पाठः सर्व्वत्र वर्त्तते, देवकीगर्भजातेन इति कृते तु सम्यक् भवति । † स्थापयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अष्टापञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

विंशतिर्योजनानान्तु माथुरं मम मण्डलम् ।
यत्र तत्र नरः स्नातोमुच्यते सर्व्वकिल्विषैः ॥ १ ।
वर्षाकाले तु स्नातव्यं यत्र स्नानन्तु हर्षदम् ।
पुण्यात्पुण्यतरञ्चैव माथुरे मम मण्डले ॥ २ ।
सप्तद्वीपेषु तीर्थानि पुण्यान्यायतनानि च ।
मथुरायां गमिष्यन्ति प्रसुप्ते तु सदा मयि ॥ ३ ।
सुप्तोत्थितं तु दृष्ट्वा मां मथुरायां वसुन्धरे ।
ते नरा मां प्रपश्यन्ति सर्व्वकालं न संशयः ॥ ४ ।
सुप्तोत्थितन्तु वसुधे दृष्ट्वा मे मुखपङ्कजम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव मुच्यते ॥ ५ ।
मथुरावासिनो लोकाः सर्व्वे ते मुक्तिभाजनाः ॥ ६ ।
मथुरां समनुप्राप्य दृष्ट्वा देवन्तु केशवम् ।
स्नात्वा पुनस्तु कालिन्द्यां मम लोके महीयते ।
स तत्फलमवाप्नोति राजसूयाश्वमेधयोः ॥ ७ ।
प्रदक्षिणीकृतो येन मथुरायान्तु केशवः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ८ ।
घृतपूर्णेन पात्रेण समग्रेण च वाससा ।
केशवस्याग्रतो दत्त्वा दीपकन्तु वसुन्धरे ।
पञ्चयोजनविस्तारमायामं पञ्चविस्तरम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दीपमालासमाकीर्णं विमानं लभते नरः॥ ९।१०।
सर्व्वकामसमृद्धं तदप्सरोगणसेवितम्।
रम्यमालासमाकीर्णं भोगाढ्यं सर्व्वकामिकम्।
समारोहति वै नित्यं प्रभामण्डलमण्डितम्॥ ११।
ये देवा ये च गन्धर्व्वाः सिद्धाश्चारणपन्नगाः।
तं स्पृहन्ति सदा देवि पुण्यमस्ति कृतम्भुवि॥ १२।
यदि कालान्तरे पुण्यं हीयतेऽस्य पुरा कृतम्।
सतां पुण्यगृहे देवि जायते मानवो हि सः॥ १३।

धरण्युवाच।

क्षेत्रं हि रक्षते* देव कश्चिदं पापनाशनम्।
पशुभूतपिशाचैश्च रक्षोभूतविनायकैः।
एवमादिभिराक्रुष्टन्तत्क्षेत्रं फलदं भवेत्॥ १४।

वराह उवाच।

मत्क्षेत्रं ते न पश्यन्ति मत्प्रभावात्कदाचन।
न विकुर्व्वन्ति ते दृष्ट्वा मत्पराणां हि देहिनाम्॥ १५।
रक्षार्थं हि मया दत्ता दिक्पालास्तु वरानने।
लोकपालास्तु चत्वारस्तीर्थं रक्षन्ति ये सदा॥ १६।
पूर्व्वां रक्षति इन्द्रस्तु यमो रक्षति दक्षिणाम्।
पश्चिमां रक्षते नित्यं वरुणः पाशभृत्स्वयम्॥ १७।
उत्तरान्तु कुवेरस्तु महाबलपराक्रमः।

* रक्षतीति साधु, एवं परत्र।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मध्यान्तु रक्षते नित्यं शिवो देव उमापतिः ॥ १८ ।
मथुरायां गृहं यस्तु प्रासादङ्कुरुते नरः ।
चतुर्भुजस्तु विज्ञेयो जीवन्मुक्तो न संशयः ॥ १९ ।
मथुराया महाभागे कुण्डे च विमलोदके ।
गम्भीरे सर्व्वदा देवि तिष्ठते* च चतुर्भुजः ॥ २० ।
तत्र मुञ्चेत यः प्राणान्स्नानङ्कृत्वा वसुन्धरे ।
वैष्णवं लोकमासाद्य क्रीड़ते स सुखादिव ॥ २१ ।
तत्रैव तु सदाश्चर्य्यं कथ्यमानं मया शृणु ।
यदुच्यते वै सुश्रोणि कुण्डे तु विमलोदके ॥ २२ ।
हेमन्ते तु भवेच्चोष्णं शीतलङ्ग्रीष्मके भवेत् ।
तेजसा मम सुश्रोणि तुषारसदृशोपमम् ॥ २३ ।
न वर्द्धते च वर्षासु ग्रीष्मे चापि न हीयते ।
एतच्च महदाश्चर्य्यं तस्मिन्कुण्डे परं मम ॥ २४ ।
पदे पदे तीर्थफलं मथुरायां वसुन्धरे ।
तत्र तत्र नरः स्नातो मुच्यते सर्व्वपातकैः ॥ २५ ।
वर्षासु स्थूल†तीर्थेषु स्नातव्यन्तु प्रयत्नतः ।
कूपे ह्रदे देवखाते‡ गर्त्तेषु च नदीषु च ॥ २६ ।
प्रवाहेषु च दिव्येषु नदीनां सङ्गमेषु च ।
वर्षासु सर्व्वतः स्नायाद्यदीच्छेत्परमाङ्गतिम् ॥ २७ ।

---

* तिष्ठतीति साधु । † स्थलीतीर्थेष्विति (क), (ख) । ‡ ह्रदेषु देवखातेष्विति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अस्ति क्षेत्रं परं दिव्यं मुचुकुन्दन्तु नामतः।
मुचुकुन्दः स्वपित्यत्र दानवासुरपातनः॥ २८।
तत्र कुण्डे नरः स्नात्वा प्राप्नोत्यभिमतं फलम्।
अथाऽत्र मुञ्चति प्राणान्मम लोकं स गच्छति॥ २९।
इहजन्मकृतं पापमन्यजन्मकृतञ्च यत्।
तत्सर्व्वं नश्यति शीघ्रङ्कीर्त्तनात्केशवस्य तु॥ ३०।
किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्द्दने।
नरके पाच्यमानस्य गतिर्द्देवि जनार्द्दनः॥ ३१।
कृत्वा प्रदक्षिणं देवि विश्रामं कुरुते तु यः।
नारायणसमीपन्तु सोऽनन्तफलमश्नुते॥ ३२।
सुप्तोत्थितं हरिं दृष्ट्वा मथुरायां वसुन्धरे।
न तस्य पुनरावृत्तिर्जायते स चतुर्भुजः॥ ३३।
कुमुदस्य तु मासस्य नवम्यान्तु वसुन्धरे।
प्रदक्षिणीकृत्य वसुधां* सर्व्वपापैः प्रमुच्यते॥ ३४।
ब्रह्मघ्नश्च सुरापश्च गोघ्नो भग्नव्रतस्तथा।
मथुरान्तु परिक्रम्य पूतो भवति मानवः॥ ३५।
अष्टम्यां प्राप्य मथुरां दन्तधावनपूर्व्वकम्।
ब्रह्मचर्य्येण तां रात्रिङ्कृतसङ्कल्पमानसः॥
धौतवस्त्रस्तु सुस्नातो मौनव्रतपरायणः।

* सर्व्वत्रैव एषः पाठो दृश्यते, परमत्र छन्दोदोषः। प्रदक्षिणीकृत्य धरामिति पाठे न दोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रदक्षिणन्तु कुर्व्वीत सर्व्वपातकनाशनम्* ॥ ३६।३७ ।
प्रदक्षिणां क्रियमाण†मन्योयः स्पृशति‡ नरः ।
सर्व्वकामानवाप्नोति नाऽत्र कार्य्या विचारणा ॥ ३८ ।
मथुरायां नरो गत्वा दृष्ट्वा देवं स्वयम्भुवम् ।
प्रदक्षिणायां यत्पुण्यं तत्पुण्यं लभते नरः ॥ ३९ ।
देवस्याग्रे तु वसुधे कूपन्तु विमलोदकम् ।
पितरश्चाभिनन्दन्ति पानीयं पिण्डमेव च ॥ ४० ।
चतुःसामुद्रिकं नाम त्रिलोकेषु च विश्रुतम्§ ।
तत्र स्नातो नरो भद्रे देवैश्च सह मोदते ।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ४१ ।

इति वराहपुराणे मथुरातीर्थप्रादुर्भावो नाम
अष्टापञ्चाशदधिकशततमोऽध्यायः ।

ऊनषष्ट्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतं सुबहुशो देव तीर्थानां गुणविस्तरम् ।
प्रोच्यमानन्तु पुण्याख्यं त्वत्प्रसादाज्जनार्द्दन* ॥ १ ।

---

* सर्व्वपातकशुद्धये इति (ग) । † प्रदक्षिणं हि कुर्व्वाणमिति साधु । ‡ स्पृशतीति साधु । § कूपं लोकेषु विश्रुतमिति (ग) ।

* (ग) पुस्तके प्रथमः श्लोकः द्वितीयश्लोकस्य प्रथमपादश्च न स्तः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न दानैर्न तपोभिश्च न यज्ञैस्तादृशं फलम्।
भूमेः प्रदक्षिणायाश्च यादृशं तीर्थसेवया ॥ २ ।
भुवश्च चतुरन्तायास्तीर्थप्रक्रमणं हरे।
सर्व्वतीर्थाभिगमनमस्ति दुर्गतरं नृणाम् ॥ ३ ।
अस्ति कश्चिदुपायोऽत्र येन सम्यगवाप्यते।
प्रसादसुमुखो भूत्वा तत्सर्व्वं कथयस्व मे ॥ ४ ।

वराह उवाच।

भद्रे शृणु महत्पुण्यं पृथिव्यां सर्व्वतोदिशम्।
परिक्रम्य यथाध्वानं प्रमाणगणितं शुभम्* ॥ ५ ।
भूम्याः परिक्रमे सम्यक् प्रमाणयोजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ६ ।
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा ॥ ७ ।
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च।
जाम्बवतीशपुत्रेण रावणेन हनूमता।
एतैरनेकधा देवैः ससागरवना मही।
क्रमिता बलिना चैव वाह्यमण्डलरेखया ॥ ८।९ ।
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वं देवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः।
योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयमुखैरपि।

---

* परिक्रम्य यथाध्वानं पृथिव्यां सर्व्वतोदिशमिति क्वचित्पाठः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः ॥ १०।११ ।
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः ।
मनसाऽपि न शक्यन्ते गमनस्य च का कथा ॥ १२ ।
सप्तद्वीपे च तीर्थानां भ्रमणाद्यत्फलं भवेत् ।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे ॥ १३ ।
मथुरां समनुप्राप्य यस्तु कुर्य्यात्प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ १४ ।
तस्मात्सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः ।
कर्त्तव्या मथुराम्प्राप्य नरैः सम्यक् प्रदक्षिणा ॥ १५ ।

धरण्युवाच ।

यथाविधानक्रमणं मथुरायामवाप्यते ।
प्रदक्षिणाफलं सम्यगनुक्रमविधिं वद ॥ १६ ।

वराह उवाच ।

पुरा सप्तर्षिभिः पृष्टोब्रह्मा लोकपितामहः ।
इदमेव पुरा प्रोक्तं यथा त्वं पृष्टवान्मम ॥ १७ ।
श्रुत्वा सर्व्वपुराणोक्तं तीर्थानुक्रमणं परम् ।
पृथिव्याश्चतुरन्तायास्तथा तद्वक्तुमुद्यतः ॥ १८ ।
सर्व्वदेवेषु यत्पुण्यं सर्व्वतीर्थेषु यत्फलम् ।
सर्व्वदानेषु यत्प्रोक्तमिष्टापूर्त्तेषु चैव हि ॥ १९ ।
यत्फलं लभ्यते विप्रास्तस्माच्छतगुणोत्तरम् ।
प्रक्रमान्मथुरायास्तु सत्यमेतद्वदामि वः ॥ २० ।
इत्युक्त्वा ऋषयो जग्मुरभिवाद्य स्वयम्भुवम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आगत्य मथुरां देवीमाश्रमांश्चक्रतु*र्द्विजाः ।
ध्रुवेण सहिता आसन्कामयानास्तु तद्दिनम् ॥ २१ ।
कुमुदस्य तु मासस्य नवम्यां शुक्लपक्षके ।
मथुरोपक्रमं कृत्वा सर्व्वपापैः प्रमुच्यते ॥ २२ ।

इति वराहपुराणे मथुरामाहात्म्ये नाम
ऊनषष्ट्यधिकशततमोऽध्यायः ।

षष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

अष्टम्यां मथुरां प्राप्य कार्त्तिकस्यासिते नरः ।
स्नात्वा विश्रान्तितीर्थे तु पितृदेवार्च्चने रतः ॥ १ ।
विश्रान्तिदर्शनङ्कृत्वा दीर्घविष्णुञ्च केशवम् ।
प्रदक्षिणायाः सम्यग्वै फलमाप्नोति मानवः ॥ २ ।
उपवासरतः सम्यगल्पमिथ्याशनोऽथवा ।
दन्तकाष्ठञ्च सायाह्ने कृत्वा शुद्ध्यर्थमात्मनः ॥ ३ ।
ब्रह्मचर्य्येण तां रात्रिं कृत्वा सङ्कल्पमानसः ।
धौतवस्त्रेण सुस्नातो मौनव्रतपरायणः ॥ ४ ।
तिलाक्षतकुशान् गृह्य* पितृदेवार्थमुद्यतः ।

---

* चक्रतुरिति (क), (ख), अत्र द्वयमपि आर्षम्, चक्रुश्चरुर्वा साधु ।

---

* गृहीत्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दीपहस्तो वनङ्गत्वा श्रान्तो विश्रान्तिजागरे ॥ ५ ।
यथानुक्रमणन्तैश्च ध्रुवाद्यैर्ऋषिभिः कृतम् ।
एवं परम्परायातं क्रमणीयं नरोत्तमैः ॥ ६ ।
प्रदक्षिणावर्त्तमानो नरो भक्तिसमन्वितः ।
सर्व्वान् कामानवाप्नोति हयमेधफलं लभेत्* ॥ ७ ।
एवं जागरणं कृत्वा नवम्यां नियतः शुचिः ।
ब्राह्मे मुहूर्त्ते सम्प्राप्ते ततो यात्रामुपक्रमेत्† ॥ ८ ।
तथा प्रारभयेद्यात्रां यावन्नोदयते‡ रविः ॥ ९ ।
प्रातःस्नानं तथा कुर्य्यात्तीर्थे दक्षिणकोटिके ।
प्रक्षाल्य पादावाचम्य हनूमन्तं प्रसादयेत् ॥ १० ।
सर्व्वमङ्गलमाङ्गल्यं कुमारं ब्रह्मचारिणम् ।
विज्ञाप्य सिद्धिकर्त्तारं यात्रासिद्धिप्रदायकम् ।
यस्य संस्मरणादेव सर्व्वे नश्यन्त्युपद्रवाः ॥ ११ ।
यथा रामस्य यात्रायां सिद्धिस्ते सुप्रतिष्ठिता ।
तथा परिभ्रमन्मेऽद्य भवान्सिद्धिप्रदो भव ॥ १२ ।
इति विज्ञाप्य विधिवद्धनूमन्तं गणेश्वरम् ।
दीपपुष्पोपहारैस्तु पूजयित्वा विसर्ज्जयेत् ॥ १३ ।
तथैव पद्मनाभन्तु दीर्घविष्णुं भयापहम् ।
विज्ञाप्य सिद्धिकर्त्तारं देव्यश्च§ तदनन्तरम् ।
दृष्ट्वा वसुमतीं देवीं तथैव ह्यपराजिताम् ।

---

* लभेतेति साधु । † उपक्रमेतेति साधु । ‡ उदयतीति साधु । § देवीरिति साधु, एवं परत्र गृहदेवीः, वास्तुदेवीरिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आयुधागारसंस्थाञ्च नृणां सर्व्वभयापहाम् ॥
कंसवासनिकां तद्वदौग्रसेनाञ्च* चर्च्चिकाम्।
वधूटीञ्च तथा देवि† दानवक्षयकारिणीम्।
जयदां देवतानाञ्च मातरो‡ देवपूजिताः।
गृहदेव्योवासुदेव्यो दृष्ट्वानुज्ञाप्य निर्गमेत्§॥१४।१५।१६।१७।
मौनव्रतधरो गच्छेद्यावद्दक्षिणकोटिके।
प्राप्य स्नात्वा पितॄंस्तर्प्य¶ दृष्ट्वा देवं प्रणम्य च।
नत्वा गच्छेद्दिक्षुवासां देवि‖ कृष्णसुपूजिताम्॥ १८॥
बालक्रीड़नरूपाणि कृतानि सह गोपकैः।
यानि तीर्थानि तान्येव स्थापितानि महर्षिभिः।
ख्यातिङ्गतानि सर्व्वाणि सर्व्वपापहराणि च॥ १९॥
वत्सयुग्मं ततो गच्छेत्सर्व्वपापहरं परम्।
अर्कस्थलं** वीरस्थलं कुशस्थलमनन्तरम्॥ २०॥
पुण्यस्थलं महास्थलं महापापविनाशनम्††।
पञ्चस्थलानि तत्रैव सर्व्वपापहराणि च॥
येषां तु दर्शनादेव ब्रह्मणा सह मोदते।
शिवं सिद्धमुखं दृष्ट्वा स्थलानां फलमाप्नुयात्॥ २१।२२॥
हयमुक्तिं ततो गच्छेत्सिन्दूरं ससहायकम्।
श्रूयते चात्र ऋषिभिर्गाथा गीता पुरातना‡‡॥ २३॥

---

* औग्रसेनीन्त्विति (ग)। † तथा देवीमिति (ग)। ‡ मातृरिति साधु। § निर्गच्छेदिति साधु। ¶ तर्पयित्वेति साधु। ‖ देवीमिति (ग)। ** अङ्कस्थलमिति (क), (ख)। †† महापातकनाशनमिति (ग)। ‡‡ पुरातनीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अश्वारूढ़ेन तेनैव यत्रेयं समनुस्थिता ।
अश्वीमुक्तिं गतस्तत्र सहायसहितः सुखम् ॥ २४ ।
राजपुत्रः स्थितस्तत्र यानयात्रा न मुक्तिदा ।
तस्माद्यानैश्च यात्रा च न कर्त्तव्या फलेच्छया ॥ २५ ।
तस्मिंस्तीर्थे तु तं दृष्ट्वा स्पृष्ट्वा पापैः प्रमुच्यते ।
कुण्डं शिवस्य विख्यातं तत्र स्नानफलं महत् ॥ २६ ।
मल्लिकादर्शनङ्कृत्वा कृष्णस्य जयदं शुभम् ।
ततः कदम्बखण्डस्य गमनात्सिद्धिमाप्नुयात् ॥ २७ ।
चर्च्चिका योगिनी तत्र योगिनीपरिवारिता ।
कृष्णस्य रक्षणार्थं हि स्थिता सा दक्षिणां दिशम् ॥ २८ ।
अस्पृश्या चास्पृशा चैव मातरौ लोकपूजितौ* ।
बालानां दर्शनं ताभ्यां महारक्षाङ्करिष्यति ॥ २९ ।
वर्षखातं ततोगत्वा कुण्डं पापहरम्परम् ।
गत्वा स्नात्वा पितॄंस्तर्प्य† सर्व्वपापैः प्रमुच्यते ॥ ३० ।
क्षेत्रपालं ततो गत्वा शिवं भूतेश्वरं हरम् ।
मथुराक्रमणं तस्य जायते सफलं तथा ॥ ३१ ।
कृष्णक्रीड़ासेतुबन्धं महापातकनाशनम् ।
बालानां क्रीड़नार्थञ्च कृत्वा देवीगदाधरः ।
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने ।
तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ ३२।३३ ।

---

* लोकपूजिते इति साधु । † तर्पयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

बलिकृद्दश्च* तत्रैव जलक्रीड़ाकृतं शुभम् ।
यस्य सन्दर्शनादेव सर्व्वपापैः प्रमुच्यते ॥ ३४ ।
ततः परञ्च कृष्णेन कुक्कुटैः क्रीड़नङ्कृतम् ।
यस्य दर्शनमात्रेण चण्डोऽपि गतिमाप्नुयात् ॥ ३५ ।
स्तम्भोच्चयं सुशिखरं सौरभैः ससुगन्धिभिः ।
भूषितं पूजितं तत्र कृष्णेनाक्लिष्टकर्म्मणा ॥ ३६ ।
तस्य प्रदक्षिणङ्कृत्वा परिपूज्य प्रयत्नतः ।
मुच्यते सर्व्वपापेभ्यो विष्णुलोकं व्रजेत्तु सः† ॥ ३७ ।
वसुदेवेन देवक्या गर्भस्य रक्षणाय च‡ ।
कृतमेकान्तशयनं महापातकनाशनम् ॥ ३८ ।
ततोनारायणस्थानं प्रविशेन्मुक्तिहेतवे ।
परिक्रम्य ततो देवान्नारायणपुरोगमान् ॥ ३९ ।
दृष्ट्वा ततः सुविज्ञाप्य गणं विधिविनायकम् ।
कुब्जिकां वामनाञ्चैव ब्राह्मण्यौ कृष्णपालिते ॥ ४० ।
अनुज्ञाय ततः स्थानं द्रष्टुङ्गर्त्तेश्वरं शिवम् ।
दृष्टमात्रेण तत्रैव यात्राफलमवाप्यते ॥ ४१ ।
महाविद्येश्वरी देवी आरक्षं पापकं हरेत्§ ।
रक्षणार्थं हि क्षेत्रस्य यात्रायाः सिद्धिदां नृणाम् ।
प्रभामल्लीश्च¶ तत्रैव दृष्ट्वा कामानवाप्नुयात् ॥ ४२ ।

---

* बालकृद्दमिति (क), (ख) । † व्रजेन्नर इति (ग) । ‡ गर्भसंरक्षणाय चेति (ग) ।
§ आरक्षं परमं हरेरिति (ग) । ¶ प्रभालक्ष्मिमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

महाविद्येश्वरी देवी कृष्णरक्षार्थमुद्यता ।
नित्यं सन्निहिता तत्र सिद्धिदा पापनाशिनी ॥ ४३ ॥
कृष्णेन बलभद्रेण गोपैः कंसं जिघांसुभिः ।
सङ्केतकङ्कृतं तत्र मन्त्रनिश्चयकारकम् ॥ ४४ ॥
तदा संकेतकैः सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
सङ्केतकेश्वरीञ्चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥ ४५ ॥
तत्र कुण्डं स्वच्छजलं महापातकनाशनम् ॥ ४६ ॥
ततो दृष्ट्वा महादेवं गोकर्णेश्वरनामतः ।
यस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥ ४७ ॥
सरस्वतीं नदीं दृष्ट्वा ततो भद्राणि पश्यति ।
विघ्नराजं ततो गच्छेद्गणेशं विघ्ननायकम् ।
सर्व्वसिद्धिप्रदं रम्यं दर्शनाच्च फलं लभेत् ॥ ४८ ॥
गङ्गा साध्वी च तत्रैव महापातकनाशिनी ।
दृष्ट्वा स्पृष्ट्वा तथा ध्यात्वा सर्व्वकामान् समश्नुते ॥ ४९ ॥
महादेवमुखाकारं नाम्ना रुद्रमहालयम् ।
चित्रपत्तं परं दृष्ट्वा चित्रवासफलं लभेत् ।
तस्मादुत्तरकोटिञ्च दृष्ट्वा देवङ्गणेश्वरम् ॥ ५० ॥
द्यूतक्रीड़ा भगवता कृता गोपजनैः सह ।
नानावह्रासरूपेण जिता गोप्यो धनानि च ॥ ५१ ॥
गोपैरानीय ताश्चैव कृष्णाय च निवेदिताः ।
गोपालकृष्णगमनं महापातकनाशनम् ॥ ५२ ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

समस्तं बालचरितं भ्रमणं च यथासुखम्।
कृतं तत्र यथारूपं यद्रूपञ्च यथा तथा।
ऋषिभिः सेवितं ध्यातं विष्णोर्माहात्म्यमुत्तमम्॥ ५३।
ततो गच्छेन्महातीर्थं विमलं यमुनाम्भसि।
स्नात्वा पीत्वा पितॄंस्तर्प्य नाम्ना रुद्रमहालयम्।
गार्ग्यतीर्थे महापुण्ये नरस्तत्र तथा क्रमेत्* ॥ ५४।
भद्रेश्वरे महातीर्थं सोमतीर्थं तथैव च।
स्नात्वा सोमेश्वरं देवं दृष्ट्वा यात्राफलं लभेत्॥ ५५।
सरस्वत्याः सङ्गमे च देवर्षिपितृमानवान्।
सन्तर्प्य विधिवद्दत्त्वा विष्णुसायुज्यमाप्नुयात्॥ ५६।
घण्टाभरणके तद्वत्तथा गरुड़केशवे।
धारालोपनके तद्वद्वैकुण्ठे खण्डवेलके॥ ५७।
मन्दाकिन्याः संयमने असिकुण्डे तथैव च।
गोपानां तीर्थके चैव तथैव मुक्तिकेश्वरे॥ ५८।
वैलचगरुड़े चैव महापातकनाशने।
तीर्थान्येतानि पुण्यानि यथा विश्रान्तिसंज्ञकम्॥ ५९।
एषु तीर्थेषु क्रमितो भक्तिमांश्च जितेन्द्रियः।
देवान् पितॄन्समभ्यर्च्य ततो देवं प्रसादयेत्॥ ६०।
अविमुक्तेश देवेश सप्तर्षिभिरनुष्टुत।
मथुराक्रमणीयं मे सफलं स्यात्तवाज्ञया॥ ६१।
इत्येवं देवदेवेशं विज्ञाप्य चेत्परं शिवम्।

---

* क्रामेदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विश्रान्तिसंज्ञके स्नानङ्कृत्वा च पितृतर्पणम् ॥ ६२ ।
गतश्रमम्परिक्रम्य स्तुत्वा दृष्ट्वा प्रणम्य च ।
सुमङ्गलां ततो गच्छेद्यात्रासिद्धिं प्रसादयेत् ॥ ६३ ।
सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
यात्रेयं त्वत्प्रसादेन सफला मे भवत्विति ॥ ६४ ।
पिप्पलादेश्वरं देवं पिप्पलादेन पूजितम् ।
विश्रान्तस्तु परिक्रम्य त्रातस्तत्र महातपाः ॥ ६५ ।
उपलिप्य ततस्तस्य शीर्षोपरि महच्छिवम् ।
स्वनाम्ना चिह्नितं स्थाप्य* तदा यात्राफलं लभेत् ॥ ६६ ।
कर्कोटकं तथा नागं महादुष्टनिवारणम् ।
दृष्ट्वा गच्छेत्ततो देवीं या कृष्णेन विनिर्म्मिता ॥ ६७ ।
कंसभेदं प्रथमतः श्रुतं यत्र कुमन्त्रितम् ।
सुखवासञ्च वरदङ्कृष्णस्याक्लिष्टकर्म्मणः ।
सुखासीनञ्च तत्रैव स्थापितं शकुनाय वै ॥ ६८ ।
स्वानुकूलो स्वदीयत्र प्रवेशे दक्षिणः स्वनः ।
ध्याता स्वभावे कृष्णेन स्वसा सातिसुखप्रदा ॥ ६९ ।
भयार्त्तेन च कृष्णेन ध्याता देवी च चण्डिका ।
स्थापिता सिद्धिदा तत्र नाम्ना चार्त्तिहरा ततः ।
दृष्ट्वा सर्व्वार्त्तिहरणं यस्या देव्या सुखी नरः ॥ ७० ।
अग्रोत्तरं शुभतरं शकुनार्थञ्च याचतः ।
कृष्णस्य कंसघातार्थं सम्भूता सा तयोत्तरे ॥ ७१ ।

---

*स्थापयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तां दृष्ट्वा मनुजः कामान्सर्व्वानिष्टानवाप्नुते ॥ ७२ ।
वज्रानने ततो ध्यात्वा कृष्णोमल्लजिघांसया ।
निहत्य मल्लान् पश्चाद्धि वज्राननमकल्पयत् ।
वाञ्छितार्थफलञ्चक्रे कृष्णेनास्य मनोरथान् ॥ ७३ ।
यस्यै यस्यै देवतायै तस्यै तस्यै ददौ मखम् ।
उपयाचितन्तु माङ्गल्यं सर्व्वपापहरं शुभम् ॥ ७४ ।
कृष्णस्य बालचरितं महापातकनाशनम् ।
सूर्य्यं तं वरदं देवं माथुराणां कुलेश्वरम् ।
दृष्ट्वा तत्रैव दानञ्च दत्त्वा यात्रां समापयेत् ॥ ७५ ।
एवं प्रदक्षिणङ्कृत्वा नवम्यां शुक्लकौमुदे ।
सर्व्वं कुलं समादाय विष्णुलोके महीयते ॥ ७६ ।
क्रमतः पदविन्यासाद्यावन्तः सर्व्वतोदिशः ।
तावतः कुलसम्भूताः सूर्य्ये तिष्ठन्ति शाश्वते ॥ ७७ ।
ब्रह्मघ्नश्च सुरापश्च चौरा भग्नव्रताश्च ये ।
अगम्यागमने शीलाः चेत्रदारापहारकाः ।
मथुराक्रमणङ्कृत्वा विपाप्मानो भवन्ति ते ॥ ७८ ।
अन्यदेशागतो दूरात्परिभ्रमति यो नरः ।
तस्य सन्दर्शनादन्ये पूताः स्युर्विगतामयाः ॥ ७९ ।
श्रुतं यैश्च विदूरस्थैः कृतयात्रं नरं नरैः ।
सर्व्वपापविनिर्मुक्तास्ते यान्ति परमम्पदम् ॥ ८० ।

इति वराहपुराणे मथुरापरिक्रमप्रादुर्भावे
षष्ट्यधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकषष्ट्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

ये धर्म्मविमुखा मूढ़ाः सर्व्वज्ञानविवर्ज्जिताः ।
का गतिः कृष्ण तेषां हि विहिता नरके सुरैः ॥ १ ॥
अभुक्त्वा नारकं दुःखं सुकृतैः पुण्यदैर्नृणाम् ।
प्रयान्ति कर्म्मणा येन तमुपायं ब्रवीहि मे ॥ २ ॥

वराह उवाच ।

सर्व्वधर्म्मविहीनानां पुरुषाणां दुरात्मनाम् ।
नरकार्त्तिहरा देवी मथुरा पापघातिनी ॥ ३ ॥
मथुरावासिनो ये च तीर्थानाञ्चोपसेवकाः ।
वनानां दर्शको वाथ मथुराक्रमकोऽपि वा ॥
एषां मध्ये कृतं यैश्च एकञ्च शतमोजसा ।
न ते नरकभोक्तारः स्वर्गभाजो भवन्ति ते ॥ ४।५ ॥
प्रथमं मधुवनं नाम द्वितीयं तालमेव च ।
वनं कुन्दवनञ्चैव तृतीयं वनमुत्तमम् ॥ ६ ॥
चतुर्थं काम्यकवनं वनानां वनमुत्तमम् ।
पञ्चमम्बहुवनं नाम षष्ठं भद्रवनं स्मृतम् ॥ ७ ॥
सप्तमन्तु वनं भूमि खादिरं लोकविश्रुतम् ।
महावनं चाष्टमन्तु सदैव च मम प्रियम् ॥ ८ ॥
लोहार्गलवनं नाम नवमं पातकापहम् ।
वनं विल्ववनं नाम दशमं देवपूजितम् ॥ ९ ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकादशन्तु भाण्डीरं द्वादशं वृन्दकावनम्* ।
एतानि ये प्रपश्यन्ति न ते नरकभोगिनः ॥ १० ॥
यथाक्रमेण ये यात्रां वनानाञ्च जितेन्द्रियाः ।
करिष्यन्ति वरारोहे इन्द्रलोकं व्रजन्ति ते ॥ ११ ॥

इति वराहपुराणे मथुरामाहात्म्ये देववनप्रभावो नाम
एकषष्ट्यधिकशततमोऽध्यायः ।

द्विषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
चक्रतीर्थे पुरा वृत्तं मथुरायां तथोत्तरे ॥ १ ॥
महागृहोदयं नाम जम्बूद्वीपस्य भूषणम् ।
तस्मिन् पुरवरे दिव्ये ब्राह्मणो वसते* शुभे ॥ २ ॥
कन्यां सपुत्त्रमादाय ब्राह्मणो वेदपारगः ।
शालिग्रामं महापुण्यमगच्छद्ब्राह्मणोत्तमः ॥ ३ ॥
तत्रासौ वासमकरोत्पुण्यसेवी जितेन्द्रियः ।
तीर्थसेवी च स्नायी च† देवतादर्शने रतः ॥ ४ ॥

---

* वृन्दावनमिति (क), (ख), तत्र छन्दोदोषः ।

---

* वसतीति साधु । † तीर्थसेवी स्नानपर इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र सिद्धेन संवासो ब्राह्मणस्याभवत्तदा ।
स सिद्धो वसते नित्यं कल्पग्रामे च सर्व्वदा ।
गच्छते* सर्व्वकालन्तु शालिग्रामे वसुन्धरे ॥ ५ ।
स तेन सह सङ्गत्य कान्यकुब्जनिवासिना ।
कल्पग्रामविभूतिञ्च नित्यकालमवर्णयत् ॥ ६ ।
कल्पग्रामविभूतिञ्च श्रुत्वा स मुनिसत्तमः ।
गमने बुद्धिरुत्पन्ना ततः सिद्धमयाचत ॥ ७ ।
मित्रत्वं वर्त्तते सिद्ध नयस्वात्मनिवेशने ।
ब्राह्मणस्य वचः श्रुत्वा सिद्धो वचनमब्रवीत् ॥ ८ ।
तत्र सिद्धा हि गच्छन्ति ते न तत्र गतिर्भवेत् ।
प्रार्थनाद्दुःखलाभन्तु शृणु वै ब्राह्मणोत्तम ॥ ९ ।
आत्मयोगबलेनैव चलिष्यामि सपुत्त्रकः ।
दक्षिणे तु करे गृह्य ब्राह्मणं वेदपारगम् ।
वामे च तु करे गृह्य तस्य पुत्त्रं महामतिम् ।
उत्पपात तदा सिद्धो गृहीत्वा ब्राह्मणोत्तमौ ॥ १० ।
कल्पग्रामे तु तौ मुक्तौ पितापुत्त्रौ वसुन्धरे ।
तत्र तौ वसतोनित्यं कल्पग्रामे द्विजोत्तमौ ॥ ११ ।
तत्र कालेन महता रुग्देहे चाभवत्तदा ।
रुजा तु पीड्यमानः स दशमीञ्च दशाङ्गतः ॥ १२ ।
मर्त्तुकामो द्विजवरो निरीक्ष्य सुतमुत्तमम् ।
उवाच पुत्त्रं धर्म्मात्मा मरणे समुपस्थिते ।

---

* गच्छतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गङ्गातीरे च मां पुत्त्र नय त्वं मा विलम्बय ॥ १३ ।
तेन पुत्त्रेण नीतोऽसौ गङ्गातीरे महामुनिः ।
रुरोद पुत्त्रस्तु तदा पितृस्नेहसमन्वितः ॥ १४ ।
वेदाध्ययनशीलः स पितृभक्त्या नियन्त्रितः ।
वसतस्तस्य वै तत्र कालोजातो महामतेः ॥ १५ ।
कल्पग्रामे तदा सिद्धस्तस्य कन्या सुमध्यमा ।
वरमन्वेषयन्ती सा न प्राप्तस्तु तया मतः ॥ १६ ।
कदाचिद्दैवयोगेन कान्यकुब्जनिवासिनः ।
गृहे प्रविष्टो विप्रः स भोजनार्थं महामतिः ॥ १७ ।
पृष्टोऽसौ ब्राह्मणो भद्रे क्व भवांस्त्वमिहागतः ।
स सर्व्वं कथयामास यथावृत्तं दृढ़व्रतः ॥ १८ ।
दिव्यज्ञानेन तं ज्ञात्वा पूजयामास तं द्विजः ।
पूजयित्वा यथान्यायङ्कन्यां तस्मै ददौ तदा ॥ १९ ।
श्वशुरस्य गृहे नित्यं भोजनं कुरुते द्विजः ।
वसते पितृसान्निध्ये प्रतिचारी स पुत्त्रकः ॥ २० ।
काले भगवतस्तस्य अतिक्षीणः पिता तदा ।
तं दृष्ट्वा क्षीणतां प्राप्तं श्वशुरं पर्य्यपृच्छत ॥ २१ ।
स्वामिन्पितुर्मे मरणं भविष्यति वदस्व माम् ।
जामातृवचनं श्रुत्वा प्रहस्य श्वशुरोऽब्रवीत् ॥ २२ ।
शूद्रान्नं भक्षितं तेन नित्यकालं द्विजोत्तम ।
तस्य चाहारदोषेण मृत्युर्दूरङ्गतः पितुः ॥ २३ ।
पादयोर्विद्यते तच्च शूद्रान्नञ्च पितुस्तव ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जान्वोरूर्द्ध्वं न विद्येत शूद्रान्नञ्च द्विजोत्तम।
शूद्रान्नेन विहीनस्य तस्य मृत्युर्भविष्यति ॥ २४ ।
श्वशुरस्य तु वचनं पितुरग्रे न्यवेदयत्।
तस्य पुत्रस्य वचनं श्रुत्वात्मानं विगर्हयत्* ॥ २५ ।
ततः प्रभाते विमले उदिते च दिवाकरे।
पितुः समीपात्स गतः श्वशुरस्य निवेशनम् ॥ २६ ।
गते पुत्रे पिता तस्य रुजा अत्यन्तपीड़ितः।
दुःखेन पीड़ितः क्षीणो मर्त्तुकामो द्विजोत्तमः।
गङ्गातीरात्समुत्तिष्ठन्दिशः सर्वा विलोकयन्।
सन्निधावुपलं दृष्ट्वा गृहीतं तेन तत्पदा ॥ २७।२८ ।
चूर्णयामास तौ पादौ पीड़या मोहितोद्विजः।
ततः प्राणान् परित्यज्य गतोऽसौ कालवर्त्तनम् ॥ २९ ।
स्नात्वा भुक्त्वा ततोगत्वा प्रेक्ष्य तं पितरं मृतम्।
गतसंज्ञञ्च पितरं दृष्ट्वा स रुरुदे भृशम् ॥ ३० ।
रुदित्वा सुचिरङ्कालं शास्त्रं दृष्ट्वा व्यचिन्तयत्।
संस्कारयोग्यता नास्ति इत्येव पुनरब्रवीत् ॥ ३१ ।
सर्पशृङ्गिहतानाञ्च दंष्ट्रिविप्रहतस्य च।
आत्मनस्त्यागिनश्चैव आपस्तम्बोऽब्रवीदिदम् ॥ ३२ ।
आत्मघाती नरः पापी नरके पच्यते चिरम्।
प्रायश्चित्तं विधीयीत न दद्याच्चोदकक्रियाम्।
अहो दैवं सुबलवत्पौरुषन्तु निरर्थकम् ॥ ३३ ।

---

* व्यगर्हयदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्य पुत्रो महाभागे गतः श्वशुरमन्दिरम् ।
तं दृष्ट्वा श्वशुरोदीनमिदं वचनमब्रवीत् ।
ब्रह्महत्या तु ते जाता गच्छ त्वञ्च यथेप्सितम् ॥ ३४ ।
श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत् ।
न मया ब्राह्मणवधः कदाचिदपि कारितः ।
केन दोषेण मे सिद्धं ब्रह्महत्याफलं महत् ॥ ३५ ।
जामातुर्वचनं श्रुत्वा श्वशुरोवाक्यमब्रवीत् ।
पितुस्त्वया वधोपायोविनिर्द्दिष्टस्य पुत्रक ।
तेन दोषेण विप्रर्षे ब्रह्महत्याफलं तव ॥ ३६ ।
आसनशयनाच्चैनं भोजनात्कथनादिषु ।
संवत्सरेण पतति पतितेन सहाचरन् ।
तस्मान्मम गृहे नास्ति वासस्ते हि द्विजोत्तम ॥ ३७ ।
श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत् ।
किं मया वद कर्त्तव्यं त्वया त्यक्तेन सुव्रत ॥ ३८ ।
तस्य तद्वचनं श्रुत्वा ब्राह्मणः शंसितव्रतः ।
कल्पग्रामम्परित्यज्य मथुरां याहि सुव्रत ।
नान्यत्र तव संशुद्धिः कदाचित्पितृघातिनः ॥ ३९ ।
कल्पग्रामं परित्यज्य तत्क्षणादेव निःसृतः ।
ततः कालेन महता सम्प्राप्तो मथुरां पुरीम् ।
ब्राह्मणेभ्यो वहिःस्थाने नित्यन्तु वसते द्विजः ॥ ४० ।
कन्यापुरनिवासी तु कुशिकोऽथ नराधिपः ।
तस्य सत्रं नित्यकालं मथुरायां प्रवर्त्तते ॥ ४१ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्वे सहस्रे तु विप्राणां तस्य सत्रे च भुञ्जते ।
ब्राह्मणानां सदोच्छिष्टं ततश्चोद्धरते तु सः ॥ ४२ ।
चक्रतीर्थं समासाद्य स्नानं स कुरुते सदा ।
न भिक्षां कुरुते तत्र भोजनार्थं न गच्छति ॥ ४३ ।
ततः कालेन महता चिन्ताभूच्छ्वशुरस्य च ।
दिव्यज्ञानेन तत्सर्व्वं ज्ञात्वा ऽजामातृचेष्टितम् ।
स्वां सुतां चोदयामास गच्छ तां मथुरां पुरीम् ।
भोजनं गृह्य तत्रैव गच्छ त्वं भर्त्तृसन्निधौ ॥ ४४ ।
दिव्यज्ञानेन च तदा नित्यं सा भर्त्तृसन्निधौ ।
दिने दिने गच्छति सा भर्त्तुर्भोजनकारणात् ।
दिवसस्यावसाने तु भोजनं गृह्य गच्छति ॥ ४५ ।
भोजनं कुरुते नित्यं प्रियादत्तं वसुन्धरे ।
पात्रं निःक्षिप्य कुण्डे तु सत्रे वसति सर्व्वदा ॥ ४६ ।
एवं निवसतस्तस्य वर्षार्द्धन्तु गतं तदा ।
ततः कालेन महता तैः पृष्टः स द्विजोत्तमः ।
कुत्र सन्तिष्ठसे नित्यं भोजनं कुरुषे कुतः ॥ ४७ ।
कथयामास वृत्तान्तं तं सर्व्वञ्चात्मनो हि सः ।
ते श्रुत्वा ब्राह्मणाः सर्व्वे एकीभूता वसुन्धरे ।
इदमूचुस्ततो विप्राः शुद्धोऽसीति द्विजम्प्रति ॥ ४८ ।
चक्रतीर्थप्रभावेण पापान्मुक्तः सनातनः ।
अस्माकं वचनाच्चैव पुनः सिद्धोऽसि वै द्विज ॥ ४९ ।
ब्राह्मणानां वचः श्रुत्वा स द्विजो हृष्टमानसः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्नानार्थन्तु ततः स्थानाच्चक्रतीर्थं समागतः ॥ ५० ।
गते तस्मिंस्तस्य भार्य्या भिक्षामादाय चागता ।
सा तु हृष्टेन मनसा भर्त्तारं वाक्यमब्रवीत् ।
भोजनं कुरु मे दत्तं हत्या लक्ष्यामि ते गता ॥ ५१ ।
प्रियावचनमाकर्ण्य भर्त्ता वचनमब्रवीत् ।
पुनराभाषितं भद्रे* यदिदम्भाषितं त्वया ॥ ५२ ।
भर्त्तुर्वचनमाकर्ण्य पत्नी वचनमब्रवीत् ।
न त्वं सम्भाषितः पूर्व्वं ब्रह्महत्यासमन्वितः ।
चक्रतीर्थप्रभावेण मुक्तोऽसि द्विजसत्तम ॥ ५३ ।
उत्तिष्ठ कान्त गच्छाव कल्पग्रामं सुशोभितम् ।
तया सार्द्धं जगामाथ कल्पग्रामं द्विजोत्तमः ॥ ५४ ।
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम् ।
नित्यञ्च भुञ्जते यत्र पात्रं द्रव्यसमर्पितम् ।
दृष्ट्वा भद्रेश्वरे देवं चक्रतीर्थे फलं लभेत्† ॥ ५५ ।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे ।
अहोरात्रोपवासेन मुच्यते ब्रह्महत्यया ॥ ५६ ।
कल्पग्रामेण किं तस्य वाराणस्याञ्च वा शुभे ।
मथुरान्तु समासाद्य यः कश्चिन्म्रियते भुवि ।
अपि कीटः पतङ्गो वा जायते स चतुर्भुजः ॥ ५७ ।

इति वराहपुराणे चक्रतीर्थप्रभावो नाम

द्विषष्ट्यधिकशततमोऽध्यायः ।

---

* पुनराभाष्यतां भद्रे इति कृते तु सम्यगर्थसङ्गतिर्भवति । † भवेदिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रयःषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
वैकुण्ठतीर्थमासाद्य यद्वृत्तं हि पुरातनम् ॥ १ ।
मिथिलायां* पुरी रम्या जनकेन च पालिता ।
मिथिलावासिनो लोकास्तीर्थयात्रां समागताः ॥ २ ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चापि वसुन्धरे ।
स्नात्वा सौकरवे तीर्थे आयाता मथुरां पुरीम् ॥ ३ ।
तेषाञ्च भक्तिरुत्पन्ना मथुराम्प्रति सुन्दरि ।
वैकुण्ठतीर्थमासाद्य सर्व्वे ते मनुजाः स्थिताः ॥ ४ ।
तेषान्तु ब्राह्मणः कश्चिद्ब्रह्महत्यासु चिह्नितः ।
रुधिरस्य हि धारा च स्रवन्ती तस्य हस्ततः ॥ ५ ।
प्रत्यचा दृश्यते सर्व्वैर्ब्रह्महत्यास्वरूपिणी ।
सर्व्वतीर्थप्लुतस्यापि ब्राह्मणस्य हि सा तदा ॥ ६ ।
न गता पूर्व्वमेवासीद्वैकुण्ठे स्नानमाचरत् ।
न सा वै दृश्यते धारा ततस्ते विस्मयङ्गताः ॥ ७ ।
किमेतत्किमिति प्राहुर्धारां प्रति वसुन्धरे ।
देवोब्राह्मणरूपेण लोकान्सर्व्वान्हि पृच्छति ॥ ८ ।
केन कारणदोषेण धारा त्यक्ता गता द्विजम् ।
तत्सर्व्वं कथयामासुर्ब्राह्मणस्य विचेष्टितम् ॥ ९ ।

---

* मिथिला या पुरीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वैकुण्ठे तु* निमग्नोऽयं ब्रह्महत्या गता ततः।
विस्मयो नात्र कर्त्तव्यस्तीर्थस्येदं महत्फलम्॥ १०॥
इत्युक्तस्तैर्देवदेवस्तत्रैवान्तरधीयत।
एषः प्रभावस्तीर्थस्य वैकुण्ठस्य वसुन्धरे॥ ११॥
वैकुण्ठतीर्थे यः स्नाति मुच्यते सर्व्वपातकैः।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति॥ १२॥

सूत उवाच†।

पुनरन्यप्रवक्ष्यामि असिकुण्डेऽतिपुण्यदे।
नाम्ना गन्धर्व्वकुण्डन्तु तीर्थानां तीर्थमुत्तमम्॥ १३॥
तत्र स्नातो नरो देवि गन्धर्व्वैः सह मोदते।
तत्र यो मुञ्चते प्राणान्मम लोकं स गच्छति॥ १४॥
विंशतिर्योजनानान्तु माथुरं मम मण्डलम्।
इदं पद्मं महाभागे सर्व्वेषां मुक्तिदायि च॥ १५॥
कर्णिकायां स्थितोदेवि केशवः केशनाशनः।
कर्णिकायां मृता ये तु तेऽमरा मुक्तिभागिनः॥ १६॥
तत्र मध्ये मृता ये तु तेषां मुक्तिर्वसुन्धरे॥ १७॥
पश्चिमेन हरिन्देवं गोवर्द्धननिवासिनम्।
दृष्ट्वा तं देवदेवेशं किं मनः परितप्यते‡॥ १८॥

---

* वैकुण्ठेऽतीति (ग)। † सूत उवाचेति सार्व्वत्रिकः पाठः परमेष न सङ्गच्छते पूर्व्वतोऽविच्छिन्ने वराहवाक्प्रसङ्गे स्थिते सूतवचनस्याप्रसङ्गतत्वात्, वक्ष्यमाणानां मम लोकं स गच्छतीत्यादि वचनानामसम्बद्धत्वाच्च। अतोऽत्र वराह उवाच इति सम्यक् सम्भाव्यते।
‡ परितप्यतीति चेत्साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उत्तरेण तु गोविन्दं दृष्ट्वा देवं परं शुभम् ।
नासौ पतति संसारे यावदाभूतसंप्लवम् ॥ १९ ॥
विश्रान्तिसंज्ञके देवं पूर्व्वपत्रे व्यवस्थितम् ।
यं दृष्ट्वा तु नरो याति मुक्तिं नास्त्यत्र संशयः ॥ २० ॥
दक्षिणेन तु मां विद्धि प्रतिमां दिव्यरूपिणीम् ।
महाकायां सुरूपाञ्च केशवस्कारसन्निभाम् ।
तां दृष्ट्वा मनुजो देवि ब्रह्मणा सह मोदते ॥ २१ ॥
कृते युगे तु राजासीन्मान्धाता नाम नामतः ।
तेनाहन्तोषितो देवि भक्तियुक्तेन चेतसा ॥ २२ ॥
तस्य तुष्टेन हि मया प्रतिमेयं समर्पिता ।
तेनेयं पूजिता नित्यमात्ममुक्तिमभीप्सता ॥ २३ ॥
यदा तु मथुराम्प्राप्य लवणोऽयं निपातितः ।
तदैव प्रतिमा दिव्या मथुरायां व्यवस्थिता ॥ २४ ॥
पुण्येयं प्रतिमा दिव्या तेजसा दिव्यरूपिणी ।
कपिलो नाम विप्रर्षिर्मम भक्तिपरायणः ॥ २५ ॥
मनसा निर्म्मिता तेन वाराही प्रतिमा शुभा ।
कपिलो ध्यायते* नित्यमर्च्चति स्म दिने दिने ॥ २६ ॥
इन्द्रेणाराधितो देवि कपिलो मुनिसत्तमः ।
तस्य प्रीतो ददौ देवं वराहं दिव्यरूपिणम् ॥ २७ ॥
देवे लब्धे तु वाराहे शक्रो हर्षसमन्वितः ।
ध्यायति† स्म सदा देवं पूजाङ्कृत्वा हि भक्तितः ।

---

* ध्यायतीति साधु । † ध्यायते स्मेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इन्द्रेण तु तदा प्राप्तं दिव्यं ज्ञानमनुत्तमम् ॥ २८ ।
ततः कालेन महता रावणो नाम राक्षसः ।
इन्द्रलोकङ्गतः सोऽथ स्वर्गं जेतुं महाबलः ॥ २९ ।
शक्रेण सह सङ्गम्य ततो युद्धं प्रवर्त्तितम् ।
रावणेन जिता देवाः शक्रश्चैव महाबलः* ।
बद्धा चेन्द्रं महाबाहुं शक्रस्य भवनङ्गतः ॥ ३० ।
प्रविश्य रावणस्तत्र गृहे रत्नविभूषिते ।
दृष्ट्वा कपिलवाराहं शिरसा धरणीं गतः ।
तेन सम्मोहितो देवि रावणो नाम राक्षसः ॥ ३१ ।
त्रातुमर्हसि मे देव धरणीधर माधव ।
दामोदर हृषीकेश हिरण्याक्षविदारण ॥ ३२ ।
वेदगर्भ नमस्तेऽस्तु वासुदेव नमोऽस्तु ते ।
कूर्म्मरूप नमस्तेऽस्तु नारायण नमोऽस्तु ते ॥ ३३ ।
मत्स्यरूपधरं देवं मधुकैटभनाशिनम् ।
निरीक्षितुं न शक्नोमि प्रष्टुञ्चैव गुणव्रत† ॥ ३४ ।
देवदेव नमस्तुभ्यं भक्तानामभयप्रद ।
मम त्वं भक्तिनम्रस्य प्रसादं कुरु सर्व्वदा ॥ ३५ ।
इति स्तुतो रावणेन देवदेवो जगत्पतिः ।
सौम्यरूपोऽभवद्देवो लोकनाथो जनार्द्दनः ॥ ३६ ।

---

* शक्रश्चैव महाबलमिति बहुषु पाठः, तत्र तथाविधपराभवेण शक्रस्यापि क्लीवत्वं जातमिति च सूच्यते । † न सुव्रत इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सन्निधानमनुप्राप्य पुष्पकारोहणोत्सुकः ।
तदुद्धर्त्तुं न शक्नोति रावणो विस्मयङ्गतः ॥ ३७ ।
शङ्करेण पुरा सार्द्धं कैलासस्तु मयोद्धृतः ।
देव त्वं स्वल्पकायोऽसि नाहमुद्धरणक्षमः ॥ ३८ ।
प्रसीद देवदेवेश सुरनाथ नमोऽस्तु ते ।
अहं त्वां नेतुमिच्छामि पुरीं लङ्कामनुत्तमाम् ॥ ३९ ।

वराह उवाच ।

अवैष्णवोऽसि रक्षस्त्वं कुतोभक्तिस्तवेदृशी ।
कपिलस्य वचः श्रुत्वा रावणोवाक्यमब्रवीत् ।
त्वद्दर्शनात्समुत्पन्ना भक्तिरव्यभिचारिणी ।
महात्मन्त्वां नयिष्यामि* देवदेव नमोऽस्तु ते ॥ ४०।४१ ।
भक्तिमुद्वहतस्तस्य लघुवेषोऽभवत्तदा ।
पुष्पके तु समारोप्य देवं त्रैलोक्यविश्रुतम् ।
आनयामास लङ्कायां स्थापयित्वा स्वके गृहे ।
तदा स्थितोऽहं लङ्कायां रावणेन प्रपूजितः ॥ ४२।४३ ।
अयोध्याधिपतीरामो हन्तुं राक्षसपुङ्गवम् ।
गतोऽसौ विक्रमेणैव हत्वा राक्षसपुङ्गवम् ।
विभीषणश्च लङ्काया आधिपत्येऽभिषेचितः ।
विभीषणेन रामस्य सर्व्वस्वञ्च निवेदितम् ॥ ४४।४५ ।

राम उवाच ।

अनेन नास्ति मे कार्य्यं तव रक्षो विभीषण ।

* नेष्यामीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

देवो मे दीयतां रक्ष: शक्रलोकाद्य आगत: ।
अहन्यहनि पूजामि* देवं वाराहरूपिणम् ॥ ४६ ।
अयोध्यायाञ्च नेष्यामि त्वया दत्तं हि राक्षस ।
तत: समर्पयामास कपिलं दिव्यरूपिणन् ॥
पुष्पके तु समारोप्य नीतवान्नगरीं प्रति ।
अयोध्यायां स्थापयित्वा पूजयामास तं तदा ॥ ४७।४८ ।
गतं वर्षसहस्रन्तु दशोत्तरमत:परम् ।
लवणस्य वधार्थं हि शत्रुघ्नं प्रेषयत्तदा† ।
कृतप्रणाम: शत्रुघ्नो राघवाय महात्मने ।
चतुरङ्गबलोपेतो जगाम मथुराम्प्रति ॥ ४९ ।
गत्वा तु राक्षसश्रेष्ठं लवणं रौद्ररूपिणम्‡ ।
घातयित्वा तु शत्रुघ्न: प्रविश्य मथुरां पुरीम् ।
ब्राह्मणान्स्थापयित्वा तु मया तुल्यान्महौजस: ।
षड्विंशतिसहस्राणि वेदवेदाङ्गपारगान् ॥ ५०।५१ ।
अनृचो माथुरो यत्र चतुर्वेदस्तथापर: ।
एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता: ॥ ५२ ।
लवणस्य यथा वृत्तं कथितं ते वसुन्धरे ।
लवणस्य वधं श्रुत्वा राघवो वाक्यमब्रवीत् ।
वरं वरय शत्रुघ्न यत्ते मनसि रोचते ॥ ५३ ।
राघवस्य वच: श्रुत्वा शत्रुघ्नो वाक्यमब्रवीत् ।

---

† पूजयामीति साधु । † अप्रेषयदिति साधु । ‡ रुद्ररूपिणमिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यदि तुष्टोऽसि मे देव वरार्हो यदि वाप्यहम् ।
दीयतां मम देवोऽयं यदि मे वरदो भवान् ॥ ५४ ।
शत्रुघ्नस्य वचः श्रुत्वा राघवोवाक्यमब्रवीत् ।
नय शत्रुघ्न देवं त्वं दिव्यं वाराहरूपिणम् ॥ ५५ ।
धन्याऽसौ मण्डली लोके धन्या सा मथुरा पुरी ।
धन्यास्ते माथुरा लोकाः कपिलं पश्यते* सदा ॥ ५६ ।
दृष्टः स्पृष्टः सदा ध्यातः स्नापितश्च दिने दिने ।
अनुलिप्तश्च शत्रुघ्न सर्व्वपापं व्यपोहति ॥ ५७ ।
पूजितः स्नापितो देवो दृष्टो यैस्तु दिने दिने ।
सर्व्वं हरति वै पापं मोक्षञ्चैव प्रयच्छति ॥ ५८ ।
इत्युक्त्वा राघवस्तस्मै देवम्प्रादादवसुन्धरे ।
देवमादाय शत्रुघ्नो जगाम मथुरां पुरीम् ॥ ५९ ।
ब्राह्मणं स्थापयित्वा तु आगच्छन्मम सन्निधौ ।
तत्र मध्ये तु संस्थाप्य पूजयामास राघवः ।
अनेन क्रमयोगेण मथुरायां स्थितः प्रभुः ॥ ६० ।
गयायां पिण्डदानेन यत्फलं ज्येष्ठपुष्करे ।
तत्फलं समवाप्नोति श्वेतं दृष्ट्वा सदा नरः ॥ ६१ ।
विश्रान्तिसंज्ञके तद्वद्गोविन्दे च तथा हरौ ।
केशवे दीर्घविष्णौ च तदेव फलमश्नुते ॥ ६२ ।
उदये मामकं तेजः सदा विश्रान्तिसंज्ञके ।

---

* पश्यन्तीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मध्याह्ने मामकं तेजो दीर्घविष्णौ व्यवस्थितम् ।
केशवे मामकं तेजो दिनभागे चतुर्थके ॥ ६३ ।
एषा विद्या पुरा देवि नित्यकालं सुगोपिता ।
भक्ता त्वं मम शिष्या च कथिता ते वसुन्धरे ॥ ६४ ।

इति वराहपुराणे कपिलवराहमाहात्म्यं नाम

त्रयःषष्ट्यधिकशततमोऽध्यायः ।

चतुःषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

अस्ति गोवर्द्धनं नाम क्षेत्रम्परमदुर्लभम् ।
मथुरापश्चिमे भागे अदूराद्योजनद्वयम् ॥ १ ।
ह्रदं तत्र महाभागे द्रुमगुल्मलतायुतम् ।
चत्वारि तत्र तीर्थानि पुण्यानि च शुभानि च ॥ २ ।
ऐन्द्रं पूर्व्वेण पार्श्वेन यमतीर्थन्तु दक्षिणे ।
पश्चिमे वारुणं तीर्थं कौवेरञ्चोत्तरेण तु ।
तेषां मध्ये स्थितो भद्रे क्रीड़यिष्ये यदृच्छया ॥ ३ ।
तत्र वै शक्रतीर्थे तु स्नानं कुर्य्याद्दृढ़व्रतः ।
मोदते शक्रलोके तु सर्व्वद्वन्द्वविवर्ज्जितः ॥ ४ ।
दक्षिणे यमतीर्थे तु स्नानं कुर्य्याद्यथाविधि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यमस्य भवनङ्गत्वा मोदते कृतनिश्चयः ॥ ५ ॥
तत्राथ मुञ्चते प्राणान् लोभमोहविवर्ज्जितः ।
यमलोकं परित्यज्य मम लोकं स गच्छति ॥ ६ ॥
तत्रैव वारुणं तीर्थमासाद्य स्नानमाचरेत् ।
वारुणं भवनङ्गत्वा मुच्यते सर्व्वकिल्बिषात् ॥ ७ ॥
तत्राथ मुञ्चते प्राणान्कामक्रोधविवर्ज्जितः ।
वारुणं लोकमुत्सृज्य मम लोकं स गच्छति* ॥ ८ ॥
तत्र मध्ये च यः स्नाति क्रीड़ते स मया सह ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ९ ॥
अन्नकूटं† ततः प्राप्य तस्य कुर्य्यात्प्रदक्षिणम् ।
न तस्य पुनरावृत्तिर्देवि सत्यं ब्रवीमि ते ॥ १० ॥
स्नात्वा मानसगङ्गायां दृष्ट्वा गोवर्द्धने हरिम् ।
अन्नकूटं परिक्रम्य किं पुनः परिशोचति ॥ ११ ॥
सोमवारे त्वमायां वै‡ प्राप्य गोवर्द्धनङ्गिरिम् ।
दत्त्वा पिण्डं पितृभ्यश्च राजसूयफलं भवेत् ॥ १२ ॥
गयायां पिण्डदानेन यत्फलम्प्राप्यते नरः ।
तत्फलं प्राप्यते तत्र नात्र कार्य्या विचारणा ॥ १३ ॥
गोवर्द्धनम्परिक्रम्य दृष्ट्वा देवं परं हरिम् ।
राजसूयाश्वमेधानां फलम्प्राप्नोत्यसंशयम् ॥ १४ ॥

---

* मम लोकञ्च गच्छतीति (ग)। † अन्न कूटमिति (ग), एवं परत्रापि। ‡ अमावस्यामिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पृथिव्युवाच ।
परिक्रमोऽन्नकूटस्य विधिना क्रियते कथम् ।
प्रभावगुणमाहात्म्यं तद्भवान्वक्तुमर्हसि ॥ १५ ॥
वराह उवाच ।
मासि भाद्रपदे या तु शुक्ला चैकादशी शुभा ।
गोवर्द्धने सोपवासः कुर्य्यात्तत्र प्रदक्षिणाम् ॥ १६ ॥
स्नात्वा मानसगङ्गायां प्रभाते उदिते रवौ ।
गोवर्द्धनं प्रसाद्यैवं हरिञ्चाऽचलमूर्द्धनि ।
पुण्डरीकं ततो गच्छेत्कुण्डे स्नात्वा विधानतः ॥ १७ ॥
देवान् पितॄन् समभ्यर्च्य पुण्डरीकमथार्च्य* च ।
सर्व्वपापविनिर्मुक्तः प्रयाति भवनं हरेः ॥ १८ ॥
कुण्डञ्चाप्सरसं नाम प्रसन्नसलिलाशयम् ।
तत्र स्नानं तर्पणञ्च कृत्वा फलमवाप्नुयात् ।
राजसूयाश्वमेधानां धूतपाप्मा न संशयः ॥ १९ ॥
तीर्थं सङ्कर्षणं नाम्ना बलभद्रेण रचितम् ।
गोहत्या पूर्व्वसंलग्ना उत्तीर्णा तत्र दूरतः ।
स्नानाद्गच्छति सा क्षिप्रं नाऽत्र कार्य्या विचारणा ॥ २० ॥
अन्नकूटस्य सान्निध्ये तीर्थं शक्रविनिर्म्मितम् ।
तत्र कृष्णेन पूजार्थमिन्द्रस्य विहतो मखः ॥ २१ ॥
महानिन्द्रस्य† चोत्थानं भक्ष्यभोज्यसमन्वितम् ।

---

* अथार्चयित्वेति साधु । † महेन्द्रस्य अथवा महदिति उत्थानविशेषणं, ततः महदिन्द्रस्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कृत्वा तुष्टिकरान्साचा*दिन्द्रेण सह सङ्गथा ।
इन्द्रस्य वर्षतोऽत्यन्तं तासां पीड़ाकरञ्जलम् ।
तासाङ्गवां रक्षणाय धृतो गिरिवरस्तदा ॥ २२।२३ ।
सोऽन्नकूट इति ख्यातः सर्व्वतः शक्रपूजितः ।
देवा देव्यस्तथा गावो ऋषिभिश्च समन्विताः ।
पूजितास्तर्पिताः श्रेष्ठाः श्रमतो विष्णुना पुरा ।
तस्मिन् स्थाने तर्पणेन शतक्रतुफलं लभेत् ॥ २४।२५ ।
ततः कदम्बखण्डाख्यं कुण्डन्तु विमलोदकम् ।
स्नात्वा पितॄन् समभ्यर्च्य ब्रह्मलोकमवाप्नुयात् ॥ २६ ।
ततो गच्छेद्देवगिरिं शतबाहुसमुच्छ्रितम् ।
यत्र स्नानाद्दर्शनाच्च वाजपेयफलं लभेत् ॥ २७ ।
महादेवं ततो दृष्ट्वा गत्वा ध्यात्वा फलं लभेत् ।
कुण्डे स्नात्वा पितॄंस्तर्प्य† कृतकृत्यो दिवं व्रजेत् ॥ २८ ।
गङ्गायाश्चोत्तरं यावद्देवदेवस्य चक्रिणः ।
अरिष्टेन समं यत्र महद्युद्धं प्रवर्त्तितम् ॥ २९ ।
घातयित्वा ततश्चेममरिष्टं वृषरूपिणम् ।
कोपेन पार्ष्णिघातेन मह्यां तीर्थं प्रवर्त्तितम् ॥ ३० ।
वृषभस्य वधाज्जेयं तीर्थं सुमहदद्भुतम् ।
स्नातस्तत्र तदा कृष्णो वृषं हत्वा महासुरम् ॥ ३१ ।
वृषहत्यासमायुक्तः कृष्णश्चिन्तान्वितोऽभवत् ।

---

* तुष्टिकरात्साच्चादिति (ग) । † तपयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वृषोहतोमया चायमरिष्टः पापपूरुषः॥ ३२।
तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारणम्।
स्वनाम्ना विदितं कुण्डं कृतं तीर्थमदूरतः॥ ३३।
राधाकुण्डमिति ख्यातं सर्व्वपापहरं शुभम्।
अरिष्टराधाकुण्डाभ्यां स्नानात्फलमवाप्नुयात्।
राजसूयाश्वमेधानां नात्र कार्य्या विचारणा।
गोहत्याब्रह्महत्यायाः* पापं क्षिप्रं विनश्यति॥ ३४।३५।
तीर्थं हि मोक्षराजाख्यं नृणां मुक्तिप्रदायकम्।
यस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते॥ ३५।
इन्द्रध्वजोच्छ्रयं यत्र पूर्व्वस्यां दिशि वै कृतम्†।
इन्द्रध्वजमिति ख्यातं तीर्थञ्चैवातिमुक्तिदम्‡।
तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥ ३६।
ततो हरौ निवेद्याशु यात्राफलमनुत्तमम्।
चक्रतीर्थे नरः स्नात्वा पञ्चतीर्थाख्यकुण्डके।
समाप्य तीर्थयात्राञ्च रात्रौ जागरणं तथा।
गोवर्द्धने च कर्त्तव्यं महापातकनाशनम्॥॥ ३७।३८।
एकादश्यां तदा रात्रौ कृत्वा जागरणं शुभम्।
द्वादश्यामुषसि स्नात्वा पिण्डं निर्वाप्य शक्तितः।
पितॄणां मुक्तिदं तेषां य एवं कुरुते नरः।

---

* गोहत्याब्रह्महत्ययोरिति साधु। एवं कृते तु छन्दोदोषः। † इन्द्रध्वजोच्छ्रयः कृत इति साधु। इन्द्रवज्रोच्चयमिति (क), (ख)। ‡ अथ मुक्तिदमिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ३९।४० ।
एतत्ते कथितं भद्रे अन्नकूटपरिक्रमम् ।
यथानुक्रमयोगेन तथाषाढ़ेऽपि चोच्यते ॥ ४१ ।
य एतच्छृणुयाद्भक्त्या तीर्थानुक्रमणं हरेः ।
गोवर्द्धनस्य माहात्म्यं गङ्गास्नानफलं भवेत् ॥ ४२ ।

इति वराहपुराणे गोवर्द्धनमाहात्म्ये अन्नकूटपरिक्रमप्रभावो नाम
चतुःषष्ट्यधिकशततमोऽध्यायः ।

पञ्चषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

अतः परं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा वृत्तं प्रतिष्ठाने दक्षिणापथमण्डले ॥ १ ।
सुशीलो नाम वैश्यस्तु तस्मिन्वसति पत्तने ।
धनधान्यसमृद्धस्तु बहुपुत्रः कुटुम्बवान् ॥ २ ।
कुटुम्बभरणासक्तो नित्यकालं हि तिष्ठति ।
स्नानं दानं जपं होमं देवार्च्चां न करोति सः ॥ ३ ।
क्रयविक्रयसक्तस्य कालो दीर्घो गतस्तदा ।
कदाचिदपि पापोऽसौ न साधु गमनं गतः ॥ ४ ।
न तेन धर्म्मश्रवणं कदाचिदपि संश्रुतम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

देवानां ब्राह्मणानाञ्च भक्तिस्तस्य न विद्यते ॥ ५ ।
आत्मोदरनिमित्तं हि पापञ्च कुरुते सदा ।
गच्छन्तं बहुकालञ्च न तं बुध्यति पापकृत् ॥ ६ ।
न तस्य जायते बुद्धिर्दानं दातुं कदाचन ।
तस्यैवं वसतस्तत्र प्रतिष्ठाने पुरोत्तमे ॥ ७ ।
धनयुक्तोऽपि पापीऽसौ न ददाति कदाचन ।
नैवान्यमतिदातारं शक्नोति च निरीक्षितुम् ॥ ८ ।
स तु कालेन महता कुटुम्बासक्तमानसः ।
कदाचिद्दैवयोगेन साध्वीं भार्य्यां प्रियान् सुतान् ।
त्यक्त्वा जगाम निधनं प्रेतत्वं समुपागतः ॥ ९ ।
निरुदकेषु देशेषु विच्छायेषु वनेषु च ।
परिभ्रमन् क्षुधाविष्टो मरुदेशं गतोऽपि सः ॥ १० ।
तत्रैव च कृतावासो बहुकालं स वै बणिक् ।
कदाचिद्दैवयोगेन तत्र सार्थ उपागतः ॥ ११ ।
तस्य मध्ये तु बणिजो मथुरायां विःनिसृताः ।
गते सार्थे तु स बणिक्तं वृत्तं समुपाश्रितः ॥ १२ ।
तत्रैव वसति प्रेतो रौद्ररूपो भयानकः ।
दीर्घदंष्ट्रः सुविकटो ह्रस्वबाहुर्विभीषणः ।
महाहनुर्विशालाक्षो विड़ालसदृशाननः ॥ १३ ।
अथ कालेन बहुना दैवयोगेन भामिनि ।
तत्राजगाम कश्चित्तु क्रयविक्रयकारकः ॥ १४ ।
तं दृष्ट्वा दूरतः प्रेतः अतिहर्षेण संयुतः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्राजगाम नृत्यन्स इदं वचनमब्रवीत् ।
भक्ष्यभूतो ममाद्य त्वं क्व भवन् यातुमिच्छति ॥ १५ ।
प्रेतस्य वचनं श्रुत्वा सोऽतिभीतो द्रुतङ्गतः ।
गच्छन्तं तं गृहीत्वा सः प्रेतो वचनमब्रवीत्* ॥ १६ ।
मम त्वं विहितो भक्ष्यः स्वयम्प्राप्तोऽसि मानव ।
मांसन्ते भक्षयिष्यामि पिबामि तव शोणितम् ॥ १७ ।
इत्याकर्ण्य वचस्तस्य स वणिग्वाक्यमब्रवीत् ।
कुटुम्बभरणार्थाय सम्प्राप्तो दुर्गमाटवीम् ॥ १८ ।
वृद्धः पिता मम गृहे माता पत्नी पतिव्रता ।
मयि सम्भक्षिते रक्षः कुटुम्बं हि मरिष्यति ॥ १९ ।
ततो वचनमाकर्ण्य प्रेतो वचनमब्रवीत् ।
कस्मात्स्थानात्समायातः सत्यं ब्रूहि महामते ॥ २० ।

विभुरुवाच ।

गोवर्द्धनो गिरिवरो यमुना च महानदी ।
तयोर्मध्ये पुरी रम्या मथुरा लोकविश्रुता ।
तस्यां वसाम्यहं प्रेत पितृपैतामहे गृहे ॥ २१ ।
तत्र मे वसतो नित्यं यद्द्रव्यं पूर्व्वसञ्चितम् ।
तत्सर्व्वं तस्करैर्नीतं क्षीणवित्तोऽभवं तदा ॥ २२ ।
स्वल्पं वित्तं गृहीत्वाऽहं समायातो† मरुस्थलम् ।

---

* पञ्चदशश्लोकस्य परार्द्धं षोड़शश्लोकश्च (ग) पुस्तके न स्तः ।　　† सम्प्राप्त इति (क), (ख), तत्र छन्दोभङ्गः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तव दृष्टिपथं यातो यत्कार्य्यं तत्कुरुष्व मे* ॥ २३ ।

प्रेत उवाच ।

न त्वां खादितुमिच्छामि कृपा मे जायते त्वयि ।
समयेन हि मोक्ष्यामि कुरुष्व वचनं मम ॥ ॥ २४ ।
निवृत्य गच्छ मथुरां मम कार्य्यार्थसाधकः ।
तत्र गत्वा त्वया कार्य्यं यत्कर्त्तव्यं वदामि तत् ॥ २५ ।
स्नानङ्कृत्वा तु विधिवत्कूपे चातुःसमुद्रिके ।
पिण्डदानं कुरुष्व त्वं मम नाम्ना प्रयत्नतः ।
स्नानस्य च फलं देहि ततो गच्छ यथासुखम् ॥ २६ ।
प्रेतवाक्यं ततः श्रुत्वा विभुर्वचनमब्रवीत् ।
नाहं यास्यामि मथुरां द्रव्याभावे कथञ्चन ।
भक्षयस्व शरीरं मे ततस्तृप्तिमवाप्स्यसि ॥ २७ ।

प्रेत उवाच ।

गृहे बहुधनं तेऽस्ति त्वं गच्छ मम सत्कुरु† ।
अस्ति धनमपर्य्याप्तं गच्छ त्वं मा विलम्बय ॥ ॥ २८ ।

विभुरुवाच ।

गृहे मम धनं नास्ति यत्त्वया समुदीरितम् ।
गृहशेषं मम धनं न चान्यत्तत्र विद्यते ।
पितृपैतामही कीर्त्तिरविक्रेया हि सा मया ॥ २९ ।

---

* कुरुष्व भो इति (ग) । † तत्त्वं गच्छ मम सत्कुरु इति (ग), पाठेऽस्मिन्नेकाक्षराधिक्यात् छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रेतः प्रहस्य सानन्दमिदं वचनमब्रवीत् ।
अस्ति चैव धनम्प्रोक्तं यन्मया त्वद्गृहे विभो ।
सुवर्णभारो गर्त्तस्थो गृहे तिष्ठति सञ्चितः ॥ ३० ।
निवर्त्त* गच्छ सन्तुष्टः सुहृदां प्रीतिवर्द्धनः ।
एवं द्रक्ष्यामि† ते मार्गं मथुरा येन गम्यते ॥ ३१ ।

सूत उवाच‡ ।

वणिग्हृष्टमना भूत्वा पुनर्वचनमब्रवीत् ।
इमामवस्थां सम्प्राप्य कथं ज्ञानसमुद्भवः ।
ततः स कथयामास यद्वृत्तं हि पुरातनम् ॥ ३२ ।
प्रतिष्ठाने पुरवरे विष्णोरायतनं महत् ।
प्रभातसमये तत्र विष्णोरायतने शुभे ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र समागताः ॥ ३३ ।
वाचकः पठते तत्र कथां पौराणिकीं शुभाम् ।
मम मित्रञ्च तत्रैव नित्यकालञ्च गच्छति ॥ ३४ ।
तस्मिन् काले तु मित्रेण नीतोऽहं विष्णुमन्दिरम् ।
अत्यादरेण महता सन्तोष्य च पुनः पुनः ।
मित्रेण सह तत्रैव तस्य पार्श्वे व्यवस्थितः ॥ ३५ ।
श्रुतो मया ततः कूपः पुण्योऽयं पापनाशनः ।
समुद्राः किल तिष्ठन्ति चत्वारोऽत्र समागताः ॥ ३६ ।

---

* निवर्त्तस्व निवर्त्तयेति वा साधु । † दर्शयिष्यामि ते मार्गमिति चेत् साधु भवेत् ।
‡ अत्रापि वराह उवाच इति पाठः सम्यक् तस्यैव वाक्प्रसङ्गात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्य कूपस्य माहात्म्यं श्रुतं तत्र महत्फलम् ।
वाचकाय ततो दानं दत्तं सर्व्वैर्महाजनैः ॥ ३७ ।
मित्रेण प्रेरितो दाने मया मौनं समाश्रितम् ।
मित्रेण च पुनः प्रोक्तं यथाशक्त्या* प्रदीयताम् ।
तदा मित्रप्रसङ्गेन दत्तो वै स्वर्णमाषकः ॥ ३८ ।
ततः कालेन महता गतो वैवस्वतक्षयम् ।
वैवस्वतनियोगेन ततोऽहं पूर्व्वकर्म्मभिः ।
प्रेतत्वं समनुप्राप्तो दुस्तरं दुर्गमं महत् ॥ ३९ ।
न दत्तं न हुतञ्चापि तीर्थं नैवावगाहितम् ।
न तर्पितास्तु पितरः प्राप्तोऽहं प्रेततां ततः ॥ ४० ।
इत्येतत्कथितं सर्व्वं यन्मात्त्वं परिपृच्छसि ।
गच्छ त्वं सम्मुखस्तत्र यत्र सा मथुरा पुरी ॥ ४१ ।
प्रेतस्य वचनं श्रुत्वा विभुर्वचनमब्रवीत् ।
कथं धारयसे प्राणान्वृक्षमूलं समाश्रितः ॥ ४२ ।

प्रेत उवाच ।

कथितं हि मया पूर्व्वं यद्वृत्तं हि पुरातनम् ।
वाचकाय तु यद्दत्तं सुवर्णस्य च माषकम् ।
तद्दानस्य प्रभावेण नित्यं तृप्तोऽस्मि वै विभो ॥ ४३ ।
अकामेन मया दत्तन्तस्येदङ्कर्म्मणः फलम् ।
प्रेतभावङ्गतस्यापि न मे ज्ञानस्य विभ्रमः ॥ ४४ ।

---

* यथाशक्तीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततश्च स वणिक्श्रेष्ठ आगत्य मथुरां पुरीम्।
कृतं तेन च तत्सर्व्वं यथा प्रेतेन भाषितम्।
तेन कृत्येन प्रेतोऽसौ मुक्तिं प्राप्य दिवङ्गतः ॥ ४५ ।
एतत्ते कथितं भूमि माहात्म्यं मथुराभवम्।
चतुःसामुद्रिके कूपे पिण्डदाने पराङ्गतिम् ॥ ४६ ।
तीर्थे चैव गृहे वापि देवस्थानेऽपि चत्वरे।
यत्र तत्र मृता देवि मुक्तिं यान्ति न चान्यथा ॥ ४७।
अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति।
तीर्थे तु यत्कृतं पापं वज्रलेपो भविष्यति ॥ ४८ ।
मथुरायाङ्कृतं पापं तत्रैव च विनश्यति।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥ ४९ ।
कृतघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा।
मथुरां प्राप्य मनुजो मुच्यते सर्व्वकिल्विषैः ॥ ५० ।
तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान्।
तस्याधिकं भवेत्पुण्यं मथुराया निवासिनः ॥ ५१ ।
परदाररता ये च ये नरा अजितेन्द्रियाः।
मथुरावासिनः सर्व्वे ते देवा नरविग्रहाः ॥ ५२ ।
बलिभिक्षाप्रदातारस्ते मृताः क्रोधवर्ज्जिताः* ।
तीर्थस्नानरता ये च देवास्ते नरमूर्त्तयः ॥ ५३ ।
यदन्येषां सहस्रेण ब्राह्मणानां महात्मनाम्।

---

* क्रोधविवर्ज्जिता इति (क), (ख), तत्रैकाक्षराधिक्याच्छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकेन पूजितेन स्यान्माथुरेणाखिलं हि तत् ॥ ५४ ।
अन्यैवै माथुरो यत्र चतुर्वेदस्तथापरः ।
वेदैश्चतुर्भिर्न च स्यान्माथुरेण समः क्वचित् ॥ ५५ ।
भवन्ति सर्व्वतीर्थानि पुण्यान्यायतनानि च ।
मङ्गलानि च सर्व्वाणि यत्र तिष्ठन्ति माथुराः ॥ ५६ ।
चतुर्वेदं परित्यज्य माथुरं पूजयेत्सदा ।
सिद्धा भूतगणाः सर्व्वे ये च देवगणा भुवि ।
मथुरावासिनो लोकान् पश्यन्ति च* चतुर्भुजान् ।
मथुरायां ये वसन्ति विष्णुरूपा हि ते नराः ॥ ५७ ।
ज्ञानिनस्ता हि पश्यन्ति† अज्ञाः पश्यन्ति तान्न च ॥ ५८ ।

इति वराहपुराणे मथुरामाहात्म्ये कूपप्रभावे ब्राह्मणमाहात्म्यं नाम
पञ्चषष्ट्यधिकशततमोऽध्यायः ।

षट्षष्ट्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतानि तु महादेव तीर्थानि विविधानि तु* ।
असिकुण्डेति संज्ञेयं तन्मे त्वं कथय प्रभो ॥ १ ।

---

* लोकांस्ते पश्यन्तीति (ग)। † ताह्नि पश्यन्तीति सार्व्वत्रिकः पाठः, तान्हीति साधु ।

---

* त्रिविधानीति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच ।

सुमतिर्नाम राजासीद्धार्म्मिको लोकविश्रुतः ।
तीर्थयात्रानिमित्तेन स्वर्गलोकङ्गतः पुरा ॥ २ ।
गते स्वर्गन्तु नृपतौ पुत्त्रो राज्यञ्चकार ह ।
विमतिर्नाम नाम्ना च राज्ये पैतामहे स्थितः ॥ ३ ।
राज्यञ्च कुर्व्वतस्तस्य आगतो नारदस्तदा ।
विष्टरं पाद्यमर्घ्यञ्च तस्मै दत्तं यथोचितम् ॥ ४ ।
प्रतिगृह्य च तत्सर्व्वं तमुवाच स नारदः ।
पितुर्ह्यनृणतां गत्वा स पुत्त्रो धर्म्मभाग्भवेत् ॥ ५ ।
इत्युक्त्वा नारदस्तत्र तत्रैवान्तरधीयत ।
नारदे तु गते राजा पप्रच्छ स्वात्ममन्त्रिणः ॥ ६ ।
तदा किमुक्तमृषिणा नारदेन पितुः कृते ।
आनृण्यमिति यद्वाक्यं मया बुद्धं न किञ्चन ॥ ७ ।
मन्त्रिणश्च ततो ज्ञात्वा पितुर्मरणमेव च ।
तीर्थयात्रानिमित्तञ्च तस्मै राज्ञे न्यवेदयन् ॥ ८ ।
अतएवोक्तमानृण्यं नारदेन पितुस्तव ।
श्रुत्वा वाक्यं तदा राजा तीर्थयात्राञ्चकार* ह ॥ ९ ।
विमतेर्बुद्धिरुत्पन्ना गच्छामो मथुरां पुरीम् ।
चतुरो वार्षिकान्मासान्मथुरायां वसामहे† ॥ १० ।
सर्व्वाणि तत्र तीर्थानि तिष्ठन्ति विविधानि च‡ ।

---

* पितुस्तथैति (क), (ख) । † वसाम इति साधु । ‡ विविधानि चेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आगते तु नृपे तत्र तीर्थान्यूचुः परस्परम् ॥ ११ ।
युद्धं विमतिना सार्द्धं स्वयं कर्त्तुं न शक्नुमः ।
कल्पग्रामन्तु गच्छामो वराहो यत्र तिष्ठति ॥ १२ ।
गतानि तत्र तीर्थानि कल्पग्रामं वसुन्धरे ।
तत्र वाराहरूपेण स्थितोऽहञ्च यदृच्छया ।
यावन्निरीचयाम्यग्रं तावत्तिष्ठन्ति सन्निधौ ॥ १३ ।

तीर्थान्यूचुः ।

जय विष्णो जयाचिन्त्य जय देव जयाच्युत ।
जय विश्वेश कर्त्तेंश* जय देव नमोऽस्तु ते ॥ १४ ।

वराह उवाच ।

तीर्थैः स्तुतोऽहं वसुधे वचनञ्चेदमब्रवम् ।
वरं वृणुत भद्रं वो यद्वो मनसि वर्त्तते ॥ १५ ।

तीर्थान्यूचुः ।

वराह यदि देवेश अभयं दातुमर्हसि ।
विमतिना सुपापेन कृतस्त्रासः सुदारुणः ।
तन्नियच्छस्व† पापिष्ठं यदि पश्यसि नः सुखम् ॥ १६ ।

वराह उवाच ।

हिताय सर्व्वतीर्थानां हनिष्यामि महारिपुम् ।
तत्र तीर्थनियोगेन आगतोमथुरां पुरीम् ॥ १७ ।
तत्रागते तु वसुधे युद्धङ्कृत्वा तु तेन वै ।

---

* कर्त्तेंश इति आर्षं, कर्त्तीश वा कर्त्तरीशेति साधु । † नियच्छेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तदासिना तु दिव्येन स राजा बलदर्पितः ।
सूदितो हि मया देवि अस्यग्रं निहितं भुवि ॥ १८ ।
असेरग्रेण उद्धृत्य मृत्तिकां वरवर्णिनि ।
तत्र कुण्डं महद्दिव्यं देवर्षिविधिनिर्म्मितम् ।
असिकुण्डेति संज्ञा च प्राप्ता तेन वसुन्धरे ॥ १९ ।
तत्राश्चर्य्यं प्रवक्ष्यामि मनःकर्णसुखावहम् ।
पश्यन्ति मनुजाः सिद्धाः सर्व्वपापविवर्ज्जिताः ॥ २० ।
द्वादश्याञ्च चतुर्द्दश्यां श्रद्दधाना जितेन्द्रियाः ।
फलानि तस्य पश्यन्ति लभन्ते न सुनिश्चिताः* ॥ २१ ।
तस्मिन् काले ह्यहं देवि मथुरायां समागतः ।
तत्र तिष्ठाम्यहं भद्रे पश्चिमां दिशमाश्रितः ॥ २२ ।
तत्र कृत्वा च हैरण्या मूर्त्तयश्च† चतुर्विधाः ।
तीर्थे वाराहसंज्ञे तु मथुरायां व्यवस्थिताः ।
सुदृढ़ाः सुस्पृशः सुमूर्यः पश्यति स मुच्यते ॥ २३ ।
एका वराहसंज्ञा च तथा नारायणस्य च ।
वामनस्य तृतीया वै चतुर्थी राघवस्य च ॥ २४ ।
एताश्चतस्रो‡ यः पश्येत् स्नात्वा कुण्डेऽसिसंज्ञिते ।
चतुःसागरपर्य्यन्ता क्रान्ता तेन धरा ध्रुवम् ।
तीर्थानां माथुराणाञ्च सर्व्वेषां फलमश्नुते ॥ २५ ।

---

* लभन्ते तु सुनिश्चिता इति (क), (ख) । † मूर्त्तीरिति साधु । ‡ एताश्चतसृरिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र सर्व्वेषु तीर्थेषु असिकुण्डं महत्तरम्* ।
या संख्या कथिता पूर्व्वं तीर्थानां दक्षिणोत्तरे।
असिकुण्डं समारभ्य तीर्थानुक्रमणिका वरा† ॥ २६ ।
सुप्तोत्थितोऽपि द्वादश्यामसिकुण्डाप्लुतो नरः ।
मूर्त्तीः पश्यति यस्तास्तु ब्रह्मभूयाय कल्पते ।
नास्तीह पुनरावृत्तिर्भवेत्कालविपर्य्यये ॥ २७ ।

इति वराहपुराणे असिकुण्डप्रभावो नाम
षट्षष्ठ्यधिकशततमोऽध्यायः ।

सप्तषष्ठ्यधिकशततमोऽध्यायः ।

वराह उवाच ।
शृणु देवि यथा संज्ञा विश्रान्तेः कीर्त्तिता पुरा ।
राक्षसेन पुरा प्रोक्ता ब्राह्मणाय महात्मने ॥ १ ।
पृथिव्युवाच ।
किमर्थं राक्षसेनोक्ता संज्ञा विश्रान्तिसंज्ञिता ।
किमर्थं पृष्टवान्विप्रः सर्व्वङ्कथय मे प्रभो ॥ २ ।

---

* महत्तममिति साधु । † तीर्थानुक्रमणिका वरेत्यत्रैकाक्षराधिक्यम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच ।

उज्जयिन्यामभूद्विप्रः सदाचारविवर्ज्जितः ।
न स पूजयते* देवान्न स साधूनमस्यति ॥ ३ ।
पुण्यतीर्थं समासाद्य न च स्नानङ्करोति सः ।
देववेदाग्निरहितः परदाररतः सदा ॥ ४ ।
सन्ध्ये द्वे शयनस्थश्च नित्यङ्कालं स तिष्ठति ।
न स देवमनुष्यांश्च पितॄन् पूजयते सदा ॥ ५ ।
पापाचाररतो नित्यं पापसङ्गः सुदुर्म्मतिः ।
गार्हस्थ्यधर्म्ममाश्रित्य मोहितोवर्त्तते सदा ॥ ६ ।
गार्हस्थ्यं सर्व्वधर्म्माणां श्रेष्ठमुक्तं स्वयम्भुवा ।
यावन्ति† जन्तवः सर्व्वे यथा गोः सर्व्वतः स्थिताः ॥ ७ ।
यथा मातरमाश्रित्य सर्व्वे जीवन्ति जन्तवः ।
एवं गार्हस्थ्यमाश्रित्य‡ सर्व्वे जीवन्ति जन्तवः ॥ ८ ।
ततः स चौर्य्यतां प्राप्तः पापैः सह नराधमः ।
स च रात्रौ द्रवँल्लोकाँल्लब्धोऽसौ राजरक्षिभिः ।
पलायमानः स परमन्धकूपेऽपतत्तदा ॥ ९ ।
मृतोऽसौ पतितस्तत्र§ राक्षसत्वमुपागतः ।
अन्धकूपे स पतितो घोररूपोऽवसत्तदा ॥ १० ।

---

* पूजयतीति साधु । एवं परत्र † जीवन्तीति (ग) । ‡ एवं गार्हस्थ्यमाश्रित्य सर्व्वे जीवन्ति चागमा इति क्वचित्पाठः । § मृतः स पतितोऽमुत्र राक्षसत्वमुपागत- इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कदाचिदथ कार्य्येषु महान् सार्थ उपागतः।
तेषां मध्ये द्विजः कश्चिद्रक्षाङ्कृत्वा वसुन्धरे।
रक्षोघ्नेन च मन्त्रेण सर्व्वं सार्थञ्च रक्षति।
तत्रागत्य च रक्षस्तु ब्राह्मणं वाक्यमब्रवीत्॥ ११।१२।

राक्षस उवाच।

अहं दास्यामि ते विप्र यत्ते मनसि वर्त्तते।
बहुकालेन सम्प्राप्तं भोजनञ्च यथेप्सितम्॥ १३।
उत्तिष्ठ विप्र गच्छ त्वमन्यत्र शयनं कुरु।
येनाहं भक्षये सार्थं यावत्तृप्तिर्भवेन्मम॥ १४।
राक्षसस्य वचः श्रुत्वा विप्रो वचनमब्रवीत्।
एकः सार्थं प्रयातोऽहं* नोत्सृजामि कथञ्चन॥ १५।
तस्माद्राक्षस गच्छ त्वं सार्थं मम परिग्रहम्।
निरीक्षितुं न शक्तोऽसि मम मन्त्रबलेन हि॥ १६।

राक्षस उवाच।

मम भक्ष्ये हृते विप्र दोषस्तव भविष्यति।
दयां कुरु त्वं विप्रर्षे भोजनं मम दीयताम्॥ १७।
ततोऽपृच्छदसौ विप्रो राक्षसं दारुणं प्रति।
केन त्वं कर्म्मदोषेण राक्षसत्वमुपागतः॥ १८।
ततश्च कथयामास यथा वृत्तं पुरातनम्।
अनाचाराद्द्विजेतीश्च राक्षसत्वमुपागतम्॥ १९।

---

* एकसार्थमुपातोऽहं (उपेतोऽहम् ?) इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आत्मानङ्कथयामास विप्राग्रे स यथातथम् ।
तस्य दुःखेन संयुक्तो विप्रोऽसौ वाक्यमब्रवीत् ॥ २० ।

विप्र उवाच ।

मित्रत्वे वर्त्तसे रक्षस्तव दास्यामि किं वद ।
आत्मना चोपकारेण प्रियं किं करवाणि ते ॥ २१ ।

राक्षस उवाच ।

ददासि यदि तद्विप्र यन्मे मनसि वर्त्तते ।
मथुरायाञ्च यत्स्नातं कृतं विश्रान्तिसंज्ञके ।
तस्य स्नानफलं देहि येन मुक्तिं व्रजाम्यहम् ।
तस्य दुःखेन संयुक्तो विप्रो वाक्यमथाब्रवीत्* ॥ २२।२३ ।

विप्र उवाच ।

कथं जानासि रक्षस्त्वं तीर्थं विश्रान्तिसंज्ञकम् ।
कथञ्च संज्ञा तस्याभूत्तत्कथयस्व राक्षस ॥ २४ ।

राक्षस उवाच ।

पुरी उज्जयिनी नाम्ना तस्यां वासो हि मे सदा ।
कस्मिंश्चिदथ कालेन† गतोऽहं विष्णुमन्दिरम् ॥ २५ ।
तस्याग्रे तिष्ठते‡ विप्रो वाचको वेदपारगः ।
विश्रान्तितीर्थमाहात्म्यं श्रावयन् स दिने दिने ॥ २६ ।
तस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता ।

---

* एतच्चरणं (ग) पुस्तके नास्ति । † कस्मिंश्चिदथ कालेन इति सार्व्वत्रिकः पाठः, काले तु इति कृते साधु स्यात् । ‡. तिष्ठतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सा संज्ञा च श्रुता तत्र विश्रान्तिश्च मयाऽनघ ॥ २७ ।
वासुदेवो महाबाहुर्जगत्स्वामी जनार्द्दनः ।
विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिता* ॥ २८ ।
राक्षसस्य† वचः श्रुत्वा विप्रो वचनमब्रवीत् ।
एकस्नानस्य हि फलं तव दत्तञ्च राक्षस ।
विप्रे इत्युक्तमात्रे च मोक्षवासमवाप सः‡ ॥ २९ ।

इति वराहपुराणे विश्रान्तिमाहात्म्यं नाम

सप्तषष्ट्यधिकशततमोऽध्यायः ।

अष्टषष्ट्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

मथुरां रक्षते* कोऽसौ क्षेत्रपालोव्यवस्थितः ।
तेन दृष्टेन यत्पुण्यं कथयस्वाखिलं प्रभो ॥ १ ।

वराह उवाच ।

दृष्ट्वा भूतपतिं देवं वरदं पापनाशनम् ।
तस्य दर्शनमात्रेण मथुरायां फलं भवेत्† ॥ २ ।

---

* संज्ञका इति (ग) । † एकं स्नानस्येति (ग) । ‡ इत्युक्तमात्रे च वनै ततो मोक्षमवाप स इति (ग) ।

---

* रक्षतीति साधु । † लभेदिति (ग), तच्च आर्षं लभेतेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुरा वर्षसहस्रन्तु तपस्तप्तं सुदारुणम् ।
पूर्णे वर्षसहस्रे तु मया सन्तोषितो हरः ।
वरं वरय भद्रन्ते यस्ते मनसि वर्त्तते ॥ ३ ।

ईश्वर उवाच ।

सर्व्वगस्त्वं हि देवेश मया ज्ञातं सुनिश्चितम् ।
मथुरायाञ्च मे स्थानं सदा देव प्रदीयताम् ॥ ४ ।
देवदेववचः श्रुत्वा हरिर्वचनमब्रवीत् ।
मथुरायाञ्च देव त्वं क्षेत्रपालोभविष्यसि ॥ ५ ।
त्वयि दृष्टे महादेव मम क्षेत्रफलं भवेत्* ।
अन्यथा नाप्नुयात्सिद्धिमेवमेतन्न संशयः ॥ ६ ।
येन यद्यादृशं पुण्यङ्कृतं तीर्थे प्रयत्नतः ।
भजते मनुजः सिद्धिमात्मभावेन तादृशीम् ॥ ७ ।
मम क्षेत्रप्रवेशे च भूमिः संसारनाशिनी ।
इन्द्रस्येव पुरी रम्या यथा नाकेऽमरावती ।
जम्बूद्वीपे तथोत्कृष्टा मथुरा मम वल्लभा ॥ ८ ।
विंशतिर्योजनानां हि माथुरं मम मण्डलम् ।
पदे पदेऽश्वमेधानां फलं नात्र विचारणा ॥ ९ ।
न मया कथितं देवि ब्रह्मणश्च महात्मनः ।
रुद्रस्य न मया पूर्व्वं कथितञ्च वसुन्धरे ।
मया सुगोपितं पूर्व्वं गुह्याद्गुह्यतरं परम् ॥ १० ।

---

* लभेदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अत्र क्षेत्रे पुरी रम्या सर्व्वरत्नविभूषिता।
तस्यां तिष्ठन्ति तीर्थानि तानि वक्ष्यामि तच्छृणु॥ ११।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च।
तीर्थसंख्या च वसुधे मथुरायां मयोदिता॥ १२।
गोवर्द्धनं तथाक्रूरं द्वे कोटी दक्षिणोत्तरे।
प्रस्कन्दनञ्च भाण्डीरं कुरुक्षेत्रसमानि षट्॥ १३।
पुण्यात्पुण्यतरं श्रेष्ठमेतद्विश्रान्तिसंज्ञकम्।
असिकुण्डं सवैकुण्ठं कोटितीर्थोत्तमं स्मृतम्॥ १४।
अविमुक्तं सोमतीर्थं यमनन्तिन्दुकं ततः*।
चक्रतीर्थं तथाक्रूरं द्वादशादित्यसंज्ञितम्॥ १५।
एतत्पुण्यं पवित्रञ्च महापातकनाशनम्।
कुरुक्षेत्राच्छतगुणं मथुरायां न संशयः॥ १६।
ये पठन्ति महाभागाः शृण्वन्ति च समाहिताः।
मथुरायास्तु माहात्म्यं ते यान्ति परमम्पदम्।
कुलानि ते तारयन्ति द्वे शते विंशयोर्द्वयोः॥ १७।
एतन्मरणकाले तु यः स्मरेत्प्रयतो नरः।
स गच्छेत्परमां सिद्धिमिह संसारनाशिनीम्॥ १८।
एतत्ते कथितं देवि सर्व्वपातकनाशनम्।
तीर्थानाञ्चैव माहात्म्यं किमन्यच्छ्रोतुमिच्छसि॥ १९।

इति वराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये
अष्टषष्ट्यधिकशततमोऽध्यायः।

---

* तेन्दुकं तत इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऊनसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

मथुरायाः परक्षेत्रं त्रैलोक्ये न च विद्यते ।
तस्यां वसाम्यहं देवि मथुरायाञ्च सर्व्वदा ॥ १ ।
सर्व्वेषामेव तीर्थानां मथुरा च परं महत् ।
कृष्णेन क्रीड़ितं तत्र तच्छुद्धं हि पदे पदे ॥ २ ।
चक्रस्थितं हि तत्सर्व्वङ्कृष्णस्यैव पदेन तु ।
तत्र मध्यन्तु तत्स्थानमर्द्धचन्द्रे प्रतिष्ठितम् ।
तत्रैव वासिनो लोका मुक्तिं यान्ति न संशयः ॥ ३ ।
कृष्णस्य दक्षिणा कोटिरुत्तरा कोटिमध्यतः* ।
तयोर्मध्ये स्थितो देव आकारात्† सोमचक्रता ॥ ४ ।
तौ देवौ क्षेत्रफलदौ स्नानदानादिकर्म्मणि ।
तस्माद्धि मरणञ्चात्र द्वे कोटी सर्व्वकर्म्मसु ॥ ५ ।
अर्द्धचन्द्रे तु यः स्नानङ्करोति नियतात्मनः ।
तेन वै चाक्षया लोकाः प्राप्ताश्चैव न संशयः ॥ ६ ।
दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ।
यज्ञोपवीतमात्रेण त्रायन्ते च कुलम्बहु ॥ ७ ।

पृथिव्युवाच ।

यज्ञोपवीतमात्राया विधानं कीदृशम्प्रभो ।

---

* उत्तराकोटिर्मध्यत इत्येवं साधु । † आकारः सोमचक्रतेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथा मानं हि कर्त्तव्यं तत्सर्व्वं वक्तुमर्हसि ॥ ८ ।

वराह उवाच ।

यज्ञोपवीतस्य विधिं शृणुष्व* वरवर्णिनि ।
दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ॥ ९ ।
यज्ञोपवीतस्य विधिरेष एव प्रकीर्त्तितः ।
मनुजा येन विधिना मुक्तिं यान्ति न संशयः ॥ १० ।
अनेन विधिना चैव उत्तरस्यां समापयेत् ।
गृहान्निःसृत्य मौनेन यावत्स्नानं समाचरेत् ॥ ११ ।
पूजां कृष्णस्य कृत्वा वै ततो ब्रूयाद्वसुन्धरे ।
स्नाने समाप्ते विधिवद्देवदेवस्य चैव ह ॥ १२ ।
कृष्णस्य कृत्वा तु मखं स्नानादीनि यथाक्रमम् ।
गां वै पयस्विनीं दत्त्वा हिरण्यं वसुमेव च† ॥ १३ ।
ब्राह्मणान् भोजयेत्पश्चाद्विधिरेष उदाहृतः ।
तथा शयनमुद्दिश्य एवमेवन्तु कारयेत् ॥ १४ ।
न तस्य पुनरावृत्तिर्मम लोके महीयते ।
अर्द्धचन्द्रे मृता देवि मम लोकं व्रजन्ति ते ॥ १५ ।
अन्यत्र तु मृता ये च अर्द्धचन्द्रकृतक्रियाः‡ ।
तेऽपि स्वर्गङ्गमिष्यन्ति दाहादिकरणैर्युताः ॥ १६ ।
यावदस्थीन्यर्द्धचन्द्रं यस्य तिष्ठन्ति देहिनः ।
तावत्सुपुण्यकर्त्ता च स्वर्गलोके महीयते ॥ १७ ।

---

* शृणु इति साधु । † वसु एव चेति साधु । ‡ अर्द्धचन्द्राकृते क्रिया इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अर्द्धचन्द्रे विशेषोऽस्ति तीर्थे विश्रान्तिसंज्ञके ।
दाहादिकरणे तत्र गर्दभोऽपि चतुर्भुजः ॥ १८ ।
गर्त्तेश्वरोऽथ भूतेशो द्वे कोटी तु वसुन्धरे ।
मध्ये सदैव तिष्ठामि न त्यजामि कदाचन ॥ १९ ।
माथुराणाञ्च यद्रूपं तद्रूपं मे वसुन्धरे ।
माथुरेण तु रूपेण रूपोऽहं नात्र संशयः ॥ २० ।
शृणु देवि यथा वृत्तं गरुड़स्य महात्मनः ।
मथुरामागतो योऽसौ कृष्णदर्शनकाङ्क्षया ।
मथुरायां स्थितं देवं भिन्नरूपं न पश्यति ॥ २१ ।
तदा गतोऽसौ वसुधे देवस्याग्रे विहङ्गमः ।
कृष्णस्य दर्शनार्थाय दिव्यं स्तोत्रमुदीरयन् ॥ २२ ।

गरुड़ उवाच ।

विश्वरूप जयादित्य जय विष्णो जयाच्युत ।
जय केशव ईशान जय कृष्ण नमोऽस्तु ते ॥ २३ ।
जय मूर्त्त जयाचिन्त्य जय लोमविभूषण ।
इत्येवं संस्तुतो देवो गरुड़ेन महात्मना ॥ २४ ।
गरुड़स्य पुरस्तत्र स्थितो देवः शरीरवान् ।
सान्त्वयामास गरुड़ं प्रीतिपूर्व्वमुवाच ह ॥ २५ ।
किं कुर्य्यात्स्तोत्रमेतन्मे किं वा तव चिकीर्षितम् ।
मथुरागमकृत्ये ते सर्व्वं ब्रूहि ममाग्रतः ॥ २६ ।

गरुड़ उवाच ।

मथुरामागतश्चाहं तव दर्शनकाङ्क्षया ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आगते तु मया देव न दृष्टं तव रूपकम् ॥ २७ ।
माथुरैरेव लोकैस्तु समं दृष्टं हि रूपकम् ।
एकीभूतमहं सर्व्वं दृष्ट्वा मां मोह आविशत् ।
तस्मात् स्तुतिस्तु देवेश कृतानुग्रहकाम्यया ॥ २८ ।
गरुड़स्य वचः श्रुत्वा प्रहस्य मधुसूदनः ।
उवाच श्लक्ष्णया वाचा गरुड़ं प्रति भाविनि* ॥ २९ ।

कृष्ण उवाच ।

माथुराणाञ्च यद्रूपं तद्रूपं मे विहङ्गम ।
ये पापास्ते न पश्यन्ति मद्रूपा माथुरा द्विजाः ॥ ३० ।
एवमुक्त्वा ततः कृष्णस्तत्रैवान्तरधीयत ।
गरुड़ोऽपि ततः स्थानाद्गतो देवि यथासुखम् ॥ ३१ ।
एतत्ते कथितं देवि माथुराणान्तु रूपकम् ।
येषां पूजितमात्रेण तुष्टोऽहञ्चैव सर्व्वदा ॥ ३२ ।
मथुरायां मृता ये च मुक्तिं यान्ति न चान्यथा ।
अपि कीटः पतङ्गो वा तिर्य्यग्योनिं गतोऽपि वा ।
चतुर्भुजास्तु ते सर्व्वे भवन्तीति विनिश्चितम् ॥ ३३ ।
यः पश्येत्पद्मनाभन्तु द्वादश्यामाश्विनस्य तु ।
एकदेहधरौ देवौ शिवकेशवरूपिणौ ।
एकादश्याञ्चोपवासी कृतशौचः समाहितः ।
कालिन्द्यान्तु नरः स्नातो मुच्यते योनिसङ्कटात् ॥ ३४।३५ ।

---

* भामिनीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चैत्रस्य शुक्लद्वादश्यामुपोष्य स्नानमाचरेत् ।
चिन्ताविष्णुं समभ्यर्च्य कृत्वा वै जागरं निशि ।
यः करोति स मुच्येत नात्र कार्य्या विचारणा ॥ ३६ ।
एकां संशान्ततो* देवीं यशोदां दैवकीं तथा ।
महाविद्येश्वरीं देवि† मुच्यते ब्रह्महत्यया ॥ ३७ ।
या धारा धर्म्मराजस्य मथुरायाश्च पश्चिमे ।
स्नानङ्करोति तस्यान्तु ग्रहदोषैर्न लिप्यते ॥ ३८ ।
यं यं देवमभिध्यायेद्भक्तियुक्तेन चेतसा ।
विश्रान्तिसंज्ञकं दृष्ट्वा दीर्घविष्णुञ्च केशवम् ।
सर्व्वेषां दर्शनं पुण्यं पूजनात्तु फलं भवेत् ॥ ३९ ।

इति जपविधिहोमध्यानकाले स सम्यक्
सततमभिसमीक्ष्य‡ ब्रह्मणा यत्प्रयुक्तम् ।
सकलगुणगणानामास्पदं ब्रह्मसंज्ञं
जननमरणहीनं विष्णुमेवाभियाति§ ॥ ४० ।

इति वराहपुराणे प्रागितिहासे मथुरामाहात्म्ये
ऊनसप्तत्यधिकशततमोऽध्यायः ।

---

* एकां नंशां तती देवीमिति (ग) । अत्र एकां पश्यन्तती देवीमिति पाठः सम्भाव्यते, तथा कृत एवार्थसङ्गतिर्भवति । † देवीमिति (ग) । ‡ अतिसमीक्ष्येति (ग) । § अभियान्तीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यप्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मथुरायां पुरा वृत्तं गोकर्णस्य महात्मनः ।
वसुकर्णः पिता तस्य वैश्यो धनसमृद्धिमान् ॥ १ ।
तस्य भार्य्या सुशीला तु नाम्ना गुणसमन्विता ।
भर्त्तुः प्रियकरी साध्वी न प्रसूता वयोऽधिका ।
विललाप च सुश्रोणी एकान्ते दीनमानसा ।
सरस्वतीसङ्गमेऽथ स्त्रियो दृष्ट्वा प्रजावतीः ॥ २।३ ।
वृक्षमूले तु तत्रैव मुनिरेकः समास्थितः ।
तस्या विलपितं श्रुत्वा शनैः सकरुणं हृदि ।
जातहार्द्दः प्रियं द्रष्टं* शनैः स्त्रियमथाब्रवीत् ।
का त्वं कस्यासि सुभगे किमर्थं रोदिषि स्वयम् ॥ ४।५ ।
इति तस्य वचः श्रुत्वा सा स्त्री ऋषिमथाब्रवीत् ।
सापत्यास्तु स्त्रियो दृष्ट्वा क्रीड़न्त्यो बालकैः सह ।
मम तन्नास्ति हि मुने दुर्भगायाः प्रजासुखम् ॥ ६ ।
उवाच मुनिशार्द्दूलस्तां स्त्रियं पुत्त्रगर्द्धिनीम् ।
देवतायाः प्रसादेन तव पुत्त्रो भविष्यति ॥ ७ ।
शिवस्यायतनं पुण्यङ्गोकर्णेति† च विश्रुतम् ।

---

* प्रियं द्रष्टुमिति (क), (ख) ।   † गोकर्णमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तमाराधय देवेशं पत्या सह यशस्विनि ।
स्नानदीपोपहारेण स्तोत्रैर्नानाविधैर्जपैः ॥ ८ ।
इत्युक्ता सा च सुश्रोणी प्रणिपत्य प्रसाद्य तम् ।
भर्त्रे सा कथयामास यदुक्तं मुनिना प्रियम् ॥ ९ ।
स तद्वचनमाकर्ण्य प्रीतियुक्तं सुसंयतम् ।
जगादोच्चैः प्रियां देवि भद्रं जातो मनोरथः ।
ममाप्येतन्मतं देवि यदुक्तमृषिणा ततः ॥ १० ।
इति प्रियां समाभाष्य प्रियया च तथाऽकरोत् ।
सरस्वत्याः सङ्गमे तौ स्नात्वा गोकर्णमर्चतुः* ।
पुष्पदीपोपहारन्तु चक्राते तौ दिने दिने ॥ ११ ।
एवं तयोर्दशाव्दानि† गतानि सुतहेतवे ।
ततः प्रसन्नोभगवानुमापतिरुवाच ह ।
भविष्यति युवां‡ पुत्त्रो रूपवान् गुणसंयुतः ॥ १२ ।
शश्वसन्ततिवृद्ध्यः सन्तानो यस्य वै बहुः ।
देवतानां प्रसादेन खलु तस्य भविष्यति ॥ १३ ।
इत्युक्तौ तौ तु देवेन स्नानङ्कृत्वा सरस्वतीम् ।
प्रभाते देवदेवाय ददौ द्रव्यमनन्तकम् ।
ब्राह्मणेभ्यो ददौ भोज्यं वस्त्राद्यं बहुदक्षिणम् ॥ १४ ।
ततस्तस्यां सुशीलायाङ्गर्भाधानमविन्दत ।
ततः प्रववृधे गर्भः शुक्लपक्षे यथा शशी ।

---

* आनर्चतुरिति साधु । † संवत्सरो वत्सरोऽब्दो हायनोऽस्त्रीति अनुशासनात् अब्दानीति क्लीवत्वमार्षम् । ‡ युवामिति आर्षं, युवयोर्वां इति वा साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सुषुवे दशमे मासि पुत्रम्बालशशिप्रभम् ॥ १५ ।
गोसहस्रं तदा दत्त्वा ससुवर्णं सवस्त्रकम् ।
बहुशः सर्व्ववर्णेभ्यः पुत्रजन्ममहोत्सवे ।
जातकर्म्म तथा चैव नामकर्म्म चकार च ।
गोकर्णं नाम तस्यैव पिता चक्रे निरूप्य च ॥ १६।१७ ।
एवमन्नप्राशनञ्च चूड़ोपनयनं तथा ।
अतः परञ्च गोदानं वैवाहिकमनुत्तमम् ॥ १८ ।
दानन्तु ददतस्तस्य देवतां पूजयिष्यतः ।
कृतानि बहुमुख्यानि मङ्गलानि यथाविधि ॥ १९ ।
ततः प्रविष्टे तारुण्ये अप्रजं वीक्ष्य पुत्रकम् ।
पुनर्व्विवाहयामास भार्यास्तस्य चतुष्टयम्* ॥ २० ।
वयोरूपगुणोपेतास्तस्य भार्य्याः† सुलोचनाः ।
अप्रजा एव ताः सर्व्वा नाभवत्पुत्रिणी क्वचित् ॥ २१ ।
तेनैव धर्म्म आरब्धः प्रजार्थो‡ देवसेवनम् ।
वापीकूपतड़ागानि देवतायतनानि च ।
प्रपा मालाश्च§ नित्यान्नं भोजनं वर्त्तनानि च ॥ २२ ।
अनित्यतां ततो मत्वा चञ्चलाऽस्थिरजीवितम् ।
विनियोगः कृतस्तेन सर्व्वदा सर्व्वकर्म्मसु ॥ २३ ।
गोकर्णस्य समीपे तु पश्चिमे चक्रपाणिनः ।

---

* चतुष्टयीरिति साधु । † सत्यो भार्य्या इति (क), (ख) । ‡ प्रजार्थमिति (ग) ।
§ प्रपा मताश्चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रासादङ्कारयामास पञ्चायतनकं हरेः ॥ २४ ।
आरामस्तत्र विस्तीर्णः पुष्पजात्यस्तथैव च ।
आम्रजम्बीरनारङ्गं वीजपूरः सदाड़िमः ॥ २५ ।
प्राकारङ्कारयामास परिखामण्डलीयकम्* ।
प्रावर्त्तनञ्च कूपेषु येन सिञ्चेत्प्रवाटिकाम् ॥ २६ ।
पुष्पाणि च विचिन्वन्ति सर्व्वास्ता वरयोषितः ।
स्नानं पूजादिकं तदन्मार्ज्जनं दीपकर्म्म च ।
कुर्व्वन्ति देवतागारे ताः सर्वाः शुभलोचनाः ॥ २७ ।
पतिव्रता महाभागाश्चतुरो भगिनीर्यथा ।
नित्यकालं पतेर्वाक्ये† स्थिताः कुर्व्वन्त्यहर्निशम् ॥ २८ ।
मालाकारस्तथा नित्यं विटपांश्च प्रसिञ्चति ।
पालयामास विधिवद्विधिदृष्टेन कर्म्मणा ॥ २९ ।
जाताः सुपुष्पवन्तश्च द्रुमाः फलसमन्विताः ।
नित्यकालमपर्यन्तः फलानां सुमहोत्सवम् ।
दीयते भुज्यते सर्व्वैर्यथा शक्रस्तथा सदा ॥ ३० ।
एवन्तु वसतस्तस्य मथुरायां स्थितस्य च‡ ।
धनस्य सङ्क्षयो यातः प्रत्यहं ददतः सतः ॥ ३१ ।
शेषमात्रे धने तस्य चिन्ताभून्महती तदा ।
मातापित्रोः कुटुम्बस्य भरणीयस्य भोजनम् ।

---

* परिखाः मण्डलीयकमिति (ग) । † पत्युर्वाक्ये इति साधु । ‡ स्थितस्य तु इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कथं ब्रूहि करिष्यामि महाकष्टमिति सोऽब्रवीत्* ॥ ३२ ।
इति निश्चित्य मनसा बणिग्भावं† हृदि स्थिरम् ।
कृत्वा सार्थमुपामन्त्र्य निर्गतः पूर्व्वमण्डलम् ॥ ३३ ।
तत्र क्रीत्वा‡ सुपण्यानि उत्तरापथगानि च ।
बहूनि बहुमौल्यानि परदेशगमानि च ।
यातायातं ततः कृत्वा लाभालाभविचक्षणः ।
क्रीत्वा क्रेयानि वस्तूनि लाभालाभं विचार्य्य च ।
उत्तरापथदेशात्तु सार्थं स बहुविस्तरम् ।
अश्वरत्नं मणिरत्नं पट्टरत्नं समर्थकम् ।
गृहीत्वा तु समागच्छन्मथुरायां गृहम्प्रति ॥ ३४।३५।३६ ।
एकदा सार्थसम्भारो विश्रान्तुं समुपक्रमे§ ।
सानौ पर्व्वतसामीप्ये प्रभूतयवसोदके ।
नद्यास्तीरे सुप्रदेशे आवासांश्च प्रचक्रिरे ॥ ३७ ।
निवेश्य भाण्डं तत्रैव अश्वानां यवसादिकम् ।
समादिश्येतिकृत्यञ्च भृत्यैः कतिपयैर्वृतः ।
समारुरोह तं शैलम्बहुकन्दरशोभितम् ॥ ३८ ।
क्रीड़ार्थं विहरंस्तत्र सोऽपश्यत् स्थानमुत्तमम् ।
प्रसन्नसलिलोपेतं नारङ्गैस्तु विभूषितम् ॥ ३९ ।
फलवन्तश्च वृक्षाश्च पुष्पाणि सुरभीणि च ।

---

* महाकष्टमिति सोऽब्रवीदित्यत्राक्षराधिक्याच्छन्दोदोषः, महाकष्टमथोऽब्रवीदिति कृते तु न दोषः। † बणिग्भागमिति (ग)। ‡ कृत्वेति (क, ख)। § विश्रान्तुमुपचक्रमे इति सम्यक्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पाषाणसम्भौ तत्रस्थैर्मालाकारैस्तु रोपितम् ॥ ४० ।
तत्रारुह्य दरीद्वारं यावद्दृष्टिर्निपात्यते ।
तावदभ्यागतादीनि स्वागतादि शृणोति च ॥ ४१ ।
श्रुत्वाऽपि शब्दप्रभवं किमेतदिति निश्चयम् ।
करिष्यंस्तत्र चैकान्ते दृष्टः पञ्जरगः शुकः ॥ ४२ ।
तेनोक्तं भो इहागच्छ आतिथ्यं करवाणि ते ।
पाद्यं गृहाण भोः पान्थ आसनन्ते इदं शुभम् ॥ ४३ ।
फलानीमानि स्वादूनि मधुमांसोदकानि च ।
यथेष्टं यावतीच्छा च तावद्गृह्णन्त्विमे नराः ।
आमन्त्र्य पितरौ मह्यं* विशेषे तौ करिष्यतः ॥ ४४ ।
अतिथेरागतस्येह पूजायां विमुखो भवेत् ।
गृहस्थस्तस्य पितरो वसन्ति नरके† ध्रुवम् ।
पूजिते पूजिताः स्वर्गे मोदन्ते कालमक्षयम् ॥ ४५ ।
अतिथिर्यस्य भग्नाशो गृहात्प्रव्रजते यदि ।
आत्मनो दुष्कृतं तस्मै दत्वा तत्सुकृतं हरेत् ॥ ४६ ।
तस्मात्सर्व्वप्रयत्नेन पूज्यो वै गृहमेधिना ।
काले प्राप्तस्त्वकाले वा यथा विष्णुस्तथैव सः ॥ ४७ ।
एवंविधाः शुभा वाचो वैश्यो धर्म्मोपदेशकात् ।
श्रुत्वा शुकात्स सर्व्वाय‡ गोकर्णो मुदितोऽब्रवीत् ॥ ४८ ।

* ममेत्यत्र मह्यमित्यार्षम् । † वसन्ते नरके इति (ग), तत्र वसन्ते इति आर्षम् ।
‡ सर्व्वस्मै इति साधु । श्रुत्वा शुकात् सर्व्वार्थाश्चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कस्त्वमृषिः पुराणज्ञः किं वा देवोऽथ गुह्यकः।
तव प्रसन्नरूपस्य यस्येयं वागमानुषी।
कस्त्वं कथय मे सत्यमुत्साहश्चातिथिप्रियः॥ ४९।
धन्यः स मानुषो यस्य नित्यं सन्निहितो भवान्॥ ५०।
इत्युक्तः स शुकः सर्व्वं शशंसात्मपुराकृतम्।
शृणु रौद्रं यथा पूर्व्वं मया कृतमबुद्धिना।
शुकस्य विप्रियं यादृङ्महर्षेस्तु तपस्यतः॥ ५१।
सुमेरोरुत्तरे पार्श्वे महर्षिगणसेविते।
तपश्चचार विपुलं* शुको व्याससुतो महान्॥ ५२।
श्रोतुकामाः पुराणानि सेतिहासानि नैगमाः।
ऋषयस्तत्र आजग्मुरसितोदेवलस्तदा॥ ५३।
मार्कण्डेयो भरद्वाजो यवक्रीतस्ततो भृगुः।
अङ्गिरास्तैत्तिरीयेभ्यः काण्वो मेधातिथिः क्रतः॥ ५४।
तन्तुः सुतन्तुरादित्यो वसुमानेकतो द्वितः।
वामदेवश्चाश्वशिरास्त्रिशीर्षोगौतमोदरः॥ ५५।
अन्ये च सिद्धा देवाश्च पन्नगा गुह्यकास्तथा।
शुकं सम्मुखयामासुः पप्रच्छुर्द्धर्म्मसंहिताम्॥ ५६।
अहन्तु वामदेवस्य शिष्यो नाम्ना शुकोदरः।
भ्रष्टः श्रद्धान्वितो बाल्यात्सुनीत्यामग्रतश्चरन्।
ऊहापोहकरम्प्रश्नं वारंवारञ्च पृष्टवान्।

---

* विप्रोऽलमिति पाठः सम्भाव्यते।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्यायवादिनं माञ्च गुरुर्नित्यं निषेधति ॥ ५७।५८ ।
गुरूणामग्रतो वाक्यं कथायाङ्कथतां सह ।
पूर्व्वपक्षाश्च सिद्धान्ताः परस्परजिगीषवः ।
अन्तरे चान्तराक्षेपं पुनर्नैवमवोचथाः ॥ ५९ ।
एवं निषेधितश्चाहं गुरुणा मुनिसत्तमैः ।
न कृतं यन्मया वाक्यं तेनाहं शपितस्तदा ॥ ६० ।
शुकेन कोपाच्छापो मे दत्तोऽयं जल्पको वटुः ।
यथानामा त्वयं पक्षी शुको भवति नान्यथा ॥ ६१ ।
इत्युक्तमात्रे वचने तत्रैवाहं शुकोदरः ।
शुकत्वं तत्क्षणात्प्राप्तः क्षमस्वेत्यूचुरोजसा ।
मुनयस्तं महात्मानं शुकं तत्त्वार्थवित्तमम् ॥ ६२ ।
नान्यथा नान्यथा चोक्तं कदाचिन्न भविष्यति ।
आगामिकाले दास्यामि वरमस्मै शुकाय भो ॥ ६३ ।
युष्माकमुपरोधेन यथारूपो विहङ्गमः ।
अयं भविष्यति सदा सद्भावहितभावनः ॥ ६४ ।
पुराणतत्त्ववेत्ता च सर्व्वशास्त्रार्थपारगः ।
मथुरायां मृतः पश्चाद्ब्रह्मलोकङ्गमिष्यति ॥ ६५ ।
एवं शापं वरं गृह्य* तस्मादीनो ह्यहं द्रुतम् ।
मथुरा मथुरोच्चारं कुर्य्यान्नित्यमतन्द्रितः ॥ ६६ ।
नित्योद्विग्नस्य मे गात्रं हिमाद्रौ तु गुहां वसन् ।

---

* गृहीत्वेति साधु । एवं परत्र ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राप्तोऽहं शबरेणैवं येनाहं पञ्जरे कृतः॥ ६७।
शबरस्तु सभार्य्यो वै क्रीड़ते स मया सह।
मुनेः प्रसादान्मे ज्ञानं न जहाति कदाचन॥ ६८।
भुज्यते ह्यवशेनैव कृतं येन यथा च यत्।
स्वस्थो भव महाभाग मा स्म शोके मनः कृथाः॥ ६९।
इत्युक्तः स तु गोकर्णस्तदा तेन शुकेन च।
तस्य च वचनं हृद्यं शुकमोचप्रदायकम्॥ ७०।
या सा मुक्तिप्रदा रम्या मथुरा पापनाशिनी।
तस्यां वसाम्यहं भद्र वाणिज्यार्थमिहागतः।
पुनरिच्छामहे तत्र भाण्डं गृह्य यथासुखम्॥ ७१।
मथुरावासिनं श्रुत्वा गोकर्णं स शुकस्तदा।
पुत्त्रं संस्थाप्य चात्मानं गोकर्णस्य यथेप्सितम्॥ ७२।
एवञ्च वदतस्तस्य* शबरी शयनोत्थिता।
दर्पान्निःसृत्य तु वहिर्ददर्शासनसंस्थितम्।
भृत्यैः परिवृतं चारुदर्शनीयस्वरूपकम्†॥ ७३।
निरीच्य बहुशस्तत्र शुकोवचनमब्रवीत्।
प्रियातिथिञ्च सम्प्राप्तं मातः पूज्यतमं शुचिम्।
कुरु पूजां यथार्हञ्च गोकर्णस्य वरातिथेः॥ ७४।
शुकस्य वचनाद्यावत्पूजार्थमुपकल्पितम्।
न ददाति ततस्तत्र वनाच्छबर आगतः॥ ७५।

---

* ताभ्यामिति (ग)। † रुद्रदर्शनीयस्वरूपकमिति (क, ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्याग्रे तु पुनस्तेन शुकेनातिथिपूजनम् ।
शंसितं स तथेत्युक्त्वा कृत्वा पूजां प्रणम्य च ।
फलानि मांसयुक्तानि मधूनि सुरभीणि च ।
सम्पाद्य संविदङ्कृत्वा वद किङ्करवाणि ते ॥ ७६।७७ ।
इत्युक्तः शबरेणाथ गोकर्णो वाक्यमब्रवीत् ।
अन्यत्किञ्चिदथो देयं यदि किञ्चिद्ददासि च ।
शुकोऽयं पञ्जरस्थश्च पुत्त्रार्थं मे प्रदीयताम् ।
मथुरायां गमिष्यामि कृतार्थः पितुरन्तिके ॥ ७८।७९ ।
इत्युक्तमात्रे वचने शबरो वाक्यमब्रवीत् ।
अस्माकं यमुनास्नानं सङ्गमे यमुनाम्भसः ।
सरस्वत्याश्च पतने दत्ते दास्यामि ते शुकम् ॥ ८० ।
शबरेणैवमुक्तस्तु गोकर्णः प्रत्यभाषत ।
सरस्वत्याः सङ्गमे च यत्फलं लभते नरः ।
स्नानेन किम्फलं तस्य यदि जानासि तद्वद ॥ ८१ ।

शबर उवाच ।

शुकेनानेन मे सर्व्वं मथुरायाश्च यत्फलम् ।
यत्फलं सङ्गमस्योक्तं शृणुयाद्द्वादशीव्रतम् ॥ ८२ ।
वियोनिस्थो राचसो वा तिर्य्यग्योनिङ्गतस्य वा* ।
यस्योद्दिश्य† व्रतं कुर्य्यात्स गच्छेत्परमाङ्गतिम् ॥ ८३ ।
सङ्गमस्य फलं तस्य दृष्ट्वा गोकर्णमीश्वरम् ।

---

* तिर्य्यग्योनिं गतोऽपि वा इति सम्यक् । † य उद्दिश्य इति कृते तु पाठे अर्थ-सङ्गतिः स्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नासौ यमपुरं याति विष्णुलोकञ्च गच्छति ।
एवं मया श्रुतं तस्य सङ्गमस्य महत्फलम् ॥ ८४ ।

इति वराहपुराणे गोकर्णसरस्वतीमाहात्म्ये
सप्तत्यधिकशततमोऽध्यायः ।

एकसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

शुकं गृह्य ततः स्थानात्प्रस्थितो* मथुरां पुरीम् ।
प्रविश्य गृह्य तत्पुख्यं मातापित्रोस्तदर्पितम् ।
शुकस्य चरितं सर्व्वं निवेद्य च महामतिः ॥ १ ।
एवं निवसतस्तस्य बहुवर्षाणि तत्र वै ।
सुखम्प्राप्तं मतञ्चापि व्यवहारे च पूजने ॥ २ ।
एवं निवसतस्तस्य द्रव्यशेषमजायत ।
पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ॥ ३ ।
समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपरीक्षकैः सार्द्धमानयिष्ये बहूनि च ।
एवं निश्चित्य मनसा महासार्थपुरःसरः ।
समुद्रयायिभिर्लोकैः संविदं सूच्य† निर्गतः ॥ ४।५ ।

---

* प्रतिस्थानात् प्रस्थित इति (ग) । † सूचयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पेयाहारसमाहारङ्कृत्वा कृत्यविदार्थकम् ।
शुकं गृहीत्वा प्रस्थानमकरोत्पुण्यवासरे ॥ ६ ।
मातापित्रोः शुभा वाचो गृहीत्वा देवतागृहे ।
भार्य्याणां देवकार्य्यञ्च वाटिकायाश्च पोषणम् ।
पितुः शुश्रूषणञ्चोक्त्वा सर्व्वं यूयं करिष्यथ ॥ ७ ।
यथायोगं यथाकालं यथाकृत्यं यथा च यत् ।
भवतीभिश्च कृत्यं मे करणीयं यथा तथा ।
सन्दिश्य भार्य्याः सुश्रोणीर्देवं दृष्ट्वा प्रसाद्य च ।
भार्य्याभिः समनुज्ञातो यानपात्रङ्गतस्तदा ॥ ८।९ ।
शुकेन सह सम्प्राप्तो महान्तं लवणार्णवम् ।
पोतारूढ़ास्ततः सर्व्वे पोतवाहैरुपोहिताः* ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन नित्यशः ॥ १० ।
अथ दैववशाद्वायुर्विलोमः समजायत ।
दुर्व्वातेन तदा नित्यं बलात्पोत उपोहितः ॥ ११ ।
पोतवाहास्ततः सर्व्वे विसंज्ञा मोहिताः कृशाः ।
हा कष्टं हि कथञ्चिच्च कुत्र गच्छामहे वयम् ॥ १२ ।
तेषान्तु वचनं श्रुत्वा ज्ञात्वा दुर्व्वातपीड़नम् ।
आक्षिपद्भिरुग्राभिरन्योन्याशङ्क्य† मूर्च्छिताः ॥ १३ ।
जल्पन्ति कोऽत्र पापिष्ठः समारूढ़ोनिराकृतिः ।
तस्य पातकसंस्पर्शान्मृताः सर्व्वे न संशयः ॥ १४ ।

---

* पोतवाहैरुपोषिता इति (क), (ख) । † अन्योऽन्यमाशङ्क्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं विलपतां तेषां चत्वारोऽपि समभ्ययुः।
मासास्तत्रैव बाणिज्यं षण्मासान्सिध्यते फलम् ॥ १५ ।
निर्भर्त्सनं ततस्तेषामन्योऽन्यमभिजल्पनम्।
श्रुत्वा शुकस्य गोकर्णः प्रशंसात्मविनिन्दनम् ॥ १६ ।
अपुत्तस्य गतिर्नास्ति इति सर्व्वस्य निश्चितम्।
एषां मध्ये ह्यहं पापस्तेन तप्यामि पुत्तक ॥ १७ ।
यदत्र युक्तङ्कालेऽस्मिन्विषमे समुपस्थिते।
वद स्वाध्यायषाड्गुण्यङ्कृच्छे त्वङ्कार्य्यवित्तमः ॥ १८ ।

शुक उवाच।

मा भैस्तात जोषमास्व* अस्मिन्काले यथोचितम्।
अहङ्करिष्ये तत्सर्व्वं मा विषादे मनः कृथाः ॥ १९ ।
एवमाश्वास्य पितरं समुड्डीय ततो द्रुतम्।
ध्रुवाख्यां दिशमुद्दीच्य उत्तराभिमुखो ययौ ॥ २० ।
नीचगत्या रचयन्वै सुतरं दुस्तरं जलम्।
सानौ पर्व्वतसामीप्ये योजनेन वरङ्गिरिम् ॥ २१ ।
रोमाञ्चिततनुर्जातः शुको वीच्य महागिरिम्।
क्रमित्वोर्द्धञ्च यात्युग्रं तावद्देवालयं शुभम्।
दृष्टञ्च विष्णुायतनं तेजसा चोपशोभितम्।
दिक्षु सर्व्वास्वटित्वैवं निलिल्ये देवमन्दिरे ॥ २२।२३ ।
वत्साऽयङ्गोऽत्र सञ्चारी कदा किन्तु पिता मम।

---

* पितर्जोषमास्स्वेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वितरिष्यति नो कालं दुरन्तं सुकृतिर्यथा ॥ २४ ।
क्षणमेकं तथा चैनं तस्य चिन्तान्वितस्य हि ।
सौवर्णपात्रहस्ता च देवी देवं समर्चयत् ।
नमोनारायणायोक्त्वा निषसाद वरासने ॥ २५ ।
निमिषान्तरमात्रेण वयोरूपसमन्विताः ।
असंख्याताः समायाता यथा देवी तथैव ताः ॥ २६ ।
गीतं वाद्यञ्च नृत्यञ्च यथासौख्यं विहृत्य च ।
गतास्ता देवताः सर्व्वा यथास्थानमनुत्तमम् ॥ २७ ।
देवताद्दक्षिणे भागे पक्षिणाञ्च जटायुषाम् ।
लक्ष्यान्यनेकयूथानि वृहन्ति बहुसङ्घशः ॥ २८ ।
शुको लिख्यासमस्तेषां मध्ये कृत्वा तु संविदम् ।
स्वभाषां पुरतः कृत्य* शरणञ्च अयाचयत् ॥ २९ ।
ते समाश्वास्य तम्प्राहुः कथमस्मिन् भवान् गतः ।
वारिराशिर्दुराधर्षः समुद्रो झषसंकुलः ॥ ३० ।
शुकस्तान् प्रत्युवाचाथ पिता मे पोतसंस्थितः ।
दुर्गवाताद्दुर्गमस्थो विषमे समुपस्थिते ॥ ३१ ।
तस्य त्राणमभीप्सन्वै आगतोऽत्र वरङ्गिरिम् ।
कुरुध्वं तस्य मे त्राणं यथा सुखमवाप्यते ॥ ३२ ।

पक्षिण ऊचुः ।

एहि पुत्र सुकार्य्यन्ते मार्गं द्रक्ष्यामहे वयम् ।

---

* कृत्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पोताभ्यासगतिं यासि पितुस्तव गतिं प्रति ॥ ३३ ।
ममैव पादविन्यासे क्रमयिष्ये यथा जलम् ।
तेन ते पृष्ठतो मह्यं* स पिता सन्तरिष्यति ॥ ३४ ।
मम चञ्च्वावगाहेन नङ्क्षन्ति जलजन्तवः ।
एतत्पितुः समक्षं हि शंस क्षिप्तं नदीपतिम् ॥ ३५ ।
तरयामास वेगेन गत्वा पृष्ठं जटायुषः† ।
स ययौ पर्व्वतं तीर्त्वा क्वचिन्नाभिसमं जलम् ।
ह्लकण्ठञ्चैव गम्भीरं सुखेन सुकृती यथा ॥ ३६ ।
स्तोकान्तरे ततः सोऽथ देवागारमनुत्तमम् ।
सरोवरञ्च पद्माढ्यं मणिरत्नविभूषितम् ।
स्नात्वा देवान् पितॄंश्चैव तर्पयित्वा यथासुखम् ।
पुष्पाण्यादाय देवञ्च पूजयित्वा स केशवम् ।
पञ्चायतनकञ्चैव खचितं रत्नसञ्चयैः ।
दृष्ट्वा निलिल्ये चैकान्ते शुकस्यानुमते स्थितः ॥३७।३८।३९।
क्षणेन ता यथापूर्व्वं देवताश्चागताः पुनः ।
नर्त्तयित्वा यथायोग्यं तासां ज्येष्ठाऽब्रवीदिदम् ॥ ४० ।
स्वागतस्य क्षुधार्त्तस्य ब्रह्मेष्टस्य महात्मनः ।
भोजनार्थं फलं दिव्यं पानार्थं तोयमुत्तमम् ।
गोकर्णस्य प्रयच्छध्वं येन तृप्तिस्त्रिमासिकी ॥ ४१ ।

---

* ममस्थाने मह्यमिति आर्षम् । † अत्र कथांशस्य कापि न्यूनता प्रतीयते, ततश्च पूर्व्वापराऽसङ्गतिः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथा शोको यथा पापं यथा मोहः प्रणश्यति ।
तथा कृत्वा तमूचुस्ता अभयं तेऽस्तु मा शुचः ।
वस स्वर्गोपमे स्थाने यावत्सिद्धिर्भवेत्तव ॥ ४२ ।
गतास्ताः पुनरेवञ्च नित्यमेव दिने दिने ।
वसते स सुखं तत्र मथुरायां यथा तथा ॥ ४३ ।
पोतात्तस्मादुत्ततार सुवातेनोपवाहितः ।
रत्नाकरः शुभो यत्र भावित्वाद्दैवयोगतः ।
रत्नानि बहुमौल्यानि आहृतानि बहून्यथ ॥ ४४ ।
यावत्परीक्षणार्थञ्च गोकर्णं रत्नकोविदम्* ।
निरीक्ष्यतेऽस्य संवासो न दृष्टश्शुकश्शुस्ततः† ॥ ४५ ।
क्कतोऽसौ गतवान् भद्रो मृतो नष्टो जले प्लुतः ।
क्रीड़ायुतो निमग्नोऽयं निश्चितं मकरालये ॥ ४६ ।
पितुरस्य वयं सर्व्वे पुत्त्ववद्विचरामहे ।
यथाभागञ्च रत्नानां भागं दास्यामहे परम् ।
एष धर्म्मः सदास्माकमेकसार्थागमेन हि ॥ ४७ ।
एवं वसन् स गोकर्णो द्वीपस्थः शोकविह्वलः ।
शुकस्योवाच दीनात्मा मातापित्रोः कृते तदा ॥ ४८ ।
शुकेन मन्त्रमोहत्वात्पितुरेवं निवेदितम् ।
अहं पक्षी लघुतनुर्भवन्तं नेतुमक्षमः ।
याताऽस्मिंश्‡ मथुरां मार्गे समुद्रे जलमालिनि ॥ ४९ ।

---

* दिदृक्षुभिर्वणिग्भिरिति शेषः । † ते वणिज इति शेषः । ‡ यातोऽस्मीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पित्रोर्वाक्यं तवाख्यास्ये त्वदीयं च तयोरहम् ।
अवश्यञ्च गमिष्येऽहमनुज्ञा तु प्रदीयताम् ॥ ५० ।
सत्यमुक्तं ततस्तेन गोकर्णेन शुकम्प्रति ।
गच्छ त्वं पुत्र मथुरामवस्थां मामकीमिमाम्* ।
त्वया विना न शक्नोमि शीघ्रमागमनं कुरु ॥ ५१ ।
इत्युक्तः स तथेत्युक्त्वा पोतारूढ़ः खगोत्तमः ।
कालेन मथुराम्प्राप्तः सर्व्वं पित्रे न्यवेदयत् ॥ ५२ ।
श्रुत्वा तौ† विषमावस्थं सुतं हृदि निवेश्य च ।
रुदित्वा सुचिरङ्कालं शुके स्नेहोनिवेशितः ॥ ५३ ।
अस्माकं जीवनार्थाय त्वया कार्य्यं विहङ्गम ।
कथाभिरनुकूलाभिर्धर्म्मदर्शिभिरेव च ॥ ५४ ।
शुकेन पञ्जरस्थेन कथालापेन त्विय्या ।
पुत्रशोकाभिसन्तप्तौ तथैवानेन सान्त्वितौ ॥ ५५ ।
अथ सार्थः समायातोरत्नपूर्णो यथोदधिः ।
वसुकर्णस्य पुत्रार्थमकरोत्स जनो महान् ॥ ५६ ।
सर्व्वैस्तैर्विंशतिः संख्या‡ एकैकेन समुद्रगैः ।
रत्नैः समर्च्चितोऽत्यर्थं पर्व्वतः कुसुमोत्करैः§ ।
प्रसाद्य सर्व्वं सम्पूज्य प्रेषितास्ते गृहं ययुः ॥ ५७ ।

---

* मामकीमिमामवस्थां ताभ्यां निवेदयेत्यन्वयः कर्त्तव्यः । † तौ इत्यस्य समापक-क्रियापदं नास्ति । ताभ्यामिति कृते वाक्यार्थसङ्गतिः स्यात् किन्तु छन्दोदोषो भवेत् । ‡ विंशतिः संख्या इत्यस्य तृतीयान्ततोचिता, अनन्वयापत्तेः । § द्रुमैरिवेति शेषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं ते न्यवसंस्तत्र यावत्कालं सुखेन तु ।
शुश्रूषमाणास्तं वैश्यं यथा स्वपितरं तथा ॥ ५८ ।

इति वराहपुराणे भगवच्छास्त्रे गोकर्णमाहात्म्ये
एकसप्तत्यधिकशततमोऽध्यायः ।

द्विसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

गोकर्णस्तु तथा चक्रे* तस्मिन्नायतने शुभे ।
प्रथमेऽह्नि यथा कृत्यमेवमेव त्रयोदश ॥ १ ।
ता देव्यो नृत्यगीतेषु कुशलाश्चागमेऽभवन् ।
सुरूपाश्च स्वलङ्कारा रमयन्ति दिने दिने ॥ २ ।
गोकर्णः सर्व्वभावेन गृहं विस्मृतवानसौ ।
तथैकदा स गोकर्णस्ता देव्यश्च हृतौजसः ॥ ३ ।
विवर्णवदना दीना भग्नालङ्कारवाससः ।
हीनाङ्गा लुञ्चितशिरःकेशपक्ष्मनखादयः ॥ ४ ।
दृश्यन्ते विकृताकाराः सव्रणा रुधिरस्रवाः ।
ता दृष्ट्वाऽतीवदुःखार्त्तश्चक्रे मनसि वेदनाम् ॥ ५ ।
अपुत्रस्य गतिर्नास्ति स्वर्गे नैव च नैव च ।

---

* चचे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम सङ्गादिमा देव्यो दशमीञ्च दशाङ्गताः॥ ६।
एवं ज्ञात्वा स पप्रच्छ तासां रूपविपर्य्ययम्।
कथयध्वं महाभागाः किमेतद्रूपव्यत्ययम्॥ ७।

देव्य ऊचुः।

अप्रष्टव्यं महाभाग दैवः सर्व्वेषु कारणम्।
कालात्मकः स भगवान् भुज्यते* सुकृतं यतः॥ ८।
स एव नित्यकालञ्च पृच्छति स्म तदुत्तरम्।
दुःखार्त्तस्य सुदीनस्य न जल्पन्त्यतिदुःखिताः॥ ९।
निश्चयार्थं पुनः सोऽथ गोकर्णस्ताः प्रणम्य च।
पृच्छत्याग्रहरूपेण निश्चयं विन्दते यथा॥
यदि गोप्यं ममार्त्तस्य वैरूप्यं कथयिष्यथ† ।
अगाधे दुस्तरे प्राणांस्त्यच्यास्यद्य सुदुःखितः॥
एवमुक्ते तदा तासां मध्ये एकाऽब्रवीदिदम्।
दुःखं तस्य समाख्येयं यो विनाशयते‡ रुजम्॥ १०।
शृणु वत्स वदिष्येऽहं विरूपकारणं§ यथा।
अस्माकञ्च समुत्पन्नमेकचित्तोऽवधारय॥ ११।
आस्ते मधुपुरी रम्या नृणां मुक्तिप्रदायिनी।
अयोध्याधिपतिर्वीरश्चतुरङ्गबलान्वितः।
चातुर्मास्यं तीर्थसेवी स गतो भक्तिपूर्व्वकम्॥ १२।

---

* भुङ्क्ते इति साधु। † अत्र नेति पदस्य न्यूनता। ‡ विनाशयतीति साधु।
§ विरूपकरणमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र देवस्य चागारं विष्णोः पञ्चसमन्वितम् ।
आरामवाटिकाः शुभ्राः प्राकारावरवेष्टिताः ।
कूपप्रावर्त्तकोपेताः पुष्पजात्यः सुवासिताः ॥
फलवन्तो द्रुमास्तस्मिन् सर्व्वर्त्तुसुमनोहराः ।
तस्याभ्यासे स राजर्षिश्चकारावासमुत्तमम् ॥ १३।१४।१५ ।
सेवकैर्नाश्रितः सर्व्व आरामः सफलद्रुमः ।
प्राकारपरिखा चैव स्थण्डिलप्रतिमा कृता ॥ १६ ।
बहुधा वार्य्यमाणैस्तु पापबुद्धिसमाश्रितैः ।
एवं तेन कृतं तत्र सोऽपि दैववशङ्गतः ॥
पञ्जरस्थो यथा सिंहः कोऽस्मांस्त्राता भवेदिति* ।
पिधायाञ्जलिना वक्त्रमश्रुक्लिन्नस्तनान्तरा ।
रुरोदोच्चैःस्वरं† दीना हा कष्टमिति जल्पती ॥ १७।१८ ।
सर्व्वासां रुदतीनाञ्च कुररीणामिव स्वनः ।
श्रूयते बहुधाकारो गोकर्णोऽप्यतिदुःखितः ॥
एकैकस्यास्तु चक्रेऽसौ मूर्द्ध्ना पादाभिवन्दनाम् ।
प्राञ्जलिर्दीनया वाचा सान्त्वयामास ताः शनैः ॥१९।२०।
प्राप्तसंज्ञास्तु ताः सर्व्वाः गोकर्णोऽप्याह सुस्वनः ।
भविता यदि तत्राहं राजानं तं निवारयम्‡ ।
किङ्करिष्यामि दैवेन समर्थोऽप्यवसादितः ॥ २१ ।

---

* (ग) पुस्तके इतः पूर्व्वं गोकर्ण उवाच इति पाठो वर्त्तते, स तु न सङ्गच्छते।
† रुरोद मुखरं दीनेति (ग) । ‡ निवारयेयमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इत्युक्तमात्रे वचने ताः सर्व्वा लब्धचेतसः ।
ऐक्यभावेन ताः सर्व्वाः पप्रच्छुर्वणिजम्प्रति ।
कस्त्वङ्कथय कस्माच्च स्थानाद्यस्त्वमिहागतः ॥ २२ ।

गोकर्ण उवाच ।

गोकर्णोऽहं सुचार्व्वास्यः सुकपोलः सुलोचनः ।
पूर्व्वं दृष्टा भवत्यो मे चार्व्वङ्ग्यश्चारुलोचनाः ।
इदानीं मलिना जाता मम शोकविवर्द्धनाः ।
कथयध्वं ममात्मानमत्रतस्तदनन्तरम् ॥ २३।२४ ।
ज्येष्ठा सोवाच तस्याग्रे पुष्पजात्या स्वलङ्कृताः ।
वयमारामसंस्थाश्च स्वामिना परिपालिताः ॥ २५ ।
हृद्यवेषाः सुचार्व्वङ्ग्यः पुष्पवृद्धिरताः सदा ।
पूर्व्वं दृष्टाः स्वरूपाश्च विपर्य्ययमथो शृणु ॥ २६ ।
राजलोकैः पीड़िताश्च छेदनोन्मूलनेन च ।
पीड़िता भृशमुद्विग्नास्तेनेदानीं सकल्मषाः ॥ २७ ।
पुष्पमालाविहीनाश्च मूलस्कन्धावशोषिताः ।
एवंविधाश्च सम्भूता नष्टसंज्ञाः स्थिता वयम् ॥ २८ ।
यो देवस्तत्र पाषाणो मृत्पिण्डेष्टकयन्वितः ।
सोऽत्र सत्त्वमयः साक्षी तस्य पुण्यस्य कर्म्मणि ॥ २९ ।
पुण्यं सोदकपूर्णोऽयं तस्यारामस्य सेचकम् ।
सरश्चोत्पलपूर्णञ्च कलहंसैर्युतं सदा ॥ ३० ।
ये ते वृक्षाः फलोपेतास्ते सौवर्णाश्च सत्तम ।
एता रक्षन्ति सततमारामं सुखदं नृणाम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्या नाशाद्यथा नोऽत्र जातियञ्च विरूपता ॥ ३१ ।

गोकर्ण उवाच ।

आरामकर्त्तुः किञ्चात्र फलं भवति यादृशम् ।
करणात्कूपदेवानां तस्य पुण्यफलं वद ॥ ३२ ।

ज्येष्ठोवाच ।

इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्तें मोक्षञ्च विन्दति ॥ ३३ ।
वापीकूपतड़ागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥ ३४ ।
भूमिदानेन ये लोका गोदानेन च कीर्त्तिताः ।
ते लोकाः प्राप्यते* पुंभिः पादपानां प्ररोहणे ॥ ३५ ।

अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दशपुष्पजातिः ।
द्वे द्वे तथा दाड़िममातुलिङ्गे
पञ्चाम्ररोपी† नरकं न याति ॥ ३६ ।
यथा सुपुत्त्रः कुलमुद्धरेद्धि
यथाऽतिकृच्छ्रान्नियमप्रयत्नात् ।
तथाऽत्र वृक्षाः फलपुष्पभूताः
स्वं स्वामिनं नरकादुद्धरन्ति ॥ ३७ ।

---

* प्राप्यन्ते इति साधु, तथा कृते तु छन्दोदोषः ।   † पञ्चाम्रवापीति बहुषु पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गोकर्ण उवाच ।

इन्धनार्थं यदानीतमग्निहोत्रं तदुच्यते ।
छायाविश्रामपथिकैः पक्षिणां निलयेन च ॥ ३८ ।
पत्रमूलत्वगादिश्च औषधार्थन्तु देहिनाम् ।
उपकुर्व्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते ॥ ३९ ।
गृहकृत्यानि काष्ठानि क्षुद्रजन्तुगृहास्तथा ।
यत्र निर्वर्त्तनं प्रोक्तं भिक्षा पत्रैः समीकृता ॥ ४० ।
फलन्ति वत्सरे मध्ये द्विवारं शकुनादयः ॥ ४१ ।
सांवत्सरं पितुर्मातुरुपकारम्फलैः कृतम् ।
एवं पुत्त्रसमारोपा एवं तत्त्वविदो विदुः ॥ ४२ ।

वराह उवाच ।

एवमुक्तस्तया देव्या मालत्या पुष्पजातया ।
हा कष्टङ्कथमित्येवं मुमोह च पपात च ॥ ४३ ।
ताभिराश्वासितो धीमान् ससंज्ञो वारिणोक्षितः ।
आत्मानं कथयास्माकं यस्माच्च त्वमुपागतः ॥ ४४ ।

गोकर्ण उवाच ।

वृद्धौ च मातापितरौ साधुभार्य्याचतुष्टयम् ।
मथुरायां ममैवैतदुद्यानं देवतागृहम् ॥ ४५ ।
यदि तत्र गतश्चाहं पितृराज्ञोस्तु सन्निधौ ।
इमामापदमापन्ना यूयं तद्वै निवेदये ॥ ४६ ।
ज्येष्ठा प्रोवाच नेष्यामि यदि ते रोचतेऽनघ ।
अद्यैव मथुरां देवीमवेक्ष्यामोऽधिगम्यताम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विमानप्रतिमाकारं यानमारुह्य सत्वरः ।
दिव्यानीमानि रत्नानि भूषणानि फलानि च ।
गृह्णीष्वोपायनं राज्ञे तस्मै त्वं देह्यनर्घ्यकम् ॥ ४७।४८ ।
आरुह्य स तथेत्युक्त्वा नमस्कृत्य हरिञ्च ताः ।
उत्पपात ततः स्थानाद्यत्र राजा व्यवस्थितः ॥ ४९ ।
राज्ञे निवेदयामास रत्नानि सुबहूनि च ।
राजा दर्शनमात्रेण सन्तुष्टः सन् ब्रवीदिदम्* ॥ ५० ।
स्वागतं ते महाभाग परिपूज्य सुमान्य च† ।
अर्द्धासने कृतः प्रीत्या रत्नदो धनदो यथा ॥ ५१ ।
अस्मात्स्थानादिदानीञ्च अपसर्प्य क्षणान्तरे ।
आश्चर्य्यं दर्शयिष्यामि कथयिष्यामि चापि भोः ॥ ५२ ।
स तथेति प्रतिश्रुत्य सेनापतिमुवाच ह ।
मुहूर्त्तार्द्धाद्यथा याति सैन्यं तच्च तथा कुरु ॥
क्षिप्रं तत्प्रतिपद्यस्व न कालोऽत्यभ्यगाद्यथा ।
कृतं तेन तथा सर्व्वं यथा राज्ञा प्रभाषितम् ॥ ५३।५४ ।
ता देव्यो दिव्यरूपाश्च विमानकृतरूपकाः ।
साधु साध्विति गोकर्णं प्रशशंसुः पुनः पुनः ।
वरं दत्त्वा यथाकामं स्वस्तीत्युक्त्वा दिवं ययुः ॥ ५५ ।
गोकर्णस्तु तदाचष्टे तत्सर्व्वं नृपतेः सुखी ।
सर्व्वं तच्चात्मचरितं पूर्त्तधर्म्मस्य यत् फलम् ॥ ५६ ।

---

* ब्रवीदिदमित्यत्र अब्रवीदिदमिति साधु । † स्वमान्य चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

राज्ञा तस्मै प्रदत्ताश्च ग्रामाश्चैव पुराणि च ।
वस्त्राणि च गजाश्चैव वाजिनोऽन्यद्धनम्बहु ॥ ५७ ।
आश्चर्य्यं परमं धर्म्ममारामस्य महत् फलम् ।
श्रुत्वा सर्व्वञ्चकारासौ सार्व्वभौमो महीपति: ॥ ५८ ।

इति वराहपुराणे गोकर्णमाहात्म्ये
द्विसप्तत्यधिकशततमोऽध्याय: ।

त्रय:सप्तत्यधिकशततमोऽध्याय: ।

वराह उवाच ।

तत्र स्थित्वा यथान्यायङ्गोकर्ण: सर्व्वमङ्गलम् ।
शुकञ्च मातापितरं साधुभार्य्याचतुष्टयम् ।
सम्मान्य पूजयामास यथाविभवशक्तित: ।
मथुरावासिभिर्लोकैरुद्यानङ्कारयत्तदा* ॥ १।२ ।
स्वयञ्च कृतवांस्तत्र अविघ्नस्य महामखम् ।
भक्षभोज्ये ब्राह्मणेभ्यो ददौ दानानि नित्यश: ॥ ३ ।
गीतवादित्रमाङ्गल्यं पुत्त्रवृद्धौ यथोचितम् ।
तत्सर्व्वङ्कृतवाँल्लोको गोकर्णस्य महात्मन: ॥ ४ ।
एकैकञ्च परिष्वज्य प्रणिपत्य यथाक्रमम् ।
मातापित्रो: प्रणम्याथ शिरसा पादवन्दनाम्† ॥ ५ ।

---

* कारयदित्यत्र अकारयदिति साधु । † पादबन्धनमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शुकं हृदि समालोक्य प्ररुरोद स वै वणिक् ।
यस्य प्रसादाज्जीवश्च धर्म्मश्चानुत्तमा गतिः ।
विशिष्टेन मया प्राप्तो राज्ञो लाभः सुपुष्कलः ।
शुकपुत्त्रान्मया प्राप्तमिहलोके परत्र च ॥ ६।७ ।
एवं वसन् सुखं तत्र गोकर्णः सह बन्धुभिः ।
शुकनाम्ना कृतं तेन शिवस्यायतनं महत् ॥ ८ ।
शुकेश्वरं प्रतिष्ठाप्य दिव्यं सत्रञ्चकार ह ।
ब्राह्मणानां प्रति द्वे च मिष्टान्नवरभोजने ॥ ९ ।
शुकसत्रमिति ख्यातं मृतो मुक्तिमवाप सः ।
विमानवरमारुह्य स्वर्गलोकङ्गतः शुकः ॥ १० ।
शुकप्रदाने गोकर्णः फलं स्नानस्य सङ्गमात् ।
श्राद्धं सुवर्णं गोदानं कृत्वा तस्मै ददौ च सः ॥ ११ ।
शवरस्य सभार्य्यस्य तेन स्वर्गङ्गतस्य ह ।
शुकोदरेण सहितो विमानवरमास्थितः* ॥ १२ ।
एतत्ते कथितं सर्व्वं मथुरायां महत्फलम् ।
सरस्वतीसङ्गमस्य गोकर्णस्य शिवस्य च ॥ १३ ।
गोकर्णस्य तु सन्तानमक्षयं धर्म्मतोऽव्ययम् ।
सम्भूतं स सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥ १४ ।

इति वराहपुराणे गोकर्णमाहात्म्ये
त्रयःसप्तत्यधिकशततमोऽध्यायः ।

---

* एतदर्द्धस्य कर्त्तृपदं न विभाव्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चतुःसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि* महापातकनाशनम् ।
सङ्गमस्य प्रभावं हि पापिनामपि मुक्तिदम् ॥ १ ।
अत्रैव श्रूयते पूर्व्वं ब्राह्मणः संशितव्रतः ।
महानामेति विख्यातः स्थितोऽसौ वनमाश्रितः ॥ २ ।
स्वाध्याययुक्तो होमे च नित्ययुक्तः स योगवित् ।
जपहोमपरो नित्यं स्वकालं क्षयति च सः ॥ ३ ।
एवङ्कर्म्माणि कुर्व्वंन्स ब्रह्मलोकजिगीषया ।
बह्वन्यब्दान्यतीतानि ब्राह्मणस्य वने तदा ॥ ४ ।
तस्य बुद्धिरियं जाता तीर्थाभिगमनं प्रति ।
पुनस्तीर्थजलैरेतत्क्षालयामि कलेवरम् ।
प्रयातो विधिवत्साक्षात् सूर्य्यस्योदयनं प्रति ॥
असिकुण्डादितः कृत्वा दक्षिणां कोटिकां ततः ।
तथाचोत्तरकोट्यान्तु तथा मन्मथुरञ्च यत् ।
क्रमेण सर्व्वतीर्थानि स्नात्वा मामपि पुष्करम् ।
गत्वा सर्व्वाणि तीर्थानि स्नात्वा पूतो भवाम्यहम् ॥ ५।६।७ ।
इति कृत्वा मथुराया निर्जगामाथ स द्विजः ।
कृतपूजानमस्कारः अध्वानं प्रत्यपद्यत ॥ ८ ।

---

* प्रभावस्य पुंस्त्वात्पुनरन्यम्प्रवक्ष्यामीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अध्वप्रपन्नो ददृशे पञ्च प्रेतान् सुभीषणान् ।
अरण्ये कण्टकवृते निर्ज्जने शब्दवर्ज्जिते ॥ ९ ।
तान्दृष्ट्वा विकृताकारानतितीव्रभयङ्करान् ।
ईषदुत्त्रस्तहृदयोऽतिष्ठदुन्मील्य चक्षुषी ॥ १० ।
आलम्ब्य स ततो धैर्य्यं त्रासमुत्सृज्य दूरतः ।
पप्रच्छ मधुरालापः के यूयं रौद्रमूर्त्तयः ॥ ११ ।
भवन्तः कर्म्मणा केन दुष्कृतेन भयावहाः ।
एकस्थानात्सदा यूयं प्रस्थिताः कुत्र वा सदा ॥ १२ ।

प्रेता ऊचुः ।

क्षुत्पिपासातुरा नित्यं बहुदुःखसमन्विताः ।
दुर्बुद्धया च हताः सर्व्वे हीनज्ञाना विचेतसः ॥ १३ ।
न जानीमो दिशञ्चापि विदिशञ्चापि चाध्वनि ।
नान्तरिक्षं महीञ्चापि जानीमो दिवसन्तथा ॥ १४ ।
यदेतद्दुःखमापन्नं सुखोदर्कफलं भवेत् ।
अप्रकाममिदं भाति भास्करोदयनम्प्रति ॥ १५ ।
अहं पर्य्युषितो नाम सूचिमुखस्ततः परः ।
शीघ्रगो रोधकश्चैव पञ्चमो लेखकस्तथा ॥ १६ ।

ब्राह्मण उवाच ।

प्रेतानाङ्कर्म्मजातानां नाम्नां वै सम्भवः कुतः ।
किं तत्कारणमेतद्धि यूयं सर्व्वे सनामकाः ॥ १७ ।

प्रेत उवाच ।

अहं स्वादु सदाश्नासि दद्मि पर्य्युषितं द्विजे ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्कारणमुद्दिश्य नाम्नि पर्य्युषितं द्विज ॥ १८ ।
सूचिता बहवोऽनेन विप्राश्चान्नादिकाङ्क्षिणः ।
एतत्कारणमुद्दिश्य सूचिमुखस्ततः परः ॥ १९ ।
समर्थितो द्विजेनैव शीघ्रं याति यतो हि सः ।
एतत्कारणमुद्दिश्य शीघ्रगस्तेन सोच्यते* ॥ २० ।
एको गृहस्य मध्ये तु भुङ्क्ते द्विजभयेन हि ।
समारुह्योद्विग्नमना रोधकस्तेन चोच्यते ॥ २१ ।
मौनेनापि स्थितो नित्यं याचितोऽपि लिखेन्मही्म् ।
अस्माकमपि पापिष्ठो लेखकस्तेन नाम वै ॥ २२ ।
मदेन लेखको याति रोधकस्तु ह्यवाक्शिराः ।
शीघ्रगः पङ्गुतां प्राप्तः सुचिमुखस्ततः परम्† ॥ २३ ।
उपितः केवलग्रीवो लम्बौष्ठो बृहतोदरः‡ ।
बृहद्वृषणशुष्काङ्गः पापादेव प्रजायते ॥ २४ ।
एतत्ते सर्व्वमाख्यातमात्मवृत्तान्तसम्भवम् ।
यदि ते श्रवणे श्रद्धा पृच्छ चान्ययदिच्छसि ॥ २५ ।

ब्राह्मण उवाच ।

ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारजीविनः ।
युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः ॥ २६ ।

प्रेता ऊचुः ।

शृणु चाहारमस्माकं सर्व्वभूतदयापर ।

---

* स उच्यते इति साधु । † एतदर्द्धं (ग) पुस्तके नास्ति । ‡ बृहदुदर इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यच्छ्रुत्वा निन्दसे नित्यं भूयोभूयश्च नित्यशः ॥ २७ ।
श्लेष्ममूत्रपुरीषेण योषितानां समन्ततः ।
गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति* तत्र वै ॥ २८ ।
बलिमन्त्रविहीनानि दानहीनानि यानि च ।
गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च ॥ २९ ।
यानि प्रकीर्णभाण्डानि प्रकीर्णोच्छेषणानि च ।
नित्यञ्च कलहो यत्र प्रेता भुञ्जन्ति तत्र वै ॥ ३० ।
अपात्रे प्रतिदत्तानि विधिहीनानि यानि च ।
निन्दितानां द्विजातीनां जुगुप्सितकुलोद्भवे ।
जातानां विहितानाञ्च कर्म्मदुष्कृतकारिणाम् ।
तेभ्यो दत्तं तदस्माकमुपतिष्ठति भोजने ॥ ३१।३२ ।
एतत्पापतरञ्चान्यद्भोजनं दुष्टकर्म्मिणा ।
निर्व्विण्णाः प्रेतभावेन पृच्छामः सुदृढ़व्रत ।
प्रेतो यथा न भवति तथा ब्रूहि तपोधन ॥ ३३ ।

ब्राह्मण उवाच ।

एकरात्रित्रिरात्रेण कृच्छ्रचान्द्रायणदिभिः ।
व्रतैरभ्युद्यतः पूतो न प्रेतो जायते नरः ॥ ३४ ।
मिष्टान्नपानदाता च सततं श्रद्धयान्वितः ।
यतीनां पूजको नित्यं न प्रेतो जायते नरः ॥ ३५ ।
त्रिरब्भिः पञ्च चैकं वा प्रतिनित्यन्तु प्रोषयेत् ।

---

* भुञ्जते इति साधु। एवं परत्र।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वभूतदयालुश्च न प्रेतो जायते नरः ॥ ३६ ।
देवातिथिषु पूजासु गुरुपूजासु नित्यशः ।
रतो वै पितृपूजायां न प्रेतो जायते नरः ॥ ३७ ।
जितक्रोधी ह्यमात्सर्य्यस्तृष्णासङ्गविवर्ज्जितः ।
क्षमायुक्तो दानशीलो न प्रेतो जायते नरः ॥ ३८ ।
एकादशीं सिताकृष्णां सप्तमीं वा चतुर्द्दशीम् ।
उपवासपरोनित्यं न स प्रेतोऽभिजायते ॥ ३९ ।
गां ब्राह्मणञ्च तीर्थानि पर्व्वतांश्च नदीस्तथा ।
देवांश्च वन्दते नित्यं न प्रेतो जायते हि सः ॥ ४० ।

प्रेता ऊचुः ।

त्वत्तस्तच्छ्रुतमस्माभिर्यो न प्रेतोऽभिजायते ।
प्रेतस्तु जायते केन* तद्वद त्वं महामुने ॥ ४१ ।

विप्र उवाच ।

शूद्रान्नेन तु भुक्तेन ब्राह्मणोम्रियते यदि ।
तेनैव उदरस्थेन स प्रेतो जायते ध्रुवम् ॥ ४२ ।
नग्नकापालिपाषण्डमेलनासनभोजनैः† ।
मनुष्यः प्रेततां याति स्पर्शेन सुतरां तथा‡ ।
पूर्व्वपुण्यं विनश्येत प्रेतो भवति नित्यशः§ ॥ ४३ ।

---

* केव (को वा ?) इति (ग)। † नग्नकापालिपाषण्डसंलापासनभोजनैरिति (ग)।
‡ संस्पर्शेन सुदांस्तथेति (ग)। § न संशय इति (क), (ख), अत्र तु छन्दोदोषः। निश्चितम् इति कृते तु न दोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पाषण्डाश्रमसंस्थश्च मद्यपः पारदारिकः ।
वृथामांसरती नित्यं स च प्रेतोऽभिजायते ॥ ४४ ।
देवस्वं ब्राह्मणस्वञ्च गुरोर्द्रव्यं हरेत्तु यः ।
कन्यां ददाति शुल्केन स च प्रेतोऽभिजायते ॥ ४५ ।
मातरं पितरं भ्रातृभगिन्यौ च* स्त्रियं सुतम् ।
अदुष्टान् यस्त्यजेत्सोऽपि प्रेतो भवति च ध्रुवम् ॥ ४६ ।
अयाज्ययाजनाच्चैव याज्यानां परिवर्ज्जनात् ।
रतो वा† शूद्रसेवायां स प्रेतो जायते नरः ॥ ४७ ।
ब्रह्महा च कृतघ्नश्च गोघ्नोऽतिपञ्चपातकी ।
भूमिकन्याहृती चैव‡ स प्रेतो जायते नरः ॥ ४८ ।
गुरोर्धर्म्मोपदेष्टुश्च नित्यं हितमभीप्सतः§ ।
न करोति वचस्तस्य स प्रेतो जायते नरः ॥ ४९ ।
असद्भ्यः प्रतिगृह्णाति नास्तिकेभ्यो विशेषतः ।
स पापो जायते प्रेत आहारादिविवर्ज्जितः ॥ ५० ।

प्रेता ऊचुः ।

य एतत्कर्म्म कुर्व्वन्ति मूढ़ाऽधर्म्मपरायणाः ।
विरुद्धकारिणः पापास्तेषाङ्गाञ्चिद्गतिं वद ॥ ५१ ।

ब्राह्मण उवाच ।

ये धर्म्मविमुखा मूढ़ा दयादानविवर्ज्जिताः ।

---

* भ्रातॄन् भगिनीश्चेति (ग) । † रतीवै इति (ग) । ‡ भूमिकन्यापहृती चेति (ग) ।
§ हितमपश्यतः इति प्रायः सार्व्वत्रिकः पाठः, स चासङ्गतः लिपिकरप्रमादगतानुगतिक इत्यनुनीयते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेषां गतिर्भवेदेका मथुरायान्तु सङ्गमे ॥ ५२ ।
श्रवणद्वादशीयोगे मासि भाद्रपदे तथा ।
वामनं तत्र देवन्तु पूजयेज्जुहुयात्तथा ।
सुवर्णमन्नं वस्त्रञ्च छत्रोपानहसंयुतम् ॥ ५३ ।
तत्र स्नात्वा पितॄंस्तर्प्य* दत्त्वा करकमेव च ।
न ते प्रेता भविष्यन्ति मार्गस्थो यो नमस्यति† ।
विमानवरमारुह्य विष्णुलोकं स गच्छति ॥ ५४ ।
तत्र तीर्थे नरः स्नातो हृष्टपुष्टो यथाश्रुतः ।
ध्यातश्च कीर्त्तितो वापि तेन गङ्गावगाहिता ॥ ५५ ।
तीर्थस्यैव तु माहात्म्यं प्रेतो भूत्वा शृणोति यः ।
तस्याक्षयपदं विष्णोर्भवतीति मया श्रुतम् ॥ ५६ ।

प्रेता ऊचुः ।

अस्माकं वद कल्याणं व्रतस्यास्य विधिं परम् ।
येन वै क्रियमाणेन प्रेतत्वञ्च विमुच्यते‡ ॥ ५७ ।

ब्राह्मण उवाच ।

एवमेव व्रतस्यास्य विधानङ्कर्म्मसंहितम् ।
पुराणङ्कथितं राज्ञे मान्धात्रे पृच्छते पुरा ।
वसिष्ठेन महाभागा शृणुध्वं कथयाम्यहम् ।
प्रेतानां मोचणं पुण्यं गतिप्रवरदायकम् ॥ ५८।५९ ।
मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ।

---

* तर्पयित्वेति साधु । † नमस्यतीति साधु । ‡ प्रेतभावश्च मुच्यते इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्यां दत्तं हुतं स्नानं सर्व्वं लचगुणं भवेत् ॥ ६० ।
सङ्गमे च पुनः स्नात्वा पूजयित्वा तु वामनम् ।
कलशं विधिना दत्त्वा तस्य पुण्यफलं शृणु ॥ ६१ ।
कपिलानां शतं दत्त्वा हिरण्योपस्कराञ्चितम्* ।
तेन यत्फलमाप्नोति तद्वादश्यामखण्डितम् ॥ ६२ ।
राचसत्वं न गच्छेत† श्रवणद्वादशीव्रतात् ।
स्वर्गे च वसते तावद्यावदिन्द्राश्चतुर्द्दश ॥ ६३ ।
ततः स्वर्गात्परिभ्रष्टो ब्राह्मणो वेदपारगः ।
जातिस्मरो महायोगी मोचमार्गपरायणः‡ ।
ध्यानयोगेन भावेन मुक्तो यात्यपुनर्भवम् ॥ ६४ ।
करकञ्च सुसम्पीतं सान्नं रत्नसमन्वितम् ॥ ६५ ।
यथालाभोपपन्नेन सौवर्णो वामनः कृतः ।
उपानच्छत्रसंयुक्तो विधिमन्त्रपुरःसरः ।
कृत्वा च विधिवत्तस्य स्नानपूजादिकं नरः ।
मन्त्रैस्तथाविधैर्होमैर्ब्राह्मणं चोपपादयेत् ॥ ६६।६७ ।
आगच्छ वरदानन्तु श्रीपते मदनुग्रहात् ।
सर्व्वगोपिनिजांशेन स्थानमेतदलङ्कुरु ॥ ६८ । आवाहनम् ।
यत्त्वं नचत्ररूपेण द्वादश्यां नभसि स्थितः ।
तन्नचत्रमहं वन्दे मनोवाञ्छितसिद्धये ॥ ६९ । नाचत्रम् ।
नमः कमलनाभाय कमलालय केशव ।

---

* हिरण्योपस्करान्वितमिति (ग)। † गच्छेदिति साधु। ‡ मोचधर्म्मपरायण इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कमूर्त्तें सर्व्वतोव्यापिनारायण नमोऽस्तु ते ॥ ७० । स्नानम् ।

सर्व्वव्यापिजगद्योने नमः सर्व्वमयाच्युत ।

श्रवणाद्वादशीयोगे पूजां गृह्णीष्व केशव ॥ ७१ । पूजा ।

धूपोऽयं देवदेवेश शङ्खचक्रगदाधर ।

अच्युतानन्त गोविन्द वासुदेव नमोऽस्तु ते ॥ ७२ । धूपः ।

तेजसा सर्व्वलोकाश्च विहृताः सन्तु तेऽव्ययः ।

त्वं हि सर्व्वगतं तेजो जनार्द्दन नमोऽस्तु ते ॥ ७३ । दीपः ।

अदितेर्गर्भमाधाय वैरोचनिशमाय च ।

त्रिभिः क्रमैर्जिता लोका वामनाय नमोऽस्तु ते ॥ ७४ ।

नैवेद्यम् ।

देवानां सम्मतश्चापि योगिनां परमा गतिः ।

जलशायी जगद्योने अर्घ्यं मे प्रतिगृह्यताम् ॥ ७५ ।

अर्घ्यम् ।

हव्यभुक् हव्यकर्त्ता त्वं होता हव्यं त्वमेव च ।

सर्व्वमूर्त्तें जगद्योने नमस्ते केशवाय चेति स्वाहा ॥ ७६ ।

होमः ।

हिरण्यमनन्त्वं देव जलवस्त्रमयो भवान् ।

उपानच्छत्रदानेन प्रीतो भव जनार्द्दन ॥ ७७ ।दक्षिणायाम्।

पर्य्यन्यो वरुणः सूर्य्यः सलिलं केशवः शिवः ।

अग्निर्वैश्रवणो देवः पापं हरतु मेऽव्ययः ॥ ७८ ।

वामनस्तुतौ ।

अन्नप्रजापतिर्विष्णुरुद्रेन्द्रचन्द्रभास्कराः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्नं त्वष्टा यमोऽग्निश्च* पापं हरतु मेऽव्ययः ॥ ७९ ।

करकदाने ।

वामनोबुद्धिदाता च द्रव्यस्थो वामनः स्वयम् ।
वामनस्तारकोभाभ्यां वामनाय नमोऽस्तु ते ॥ ८० ।

यजमाने ।

वामनं प्रतिगृह्णामि वामनो मे प्रयच्छति ।
वामनस्तारकोभाभ्यां वामनाय नमो नमः ॥ ८१ ।

द्विजप्रतिग्रहे ।

कपिलाङ्गेषु तिष्ठन्ति भुवनानि चतुर्द्दश ।
दत्त्वा कामदुघां लोका भवन्ति सफला नृणाम् ॥ ८२ ।

गोदाने ।

मम पापच्छिदे तुभ्यं देवगर्भा सुपूजिता ।
मया विसर्ज्जितो देव स्थानमन्यदलङ्कुरु† ॥ ८३ ।

विसर्ज्जनम् ।

एवं विद्वांस्तु द्वादश्यां यो नरः श्रद्धयान्वितः ।
यत्र तत्र नभस्ये तु कृत्वा फलमवाप्यते‡ ॥ ८४ ।

ब्राह्मण उवाच ।

यस्तु सारस्वते तीर्थे यमुनायाश्च सङ्गमे ।
करोति विधिनानेन तस्य पुण्यं ग्रतोत्तरम् ॥ ८५ ।
मयापि श्रद्धया चैतत्कालं तीर्थस्य सेवनम् ।

---

* अन्नं त्वष्टयमाग्निश्चेति (क), (ग) । † स्थानमेतदलङ्कुरु इति (ग) । ‡ अवाप्नोतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्षेत्रसन्न्यासरूपेण कृतं भक्तिसमन्वितम्।
तेन यूयं न शक्ता मां बाधितुं पापकर्म्मिणः॥ ८६।
श्रवणद्वादशीयोगे व्रतं तिथिसमन्वितम्।
तावद्व्रतं तु कर्त्तव्यं यावदेकं क्षयं व्रजेत्॥ ८७।
तीर्थस्यैव प्रभावो हि प्रत्यक्षमिह दृश्यते।
श्रवणाद्वो गतिः साक्षात्साधु लप्स्यामहेऽधुना॥ ८८।
वराह उवाच*।
एवं ब्रुवति विप्रे तु आकाशे दुन्दुभिस्वनः।
पुष्पवृष्टिः पतद्भूमौ† देवैर्मुक्ता सहस्रशः॥ ८९।
प्रेतानान्तु विमानानि आगतानि समन्ततः।
देवदूत उवाचेदं प्रेतानां शृण्वतां तदा॥ ९०।
अस्य विप्रस्य सम्भाषात्पुण्यसत्कीर्त्तितेन च।
प्रेतभावविमुक्ताः स्थ तीर्थस्य श्रवणादपि॥ ९१।
तस्मात्सर्व्वप्रयत्नेन सता सम्भाषणं वरम्।
कर्त्तव्यस्तीर्थभावश्च व्रतभावश्च भाविनि‡॥ ९२।
तीर्थाभिषेकिपुरुषाद्यथा तेषां दुरात्मनाम्।
प्रेतानामक्षयः स्वर्गः सरस्वत्याश्च सङ्गमात्॥ ९३।
प्राप्तन्तीर्थप्रभावस्य श्रवणान्मुक्तिदं फलम्।
तिलकं सर्व्वधर्म्माणां पञ्च प्रेतत्वमुक्तिदम्॥ ९४।
यः पठेत्परया भक्त्या शृणुयाद्भक्तितत्परः।

---

* श्रीवराह उवाच इति (ग)। † अपतद्भूमौ इति साधु। ‡ भामिनीति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

करोति श्रद्धया युक्तो न प्रेतो जायते नरः ॥ ६५ ।
पिशाचसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्य श्रवणमात्रेण न प्रेतो जायते नरः ॥ ६६ ।

इति वराहपुराणे सर्व्वतीर्थे यमुनासङ्गमप्रभावो नाम
चतुःसप्तत्यधिकशततमोऽध्यायः ।

पञ्चसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच* ।

शृणु चान्यद्वरारोहे कृष्णगङ्गासमुद्भवम् ।
यमुनास्रोतसि स्नात्वा कृष्णद्वैपायनो मुनिः ॥
ध्यात्वा मनसि गङ्गां तां कालिन्दीं पापहारिणीम् ।
नित्यकालञ्च† कुरुते तत्र तीर्थजलाप्लुतिम् ॥ १।२ ।
सोमवैकुण्ठयोर्मध्ये कृष्णगङ्गेति कथ्यते ।
यत्रातप्यत स व्यासो मथुरायां स्थितोऽमलः ॥ ३ ।
तत्राश्रमपदं दिव्यं मुनिप्रवरसेवितम् ।
आगच्छन्ति सदा तत्र चातुर्मास्यमुपासितुम् ।
मुनयो वेदतत्त्वज्ञाः‡ ज्ञानिनः शंसितव्रताः ॥ ४ ।

---

* श्रीवराह उवाच इति (ग) । † नित्यकालन्तु इति (ग) । ‡ वेद्यतत्त्वज्ञा- इति (क) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

श्रौतस्मार्त्तपुराणेषु सन्देहो यस्य कस्यचित् ।
व्यासोऽपनोदयामास नानावाक्यैः सताङ्गतिः ॥ ५ ।
कालञ्जरे महादेवं तत्र तीर्थपतिं शिवम् ।
यस्य सन्दर्शनादेव कृष्णगङ्गाफलं भवेत् ॥ ६ ।
तत्र स्थितो द्वादशाब्दव्रती सङ्गविवर्ज्जितः ।
पत्राहारी च फलभुग्दर्शे वै पौर्णमासिके ॥ ७ ।
गत्वा हिमालयञ्चासौ वदरीमभितो गतः ।
व्यासश्चर्य्यापरस्तत्र ध्यानयोगपरायणः ।
त्रिकालदर्शी शुद्धात्मा सिद्धत्वं प्राप्नुयात्प्रभुः ॥ ८ ।
तस्याश्रमपदस्थस्य यद्दृष्टं ज्ञानचक्षुषा ।
प्रत्यक्षं कृष्णतीर्थं तु पाञ्चाल्यकुलतन्तुना ॥ ९ ।
पाञ्चाल्योऽथ द्विजः कश्चिन्नाम्ना वसुरिति श्रुतः ।
दुर्भिक्षपीड़ितोऽत्यन्तं सभार्य्यो दक्षिणाङ्गतः ॥ १० ।
शिवनद्या दक्षिणे तु कूले सुवरपत्तने ।
निवासमकरोत्तत्र ब्राह्मणीं वृत्तिमाश्रितः ॥ ११ ।
तत्रस्थस्य तदा पञ्च पुत्रा कन्याभवत्तदा ।
ब्राह्मणाय च दत्ता सा धनधान्यसमन्विता ॥ १२ ।
स द्विजः कालसम्पन्नः सभार्य्यस्तत्र संस्थितः ।
कन्याऽस्थीनि तु संगृह्य मथुरामाजगाम ह ॥ १३ ।
श्रुत्वा पुराणे पतितमर्द्धचन्द्रेऽस्थिपातनम् ।
स्वर्गं वसति स नित्यं यस्यास्थि ह्यर्द्धचन्द्रके ॥ १४ ।
तीर्थयात्राप्रसङ्गेन लोकैः प्रचलिता वहिः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेन सार्थेन सा कन्या मथुरायां जगाम च ॥ १५ ॥
कनिष्ठा भगिनी तेषां बालरण्डा बभूव ह ।
सुरूपा सुकुमाराङ्गी नीलकुञ्चितमूर्द्धजा ॥ १६ ॥
कदलीकाण्डसङ्काशे तस्या ऊरू समांसले ।
सुश्लिष्टाङ्गुलिपादा तु नखास्ताम्रोज्ज्वलाः शुभाः ॥ १७ ॥
गम्भीरा दक्षिणावर्त्ता नाभिस्त्रिवलिशोभिता ।
क्षामोदरी समकुक्षिः पीनोन्नतपयोधरा ॥ १८ ॥
कम्बुग्रीवा संवृतास्या सुदती स्वधराहनुः ।
सुनखी स्वक्षिणी सुभ्रूः सुप्रमाणसुभाषिणी ॥ १९ ॥
तेन तेनैव सम्पूर्णरूपेण च तिलोत्तमा ।
यं यं पश्यति चार्व्वङ्गी यस्ताञ्चैव प्रपश्यति ।
स स चित्र इव न्यस्तो विचेता जायते नरः ॥ २० ॥
एवंविधा तत्र तत्र तीर्थस्नानपरायणा ।
दृष्टा वेश्यासमूहेन प्रागल्भेन तदा क्वचित् ॥ २१ ॥
कान्यकुब्जाधिपो राजा क्षत्रधर्म्मे व्यवस्थितः ।
तस्य सत्रं सर्व्वकालं देवगर्त्तेश्वरे शिवे ।
प्रवर्त्तते सुवित्ताढ्यं प्रेक्षणीयं मनोरमम् ।
वादित्राणि च गीतानि शक्रस्य भवने यथा ॥ २२।२३ ॥
तस्य देवस्य या वेश्यास्ताभिः सा प्रतिलोभिता ।
गीतनृत्यादिषु रता तासां धर्म्मसुपागता ॥ २४ ॥
अल्पैर्दिवसैः सा साध्वी* असाध्वीभिः परीवृता ।

* ततोऽल्पैर्दिवसैः साध्वीति (म) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं वसति सा बाला देवस्यास्य परिग्रहा।
यथासुखं समेताभिर्विहरन्ती दिने दिने ॥ २५ ।

इति वराहपुराणे मथुरामाहात्म्ये कृष्णगङ्गाकालिञ्जरप्रभावे
पञ्चसप्तत्यधिकशततमोऽध्यायः।

षट्सप्तत्यधिकशततमोऽध्यायः।

वराह उवाच।

पञ्चानान्तु कनिष्ठो यः पञ्चालो ब्राह्मणात्मजः।
वाणिज्यभाण्डमादाय समूहस्य प्रसङ्गतः ॥ १ ।
सार्थेन निष्ठितः सोऽथ धनवान् रूपवांस्ततः* ।
क्रमेण ते सर्व्वदेशान्विषयान् पर्व्वतान्नदीः ॥
आक्रम्य तत्र सम्प्राप्ता यत्र सा मथुरा पुरी।
आवासं कारयामासुः प्रभूतयवसेन्धने ॥ २।३ ।
तस्मिन्स्थाने स पाञ्चालः† प्राप्तस्तु पुरुषैः सह ।
तस्मिंस्तीर्थवरे स्नाप्य‡ वस्त्रालङ्कारभूषितः।
ऐश्वर्य्यमदभावेन यानेन महता तदा।
देवतादर्शनं कृत्वा दत्त्वा दानान्यनेकशः।

---

* धनवान्दर्पवांस्तत इति (क), (ख)। † पाञ्चाल्य इति (ग)। ‡ स्नापयित्वेति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कौतुकार्थं ततो गत्वा देवङ्गर्त्तेश्वरं तदा ।
तिलोत्तमायास्तद्रूपं दृष्ट्वा मोहवशं गतः ॥ ४।५।६ ।
धात्रेयिकायास्तस्याश्च बहुमानपुरःसरम् ।
वस्त्राणि बहुरूपाणि कटकानां शतानि च ।
हारा रत्नमयास्तद्दद्दौ लोभविमोहितः ॥ ७ ।
ददौ अगुरुसारञ्च सकर्पूरं सचन्दनम् ।
तस्या गृहवरे तत्र वसति स्म दिने दिने ॥ ८ ।
प्रहरार्द्धं दिने* जाते ततः स्वशिविरं ययौ ।
स्नात्वा तीर्थं समीपे च कृष्णगङ्गोद्भवे सदा ॥ ६ ।
एवं नित्यं प्रसक्तो हि करोति द्रव्यगर्वितः ।
एवन्तु कुर्व्वतस्तस्य मासषट्कं ततो गतम् ॥ १० ।
अथैकदा समायातः स्नातुं तत्र सुमन्तुना ।
स्वाश्रमस्थेन दृष्टः स कृमियुक्तः समागतः ॥ ११ ।
कृमयो रोमकूपेभ्यः पतमाना† अनेकशः ।
यावत्स्नानं स कुरुते पतन्ति‡ राशिमात्रकः ।
स्नाने कृते नश्यति च सुरूपश्चाभिजायते ॥ १२ ।
एवं सुमन्तुना दृष्टमाश्चर्य्यं बहुवासरम् ।
सुमन्तुस्तर्कयामास कोऽयं कस्यात्मजो युवा ।
इति चिन्तासमायुक्तस्तमपृच्छद्विशङ्कितः ॥ १३ ।
कस्त्वं कस्यासि सुभग का जातिः कश्च ते पिता ।

---

* अथ दीर्घे दिने जाते इति (क), (ख) । † पतन्त इति साधु । ‡ पततीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किङ्करोषि दिवारात्रौ ब्रूहि त्वं पृच्छतो मम ॥ १४ ।

पाञ्चाल उवाच ।

पाञ्चालो ब्राह्मणसुतो वाणिज्यञ्च समाश्रितः ।
दक्षिणापथदेशाच्च मथुरायां समागतः ॥ १५ ।
निशामुषित्वा शिविरे प्रातस्तीर्थं समाश्रितः ।
स्नात्वा महेश्वरं दृष्ट्वा त्रिगर्त्तेश्वरसंज्ञितम् ।
कालिञ्जरं भवत्पादौ गच्छामि शिविरं ततः ॥ १६ ।

सुमन्तुरुवाच ।

आश्चर्य्यं तव देहेऽस्मिन्नित्यं पश्यामि निःसृतम् ।
अस्नाते कृमिसम्पूर्णं स्नाते निर्मलवर्चसम् ॥ १७ ।
अस्ति किञ्चिन्महत्पापं तव प्रच्छन्नसम्भवम् ।
अस्यां तीर्थप्रभावेण स्नानाद्गच्छति दूरतः ।
कालिञ्जरस्य संस्पर्शाच्छुद्धं देहञ्च दृश्यते ॥ १८ ।
निरूप्य कथयास्माकं यत्ते प्रच्छन्नकिल्बिषम् ।
तीर्थमाहात्म्यभावञ्च दृष्ट्वा पृच्छामि ते हितम् ॥ १९ ।
इति तस्य मुनेः श्रुत्वा त्रिकालज्ञस्य भाषितम् ।
किञ्चिन्नोवाच पृष्टोऽपि एवमेव गतः पुनः ॥ २० ।
तस्यामासीत्* स एकान्ते तान्तु पप्रच्छ सादरम् ।
का त्वं कस्यासि सुभगे कश्च देशः प्रियंवदे ।
किं तत्कारणमुद्दिश्य वसस्यत्र सुखं सदा ॥ २१ ।

---

* तस्यां रात्र्यामिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इति निर्बन्धपृष्टा सा किञ्चिन्नोवाच तम्प्रति ।
पुनः पुनश्च पप्रच्छ सा प्रोवाच न किञ्चन ॥ २२ ।
किञ्चित्कालं समास्थाय तेनोक्तं हि प्रियाम्प्रति ।
त्यच्यामि हि प्रियान् प्राणान्यदि सत्यं न वच्यसि ॥ २३ ।
निर्बन्धं तस्य तज्ज्ञात्वा दुःखेनोवाच तम्प्रति ।
पितरौ भ्रातरश्चेति देशं ज्ञातिं ततः कुलम् ॥ २४ ।
पञ्चालनगरी रम्या गङ्गायाश्चोत्तरे तटे ।
तस्यां तौ पितरौ मह्यं* वसतश्च यदृच्छया ॥ २५ ।
दुर्भिक्षपीड़िते राष्ट्रे गतौ तौ दक्षिणापथम् ।
नर्म्मदादक्षिणे कूले ब्राह्मणानां पुरोत्तमे ॥ २६ ।
तस्मिन् स्थाने पितुर्मह्यं पञ्च पुत्त्रा मया सह ।
जातास्तेषामहं षष्ठी कनिष्ठा विधवाऽभवम् ॥ २७ ।
योऽसौ कनिष्ठको भ्राता मम ज्येष्ठश्च पञ्चमः ।
बाल एव गतो देशं धनतृष्णाप्रलोभितः ॥ २८ ।
तस्मिन् गतेऽथ पितरौ कालधर्म्ममुपेयतुः ।
तीर्थेऽस्मिन्नस्थिपातार्थमहं सार्थैः सहागता ॥ २९ ।
अत्र स्नानपरा नित्यं देवब्राह्मणवन्दनम् ।
कुर्व्वन्ती वशमापन्ना आसां यस्या ममेदृशम् ।
आश्रिता कुलटाधर्म्मं कुलनाशो मया कृतः ॥ ३० ।
कुलद्वये† च पुरुषा एकविंशतिसंख्यया ।

---

* मम स्थाने मह्यमिति आर्षम् । † कुलटयेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नीता नरकमतुल्यं मया पापिष्ठया भृशम् ॥ ३१ ।
एवं सा तस्य तत्सर्व्वं कथयित्वा तिलोत्तमा ।
रुरोद सुस्वरं दीना स्मृत्वा पूर्व्वं कुलं वरम् ।
विलप्य बहुधा रात्रौ संस्मृत्य स्वं विचेष्टितम् ॥ ३२ ।
तस्या विलपितं श्रुत्वा स्त्रीजनः स तदागतः ।
सान्त्वयामास तां बालां किं भद्रे रुदितं तव ॥ ३३ ।
एतच्छ्रुत्वा स पाञ्चाल्योमूर्च्छितो धरणीं गतः ।
ताः स्त्रियस्तां समाश्वास्य पाञ्चाल्यं परिवार्य्य च ।
तैस्तैरुपायैर्विविधैर्जीवयित्वा च तं नरम् ।
लब्धप्राणन्तु तं दृष्ट्वा पप्रच्छुर्मोहकारणम् ॥ ३४।३५ ।
ततस्तेन सवृत्तान्तं कथितञ्च कुलं महत् ।
तिलोत्तमासहायानां स्त्रीणामग्रे सविस्तरम् । ३६ ।
ततः स विमना जातो अगम्यागमनेन च ।
प्रायश्चित्ते मतिरभून्निर्व्विण्णस्य दुरात्मनः ॥ ३७ ।
ब्रह्महा च सुरापश्च* ब्राह्मणो यदि जायते ।
प्रायश्चित्तं विनिर्द्दिष्टं मुनिभिर्देहनाशनम् ॥ ३८ ।
मातरं गुरुपत्नीञ्च स्वसारं पुत्रिकां बधूम् ।
गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥ ३९ ।
ब्रह्मघ्नश्च सुरापश्च स्त्रीघ्नश्च गुरुतल्पगः ।

---

* सुरापी चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अगम्यागमनङ्कृत्वा एषां स समतामियात् ॥ ४० ।
इति श्रुत्वा तु पाञ्चाली ज्येष्ठभ्रातरमेव तम् ।
द्विजेभ्यः प्रददौ सर्व्वमङ्गलग्नं विभूषणम् ॥ ४१ ।
रत्नं वस्त्रं धनं धान्यं यत्किञ्चित्तत्र संस्थितम् ।
तत्सर्व्वं ब्राह्मणेभ्यश्च दत्त्वाशेषं ददौ धनम् ॥ ४२ ।
कालिञ्जरस्य भूषार्थमारामार्थं विशेषतः ।
कृष्णगङ्गोद्भवे तीर्थे चितां कृत्वा विधानतः ।
आत्मनश्च विशुद्ध्यर्थं प्रजज्वाल हुताशनम् ॥ ४३ ।
इति निश्चित्य तत्रैव स्नात्वा देवं प्रणम्य च ।
पञ्चालोऽपि विधानेन नमस्कृत्य मुनिं गुरुम् ।
सुमन्तुञ्च महाभागमुपविश्याग्रतश्च सः ।
मरणायोपयोग्यानि कृत्वा कर्म्माणि तत्र च ।
माथुरान् स समाहूय दत्त्वा दानानि सर्व्वशः ।
क्रीत्वा ग्रामांश्च तत्रैव ब्राह्मणेभ्यो ददौ तदा ॥ ४४।४५।४६।
ईशावास्यं जपं दिव्यं जापकेभ्यः शृणोति च ।
तेभ्योऽपि प्रददौ द्रव्यं सत्रार्थञ्च विभागशः ॥ ४७ ।
और्द्ध्वदेहिकभागार्थं कल्पयित्वा यथाविधि ।
स्नात्वा तीर्थे च कृष्णस्य देवं दृष्ट्वा प्रणम्य च ।
कालिञ्जरस्य पूजार्थं सत्रार्थम्परिकल्प्य च ।
देवालयञ्च तत्रैव कृत्वा सन्दिश्य सार्थकान् ।
सुमन्तोः प्रवरस्याथ पादौ जग्राह धर्म्मवित् ॥ ४८।४९ ।
देव ज्ञानञ्च ते दिव्यमद्भुतं लोमहर्षणम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अगम्यागमनादेव* पापं जातं मम प्रभो ॥ ५० ।
आगतोऽहं यदारभ्य मथुरायां ततो गुरो ।
भगिन्या सह संयोगो जातोऽयं कुलनाशकः ॥ ५१ ।
त्वया निर्म्मलदृष्ट्या च वीक्षितोऽहं पुरा मुने ।
क्रमयो मम गात्रात्तु निर्गच्छन्तो हि नित्यदा ।
कृष्णगङ्गाप्रभावेण पुनर्निर्म्मलताङ्गतम् ।
तत्सर्व्वं हि त्वया दृष्टं पृष्टश्चाहं पुनः पुनः ।
तत्सत्यं मम सञ्जातमगम्यागमपातकम् ॥ ५२।५३ ।
तत्पापस्य विशुद्ध्यर्थं देहत्यागङ्करोमि वै ।
अनुज्ञां देहि भो स्वामिंस्तव पादाभिवन्दये ॥ ५४ ।
विश्राव्य तस्य तत्पापं† चितां दीप्य घृतोचिताम् ।
प्रविष्टुकामं तत्राग्नौ खे प्रोवाचाशरीरिणी ॥ ५५ ।
मैवङ्कार्षीः साहसञ्च विपाप्मानौ सतश्च वः‡ ।
कस्माद्वा कस्य सन्त्रासान्मरणे कृतनिश्चयौ ॥ ५६ ।
यत्र कृष्णस्य सञ्चारः क्रीड़ितञ्च यथासुखम् ।
चक्राङ्कितपदा तेन स्थानं ब्रह्मसमं शुभम् ॥ ५७ ।
अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति ।
तीर्थे च यत्कृतं पापं वज्रलेपो भविष्यति ॥ ५८ ।
द्वावेतौ च यथावश्यं गङ्गासागरसङ्गमे ।

---

* अगम्यागमनादेवमिति (ग)। † एवं विश्राव्य तत्पापमिति (ग)। ‡ विपाप्मानौ सतश्च व इति आर्षः प्रयोगः, विपाप्मानौ युवां यत एवं कृते साधु स्यात्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सकृदेव नरः स्नात्वा मुच्यते ब्रह्महत्यया ॥ ५९ ।
पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात् ।
तत्पञ्चतीर्थस्नानेन समन्तात्स्यन्न संशयः ॥ ६० ।
एकादश्याञ्च विश्रान्तौ द्वादश्यां सौकरे तथा ।
त्रयोदश्यां नैमिषे च प्रयागे च चतुर्द्दशीम् ।
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते ।
कालेष्वेषु नरः स्नात्वा सर्व्वपापं व्यपोहति ॥ ६१।६२ ।
मथुरायाञ्च तीर्थेभ्यो विश्रान्तः पञ्चसंज्ञके ।
सरस्वत्यामसिकुण्डे तथा कालिञ्जरस्य च ।
पञ्चतीर्थाभिषेकाच्च यत्फलं लभते नरः ।
कृष्णगङ्गादशगुणं लभते च दिने दिने ॥ ६३।६४ ।
ज्ञानतोऽज्ञानतो वापि यत्पापं समुपार्ज्जितम् ।
सुकृतं दुष्कृतञ्चापि मथुरायां प्रणश्यति ॥ ६५ ।
वराहेण पुरा चेदं पृथिव्यै कथितं शुभम् ।
तीर्थानाङ्गुणमाहात्म्यं महापातकनाशनम् ॥ ६६ ।
सर्व्वदेवमयो योऽसौ सर्व्ववेदमयस्तथा ।
अनन्तश्चाप्रमेयश्च यस्य चान्तो न विद्यते ॥ ६७ ।
यस्य श्रोत्रैकदेशे तु आकाशो लेशमात्रकः ।
विलीनो नैव ज्ञायेत तस्य देवस्य का कथा ॥ ६८ ।
तथा नयनयोः प्रान्ते तेजो लीनन्न दृश्यते ।
निःश्वासे च विलीनोऽसौ वायुर्नष्टो न दृश्यते ॥ ६९ ।
खुराग्रेषु तथा लीनाः समुद्राः सप्त च प्रभोः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दृश्यन्ते स्वेदसङ्काशा नाममात्रा यथा पुरा ॥ ७० ।
रोमकूपान्तरे लग्ना सशैलवनकानना ।
नष्टा पृथ्वी न लभ्येत तस्य देवस्य कोऽधिकः ॥ ७१ ।
सोऽत्र तीर्थपरित्राणं कुर्व्वन्देवः स्वयम्प्रभुः ।
वराहः संस्थितः साक्षात्पुराणं येन सूचितम् ॥ ७२ ।
पृथिव्याः सर्व्वसन्देहान् स्फोटयामास योऽव्ययः ।
तस्य सन्दर्शनादेव सर्व्वपापविवर्ज्जितः ।
तत्क्षणादेव जायेत नात्र कार्य्या विचारणा ॥ ७३ ।
ज्यैष्ठशुक्लस्य नवम्यां स्नात्वा गङ्गोदके नरः ।
शूकरे तु त्रिरात्रञ्च* मानवोदीपदः सकृत् ।
दत्त्वा दानं यथाशक्त्या सर्व्वपापैः प्रमुच्यते ॥ ७४ ।
कलिञ्जरे च द्वादश्यां स्नात्वा पूज्य† च देवताम् ।
द्वादशादित्यसङ्काशो विमाने च समास्थितः ।
विष्णुना समनुज्ञातो विष्णुलोके महीयते ॥ ७५ ।

वराह उवाच ।

एवं सुखदशब्देन देववाण्या प्रचोदितः‡ ।
पाञ्चालसंज्ञकस्तत्र सुमन्तुं पर्य्यपृच्छत ।
अस्मद्गुरुः पिता त्वञ्च ब्रूहि किङ्करवाणि वै ॥ ७६ ।
पापकालम्भनं मे स्यादुताहो तीर्थसेवनम् ।
त्रिरात्रं कृच्छ्रपाराकं चान्द्रायणमथापि वा ।
तव पादाङ्किते वापि स्थित्वा मोक्षमवाप्नुयाम् ॥ ७७ ।

* शूकरेऽपि त्रिरात्रञ्चेति (ग)। † पूजयित्वेति साधु। ‡ प्रबोधित इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सुमन्तुरुवाच ।

आकाशभारती यत्तु तत्सत्यं नानृतं क्वचित्* ।
मया प्रत्यक्षतः पूर्व्वं तव गात्रेषु पातकम् ।
दिने दिने च स्नानात्प्राक् प्रतिगच्छति नित्यशः ।
आश्रमे त्वं स्थितश्चात्र निर्म्मलश्च शशी यथा ॥ ७८।७९ ।
तिष्ठोपरमितः† पापाद्यावत्कालञ्च जीवसि ।
इयन्तु भगिनी पापादुपावृत्ता सती परम् ।
सगतिश्चं विपापा च भविष्यति न संशयः ॥ ८० ।

वराह उवाच ।

एवं प्रभावस्तीर्थस्य मथुरायां वसुन्धरे ।
कृष्णगङ्गोद्भवस्यापि तथा कालिञ्जरस्य च ॥ ८१ ।
शूकरस्य च माहात्म्यं यथा ते वर्णितं पुरा ।
यः शृणोति वरारोहे श्रद्धया परया युतः ।
पठते प्रातरेवापि न स पापेन लिप्यते ॥ ८२ ।
सप्तजन्मकृतं पापं तस्य सर्व्वं व्यपोहति ।
फलञ्च गोशतस्यापि दत्तस्य समवाप्नुयात् ।
अमृतत्वञ्च लभते स्वर्गलोकञ्च गच्छति ॥ ८३ ।

इति वराहपुराणे कृष्णगङ्गोद्भवमाहात्म्यं नाम
षट्सप्तत्यधिकशततमोऽध्यायः ।

---

* आकाशवाग्वदति यत्तत्सत्यमिति (ग) । † उपरत इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

शृणु चान्यद्वरारोहे कृष्णस्यान्यद्विचेष्टितम् ।
द्वारकां वसमानस्य साम्बशापादिकं शृणु ॥ १ ।
सुखासीनस्य कृष्णस्य पुत्त्रदारसुतैः सह ।
आगतो नारदस्तत्र यदृच्छागमनो मुनिः ॥ २ ।
पाद्यमर्घ्यञ्चासनञ्च मधुपर्कं सभाजनाम् ।
गाञ्च दत्त्वा यथान्याय्यं कृतं संवादमुत्तमम् ॥ ३ ।
एकान्ते प्राप्य कृष्णञ्च विज्ञप्तिमकरोत्प्रभुः ।
कृष्ण किञ्चिद्वक्तुकामस्तत्त्वं शृणु महामते* ॥ ४ ।
शाम्बनामा तव पुत्त्रो† युवा वाग्मी तु रूपवान् ।
स्पृहणीयः सदा कान्तः स्त्रीजनस्य सुरेश्वर ॥ ५ ।
एतास्तु वरनार्य्यो वै क्रीड़ार्थं हि पुरेश्वरः ।
देवयोन्यो ददुस्तुभ्यं सहस्राणि च षोड़श ।
शाम्बं दृष्ट्वा च सर्व्वासां क्षुभ्यते च मनः प्रभो ॥ ६ ।
एतत्तु ब्रह्मलोके च गीयते दैवतैः स्वयम् ।
त्वत्प्रियार्थं समायातः कथितुं‡ ते सुरोत्तम ॥ ७ ।
श्रूयते चार्थविद्रूपः श्लोको द्वैपायनेन वै ।
कृतिमतः स्वर्गवासो नरकस्तद्विपर्य्ययात् ॥ ८ ।

---

* वदामि ते इति (ग) । † अत्र छन्दोदोषः, तव सुत इति कृते तु न दोषः ।
‡ कथयितुमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुण्यरूपन्तु यत्कर्म्म दिशो भूमिञ्च संस्पृशेत् ।
यावत्स शब्दो भवति* तावत्पुरुष उच्यते ॥ ६ ।
पुरुषश्चाविनाशी च कथ्यते शाश्वतोऽव्ययः ।
नरके पुरुषः प्रोक्तो विपरीतो मनीषिभिः ॥ १० ।
तस्माच्छाम्बं समाहूय तथा देवीगणञ्च तम् ।
आसनेषूपविष्टानां तासां चोभञ्च तत्त्वतः ।
लक्षयिष्याम्यहं सर्व्वं सत्यञ्चासत्यमेव च ॥ ११ ।
तावत्सभ्यासनान्येव स्वास्तीर्य्य च विभागशः ।
सर्व्वास्तासु समाहूय आसने चोपवेश्य च ।
पश्चाच्छाम्बः समायातस्तस्याग्रे करसम्पुटम् ।
कृत्वा स्थितो मुहूर्त्तन्तु किमाज्ञापयसि प्रभो ॥ १२।१३ ।
दृष्ट्वा रूपमतीवास्य साम्बस्यैव वरस्त्रियः ।
चुक्षुभुः सकला देव्यः कृष्णस्यैव तु पश्यतः ॥ १४ ।
उत्तिष्ठत प्रियाः सर्व्वा गच्छत स्वं निवेशनम् ।
कृष्णवाक्यात्तदा देव्यो जग्मुः स्वं स्वं निवेशनम् ॥ १५ ।
शाम्बस्तत्रैव संतस्थौ वेपमानः कृताञ्जलिः ।
स कृष्णो नारदं वीक्ष्य लज्जयावाङ्मुखोऽभवत् ॥ १६ ।
कृष्णस्तु कथयामास नारदाय सविस्तरम् ।
स्त्रीस्वभावं चरित्रञ्च आश्चर्य्यं पापकारकम् ॥ १७ ।
क्षणं नास्ति रहो नास्ति नास्ति कृत्ये विभावना ।

---

* भवितेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेन नारद नारीणां सतीत्वमुपजायते ॥ १८ ।
एकवासास्तथा गौरी श्यामा वा वरवर्णिनी ।
मध्यगता प्रगल्भा च वयोऽतीतास्तथा स्त्रियः ।
सुरूपं पुरुषं दृष्ट्वा चरन्ति मुनिसत्तम ।
स्वभाव एष नारीणां शाम्बस्य शृणु कारणम् ॥ १९।२० ।
अतीव मानी तेजस्वी धार्म्मिकोऽतिगुणान्वितः ।
रूपकारणमुद्दिश्य गतः चोभङ्गयच्चन ॥ २१ ।
नारदस्त्वेवमेवञ्च प्रतिपूज्य हरेर्वचः ।
अन्तरज्ञ उवाचेदं शाम्बशापकरं तथा ॥ २२ ।
यथा एकेन चक्रेण रथस्य न गतिर्भवेत् ।
पुरुषास्वादनाच्चैवं चरन्ति सततं स्त्रियः ।
पुंसः सुदृष्टिपातेन कृतकृत्या भवन्ति ताः ॥ २३ ।
प्रद्युम्नं वीक्ष्य नार्य्यस्तु लज्जामापुः सुपुष्कलाम् ।
शाम्बं* दृष्ट्वैव ताः सर्व्वा अनङ्गेन प्रपीड़िताः ।
उद्दीपनविभावोऽयं तासां गन्धादिकं यथा ।
तस्माच्छाम्बस्तु दुष्टात्मा तव स्त्रीणां विनाशकृत् ॥ २४।२५ ।
सत्वलोके प्रवादो यस्तव जातो दुरत्ययः ।
मया श्रुतस्तु लोकेभ्यो ब्रह्मर्षिभ्यो मुहुर्मुहुः ।
शाम्बत्यागात्प्रमार्ष्टुं त्वमयशः कीर्त्तिनाशकम् ।
कर्त्तुमर्हस्यमेयात्मन्मया ते कथितं हितम् ॥ २६।२७ ।

---

* क्वचित्पुस्तके साम्ब इति शब्दरूपं दृश्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इत्युक्त्वा वचनं तत्र नारदो मौनमास्थितः ।
कृष्णः शशाप शाम्बन्तु विरूपस्त्वं भविष्यसि ॥ २८ ।
शापयुक्तः स शाम्बस्तु कुष्ठयुक्तोऽभवत्क्षणात् ।
शरीरात्तु गलद्रक्तं पूतिगन्धयुतं सदा ।
पशुवत्कर्तितो यस्तु तद्वद्देहोऽस्य दृश्यते ॥ २९ ।
ततस्तु नारदेनैव शाम्बशापविनाशकः ।
समादिष्टो महाधर्म्म आदित्याराधनम्प्रति ॥ ३० ।
शाम्ब शाम्ब महाबाहो शृणु जाम्बवतीसुत ।
उदयाचले च पूर्व्वाह्णे* उद्यन्तन्तु विभावसुम् ।
नमस्कुरु यथान्यायं वेदोपनिषदादिभिः ।
त्वयोदितं रविः श्रुत्वा तुष्टिं यास्यति नान्यथा ॥ ३१।३२ ।

शाम्ब उवाच ।

अगम्यागमनात्पापाद्ग्रस्तो यः पुरुषो भवेत् ।
तस्य देवः कथं तुष्टो भविष्यति स वै मुने ॥ ३३ ।

नारद उवाच ।

भविष्यत्पुराणमिति† च तव वादाद्भविष्यति ।
ब्रह्मलोके पठिष्यामि ब्रह्मणोऽग्रे त्वहं सदा ।
सुमन्तुर्मर्त्यलोके च मनोः प्रकथयिष्यति ॥ ३४ ।

शाम्ब उवाच ।

कथम्पूर्व्वाचले गत्वा मांसपिण्डोपमः प्रभो ।

---

* अत्रैकाक्षराधिक्याच्छन्दोदोषः । † भविष्यं पुराणमिति चेति (ग) । अत्र छन्दोदोषः, 'भविष्याख्यं पुराणञ्च तव वादाद्भविष्यति' इत्येवं कृते तु न दोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्वत्प्रसादान्महद्दुःखं प्राप्तस्त्वहमकल्मष: ॥ ३५ ।

नारद उवाच।

यथोदयाचले देवमाराध्य लभते फलम्।
मथुरायां तथा गत्वा षट्सूर्य्ये लभते फलम् ॥ ३६ ।
मध्याह्ने च तथा देवं फलप्रियमकल्मषम्।
मथुरायाञ्च मध्याह्ने मध्यन्दिनरवौ तथा।
अस्तङ्गते तथा देवं सद्यो राज्यफलं भवेत् ॥ ३७ ।
मथुरायां तथा पुण्यमुदयास्तं रवेर्जपम्।
मध्याह्ने प्रयतो वाग्मिः* जपन्मुच्यति† पातकात् ॥ ३८ ।
कृष्णगङ्गोद्भवे स्नात्वा सूर्य्यमाराध्य यत्नतः।
सर्व्वपापविनिर्मुक्तः कुष्ठादिभ्यो विमुच्यते ॥ ३९ ।

वराह उवाच।

ततः शाम्बो महाबाहुः कृष्णाज्ञप्तो ययौ पुरीम्।
मथुरां मुक्तिफलदां रवेराराधनोत्सुकः ॥ ४० ।
नारदोक्तेन विधिना शाम्बो जाम्बवतीसुतः।
षट्सूर्य्यात् पूजयामास उदयन्तं दिवाकरम् ॥ ४१ ।
कृत्वा योगेन आत्मानं शाम्बस्याग्रे रविस्तदा।
वरं वृणीष्व भद्रन्ते मद्व्रतख्यापनाय च।
यस्तोषितो नारदेन तद्वदस्व ममाग्रतः ॥ ४२ ।
शाम्ब पञ्चाशकैः श्लोकैर्वैदगुह्यपदाक्षरैः।

---

* वाग्मीति (ग)। † मुच्यते इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यः स्तुतोऽहं त्वया वीर तेन तुष्टोऽस्मि ते सदा ॥ ४३ ।
स्पृष्टो देवेन सर्व्वाङ्गैः तत्क्षणाद्दीप्तसच्छविः ।
व्यक्ताङ्गावयवः साक्षाद्द्वितीयोऽभूद्रविर्यथा ॥ ४४ ।
मध्याह्ने याज्ञवल्क्यस्य यज्ञं माध्यन्दिनीयकम् ।
अध्यापयच्छाम्बसहितो रविर्मध्यन्दिनोऽभवत् ॥ ४५ ।
वैकुण्ठपश्चिमे पार्श्वे तीर्थं माध्यन्दिनीयकम् ।
स्नात्वा माध्यन्दिनं दृष्ट्वा सर्व्वपापैः प्रमुच्यते ॥ ४६ ।
उदयास्ते ततो देवः शाम्बेन सहितो विराट् ।
सायाह्ने कृष्णगङ्गाया दक्षिणे संस्थितस्तदा ॥ ४७ ।
तत्र दृष्ट्वा तु सायाह्ने रविमस्तोदयं प्रभुम् ।
सर्व्वपापविशुद्धात्मा परं ब्रह्माधिगच्छति ॥ ४८ ।

वराह उवाच ।

एवं शाम्बस्य तुष्टेन मध्याह्ने तु नभस्तलात् ।
द्विधाकृतात्मयोगेन शाम्बकुष्ठमपोहत ।
शाम्बप्रख्याततीर्थे तु तत्रैवान्तरधीयत ॥ ४९ ।
शाम्बस्तु सह सूर्य्येण रथस्थेन दिवानिशम् ।
रविं पप्रच्छ धर्म्मात्मा पुराणं सूर्य्यभाषितम् ॥ ५० ।
भविष्यत्पुराणमिति ख्यातङ्कृत्वा पुनर्नवम् ।
शाम्बः सूर्य्यप्रतिष्ठाञ्च कारयामास तत्त्ववित् ॥ ५१ ।
उदयाचले च संश्रितो यमुनायाश्च दक्षिणे ।
मध्ये कालप्रियं देवं मध्याह्ने स्थाप्य चोत्तमम् ।
मूलस्थानं ततः पश्चादस्तमानाचले रविम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्थाप्य त्रिमूर्त्तिं शाम्बस्तु प्रातर्मध्यापराह्णिकम्।
मथुरायां तथा चैकं स्थाप्य शाम्बो वसुन्धरे।
स्वनाम्ना स्थापयामास पुराणविधिना स्वयम्॥५२।५३।५४।
एवं शाम्बपुरं नाम मथुराणां कुलेश्वरम्।
रथयात्रां तथा कृत्वा रविणा कथिता यदा।
माघमासस्य सप्तम्यां देवं शाम्बपुरं नराः।
रथयात्रां प्रकुर्व्वन्ति सर्व्वद्वन्द्वविवर्ज्जिताः।
गच्छन्ति तत्पदं शान्तं सूर्य्यमण्डलभेदकम्॥ ५५।५६।
एतत्ते कथितं देवि शाम्बशापसमुद्भवम्।
पापप्रशमनाख्यानं महापातकनाशनम्॥ ५७।

इति वराहपुराणे शाम्बवचनत्रयसूर्य्यप्रतिष्ठानं नाम

सप्तसप्तत्यधिकशततमोऽध्यायः।

अष्टसप्तत्यधिकशततमोऽध्यायः।

वराह उवाच।

शत्रुघ्नेन पुरा घोरो लवणः सूदितो यथा।
द्विजानुग्रहकामार्थमन्नमुग्रस्वरूपिणम्॥ १।
द्वादश्यां मार्गशीर्षस्य उपोस्य नियतः* शुचिः।

---

* उपस्यभियत इति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यः करोति वरारोहे शत्रुघ्नचरितं यथा ।
द्विजानां प्रीणनङ्कृत्वा स्वधान्नपटुभोजनैः* ॥ २ ।
लवणस्य वधादेव शत्रुघ्नस्य† शरीरके ।
हर्षस्तु सुमहाञ्जातो रामस्याक्लिष्टकर्म्मणः ॥ ३ ।
अयोध्यायाः समायातो रामः सबलवाहनः ।
महोत्सवञ्च कर्त्तुं स शत्रुघ्नस्य महात्मनः ॥ ४ ।
सितामाग्रहणीं प्राप्य मथुरां लवणान्तकः ।
एकादश्यां सोपवासः स्नात्वा विश्रान्तिसंज्ञके ।
कृत्वा महोत्सवं तत्र कुटुम्बसहितः पुरा ।
तस्मिन् भुक्त्वा यथाकामं ब्राह्मणान्वै प्रतर्प्य च ॥ ५।६ ।
तस्मिन्नहनि तत्रैव यः कुर्य्यात्स महोत्सवम् ।
सर्व्वपापविनिर्मुक्तः पितृभिः सह मोदते ।
स्वर्गलोके चिरङ्कालं यावत्स्थित्यन्तजन्मनः ॥ ७ ।

इति वराहपुराणे मथुरामाहात्म्ये शत्रुघ्नलावणे रामतीर्थयात्रायाम्
अष्टसप्तत्यधिकशततमोऽध्यायः ।

---

* बहुभोजनैरिति (ग) ।

† शत्रुघ्नश्चेति बहुषु पाठः । स चासङ्गत इव प्रतिभाति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऊनाशीत्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

तवापराधाद्देवेश वर्ज्या ये वैष्णवेन च ।
निरपराधो मनुजः सापराधश्च जायते ॥ १ ।
कर्म्मणाचरणैर्नैवाकरणेन जुगुप्सितम् ।
तच्च पूजाफलं सर्व्वं नश्यते तद्वदस्व मे ॥ २ ।

वराह उवाच ।

कर्म्मणा मनसा वाचा ये पापरुचयो जनाः ।
भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥ ३ ।
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च ।
सूतक्युदक्याप्रेक्षा च स्पर्शनं मेहनं तथा ॥ ४ ।
अभाष्यभाषणङ्घोषं पिण्याकस्य च भक्षणम् ।
रक्तपारक्यमलिनवस्त्रधारित्वनीलिजम् ॥ ५ ।
गुरोश्चालीकनिर्बन्धः पतितान्नस्य भक्षणम् ।
अभक्ष्यभक्षणञ्चैव तुन्दुलीयविभीतकम् ॥ ६ ।
अदानन्तु वरान्नस्य जालपाद्वराकयोः ।
भक्षणं देवतागारे सोपानत्कोपसर्पणम् ॥ ७ ।
तथैव देवपूजायां निषिद्धकुसुमार्च्चनम् ।
अनुत्ताय्य च निर्म्माल्यं पूजा क्षीणान्धकारयोः ॥ ८ ।
पानं सुरायाः देवस्य अन्धकारे प्रबोधनम् ।
तावत्कर्म्मार्च्चने विष्णोरनमस्करणं तथा ॥ ९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अपराधास्त्रयस्त्रिंशत्समाख्याता मया धरे।
एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपश्यति ॥ १० ।
दूरस्थो न नमस्कारं कुर्य्यात्पूजा तु राक्षसी।
एकरात्रं द्विरात्रं वा त्रिरात्रं स्नानमेव च।
सवासाः पञ्चगव्याशी मलसंवस्त्रकं क्रमात्* ॥ ११ ।
नीलीरक्षापनोदार्थं गोमयेन प्रघर्षणम्।
प्राजापत्येन शुद्धिः स्यान्नीलीवस्त्रस्य धारणात् ॥ १२ ।
चान्द्रायणद्वयं कुर्य्याद्धरीः क्षयितमुत्तमम्।
चान्द्रायणं पराकञ्च पतितान्नस्य भक्षणात् ॥ १३ ।
चान्द्रायणं पराकञ्च प्राजापत्यं तथैव च।
गोप्रदानञ्च भोज्यञ्च अभक्ष्यस्य च भक्षणे।
उपवासस्तु पञ्चाहं पञ्चगव्येन शुद्ध्यति ॥ १४ ।
सोपानत्कश्चरेत्पादकृच्छ्रस्य द्विरभोजनम्।
पुष्पाभावेऽर्चनं स्नानं देवस्पर्शञ्च कारयन्।
अनिर्माल्यनमस्कारं स्नानं पञ्चामृतेन तु ॥ १५ ।
सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम्।
तथैव द्वादशाब्दन्तु प्राजापत्यत्रयञ्चरेत्।
ब्रह्मकूर्चेन शुद्धिः स्याद्गोप्रदानत्रयेण च ॥ १६ ।
त्रयाणामेकरात्रेण पञ्चामृतनिषेवणात्।
मुच्यते त्वपराधैस्तु तथा विष्णोः स्तवं पठन् ॥ १७ ।

---

* मलवस्त्रान्तिकं क्रमादिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं गुह्यङ्किमेतच्छ्रोतुमिच्छसि।
पुनः पुनरुवाचेदं देवदेवो जनार्द्दनः।
मोहङ्गता तु शृणुते* नष्टसंज्ञेव लक्ष्यते॥ १८।
मुहूर्त्तमात्रे सा देवी संज्ञां प्राप्येदमब्रवीत्।
अपराधे कृते देव सूतकी हि प्रजायते।
प्रायश्चित्तानि भूरीणि कृतानि तु नरैः सदा।
तेन मे मनसो मोहो दुःखदो यः समभ्ययात्॥ १९।२०।
अस्ति कश्चिदुपायोऽत्र येन त्वं नृप तुष्यसि।
पूजितः सफलश्चासि अपराधविशोधनम्॥ २१।

वराह उवाच।

संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात्।
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत्॥ २२।
अनयोस्तीर्थयोरेवं यः सेवेत सकृन्नरः।
सहस्रजन्मनि जातानपराधाञ्जहाति सः॥ २३।
स्नानात्पानात्तथा ध्यानात्कीर्त्तनाद्धारणात्तथा।
श्रवणान्मननाच्चैव दर्शनाद्याति पातकम्॥ २४।

पृथिव्युवाच।

मथुरा सूकरश्चैव द्वावेतौ तव वल्लभौ।
विशिष्टमनयोः किञ्च सत्यं ब्रूहि सुरेश्वर॥ २५।

---

* शृणोतीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच ।

पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
कुब्जाम्रकं प्रशंसन्ति सदा मद्भावभाविताः ॥ २६ ।
तस्मात्कोटिगुणङ्गुह्यं सौकरं तीर्थमुत्तमम् ।
एकाहं मार्गशीर्षाच्च द्वादश्यां सितवैष्णवम् ॥ २७ ।
गङ्गासागरिकं नाम पुराणेषु च पठ्यते ।
गुह्याद्गुह्यतरङ्गुह्यं माथुरं मम मण्डलम् ।
फलम्परार्द्धगुणितं सिततीर्थान्न संशयः ॥ २८ ।
अटित्वा सर्व्वतीर्थानि कुब्जाम्रादीनि नित्यशः ।
अघौ* विनश्यते चिप्रं मथुरामागतस्य च ॥ २९ ।
विश्रमणाच्च विश्रान्तिस्तेन संज्ञा वरा मम ।
सारात्सारतरं स्नानं गुह्यानां गुह्यमुत्तमम् ।
गतिरन्वेषणीयानां मथुरा परमा गतिः ॥ ३० ।
कुब्जाम्रके सौकरे च मथुरायां विशेषतः ।
विना सांख्येन योगेन मुच्यते नात्र संशयः ॥ ३१ ।
या गतिर्योगयुक्तस्य ब्राह्मणस्य मनीषिणः ।
सा गतिस्त्यजतः प्राणान्मथुरायां न संशयः ॥ ३२ ।
एतत्ते कथितं सारं मया सत्येन सुव्रते ।
न तीर्थं मथुराया हि न देवः केशवात्परः ॥ ३३ ।

इति वराहपुराणे अपराधप्रायश्चित्तमाहात्म्यं नाम
ऊनाशीत्यधिकशततमोऽध्यायः ।

---

* अघम इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अशीत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवच्चामि पितृणां तृप्तिकारकम् ।
ध्रुवतीर्थे पुरा वृत्तं तच्छृणुष्व वसुन्धरे ॥ १ ।
अस्यां पुर्य्यान्तु राजासीद्धार्म्मिकः सत्यविक्रमः ।
चन्द्रसेनेति नाम्ना च यज्वा दानहिते रतः ॥ २ ।
तस्य नार्य्यः शते द्वे तु कुलशीलवयोयुते ।
तासां मध्येऽधिका चैका यतिव्रतपरायणा ।
नाम्ना चन्द्रप्रभा चैव वीरसूर्वीरपुत्रका ॥ ३ ।
तस्या दासीशतस्यैका दासी नाम्ना प्रभावती ।
तस्याः परिग्रहास्त्वेकोद्दिष्टाचारविहीनकाः ॥ ४ ।
तस्याः पितृगणाः सर्व्वे अतीताः शतसंख्यया ।
स्वदोषैः पतिताः सर्व्वे नरकं प्रति भामिनि ।
सङ्करो नरकायैव कुलघ्नानां कुलस्य हि ॥ ५ ।
कदाचिदपि तस्याथो भ्रष्टः प्राणिजनो महान् ।
सूक्ष्मः प्राणिसमूहो हि ध्रुवतीर्थे तदापतत् ॥ ६ ।
कृष्णरूपाश्चङ्क्रमन्तो मशकाकारसन्निभाः ।
दृष्टास्ते ऋषिणा तत्र त्रिकालज्ञेन भाविनि* ।
षष्ठान्नकालभोक्ता च पयोव्रतमहात्मना ॥ ७ ।

---

* भामिनि इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मौनव्रतेन सा देवि सूर्य्यगत्या स्थितेन च ।
तस्मिन् क्षणे* न च कृतं व्रतजप्यं विमोहनात् ।
कृपया परिभूतस्य कौतुकेन निरीक्षता ।
चतुर्थांशावशेषश्च दिवसः पर्य्यवर्त्तत ॥ ८।९ ।
एके तत्र समायान्ति पितरो नभसोऽवनिम् ।
अन्ये पूर्व्वोत्तरादेशाद्दक्षिणात्पश्चिमात्तथा ॥ १० ।
केचित् स्वभावतो हृष्टाः केचित्पुत्रैः स्वधाकृताः ।
हृष्टास्तुष्टाः सुपुष्टाङ्गा गच्छन्तो दिवि सङ्घशः ॥ ११ ।
तपस्विनः स्नानरता रूक्षाक्षामशरीरिणः ।
वस्त्रालङ्कारपुष्टाङ्गा हृष्टा गच्छन्ति सङ्घशः ॥ १२ ।
तथाऽपरे नग्नदेहाः सुपुष्टा यान्ति तत्र वै ।
अन्ये यथागतं यान्ति आयान्ति पुनरेव हि ॥ १३ ।
यानैरुच्चावचैः केचिन्नानारूपैः खगैस्तथा ।
समागच्छन्ति गच्छन्ति ईरयन्नाशिषो मुदा ॥ १४ ।
केचिद्यथागता यान्ति क्रुद्धाः शापप्रदायिनः ।
निर्गतोदरसूक्ष्माश्च गच्छन्ति सुविमानिताः ।
सम्मानितास्तथान्ये तु पितरः श्राद्धपूजिताः ॥ १५ ।
महोत्सवमिवालक्ष्य विस्मितो मुनिरुत्थितः ।
गते पितृगणे पुत्राः सकलत्रा गृहान् ययुः ।
निर्ज्जनं ध्रुवतीर्थन्तु हृतवेलमिवाभवत् ॥ १६ ।

---

* तस्मिन्दिने इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्रैकान्ते कृशाङ्गोऽथ क्षुत्क्षामो गतिविह्वलः।
वेपथुः कीटराजस्य पृष्ठलग्न इवोदरः।
उरुचर्म्मास्थिरुक्त्रस्तो* जृम्भमाणो भृशं कृशः।
न वाचा श्रूयते तस्य क्षुद्रपक्षिभिरिवोदिता॥ १७।१८।
को भवान्विकृताकारी वेष्टितो मशकैर्बहु।
न गच्छसि यथास्थानमागतस्तु निरुद्यमः।
यथावत्पृच्छते मह्यङ्कथयात्मविचेष्टितम्॥ १९।
ममाद्य नैत्यकङ्कर्म्मं तीर्थेऽस्मिन्नश्यतेऽनिशम्।
इमानुच्चावचाञ्जन्तूंन्दृष्ट्वा मां मोह आविशत्॥ २०।
त्वां दृष्टिदृक्स्वरूपञ्च क्रिया मे सा गता त्वयि।
विस्रब्धः कथयास्माकं करोमि च हितं तव॥ २१।

जन्तुरुवाच।

त्वहन्निमित्तमद्यैव पितॄणां तृप्तिकारकम्।
ध्रुवतीर्थे च यः श्राद्धं पुनः कुर्य्यात्तिलोदकम्।
तिलतृप्ता दिवं यान्ति पितरस्तेन पुत्रिणः॥ २२।
सोऽहं स्वान्तरिकाद्दत्तस्तृप्त्यर्थस्तु बुभुक्षितः।
योनिसङ्करदोषेण नरकं समुपाश्रितः।
आशापाशशतैर्बद्धः शतवर्षैरिहागतः।
अगतिर्गमने मे स्यात्ते त्रितापैः समागतः॥ २३।२४।
सन्तानैः पुष्टवपुषो दत्तश्राद्धैः कृतोदकैः।

---

* रुक् शब्द इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

बलयुक्ता ययुः स्वर्गं निर्बलस्य कुतो गतिः ॥ २५ ।
येषां सन्ततिरच्चय्या तिष्ठती च प्रजावती ।
ते स्वधापूजितैः पुत्त्रैर्गच्छन्ति परमाङ्गतिम् ॥ २६ ।
अद्य राज्ञस्तु पितरश्चन्द्रसेनस्य पूजिताः ।
दृष्टास्त्वया त्रिकालज्ञ दिव्यदृष्ट्या दिवङ्गताः ॥ २७ ।
ब्राह्मणानाञ्च वैश्यानां शूद्राणां पितरस्तथा ।
प्रतिलोमानुलोमानां शूद्राणां श्राद्धकर्म्मिणाम् ।
सर्व्वेषाञ्च त्वया दृष्टं येषां सन्ततिरव्यया ॥ २८ ।
एवं पृष्टः स विप्रेण कथयामास कारणम् ।
पुनः पप्रच्छ तं जन्तुः कौतूहलसमन्वितः ॥ २९ ।
तवापि सन्ततिस्तात नास्ति दैवाद्यथोचिता* ।
यदि कश्चिदुपायोऽत्र मया तव हितैषिणा ।
वद सर्व्वङ्करिष्यामि† यदि शक्यं भवेन्मम ॥ ३० ।
ततः स कथयामास दुःस्थः पितृगणैर्वृतः ।
इमे ये मम देहे तु भवन्ति मशकाः कृशाः ।
सन्तानप्रचयादेते मम देहं समाश्रिताः ।
तन्तुमन्त्वमहं तेषां मम तन्तुमयी सकृत् ॥ ३१।३२ ।
अस्ति नगर्य्यां मध्ये तु चन्द्रसेनस्य वेश्मनि ।
महिष्याः प्रेषणे नित्यं दासी नाम्ना प्रभावती ॥ ३३ ।

---

* यथोदिता इति (ग) । † करिष्यते इति कर्म्मणि प्रयोगः साधुः, अन्यथा मयेति कर्त्तृपदस्यानन्वयः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्या दासी कर्म्मकरी विरूपनिधिनामतः ।
अस्माकं सन्ततिस्तन्तुस्तस्या श्राद्धकृते वयम् ॥ ३४ ।
आशया बद्धहृदयाः श्राद्धतर्पणहेतवः ।
स्थिता एतावदेवन्तु कालं यास्यामहेऽम्बुधौ ।
नरके त्वप्रतिष्ठे तु निराशाः स्वेन कर्म्मणा ।
श्रुत्वैतत्स त्रिकालज्ञो मोहाविष्टोऽब्रवीदिदम् ॥ ३५।३६ ।
कथं निकृष्टयोन्या यद्दत्तञ्चापद्यते हविः ।
विधिरत्र कथं तस्या येन यूयं सपुत्रिणः ॥ ३७ ।
प्रोवाच स त्रिकालज्ञं ज्ञानक्लिष्टं कृपान्वितम् ।
पूर्व्वकर्म्मविपाकेन यां यां गतिमधोमुखीम् ।
ऊर्द्धां याञ्चापि पितरः पुत्रिणः पुत्रमीहते ॥ ३८ ।
श्राद्धं पिण्डोदकं दानं नित्यनैमित्तिकं तथा ।
नान्या गतिः पितॄणां स्यात्पितरस्तेन पुत्रिणः ॥ ३९ ।

इति स्मृतिः ।

अपि स्यात्सकुलोऽस्माकं यो नो दद्याज्जलाञ्जलिम् ।
नदीषु बहुतोयासु शीतलासु विशेषतः ॥ ४० ।
विशेषात्तीर्थमध्ये तु तिलमिश्रं जलाञ्जलिम् ।
रौप्यजुष्टजलेनाथ* नाभिदघ्ने जले स्थितः ।
दर्भपाणिस्त्रिस्त्रिगोत्रे पितृनाम समुच्चरन् ।
नाम शर्म्म तृप्यत्वेवं स्वधाकारमुदाहरन् ॥ ४१।४२ ।

---

* रौप्यसृष्टजनेनाथेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आदावेकाञ्जलिर्देवं तु निस्रोते तर्पणे स्मृताः ।
देवर्षिपितृणाञ्चैव क्रमाज्ज्ञेयं विचक्षणैः ॥ ४३ ।
तृप्यध्वमिति चान्ते वै मन्त्रं मन्त्रप्रतिक्रियाः ।
उदीरतामङ्गिरस आयन्तु न इत्युत ॥ ४४ ।
पित्रे प्रथमतो दद्यान्मात्रे दद्यात्तथा चरन् ।
गोत्रं माता नाम देवी तृप्यत्स्विवं स्वधोच्चरन् ॥ ४५ ।
एवं मातामहः शर्म्मा गोत्रे पितामहस्तथा ।
ऊर्द्ध्वं पितृभ्यो ये चेह ते पितर इहोच्यते ॥ ४६ ।
मधुवातेत्यृचं तद्वत्पूर्व्ववत्समुदीरयेत् ।
पितामहीं प्रपितामहीं मातृवत्पतिना सह ॥ ४७ ।
एवं मातामहानाञ्च पूर्व्ववत्क्रमशो बुधः ।
नमो व इति मन्त्रेण प्रत्येकं त्रितयं त्रिषु ।
गोत्रोच्चारं प्रकुर्व्वीत असूर्य्यान्नाशयामहे ॥ ४८ ।
गोत्राय पित्रे महाय शर्मणे चेदमासनम् ।
गोत्रायै मात्रे मह्यै तु देव्यै चासनकर्म्मणि ।
गोत्रः पितामहः शर्म्मा गोत्रा मातामही मही ।
अर्घपात्रसङ्कल्पे तु पिण्डदानेऽवनेजने ।
गोत्रस्य पितुर्महस्य शर्म्मणोक्तस्य कर्म्मणि ।
गोत्रायै मातुर्महायै देव्याश्चाक्षयकर्म्मणि ॥ ४९।५०।५१ ।
आवाहने द्वितीया च चतुर्थी पूज्यकर्म्मणि ।
प्रथमा चाशिषि प्रोक्ता दत्तस्याक्षयकारका ।
श्राद्धपक्षे तथा षष्ठी अक्षय्यासनयोः स्मृता ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पितुरक्षय्यकाले तु पितॄणां दत्तमक्षयम् ॥ ५२।५३ ।
एवमेतत्तु पुत्रेण भक्तिपूर्व्वं द्विजेन तु ।
वार्य्यपि श्रद्धया दत्तं तदानन्त्याय कल्पते ॥ ५४ ।
श्रद्धया ब्राह्मणेनैव यथा श्राद्धविधिक्रिया ।
कृत्वा श्राद्धं तु पितरो हृष्टा मुमुदिरे सदा ॥ ५५ ।
जोषमास्व त्रिकालज्ञ गच्छामो नरकाय वै ।
पूर्व्वकर्म्मविपाकेन चिरन्तु वसितुं मुने ॥ ५६ ।
त्रिकालज्ञ उवाच ।
ये मया चागता दृष्टा तीर्थेऽस्मिन्पितरोऽथ वै ।
बहवः स्वस्थमनसो बहवो दुःस्थमानसाः ॥ ५७ ।
पुत्रदत्तं तथा श्राद्धं जग्रासोद्विग्नरूपिणः* ।
मौनेन गच्छतां तेषाङ्किमेतद्वद निश्चयम् ॥ ५८ ।
अगस्तिरुवाच ।
अत्र यन्निश्चयं श्राद्धे पुत्रस्य विफलम्भवेत् ।
नरस्य कारणङ्किञ्चित्तन्मे निगदतः शृणु ॥ ५९ ।
अदेशकाले यद्दत्तं विधिहीनमदक्षिणम् ।
अपात्रे मलिनं द्रव्यं महत्पापाय जायते ॥ ६० ।
अश्राद्धेयमपात्रेयं दुष्टप्रेक्षितमीक्षितम् ।
तिलमन्त्रकुशैर्हीनमासुरं तद्भवेदिति ॥ ६१ ।
वैरोचनाय देवेन वामनेन विभूतये ।

---

* जग्रासेत्येकवचनमार्षं, जग्रसुरिति साधु ।

CC-0. In Public Domain. UP State Museum; Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सच्छूद्रस्य च श्राद्धस्य फलं दत्तं पुरा किल ॥ ६२ ।
तथा दाशरथी रामो हत्वा राक्षसमीश्वरम् ।
रावणं सगणङ्घोरं तुष्टेन सह सीतया ।
श्रुत्वा भक्तिं च राक्षस्यास्त्रिजटायास्त्रिलोककृत् ।
सीतावाक्यप्रतुष्टेन तस्यै प्रादाद्वरं विभुः ॥ ६३ ।
अशुचीनि गृहाण्येव तथा श्राद्धहवींषि च ।
क्रोधाविष्टानि दानानि विधिपात्रयुतानि च ।
पादशौचमनभ्यङ्गप्रतिश्रयमभोजनम् ।
त्रिजटे त्वप्रयच्छामि यच्च श्राद्धमदक्षिणम् ॥ ६४।६५ ।
तथैव शम्भुना दत्तं नागराजाय भक्तितः ।
वासुकये सुतुष्टेन तन्मे निगदतः शृणु ॥ ६६ ।
अनुज्ञाप्य व्रतं जन्तुर्वार्षिकी सकला क्रिया ।
यज्ञस्य योचिता देया दक्षिणा नाददद्विजः ।
वृथाशपथकारी यो देवब्राह्मणसन्निधौ ।
अश्रोत्रियाणि श्राद्धानि क्रिया मन्त्रैर्विहीनका ।
सरात्रिवाससा स्नानं यथासत्त्वस्वरूपतः ।
यः शिष्यो न नमेद्भक्त्या गुरुं ज्ञानप्रदायकम् ।
तथैव प्राकृतं धर्म्ममये गेयं करिष्यतः ।
सर्व्वं तुभ्यं मया दत्तं नागराजाय वार्षिकम् ॥६७।६८।६९।
इत्येतद्वै पुराणेषु सेतिहासेषु पठ्यते ।
तद्दलीककरणं श्राद्धं दानं व्रतं तथा ।
नोपतिष्ठति तेषां वै तेन नग्नादयस्त्वमी ॥ ७० ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मुषिताच्छिद्रकरणैस्तद्दानफलभोक्तृभिः ।
यथा गतास्तथा ते तु श्राद्धे हृतास्तु निष्फलाः ।
मौनव्रतधरा यान्ति पुनः प्राप्यार्थहेतवे ।
एवमेतन्महाप्राज्ञ यन्मात्वं परिपृच्छसि ॥ ७१।७२ ।

त्रिकालज्ञ उवाच ।

षट्काले भोजनं त्वद्य नाहं भोक्तुमिहोत्सहे ।
यावत्तृप्तिर्न ते भूयाद्दृष्ट्वा हन्त स्थिरो भव ।
तावत्कालं प्रतीचस्व यावदागमनं मम ॥ ७३ ।
अस्मिंस्तीर्थे सदैवाहं दिवारात्रमतन्द्रितः ॥ ७४ ।
सोऽहमद्य व्रतं त्यक्त्वा तव कारुण्यपूरितः ।
गत्वाहमानयिष्यामि त्वयोक्तां तां वरां स्त्रियम् ।
अनया कारयिष्यामि श्राद्धन्तु विधिना सह ॥ ७५।७६ ।
एवमुक्त्वा स षष्ठाशी मौनवाक् संययौ द्रुतम् ।
राजा समीपगं दृष्ट्वा अकस्मादागतं ऋषिम् ।
चित्यास्तले विलुलित*पादौ कृत्वा तु मूर्द्धनि ॥ ७७ ।
धन्योऽस्म्यनुगृहीतोऽस्मि यद्भवान्गृहमागतः ।
सदा यत्नं करिष्यामि गृहमागमने तव ।
अद्य मे सफलं जन्म यद्भवांस्त्वमिहागतः ॥ ७८ ।
इदम्पाद्यमिदञ्चार्घ्यं मधुपर्कमिमाञ्च गाम् ।
गृहाण मुनिशार्द्दूल येनाहं शान्तिमाप्नुयाम् ॥ ७९ ।

---

* चित्यास्तले विलुलितौ पादौ कृत्वेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्य तत्प्रतिगृह्याशु स मुनिस्त्वरितोऽब्रवीत् ।
मदीयागमने राजन् शृणु त्वङ्कारणं महत् ।
तच्छ्रुत्वा कुरु तत्सर्व्वं येनाहं तोषितोऽभवम् ॥ ८० ।
एवमुक्तस्तु राजर्षिरब्रवीत्तं तपोधनम् ।
किं तद्वद यथा कार्य्यं येन सिद्धिर्भवेदिदम् ॥ ८१ ।

त्रिकालज्ञ उवाच ।

या सा ते राजमहिषी तामानय वराननाम् ।
तस्या दासी वरारोहा प्रभावत्यपि विश्रुता ।
सापि देव्या तु सहिता आयातु मम सन्निधौ ॥ ८२ ।
ततश्चान्तःपुराद्देवी सदासी तत्र चागता ।
क्षितौ विलुलिता साध्वी प्रणाममकरोदृषेः ॥ ८३ ।
समासीनाञ्च विप्रेन्द्रः प्रोवाच विनताननाम् ।
भुवतीर्थे मयाश्चर्य्यं यद्दृष्टङ्कथयामि वः ॥ ८४ ।
ये केचित्पितरो लोके लोकानां सर्व्वतः स्थिताः ।
ते पूजिताः श्राद्धकृद्भिः पुत्रैः प्रीता दिवं ययुः ॥ ८५ ।
एको वृद्धो नरस्तत्र सूक्ष्मप्राणिभिरावृतः ।
क्षुत्क्षामदेहः शुष्कास्यो निर्गतोदरसूक्ष्मदृक् ।
निराशो गन्तुकामश्च पुनः स निरयेऽशुचौ ॥ ८६ ।
कारुण्यात्स मया पृष्टः कस्त्वं ब्रूहि किमिच्छसि ।
तेनात्मकर्म्मजनितं मम कर्म्म निवेदितम् ॥ ८७ ।
ततस्तत्रैव तच्छ्रुत्वा तस्य कारुण्ययन्त्रितः ।
तव दास्याश्च या दासी तस्य तन्तुः किलोच्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नाम्ना विरूपकनिधिस्तामानय वरानने ॥ ८८ ।
इति श्रुत्वानवद्याङ्गी तस्या आनयनेऽत्वरत्* ।
प्रेषयामास सर्व्वत्र तस्या आनयने बहून् ॥ ८९ ।
सा चैकान्ते च दिवसे पानमांसरता सदा ।
पुरुषेण सहासीना शय्यायां मदविह्वला ।
सेवकैः सा करे गृह्य† आनीता मुनिसन्निधौ ॥ ९० ।
तां दृष्ट्वा मदिरामत्तां स मुनिः प्राह धर्म्मवित् ।
प्रत्ययार्थन्तु तस्या वै मुनिः प्राह क्रियाम्प्रति ॥ ९१ ।
पितॄणाञ्च कृते दत्तं दानं वारि न वा स्वधा‡ ।
तर्पणञ्चापि नो दत्तं पितॄणाञ्चातिमुक्तिदम् ॥ ९२ ।
सा नैवमित्युवाचेदं तं मुनिं संशितव्रतम् ।
न जानामि पितॄन् स्वान्वै क्रियां कार्य्यञ्च वै विभो ॥ ९३ ।
इति ब्रुवाणान्तां दासीं त्रिकालज्ञोऽभ्युवाच ह ।
पत्नी च मथुरेशस्य नृपः सपुरसज्जनः ।
सर्व्वं दृष्ट्वाथ माहात्म्यं पितॄणां सन्ततेः फलम् ॥ ९४ ।
सकौतुका महाभागाः श्राद्धदानञ्च चैव ह ।
नगरस्थापि ते§ सर्व्वे ब्राह्मणा भावपूजिताः ।
राज्ञानीतास्तत्र तीर्थे श्राद्धार्थं मुनिना सह ॥ ९५ ।
लोकैः परिवृतो राजा ध्रुवतीर्थं गतः प्रभुः ।
तत्र दृष्टः स वै जन्तुर्नष्टतन्तुर्विचेतनः ।

---

* अत्वरतेति साधु । † गृहीत्वेति साधु । ‡ त्वया पितॄणाञ्च कृते दत्तं न वा वारि न वा स्वधा इति (ग) । § नगरस्था अपीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मशकैर्वेष्टितः क्षुद्रैः क्षुधया चातिपीड़ितः ॥ ९६ ।
उवाच तं तदा विप्रोऽभवत्सन्तानजाः स्त्रियः ।
आनीतास्तव पुष्ट्यर्थं यदिच्छसि तथा कुरु ॥ ९७ ।

अगस्त्य उवाच ।

स्नात्वैषा ध्रुवतीर्थे तु ब्रह्मणोक्तक्रमेण च ।
करोतु तर्पणञ्चास्मिन् पूर्व्वोक्तविधिना स्त्रियम् ॥ ९८ ।
ततः श्राद्धं सरौप्यञ्च सवस्त्रं सविलेपनम् ।
अर्च्चित्वा पिण्डदानेन करोत्वेषा च भक्तितः ॥ ९९ ।
अत्रैव भवतः सर्व्वं मामीक्षस्व सुखान्वितम् ।
कारयित्वा यथासर्व्वं श्राद्धदानं हि तन्तुना ॥ १०० ।
तस्य तद्वचनं श्रुत्वा राजपत्नी यशस्विनी ।
कारयामास दास्या वै श्राद्धं सुबहुदक्षिणम् ॥ १०१ ।
पट्टवस्त्रं तथा धूपकर्पूरागुरुचन्दनम् ।
तिलोत्तरं तथान्नञ्च बहुरूपं सपिण्डकम् ॥ १०२ ।
कृते श्राद्धे पिण्डदाने स जन्तुः सुकृती यथा ।
दिव्यकान्तिरदीनात्मा तथा भूतैः पृथक् पृथक् ।
वेष्टितः शुशुभेऽतीव दीक्षितोऽवभृथे यथा ॥ १०३ ।
स्वर्गागतैर्विमानैश्च छादितं तत्र वै नभः ।
तेषां मशकगात्राणां सुगात्राणां सुरूपिणाम् ॥ १०४ ।
ततस्तुष्टमना जन्तुर्विमानं प्रेक्ष्य चागतम् ।
गन्तुं स्वर्गमुवाचेदं त्रिकालज्ञं मुनिं नृपम् ॥ १०५ ।
शृण्वन्तु वचनं सर्व्वं मदीयं पितृतुष्टिदम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तीर्थानि सरितः श्रेष्ठाः पर्व्वताश्च सरांसि च।
कुरुक्षेत्रं गया चैव स्थानान्यायतनानि च।
पितॄणां मुक्तिदं चान्यन्न भूतं न भविष्यति॥ १०६।१०७।
आषाढ्याः पञ्चमे पक्षे प्रतिपत्प्रभृतिस्तथा।
शुक्लप्रतिपदान्तञ्च तीर्थम्प्राप्य ससत्वराः।
पितरः श्राद्धपिण्डोदा आश्विने ध्रुवमास्थिताः।
कृत्वा प्रेतपुरीं शून्यां स्वर्गं पातालमेव च।
ईहमानाः स्वकं पुत्रं गोत्रतन्तुमथानुजम्॥ १०८।१०९।
कन्यां गते सवितरि यः श्राद्धं सम्प्रदास्यति।
तर्पणं ध्रुवतीर्थे ते पितॄणां षोड़शान्तरे।
सुतृप्ताः स्मो वयं शश्वद्यास्यामः परमाङ्गतिम्॥ ११०।
एष एव प्रभावोऽत्र ध्रुवस्य कथितो मया।
दृष्टो भवद्भिः सर्व्वं यदस्माकं सुदुरत्ययम्।
दुस्तरं तरितं पापं त्वत्प्रसादान्महामुने॥ १११।
इति विश्राव्य वचनं राजानं सऋषिं जनान्।
राजपुत्रीं तथा दासीं स्वां सुतां शिवमस्तु वः।
आरुह्य वरयानन्ते गताः स्वर्गं वृताः सुरैः॥ ११२।

वराह उवाच।

ततः स राजशार्दूलः सगणः परिवारकः।
दृष्ट्वा तीर्थस्य माहात्म्यं प्रणम्य ऋषिसत्तमम्।
प्रविष्टो नगरीं रम्यां संस्मरन्नित्यमच्युतम्॥ ११३।
एतत्ते कथितं भद्रे माहात्म्यं मथुराभवम्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्मरणाद्यस्य पापानि नश्यन्ति पूर्व्वजन्मनि ॥ ११४ ।
पठति श्रद्धयायुक्तो ब्राह्मणानाञ्च सन्निधौ ।
स पितृंस्तर्पयेत्सर्व्वानभिगम्य गयाशिरे ॥ ११५ ।
एतत्त्वयान्तव्रतिने न चाशुश्रूषवे तथा ।
कथनीयं महाभागे यश्च नार्च्चयते हरिम् ॥ ११६ ।
तीर्थानां परमं तीर्थं धर्म्माणां धर्म्मसुत्तमम् ।
ज्ञानानां परमं ज्ञानं लाभानां लाभमुत्तमम्* ।
कथनीयं महाभागे पुण्यान् भागवतान् सदा ॥ ११७ ।

सूत उवाच ।

एतच्छ्रुत्वा प्रभोर्वाक्यं धरणी विस्मयान्विता ।
पप्रच्छ मुदिता देवी प्रतिमास्थापनम्प्रति ॥ ११८ ।

इति वराहपुराणे भगवच्छास्त्रे मथुरावर्णनं नाम
अशीत्यधिकशततमोऽध्यायः ।

एकाशीत्यधिकशततमोऽध्यायः ।

सूत उवाच ।

एवं श्रुत्वा परं स्थानं सा मही संशितव्रता ।
सर्व्वक्षेत्रविभागेषु यश्च वै परमो विधिः ।
संश्रुत्वा विस्मयाविष्टा प्रत्युवाच वसुन्धरा ॥ १ ।

---

* लाभानां लाभ उत्तम इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

धरण्युवाच ।

अहो क्षेत्रप्रभावो वै यस्त्वया समुदाहृतः ।
यं श्रुत्वा देव तत्त्वेन जातास्मि विगतज्वरा ॥ २ ।
एकं मे परमङ्गुह्यं यन्नित्यं हृदि वर्त्तते ।
मम प्रीत्यर्थमखिलं तद्विष्णो वक्तुमर्हसि ॥ ॥ ३ ।
कथं तिष्ठसि काष्ठेषु शैलमृण्मयजेषु च ।
ताम्रे कांस्ये च रौप्ये च स्थापितस्तिष्ठसे* कथम् ॥ ४ ।
सौवर्णेषु च सर्व्वेषु स्थापितस्तिष्ठसे† कथम् ।
ब्रह्मचारी समासाद्य कथं तिष्ठसि माधव ।
दन्तरले समासाद्य कथं सन्तिष्ठसे‡ भवान् ॥ ५ ।
कथं तिष्ठसि वा सेव्ये भित्तिसंस्थो जनार्द्दनः ।
भूमिसंस्थो महाभाग विधिदृष्टेन कर्म्मणा ॥ ६ ।
एवं धरावचः श्रुत्वा प्रत्युवाचादिशूकरः ॥ ७ ।

वराह उवाच ।

प्रतिमा यस्य कर्त्तव्या तदानीय वसुन्धरे ।
प्रतिमाङ्कारयेच्चैव लक्षणोक्तां वसुन्धरे ॥ ८ ।
अर्च्चाशुद्धिं ततः कृत्वा प्रतिष्ठाप्य विधानतः ।
ततः सम्पूजयेद्देवि संसारभवमुक्तये ॥ ९ ।
तत्र काष्ठेषु मधुकमानीय च वसुन्धरे ।
कृत्वा तत्प्रतिमाञ्चैव प्रतिष्ठाविधिनार्च्चयेत् ॥ १० ।

---

* तिष्ठसीति साधु । † तिष्ठसीति साधु । ‡ सन्तिष्ठते भवानिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तान्तु दद्यात्तु गन्धांश्च ये मया समुदाहृताः।
कर्पूरं कुङ्कुमञ्चैव त्वचञ्चागुरुमेव च।
रसञ्च चन्दनञ्चैव सिल्हकोशीरकं तथा।
एतैर्विलेपनं दद्यादर्च्चितस्तु विचक्षणः॥ ११।१२।
स्वस्तिकं वर्द्धमानञ्च श्रीवत्सङ्कौस्तुभं तथा।
विधानपूर्व्वकञ्चैव मङ्गल्यञ्चैव पायसम्।
वर्त्तिस्तिलफलञ्चैव कर्म्मण्यानि न संशयः॥ १३।
एवं सर्व्वं ततो दद्यात्पूजायां विहितं शुभम्।
कर्म्मणा विधिदृष्टेन शुद्धो भागवतः शुचिः।
प्राणायामं ततः कृत्वा इमं मन्त्रमुदीरयेत्॥ १४।
योऽसौ भवांस्तिष्ठति सर्व्वयोगप्रधानतः।
ससम्भ्रमं लोके सुप्रतीतस्तिष्ठ काष्ठे स त्वं भुवि॥ १५।
एवं संस्थापनङ्कृत्वा काष्ठस्य प्रतिमासु च।
पुनः प्रदक्षिणीकृत्य* शुद्धैर्भागवतैः सह।
प्रज्वाल्य दीपं तत्रैव अर्चायाः सम्मुखं स्थितः।
नोर्द्ध्वं न तिर्य्यगीक्षेत कामक्रोधविवर्ज्जितः।
नमो नारायणायेति इमं मन्त्रमुदीरयेत्।
कुर्य्यात्संस्करणं तेषां विधिदृष्टेन कर्म्मणा॥ १६।१७।१८।
मन्त्रः—योऽसौ भवान् सर्व्वजनप्रवीर
गतिः प्रभुस्त्वं वससि ह्यमोघ।

---

* प्रदक्षिणं कृत्वेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अनेन मन्त्रेण च लोकनाथ
संस्थापितस्तिष्ठ सुवासुदेव ॥ १९ ।
सर्व्वामिवं ततः कृत्वा मम संस्थापनक्रियाम् ।
पूज्या भागवताः सर्व्वे ये तत्र समुपागताः ॥ २० ।
गन्धमाल्यैरर्च्चयित्वा उपलेपैश्च* भोजनैः ।
कुर्य्यात्संस्करणं तेषां विधिदृष्टेन कर्म्मणा ॥ २१ ।
एतत्कर्म्मविधानेन मधुकाष्ठस्य सुन्दरि ।
धर्म्मसंस्थापनार्थाय एतत्ते कथितं मया ॥ २२ ।
ये त्वनेन विधानेन अर्च्चां काष्ठस्य स्थापयेत् ।
ते न गच्छन्ति संसारं मम लोके च गच्छति† ॥ २३ ।

इति वराहपुराणे भगवच्छास्त्रे मधुकाष्ठार्च्चास्थापनं नाम
एकाशीत्यधिकशततमोऽध्यायः ।

द्व्यशीत्यधिकशततमोऽध्यायः ।

वराह उवाच ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा तिष्ठामि शैलेषु प्रतिमायामितस्ततः ॥ १ ।
सुरूपाञ्च शिलां दृष्ट्वा निःशल्यां सुपरीक्षिताम् ।

---

* उपपन्नैश्चेति (ग) । † गच्छन्तीति साधु, तथा कृते तु छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र दत्तं रूपकारं शीघ्रञ्च विनियोजयेत् ॥ २ ।
शीघ्रमालिख्य तं तत्र श्वेतवर्त्तिकया नरः* ।
प्रदक्षिणां ततः कृत्वा पूजयेदक्षतादिभिः ॥ ३ ।
दीपकञ्च ततो दद्याद्बलिं दध्योदनेन च ।
नमो नारायणायेति उक्त्वा मन्त्रमुदीरयेत् ॥ ४ ।
मन्त्रः—योऽसौ भवान्सर्व्वजनप्रवीरः
सोमाग्नितेजा समतिप्रधानः ।
एतेन मन्त्रेण तु वासुदेव
प्रतिष्ठितः कीर्त्तिञ्च वर्द्धयस्व ॥ ५ ।
प्रवर अयुतवराह जय जय वर्द्धस्व ।
अनेनैव तु मन्त्रेण कर्त्तव्यं यस्य यादृशम् ।
एवं रूपं ततः कृत्वा देवं नारायणम्प्रभुम् ।
ततो वै स्थापयेत्तत्र पूर्व्वाभिमुखमेव तु ॥ ६ ।
अहोरात्रमुषित्वैवं शुक्लवस्त्रेण भूषितः ।
शुक्लयज्ञोपवीती च कृत्वा वै दन्तधावनम् ।
सर्व्वगन्धोदकं गृह्य† इमं मन्त्रमुदाहरेत् ॥ ७ ।
मन्त्रः—योऽसौ भवांस्तिष्ठति सर्व्वरूप
मायाबलं सर्व्वजगत्स्वरूपम् ।
एतेन मन्त्रेण जगत्स्वरूप
सम्पूजितस्तिष्ठसि लोकनाथ ॥ ८ ।

* तया वर्त्तिकया नर इति (क), (ख) । † गृहीत्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

करणधारणप्रबध्यमुदाहरणमपराजितमजरामर सम्पूज्य स्नापयात्मानमनेन मन्त्रेण ओं नमो वासुदेवाय ।

एवन्तु स्थापनङ्कृत्वा शिलायां मम सुन्दरि ।
ततोऽधिवासनङ्कार्य्यं पूर्व्वंप्रोष्ठपदासु च ॥ ९ ।
यो मां* संस्थापयेद्भूमै मम कर्म्मपरायणः ।
स याति वैष्णवं लोकं नात्र कार्य्या विचारणा ॥ १० ।
यावकं पायसम्भुक्ता अहोरात्रं समापयेत् ।
ततः पश्चिमसन्ध्यायां दद्याच्चत्वारि† दीपकान् ॥ ११ ।
पञ्चगव्यञ्च गन्धञ्च वारिणा सह मिश्रयेत् ।
चतुरः कलशांश्चैव स्थापयेत्पादमूलतः ॥ १२ ।
गीतवादित्रघोषेण उत्सवं तत्र कारयेत् ।
ब्राह्मणैः सामगैस्तत्र वेदघोषन्तु कारयेत् ॥ १३ ।
ब्रह्माक्षरसहस्राणि पठतां ब्रह्मवादिनाम् ।
येषां पठितशब्देन शुभगीतस्वरेण च ।
आगमिष्याम्यहं देवि मन्त्रपाठोमम प्रियः ॥ १४ ।
निःशब्दञ्च ततः कृत्वा स्थाप्यो भागवतैः सह ।
पुनरावाहनं कुर्य्यान्मन्त्रेणानेन सुव्रतः ॥ १५ ।

आगच्छ हे देव समन्त्रयुक्तः
पञ्चेन्द्रियैः षट्सु तथा प्रधानः ।
एतेषु भूतेषु च संविधाता
आवासिता तिष्ठसि लोकनाथ ॥ १६ ।

---

* पूर्व्वं संस्थापयेदिति (क), (ख) । † चत्वारीति आर्षं, चतुर इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अनेनैव तु मन्त्रेण समित्तिलघृतेन च ।
मधुना चैव होतव्यमष्टोत्तरशताहुती: ।
एवं कृते विधानेऽथ तत्र सन्निहितोऽभवम् ॥ १७ ।
व्यतीतायान्तु शर्व्वर्य्यां प्रभाते विमले ततः ।
पञ्चगव्यं ततः प्राश्य मन्त्रेण विधिपूर्व्वकम् ।
सर्व्वगन्धैश्च लाजैश्च पञ्चगव्यजलं तथा ।
ततः प्रासादे स्थाप्योऽहं गीतवादित्रमङ्गलैः ।
सर्व्वगन्धांस्ततो गृह्य इमं मन्त्रमुदाहरेत् ॥ १८।१९ ।
मन्त्रश्च—योऽसौ भवाँल्लक्षणलक्षितश्च
लक्ष्म्या च युक्तः सततं पुराणः ।
अत्र प्रासादे सुसमिद्धतेजाः
प्रवेशमायाहि नमोनमस्ते ॥ २० ।
तत एतेन मन्त्रेण प्रासादं प्रविवेशयेत् ।
प्रतिमा स्थापितव्या मे मध्ये न तु विपार्श्वतः ॥ २१ ।
एवं संस्थापनं कृत्वा दद्यादुद्वर्त्तनं विभोः ।
चन्दनं कुङ्कुमञ्चैव मिश्रङ्कालेयकेन च ।
एवञ्चोद्वर्त्तनङ्कृत्वा इमं मन्त्रमुदाहरेत् ॥ २२ ।
योऽसौ भवान् सर्व्वजगत्प्रधानः
सम्पूजितो ब्रह्मबृहस्पतिभ्याम् ।
प्रवन्दिनः कारणं मन्त्रयुक्ताः
सुस्वागतं* तिष्ठ सुलोकनाथ ॥ २३ ।

* सुखागतमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं संस्थापनङ्कृत्वा गन्धमाल्यैश्च पूजयेत्।
शुक्लवस्त्राणि मे दद्यादिमं मन्त्रमुदाहरेत्॥ २४।
मन्त्रः—वस्त्राणि देवेश गृहाण तानि
मया सुभक्त्या रचितानि यानि।
इमानि सन्धारय विश्वमूर्त्ते
प्रसीद मह्यञ्च नमो नमस्ते॥ २५।
एवं वस्त्राणि मे दद्याद्विधिदृष्टेन कर्म्मणा।
धूपनं मे ततो दद्यात्कुङ्कुमागुरुमिश्रितम्।
एवञ्च धूपनं दद्यादिमं मन्त्रमुदीरयेत्* ॥ २६।
मन्त्रः—असावनादिः पुरुषः पुराणो
नारायणः सर्व्वजगत्प्रधानः।
गन्धञ्च माल्यानि च धूपदीपौ
गृहाण देवेश नमो नमस्ते॥ २७।
एवं पूजां ततः कृत्वा प्रापणञ्च निवेदयेत्।
पूर्व्वोक्तेन विधानेन प्रापणञ्चोपकल्प्य च।
पूर्व्वोक्तेनैव मन्त्रेण दद्यात्प्रापणकम्बुधः॥ २८।
प्रापणान्ते चाचमनं दद्याद्देहविशुद्धये।
शान्तिजाप्यं ततः कार्य्यं सर्व्वकार्य्यार्थसिद्धिदम्॥ २९।
मन्त्रः—ओं शान्तिर्भवान्कुर्व्वतु† लोकनाथ
राज्ञः सराष्ट्रस्य च ब्राह्मणानाम्।

---

* मुदाहरेदिति (ग)। † कुर्व्वतु इति बहुवचनमार्षं, करोत्विति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

बालेषु वृद्धेषु गवाङ्गणेषु
कन्यासु शान्तिश्च पतिव्रतासु ॥ ३० ।
रोगा विनश्यन्तु च सर्व्वतश्च
कृषीबलानाञ्च कृषिः सदा स्यात् ।
सुभिक्षयुक्ताश्च सदा हि लोकाः
काले सुवृष्टिर्भविता च शान्तिः ॥ ३१ ।
एवं विधिं ततः कृत्वा विधिदृष्टेन कर्म्मणा ।
संपूज्य तेन देवेशं ब्राह्मणान्भोजयेद्व्रती ।
दीनानाथान्प्रतर्प्याथ यथाविभवशक्तितः ॥ ३२ ।
य एतेन विधानेन कुर्य्यात्संस्थापनं मम ।
यावन्तो मम गात्रेषु जायन्ते जलबिन्दवः ।
तावद्वर्षसहस्राणि मम लोकेषु तिष्ठति ॥ ३३ ।
यो मां संस्थापयेद्भूमे सर्व्वाहङ्कारवर्ज्जितः ।
तारितञ्च कुलन्तेन सप्त सप्त च सप्ततिः ॥ ३४ ।
एतत्ते कथितं भद्रे शैलिकास्थापनं मम ।
धर्म्मसन्धारणार्थाय मम भक्तसुखाय च ॥ ३५ ।

इति वराहपुराणे शैलार्चास्थापनं नाम
द्व्यशीत्यधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्र्यशीत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तिष्ठामि मृण्मयाञ्चापि* प्रतिमाम्पूजनेच्छया ॥ १ ।
अर्च्चाञ्च मृण्मयाङ्कृत्वा† अस्फुटाञ्चाप्यखण्डिताम् ।
नाधिकां वामनाञ्चापि न वक्राङ्कारयेद्बुधः ॥ २ ।
ईदृशीं प्रतिमां कृत्वा मम कर्म्मपरायणः ।
भूमे सर्व्वाणि कर्म्माणि यथा वा रोचते तथा ॥ ३ ।
काष्ठानामप्यलाभे तु मृण्मयां‡ तत्र कारयेत् ।
शैलजां वा ततो भूमे मम कर्म्मपरायणः ॥ ४ ।
ताम्रेण कांस्यरौप्येण सौवर्णत्रपुरीतिकाम् ।
कुर्व्वन्ति शुभकर्म्माणः कोविदोऽहमहं भवम् ॥ ५ ।
अर्च्चनन्त्वपरं वेद्यां मम कर्म्मपरिग्रहात् ।
केचिल्लोकापवादेन ख्यात्यै कुर्व्वन्ति केचन ।
गृहञ्चालोच्य कश्चिन्मां पूजयेत्कामनापरः ॥ ६ ।
पूजयेद्यदि वा चक्रं मम तेजोंऽशसम्भवम् ।
भूमे एवं विजानीहि स्थापितोऽहं न संशयः ।
सर्व्वसम्पत्प्रयच्छामि पूजितोऽहं धराधरे ॥ ७ ।
मन्त्रैर्वा विधिपूर्व्वेण यो मे कर्म्माणि कारयेत् ।
यं यं फलं समुद्दिश्य मां पूजयति मानवः ।

---

* मृण्मयीञ्चेति साधु । † मृण्मयीङ्कृत्वेति साधु । ‡ मृण्मयीमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्तत्फलम्प्रयच्छामि प्रसन्नेनान्तरात्मना।
मम चैव प्रसादेन प्राप्नोति गतिमुत्तमाम्॥ ८।८ ।
मद्भक्तः सततं नित्यं कर्म्मणा परिवेष्टितः।
स वै मत्परितोषार्थं मनस्येव प्रपूजयेत्।
दद्याज्जलाञ्जलिं मह्यं तेन मे प्रीतिरुत्तमा॥ १०।
तस्य किं सुमनोभिश्च जाप्येन नियमेन किम्।
मह्यं चिन्तयतो नित्यं निभृतेनान्तरात्मना॥ ११।
तस्य कामान् प्रयच्छामि दिव्यान् भोगान्मनोरमान्।
एतत्ते सर्व्वमाख्यातं सुगोप्यञ्च प्रयत्नतः॥ १२।
मृण्मयीं प्रतिमाङ्कृत्वा मम कर्म्मसु निष्ठितः।
श्रवणे चैव नक्षत्रे कुर्य्यात्तस्याधिवासनम्॥ १३।
पूर्व्वोक्तेन विधानेन स्थापयेन्मन्त्रपूर्व्वकम्।
पञ्चगव्यञ्च गन्धैश्च वारिणा सह मिश्रयेत्।
ततो मे स्नपनङ्कार्य्यमिमं मन्त्रमुदाहरेत्॥ १४।
मन्त्रः—योऽसौ भवान्सर्व्वजगत्प्रकर्त्ता
यस्य प्रसादेन भवन्ति लोकाः।
स त्वं कुरुष्वाच्युत मत्प्रसादं
सन्तिष्ठ अर्च्चासु च मृण्मयीषु॥ १५।
कारणकारणं ह्युग्रतेजसं द्युतिमन्तं महापुरुषं नमो नमः।
अनेन मन्त्रेण वेश्मनि प्रविश्य स्थापनां कुर्य्यात्।
अनेनैव* तु मन्त्रेण स्थापयेन्मां समाहितः।

* एतेनैवेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूर्व्ववत्स्थापयेत्तत्र चतुरः कलशान् पुरा।
चतुरस्तान् गृहीत्वा च इमं मन्त्रमुदाहरेत्॥ १६।
मन्त्रः—ओं वरुण समुद्रो लब्ध्वा
संपूजितो ह्यात्मप्रतिप्रसन्नः।
एतेन मन्त्रेण ममाभिषेकं
प्राप्तं वरिष्ठं हि स ऊर्द्धबाहुः।
अग्निश्च भूमिश्च रसाश्च सर्व्वे
भवन्ति यस्मात्सततं नमस्ये॥ १७।
एवमास्नाप्य विधिवन्मम कर्म्मपरायणः।
पूर्व्वोक्तविधिना चैव गन्धमाल्यैश्च पूजयेत्॥ १८।
अगुरुञ्चैव धूपञ्च सकर्पूरं सकुङ्कुमम्।
नमो नारायणायेति उक्ता धूपम्प्रकल्पयेत्॥ १९।
धूपं दत्त्वा यथान्यायं पीतं वस्त्रन्तु दापयेत्।
नमो नारायणायेति उक्ता मन्त्रमुदाहरेत्॥ २०।
मन्त्रः—वस्त्रेण पीतेन सदा प्रसन्नो
यस्मिन्प्रसन्ने तु जगत्प्रसन्नम्।
गृह्णातु वस्त्रं सुमुखः प्रसन्नो
देवः सदा पातु भवस्य बन्धात्॥ २१।
तत एतेन मन्त्रेण वस्त्रं दद्याद्यथोचितम्।
धूपदीपादिभिः पूज्य* प्रापणम्परिकल्पयेत्॥ २२।

---

* पूजयित्वेति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूर्व्वोक्तेन विधानेन दद्यात्प्रापणकं नरः।
पश्चादाचमनं दद्यान्मन्त्रपूर्व्वं प्रयत्नतः॥ २३।
मन्त्रः—शान्तिर्भवतु देवानां ब्राह्मणक्षत्रियान्तथा।
शान्तिर्भवतु वृद्धानां बालानां शान्तिरुत्तमा।
देवो वर्षतु पर्जन्यः पृथिवी शस्यपूरिता॥ २४।
अनेनैव तु मन्त्रेण शान्तिं कृत्वा विधानतः।
पश्चाद्भागवतान् पूज्य* ततो ब्राह्मणपूजनम्।
शिरसा चन्दनङ्कार्य्यं दक्षिणाभिः प्रपूज्य च।
अच्छिद्रं वाच्य† पश्चाच्च कुर्य्यादेवं विसर्ज्जनम्॥ २५।२६।
एवं विसर्ज्जनङ्कृत्वा ये च तत्र समागताः।
पूजयेत्तांश्च विधिवद्वस्त्रालङ्कारभूषणैः।
पूजयीत‡ गुरुं तत्र यदीच्छेन्मम सात्म्यताम्॥ २७।
यो गुरुं पूजयेद्भक्त्या विधिदृष्टेन कर्म्मणा।
तेनाहं पूजितो नित्यं देवि सत्यं ब्रवीमि ते॥ २८।
तुष्टो ददाति कृच्छ्रेण ग्राममात्रं नराधिपः।
आब्रह्मपदपर्य्यन्तं हेलया यच्छते गुरुः॥ २९।
तथैव मम शास्त्रेषु ममैव वचनाच्छुभे।
सर्व्वशास्त्रेषु कल्याणि गुरुपूजा व्यवस्थिता॥ ३०।
यएतेन विधानेन कुर्य्यात्संस्थापनं मम।
तारितानि कुलान्येव त्रीणि त्रिंशच्च सप्ततिः॥ ३१।

---

* पूजयित्वेति साधु। † वाचयित्वेति साधु। ‡ पूजयेदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पूजायां मम मार्गेषु पतन्ति जलविन्दवः ।
तावद्वर्षसहस्राणि मम लोकेषु मोदते ॥ ३२ ।
एवं ते कथितं भूमि स्थापनं मृण्मयस्य तु ।
कथयिष्यामि ते ह्यन्यत्सर्व्वभागवतप्रियम् ॥ ३३ ।

इति वराहपुराणे मृण्मयार्चास्थापनं नाम
चतुरशीत्यधिकशततमोऽध्यायः ।

चतुरशीत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

ताम्रेण प्रतिमाङ्कृत्वा सुरूपाञ्चैव भास्वराम् ।
उचितेनोपचारेण वेश्ममध्य उपानयेत् ॥ १ ।
ततो वेश्मन्युपागम्य स्थापयित्वा उदङ्मुखः ।
चित्रायां चैव नक्षत्रे कुर्य्याच्चैवाधिवासनम् ॥ २ ।
जलञ्च सर्व्वगन्धेन पञ्चगव्येन मिश्रितम् ।
स्नापयेच्च ततो मां वै इमं मन्त्रमुदाहरेत् ॥ ३ ।
मन्त्रः—योऽसौ भवांस्तिष्ठसि* सारभूतः
स ताम्रके तिष्ठसि नेत्रभूतः ।
आगच्छ मूर्त्त्या सह पञ्चभूतै-
र्मया च पात्रैः सह विश्वधामेति ॥ ४ ।

---

* तिष्ठतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अनेनैव तु मन्त्रेण स्थापयित्वा यशस्विनि ।
पूर्व्वन्यायेन कर्त्तव्यमधिवासनपूजनम् ॥ ५ ।
व्यतीतायाञ्च शर्व्वर्य्यामुदिते च दिवाकरे ।
ऋचः शुद्धिं विधायाऽथ स्नापयेन्मन्त्रपूर्व्वकम् ॥ ६ ।
ब्राह्मणा वेदपाठांश्च कुर्य्युस्तत्र समागताः ।
बहूनि मङ्गलान्यत्र मण्डपे स्थापयेत्ततः ॥ ७ ।
सुगन्धद्रव्यसंयुक्तं जलञ्चादाय पूजकः ।
ततो मे स्नपनङ्कार्य्यमिमं मन्त्रमुदाहरेत् ॥ ८ ।

मन्त्रः—ओँ योऽसौ भवान्सर्व्ववरः प्रभुश्च
मायाबली योगबलप्रधानः ।
आगच्छ* शीघ्रञ्च मम प्रियाय
सन्तिष्ठ† तास्त्रिष्वपि लोकनाथ ॥ ९ ।

ज्वलन पवनतुल्यावन भावन तपन श्वासन स्वयं तिष्ठ भगवन् पुरुषोत्तम ओम् । इति सूत्रम् ।

ततो द्वारमुपागम्य वेश्म शीघ्रं प्रवेशयेत् ।
आसने चापि मां स्थाप्य‡ पूजयेद्भक्तिपूर्व्वकम् ।
मन्त्रेणानेन मां स्थाप्य गन्धपुष्पादिदीपकैः ॥ १० ।

स्थापनामन्त्रः—ओँ आकाशप्रकाश जगत्प्रकाश विज्ञानमयानन्दमय त्रैलोक्यनाथात्रागच्छ इह सन्तिष्ठतु§ भवान्पुरुषोत्तम मामव इति सूत्रम् ।

---

* आगच्छतु इति साधु । † सन्तिष्ठतामिति साधु । ‡ स्थापयित्वेति साधु, एवं परत्रापि । § सन्तिष्ठतामिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अनेन स्थापनङ्कृत्वा मम शास्त्रानुसारतः ।
शुक्लवस्त्रं समादाय इमं मन्त्रमुदाहरेत् ॥ ११ ।
मन्त्रः—त्वौं शुद्धस्त्वमात्मा पुरुषः पुराणो
जगत्सु तत्त्वं सुरलोकनाथ ।
वस्त्राणि गृह्णीष्व* मम प्रियाणि
नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ १२ ।
वस्त्रैर्विभूषितङ्कृत्वा मम कर्म्मपरायणः ।
यथान्यायेन मे शीघ्रमर्च्चनं तत्र कारयेत् ॥ १३ ।
अर्च्चनालङ्कृतङ्कृत्वा गन्धधूपादिभिः प्रभुम् ।
सम्पूज्य विधिवन्मान्तु नैवेद्यं परिकल्पयेत् ।
दत्त्वा स्वादु च नैवेद्यं शान्तिपाठन्तु कारयेत् ॥ १४ ।
मन्त्रः—शान्तिर्भवतु देवानां विप्राणां शान्तिरुत्तमा ।
शान्तिर्भवतु राज्ञाञ्च सराष्ट्राणां तथा विशाम् ॥ १५ ।
बालानां व्रीहिपण्यानां† गर्भिणीनाञ्च देहिनाम् ।
शान्तिर्भवतु देवेश त्वत्प्रसादान्ममाखिला ॥ १६ ।
एवं शान्तिं पठित्वा तु ब्राह्मणांस्तत्र पूजयेत् ।
गुरुं भागवतञ्चैवमर्च्चयेच्च यथाविधि ॥ १७ ।
ब्राह्मणान् भोजयेत्तत्र यथोत्पन्नेन माधवि ।
विशेषेण गुरुं पूज्य‡ वस्त्रालङ्कारभोजनैः ।

---

* गृहाणेति साधु । † बालानां हि विपन्नानामिति (क), (ख) । ‡ पूजयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेनाहं पूजितो भूमे सत्यमेतद्ब्रवीमि ते ।
गुरुर्यस्य न तुष्टो वै तस्माद्दूरतरो ह्यहम् ॥ १८।१९ ।
य एतेन विधानेन कुर्य्यात्संस्थापनं मम ।
तारितञ्च कुलं तेन नवभिः सप्तविंशतिः ॥ २० ।
एतत्ते कथितं भद्रे ताम्रार्चास्थापनं मम ।
कथयिष्यामि ते ह्येवं कार्त्स्न्येन प्रतिमार्च्चनम् ॥ २१ ।
जलस्य बिन्दवो यावन्मम स्नाने च सुन्दरि ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥ २२ ।

इति वराहपुराणे ताम्रार्चास्थापनं नाम
चतुरशीत्यधिकशततमोऽध्यायः ।

पञ्चाशीत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

कांस्येन प्रतिमाङ्कृत्वा सुरूपां सुप्रतिष्ठिताम् ।
सर्व्वाङ्गावयवैर्युक्तां विमलाङ्गैर्निर्म्मिताम् ।
ज्येष्ठायाञ्चैव नक्षत्रे मम वेश्मन्युपानयेत् ॥ १ ।
गीतवादित्रशब्देन बहुभिर्मङ्गलैस्तथा ।
अर्घ्यं गृह्य* यथान्यायमिमं मन्त्रमुदाहरेत् ॥ २ ।

---

* गृहीत्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

योऽसौ भवान्सर्व्वयज्ञेषु पूज्यो
ध्येयो गोप्ता विश्वकामो महात्मा।
प्रसन्नात्मा भगवान्मे प्रसन्नः
सुपूजितस्तिष्ठ हि लोकनाथ ॥ ३ ।

अर्घं दत्त्वा यथान्यायं स्थापयेत्तदुदङ्मुखः।
यथान्यायेन संस्थाप्य कुर्य्याच्चैवाधिवासनम् ॥ ४ ।
चतुरः कलशांश्चैव पञ्चगव्यसमन्वितान्।
सर्व्वगन्धैश्च लाजैश्च मधुना च विशेषतः ॥ ५ ।
चतुरः कलशान् पूर्य्य* स्नानार्थं मे समन्त्रकम्।
ततश्चास्तङ्गते सूर्य्ये शुद्धैर्भागवतैः सह ॥ ६ ।
कुर्य्यात्संस्थापनं तत्र ममार्च्चायास्तु पूजकः।
गृहीत्वा कलशांस्तत्र शुद्धान् भागवतांस्तथा।
नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ ७ ।
मन्त्रः—आदिर्भवान् ब्रह्मयुगान्तकल्पः

सर्व्वेषु कालेष्वपि कल्पभूतः।
एकोभवान्नास्ति कश्चिद्द्वितीय-
उपागतस्तिष्ठ हि लोकनाथ ॥ ८ ।

विकार अविकार अकार सकार शकार षकार स्वच्छन्दरूपः चरमचरं धृतिरूपः अरूपमिति नमः पुरुषोत्तमायेति सूत्रम्।
व्यतीतायान्तु शर्व्वर्य्यामुदिते च दिवाकरे।

---

* पूरयित्वेति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अश्विन* च मुहूर्त्तेन प्राप्ते मूलेषु चोत्तरे ॥ ९ ।
पूर्व्वोक्तेषु विधानेन मम शास्त्रानुदर्शिनाम् ।
स्थापयेद्द्वारमूले तु मम वेश्मस्य† सुन्दरि ॥ १० ।
सर्व्वशान्त्युदकं गृह्य‡ सर्व्वगन्धफलानि च ।
नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ ११ ।
मन्त्रः—ओँ इन्द्रो भवांस्त्वञ्च यमः कुवेरो
जलेश्वरः सोमबृहस्पती च ।
शुक्रः शनैश्चरबुधौ सह सैंहिकेय-
केतू रविश्चैव धरात्मजस्त्वम् ॥ १२ ।
तथैव सर्व्वौषधयो जलानि
वायुश्च पृथ्वी च सवायुसारथिः ।
नागाः सयक्षाश्च दिशश्च सर्व्वा-
स्तस्मै नमस्ते पुरुषोत्तमायेति सूत्रम् ॥ १३ ।
अनेनैव तु मन्त्रेण कृत्वा कर्म्म सुपुष्कलम् ।
मम तां प्रतिमां गृह्य ततो वेश्मन्युपानयेत् ॥ १४ ।
एकान्ते स्नापयेन्माञ्च जलैः पूर्व्वाभिमन्त्रितैः ।
प्रगृह्य कलशेभ्यश्च जलं गन्धसमन्वितम् ।
गात्रसंशोधनार्थाय इमं मन्त्रमुदाहरेत् ॥ १५ ।
मन्त्रः—सरांसि ये ते च समस्तसागरा-
नद्यश्च तीर्थानि च पुष्कराणि ।

* श्वेतेनेति (ग) । † वेश्मस्य इति आर्षं, वेश्मन इति साधु । ‡ गृहीत्वेति साधु, एव परत्र ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आयान्तु तान्येव तव प्रसादा-
च्छुद्धैश्च मे स्युः पुरुषोत्तमायेति सूत्रम् ॥ १६ ।
एवं मां स्नाप्य* विधिना मम कर्म्मानुसारिणः ।
एवं न्यायेन मां तत्र अर्च्चयित्वा यथोचितम् ॥ १७ ।
गन्धधूपादिभिश्चैव यथाविभवशक्तितः ।
पश्चाद्वस्त्राणि मे दद्यान्मम गात्रसुखानि च ॥ १८ ।
तान्यानयित्वा वस्त्राणि ममाग्रे स्थापयेन्नरः ।
उभौ तौ चरणौ नत्वा इमं मन्त्रमुदाहरेत् ॥ १९ ।
मन्त्रः—ओं वस्त्राणि देवेन्द्र मयाहृतानि
सूक्ष्माणि सौम्यानि सुखावहानि ।
गात्रस्य सन्तुष्टिकराणि तुभ्यं
गृह्णीष्व देवेश सुलोकनाथ ॥ २० ।
वेदोपवेद ऋग्वेद यजुर्वेद सामवेद अथर्व्ववेद संस्तुत इति नमः परम्परायेति सूत्रम् ।
अर्च्चितालङ्कृतङ्कृत्वा पूर्व्वन्यायेन सुन्दरि ।
पश्चान्मे प्रापणं दद्यान्मन्त्रवद्विधिपूर्व्वकम् ॥ २१ ।
दत्त्वा प्रापणकं तत्र दद्यादाचमनं ततः ।
शान्तिपाठश्च वै कार्य्यो मन्त्रेणानेन सुन्दरि ॥ २२ ।
विद्याः सर्व्वे† ब्रह्म च ब्राह्मणाश्च
ग्रहाः सर्व्वे सरितः सागराश्च ।

* स्नापयित्वेति साधु । † विद्याः सर्व्वा इति तु साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इन्द्राद्यष्टौ लोकपालाश्च सर्व्वे
पूर्व्वोक्ता ये सर्व्वशान्तिञ्च कुर्य्युः ॥ २३ ।

आयाम यम* कामदम वाम श्रीं नमः पुरुषोत्तमायेति सूत्रम् ।

व्रत्तेष्वेवोपचारेषु मम कुर्य्यात्प्रदक्षिणम् ।
अभिवादनं स्तुतिञ्चापि कृत्वा भागवतान् शुचीन् ।
सम्पूज्य ब्राह्मणान्पश्चाद्भोजयेत्पायसादिभिः ॥ २४ ।
तेभ्यः शान्त्युदकं गृह्य† द्विजेभ्यः कमलेक्षणे ।
दद्यादभ्युक्षणं मह्यं तेनाहं पूजितोऽभवम् ॥ २५ ।
सर्व्वान्विसर्ज्जयित्वा तु कुर्य्याद्वै गुरुपूजनम् ।
अङ्गुलीयकवासोभिर्दानसम्माननादिभिः ॥ २६ ।
यो गुरुं पूजयेद्भूमे भक्तियुक्तेन चेतसा ।
तेनाहं पूजितो देवि एवमेतन्न संशयः ॥ २७ ।
ब्राह्मणान्मम भक्तांश्च गुरुंश्चैव हि निन्दति ।
नाशयिष्यामि तं देवि सत्यमेतद्ब्रवीमि ते ॥ २८ ।
जलस्य विन्दवो यावन्मम गात्रेषु तिष्ठति‡ ।
तावद्वर्षसहस्राणि मम लोकेषु तिष्ठति ॥ २९ ।
य एतेन विधानेन स्थापयिष्यति मां नरः ।
तारितञ्च कुलं तेन पितृजं मातृजं तथा ॥ ३० ।

---

* आमामयेति (ग)। † गृह्वीत्वेति साधु, एवं परत्रापि। ‡ तिष्ठन्तीति साधु, तथा कृते तु छन्दोदोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं भद्रे कांस्येन स्थापनं मम।
कथयिष्यामि ते ह्येवं रौप्येण स्थापनं मम* ॥ ३१ ।

इति वराहपुराणे कांस्यप्रतिमास्थापनविधिर्नाम
पञ्चाशीत्यधिकशततमोऽध्यायः।

षड़शीत्यधिकशततमोऽध्यायः।

वराह उवाच।

राजतीं प्रतिमां कृत्वा सुरूपां निर्म्मलां शुचिम्*।
अश्लिष्टाश्चैव निर्दोषां सर्व्वतः परिनिष्ठिताम्।
चन्द्रपाण्डुरसङ्काशां सुश्लक्ष्णां निर्घृणां शुभाम्।
श्रिया युक्तां मनोज्ञाञ्च दीप्यमानां दिशो दश† ॥ १२ ।
ईदृशीं प्रतिमाङ्कृत्वा मम कर्म्मपरायणः।
गीतवादित्रशब्देन शङ्खदुन्दुभिनिस्वनैः।
स्तुतिभिर्मङ्गलैश्चैव मम वेश्मन्युपानयेत्।
अर्घ्यपाद्यादिकं गृह्य इमं मन्त्रमुदाहरेत् ॥ ३।४ ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति।

---

* शुचिरिति (ग)। † दीपयन्तीं दिशोदशेति तु स समीचीनम्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मन्त्रः—श्रीं यः सर्व्वलोकेष्वपि सर्व्वमर्घ्यं
पूज्यश्च मान्यश्च दिवौकसामपि ।
उपागतो गृह्ण इदं ममार्घ्यं
प्रसीद मां तिष्ठ सुलोकनाथ ।
यो राजते यज्ञपतिश्च यज्ञे
सूर्य्योदये मम कर्म्माग्निहोत्रम् ॥ ५ ।

मन्त्रश्चेति आदिमध्यस्वरूपायेति सूक्तम् ।

तत एतेन मन्त्रेण अर्घ्यं दत्त्वा यथाविधि ।
सुस्नातोऽलङ्कृतश्चैव स्थापयेत्तामुदङ्मुखः ॥ ६ ।
अश्लेषासु च नक्षत्रे राशौ कर्कटके* स्थिते ।
अस्तङ्गते दिनकरे स्वजने यजति स्थिते ।
अधिवासनं तत्र कुर्य्याद्विधिवन्मन्त्रपूर्व्वकम् ॥ ७ ।
चत्वारः कलशास्तत्र चन्दनोदकमिश्रिताः ।
सर्व्वौषधिसमायुक्ताः सहकारविभूषिताः ॥ ८ ।
ततस्ते कर्म्मिणः सर्व्वे मम शास्त्रानुसारिणः ।
गुरोस्तु वचनाद्देवि मनोज्ञान् सुखशीतलान् ।
नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ ९ ।

मन्त्रः—योऽसौ भवान् सर्व्वलोकैककर्त्ता
सर्व्वाध्यक्षः सर्व्वरूपैकरूपः ।
आयातु मूर्त्तौ सहितो मया च
ध्रुवादिभिर्लोकपालैस्तु पूज्यः ॥ १० ।

* यजमाने इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नमोऽनन्तायेति सूत्रम् ।

व्यतीतायान्तु शर्व्वर्य्यामुदिते सूर्य्यमण्डले ।
दिशासु च प्रसन्नासु द्वारमूले उपानयेत्* ॥ ११ ।
एवं संस्थापनङ्कृत्वा मम कर्म्मानुसारिणः ।
घटैः पूर्णैर्यथान्यायं कुर्य्यात्तत्राभिषेचनम् ॥ १२ ।
अभिषिच्य† ततः पश्चात्स्थापयेत‡ विधानतः ।
नमो नारायणायेति उक्ता मन्त्रमुदाहरेत् ॥ १३ ।
मन्त्रः—गङ्गादिभ्यो नदीभ्यश्च सागरेभ्यो मया हृतम् ।
स्नानाय ते सुरश्रेष्ठ कर्पूरावासितं जलम् ॥ १४ ।
एवं स्नाप्य§ विधानेन गृहस्याभ्यन्तरं नयेत् ।
स्थापना तत्र मे कार्य्या मन्त्रेणानेन सुन्दरि ॥ १५ ।
मन्त्रः—वेदैर्वेद्यो वेदविद्भिश्च पूज्यो
यज्ञात्मको यज्ञफलप्रदाता ।
यज्ञार्थं त्वामाह्वये देवदेव
मूर्त्तावस्यान्तिष्ठ सुलोकनाथ ॥ १६ ।

धनजन रूप्यस्वर्ण अनन्ताय नम इति सूत्रम् ।

एवं संस्थापनङ्कृत्वा प्रहृष्टेनान्तरात्मना ।
अर्च्चयित्वा यथान्यायं पूर्व्वोक्तविधिना नरः ।
नीलवस्त्राणि मे दद्यात्प्रियाणि मम भूषणम् ॥ १७ ।
ततो वस्त्राण्युपादाय जानुभ्यां पतितो भुवि ।

---

* द्वारमूले तु स्थापयेदिति (ग)पाठोऽत्र छन्दोदोषः । † अभिषेच्य इति (ग) ।
‡ स्थापयेदिति साधु । § स्नापयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नमो नारायणायेति उक्त्वा काममुदाहरेत्* ॥ १८ ।

मन्त्र.—योऽसौ भवांश्चन्द्ररश्मिप्रकाशः
शङ्खेन कुन्देन समानवर्णः ।
चीरोज्ज्वलः कौमुदवर्ण देव
वस्त्राणि गृह्णीष्व मम प्रियाय ॥

वेषः सुवेषः अनन्तः अमरः मारणः कारणः सुलभः दुर्लभः श्रेष्ठः सुवर्चा इति सूत्रम् ।

अनेनैव तु मन्त्रेण दत्त्वा वस्त्राणि मे शुचिः ।
ततो मे प्रापणं दद्याद्भक्तियुक्तेन चेतसा ।
नमो नारायणायेति इमं मन्त्रमुदाहरेत् ॥ १९ ।
शाल्यन्नं पायसैर्युक्तं सितया च घृतेन च ।
प्रापणं गृह्यतां देव अनन्त पुरुषोत्तम ॥ २० ।
दत्त्वा तु मम नैवेद्यं दद्यादाचमनं बुधः ।
सर्व्वलोकहितार्थाय शान्तिपाठमुदाहरेत् ॥ २१ ।
ओं शान्तिं करोति ब्रह्मा च रुद्रो विष्णुर्हि भास्करः ।
रात्रिश्चैव तु सन्ध्ये द्वे नक्षत्राणि ग्रहा दिशः ॥ २२ ।

अचल चञ्चल सचल खेचल प्रचल अरविन्दप्रभ उद्भव चेति नमः संस्थापितानां वासुदेव इति सूत्रम् ।

कृत्वा वै शान्तिकं तत्र सर्व्वपापप्रणाशनम् ।
पूज्य† भागवतांस्तत्र यथाविभवशक्तितः ।

---

* मन्त्रमुदाहरेदिति (ग)। † पूजयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ब्राह्मणान् भोजयेत्तत्र* गुरुं मन्त्रेण पूजयेत् ॥ २३ ।
तेभ्यः शान्त्युदकं गृह्य कुर्य्यादभ्युक्षणं ततः ।
ब्राह्मणान् स्वजनञ्चैव अभिवाद्य कृताञ्जलिः ।
शीघ्रं विसर्ज्जयेत्तांश्च ये तत्र समुपागताः ॥ २४ ।
ततो गुरुञ्च संपूज्य दानमानादिभिर्विभुम् ।
गुरौ सम्पूजिते तत्र मम पूजा कृता भवेत् ॥ २५ ।
जलस्य विन्दवो येऽन्नभोजनान्ते पतन्ति हि ।
तावद्वर्षसहस्राणि विष्णुलोके स मोदते ॥ २६ ।
य एतेन विधानेन पूजयेन्मतिमान्नरः ।
उद्धृतञ्च कुलं तेन पितृजं मातृजं तथा ॥ २७ ।
अनेन विधिना देवि† रौप्यार्च्चास्थापनं मम ।
सुवर्णस्य प्रवक्ष्यामि स्थापनं मम सुप्रियम् ॥ २८ ।
यथैव राजतीं कुर्य्यात्तथैव च सुवर्णिकाम् ।
तेनैव विधिना सर्व्वं कुर्य्यादावाहनादिकम् ॥ २९ ।
यत्फलं दारुशैलादिनाम्ना कांस्यादिराजते ।
तत्फलं कोटिगुणितं सौवर्णस्य प्रपूजने‡ ॥ ३० ।
कुलानि तारयेत्सुभ्रु अयुतान्येकविंशतिम् ।
याति मल्लयतां भूमे पुनरावृत्तिवर्ज्जितः ॥ ३१ ।

---

* (ग) पुस्तके कृत्वा वै शान्तिकं तत्र इत्यनन्तरं चरणचतुष्टयं नास्ति तच्च २२ श्लोकादनन्तरं दृश्यते । † एतत्ते कथितं देवीति (ग) । ‡ सौवर्णस्य च स्थापने इति (क), (ख), पाठेऽत्र छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं भूमे यत्त्वया परिपृच्छितम्* ।
रहस्यं विपुलश्रोणि किमन्यत्कथयामि ते ॥ ३२ ।
भूमिरुवाच ।
उक्ता याः प्रतिमाः सर्व्वाः सुवर्णादिविनिर्म्मिताः ।
तासु तिष्ठसि सर्व्वासु शालग्रामे च सर्व्वदा ॥ ३३ ।
कति पूज्या गृहादौ च अविशेषस्तु पूजने ।
विशेषो वा भवेत्तन्मे रहस्यं वद माधव ।
शिवादिपूजने के वा संख्याता†स्तच्च मे वद ॥ ३४ ।
वराह उवाच ।
गृहे लिङ्गद्वयं नार्च्यं शालग्रामत्रयं तदा ।
द्वे चक्रे द्वारकायास्तु नार्च्यं सूर्य्यद्वयं तथा ।
गणेशत्रितयं नार्च्यं शक्तित्रितयमेव च ॥ ३५ ।
शालग्रामयुगाः पूज्या युग्मेषु द्वितयं न हि ।
विषमा नैव पूज्याः स्युर्विषमे एक एव हि ॥ ३६ ।
गृहेऽग्निदग्धा भग्ना वा नैव पूज्या वसुन्धरे ।
आसान्तु पूजनाद्गेहे उद्वेगं प्राप्नुयाद्गृही ॥ ३७ ।
शालग्रामशिला भग्ना पूजनीया सचक्रका ।
खण्डिता स्फुटिता वापि शालग्रामशिला शुभा ॥ ३८ ।
शिला द्वादश वै देवि शालग्रामसमुद्भवा ।
विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥ ३९ ।

---

* परिपृष्टमिति साधु । † को वा संख्यात इति (म) पुस्तके पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शालग्रामशिलायुक्त...

कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः।
यत्स्याद्द्वादशकल्पैस्तु दिनैकेन हि तद्भवेत् ॥ ४० ।
यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम्।
तत्फलं नैव शक्तोऽहं वक्तुं वर्षशतैरपि ॥ ४१ ।
सर्व्वैर्वर्णैस्तु सम्पूज्याः प्रतिमाः सर्व्वदेवताः।
लिङ्गान्यपि तु पूज्यानि अणिभिः कल्पितास्तथा ॥ ४२ ।
शालग्रामो न स्प्रष्टव्यो हीनवर्णैर्वसुन्धरे।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको* मतः ॥ ४३ ।
मोहाद्यः संस्पृशेच्छूद्रो योषिद्वापि कदाचन।
शयते नरके घोरे यावदाभूतसंप्लवम् ॥ ४४ ।
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे।
दूरादेवास्पृशन् पूजाङ्कारयेत्सुसमाहितः ॥ ४५ ।
चरणामृतपानेन सर्व्वपापक्षयो भवेत्।
अभक्ष्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलायोगात्पावनं तद्भवेत्सदा ॥ ४६ ।
दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः।
सुवर्णसहितां तस्य यत्पुण्यं तच्छृणुष्व मे ॥ ४७ ।
सुवर्णसहिता भूमिः सपर्व्वतवनाकरा।
ससमुद्रा भवेद्दत्ता सत्पात्राय वसुन्धरे ॥ ४८ ।
शालग्रामशिलायास्तु मूल्यमुद्घाटयेत्क्वचित्।

---

* संस्पर्शैर्वज्रस्पर्शाधिक इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विक्रेता क्रयकर्त्ता च नरके नीयते ध्रुवम् ।
पूजा फलं न शक्येत वक्तुं वर्षशतैरपि ॥ ४९ ।
एतत्ते कथितं गुह्यं प्रतिमास्थापनम्प्रति ।
शालग्रामे विशेषश्च लिङ्गादीनाञ्च यो भवेत् ।
पूजनादौ विधिश्चापि किमन्यच्छ्रोतुमिच्छसि ॥ ५० ।

इति वराहपुराणे प्रागितिहासे भगवच्छास्त्रे रौप्यसौवर्णार्चास्थापनं नाम षड़शीत्यधिकशततमोऽध्यायः ।

पौत्रयज्ञनौका स्मारति

सप्ताशीत्यधिकशततमोऽध्यायः ।

सूत उवाच ।
एवं नारायणाच्छ्रुत्वा सा मही शंसितव्रता ।
कराभ्यामञ्जलिङ्कृत्वा माधवं पुनरब्रवीत् ॥ १ ।
धरण्युवाच ।
श्रुतमेतन्मयाख्यानं चैतस्य च महत्फलम् ।
एकं मे परमं गुह्यं तद्भवान्वक्तुमर्हसि ॥ २ ।
पितृयज्ञस्य माहात्म्यं सोमदत्तो नराधिपः ।
मृगयां समुपागम्य यत्त्वया पूर्व्वभाषितम् ॥ ३ ।
को गुणः पितृयज्ञस्य कथमेव प्रयुज्यते ।
केन चोत्पादितं श्राद्धं कस्मिन्नर्थे किमात्मकम् ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण वदस्व मे ॥ ४ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच।

साधु भूमि महाभागे यन्मात्वं परिपृच्छसि।
मोहितासि वरारोहे भाराक्रान्ता वसुन्धरे।
दिव्या ददामि ते बुद्धिं शृणु सुन्दरि तत्त्वतः॥ ५।
कथयिष्यामि ते ह्येवं* श्राद्धोत्पत्तिविनिश्चयम्।
आदौ स्वर्गस्य चोत्पत्तिं देवानाञ्च वरानने॥ ६।
निष्प्रभेऽस्मिन्निरालोके सर्व्वतस्तमसावृते।
स्रष्टुं वै बुद्धिरुत्पन्ना त्रैलोक्यं सचराचरम्॥ ७।
सोऽहञ्च शेषपर्य्यङ्के एकश्चैव पराङ्मुखः।
स्वपामि च वरारोहे अनन्तशयने ह्यहम्॥ ८।
निद्रां मायामयीं कृत्वा जागर्मि च स्वपामि वा†।
विष्णुमायामयङ्कृत्वा जानासि त्वं न धारिणि॥ ९।
युगं युगसहस्राणि यास्यन्ति च गतानि च।
न त्वं मम विजानासि ज्ञातुं मायां यशस्विनि॥ १०।
धारितं मम सुश्रोणि दिव्या पञ्चशतानि च।
वाराहं रूपमादाय न जानासि हि भामिनि॥ ११।
यन्मां पृच्छसि वै ज्ञातुमात्मानञ्च यशस्विनि।
एकमूर्त्तिस्त्रिधा जातो ब्रह्मविष्णुहरात्मकः॥ १२।
क्रोधहेतोर्मया सृष्ट ईश्वरोऽसुरनाशनः।
मम नाभ्यां भवत्पद्मं‡ पद्मगर्भः पितामहः॥ १३।

* ते ह्यीदमिति (ग)। † स्वपानि चेति (ग)। ‡ अभवत् पद्ममिति साधु, समुत्पन्नइति कृते तु सुसङ्गतिः स्यात्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं त्रयो वयं देवाः कृत्वा ह्येकार्णवां महीम् ।
तिष्ठामः परमप्रीत्या मायां कृत्वा तु वैष्णवीम् ॥ १४ ।
सर्व्वं तज्जलपूर्णन्तु न प्रज्ञायत किञ्चन ।
वटमेकं वर्जयित्वा विष्णुमूलं यशोद्रुमम् ।
तिष्ठामि वटवृक्षेऽहं मायया बालरूपधृक् ॥ १५ ।
पश्यामि च जगत्सर्व्वं त्रैलोक्यं यन्मया कृतम् ।
धारयामि वरारोहे जानासि त्वं धरे शुभे ॥ १६ ।
कालेन तु तदा देवि कृत्वा वै वड़वामुखम् ।
विनिःसृतं जलं तत्र मायया तदनन्तरम् ॥ १७ ।
प्रलये च विनिर्वृत्ते ब्रह्मा लोकपितामहः ।
मुहूर्त्तं ध्यानमास्थाय भाषितं वचनं मया ।
शीघ्रमुत्पादय ब्रह्मन् दैवतासुरमानुषान् ॥ १८ ।
एवमुक्तो मया देवि गृह्य तत्र कमण्डलुम् ।
उपस्पृश्य शुचिर्भूत्वा ब्रह्मा चोत्पादयत्सुरान्* ।
आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ।
तारणार्थञ्च सर्व्वेषां ब्राह्मणान् भुवि दैवतान् ॥ १९।२० ।
बाहुभ्यां चत्रमुत्पन्नं वैश्या ऊरुविनिःसृताः ।
पद्भ्यां विनिःसृताः शूद्राः सर्व्ववर्णोपचारकाः ॥ २१ ।
देवताश्चासुरा देवि जातास्ते ब्रह्मणस्तथा ।
देवता ह्यसुराः सर्व्वे तपोवीर्य्यबलान्विताः ॥ २२ ।

---

* चोदपादयदिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ।
देवतास्तु त्रयस्त्रिंशददित्यां जनयत्पुरा* ।
दित्यां च जनिताः पुत्रा असुराः सुरशत्रवः ॥ २३ ।
प्रजापतिश्चाजनयदृषयश्च† तपोधनान् ।
तेजसा भास्कराकाराः सर्व्वे शास्त्रविदो द्विजाः ।
तेषां पुत्राश्च पौत्राश्च जनिता ब्रह्मसूनुना ॥ २४ ।
निमिस्तु वंशसम्भूतो आत्रेय इति विश्रुतः ।
जातमात्रो महात्मा स श्रीमांश्चापि तपोनिधिः ।
एकचित्तं समाधाय तपश्चरति निश्चलः ॥ २५ ।
पञ्चाग्निर्वायुभक्षश्च एकपादोर्द्ध्वबाहुकः ।
शीर्णपर्णाम्बुभक्षश्च शिशिरे च जलाशयः ।
स कृच्छ्रे फलभक्षश्च पुनश्चान्द्रायणञ्चरन् ।
वर्षाणाञ्च सहस्राणि तपस्तप्त्वा वसुन्धरे ।
मृत्युकालमनुप्राप्तस्ततः पञ्चत्वमागतः ॥ २६।२७ ।
नष्टञ्च तं सुतं दृष्ट्वा निमिः शोक उपाविशत् ।
पुत्रशोकाभिसंयुक्तो दिवा रात्रौ च चिन्तयन् ।
निमिः कृत्वा ततः शोकं विधानात्तत्र माधवि ।
तं मनोगतसङ्कल्पं‡न्निरात्रे प्रत्यपद्यत ॥ २८।२९ ।
तस्य प्रति विशुद्धस्य माघमासे तु द्वादशीम् ।

---

* अजनयदिति साधु । † ऋषींश्चैव तपोधनानिति साधु । ‡ तमेव गतसङ्कल्पमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मानसं सृज्य* विषयबुद्धिर्विस्तारगामिणी ।
स निमिश्चिन्तयामास श्राद्धकल्पं समाहितः ॥ ३० ।
यानि तस्यैव भोज्यानि मूलानि च फलानि च ।
यानि कानि च भक्ष्याणि नवश्च रससम्भवः ।
यानि तस्यैव चेष्टानि सर्व्वमेतदुदाहरेत् ॥ ३१ ।
आमन्त्र्य ब्राह्मणं पूर्व्वं शुचिर्भूत्वा समाहितः ।
दक्षिणावृततः सर्व्वं ऋषिः स्वयमकुर्व्वत ॥ ३२ ।
सप्तकृत्वा ततस्तत्र युगपत्समुपाविशत् ।
दत्त्वा तु मांसशाकानि मूलानि च फलानि च ।
पूजयित्वा तु विप्रान्स सप्तकृत्वश्च सुन्दरि ।
कृत्वा तु दक्षिणाग्रांश्च कुशांश्च प्रयतः शुचिः ।
प्रददौ श्रीमतिः पिण्डं नामगोत्रमुदाहरन् ॥ ३३।३४ ।
तत्कृत्वा स मुनिश्रेष्ठो धर्म्मसङ्कल्पमात्मनः ।
एवं दिने गते भद्रे अस्तम्प्राप्ते दिवाकरे ।
ब्रह्मकर्म्मोत्तमं दिव्यं भावसाध्यमुपासत ॥ ३५ ।
एकाकी यतचित्तात्मा निराशी निष्परिग्रहः ।
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्चं नातिनीचञ्च चेलाजिनकुशोत्तरम् ।
तत्रैकाग्रं मनः कृत्वा यतचित्तोजितेन्द्रियः ।
उपविश्यासनेऽयुञ्जद्योग†मात्मविशुद्धये ॥ ३६।३७ ।

---

* सृष्टेति साधु । † अयुङ्क्त योगमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

समकायशिरोग्रीवं धारयन्नचलं स्थितः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।
प्रशान्तात्मा विगतभीर्ब्रह्मचारी व्रते स्थितः ।
संयम्य मयि चित्तं भो युक्त आसीत मत्परः ।
प्रयुञ्जीत सदात्मानं मद्भक्तो नान्यमानसः ॥ ३८।३९ ।
एवं सन्ध्यां निवृत्तायां ततो रात्रिरुपागता ।
पुनश्चिन्तितुमारब्धः शोकसंविग्नमानसः ।
कृत्वा तु पिण्डसङ्कल्पं पश्चात्तापमकुर्व्वत ॥ ४० ।
अकृतं मुनिभिः सर्व्वं किं मया तदनुष्ठितम् ।
निवापकर्म्म ह्यशुचिः पुत्रार्थे विनियोजितम् ।
अहो स्नेहप्रभावेण मया चाकृतबुद्धिना ॥ ४१ ।
कथन्ते मुनयः शापात्प्रदहेयुर्न मामिति ।
सदेवासुरगन्धर्व्वपिशाचोरगराक्षसाः ।
किं वक्ष्यन्ति च मां सर्व्वे ये वै पितृपदे स्थिताः ॥ ४२ ।
एवं विचिन्त्यमानस्य* गता रात्रिर्वसुन्धरे ।
पूर्व्वसन्ध्यानुसम्प्राप्ता उदिते च दिवाकरे ।
सन्ध्याविधिं विनिर्वर्त्त्य हुत्वाग्नीन्द्विजसत्तमः ।
पुनश्चिन्ताप्रपन्नः स आत्रेयो ह्यतिदुःखितः ।
एकाकी भाषते तत्र शोकपीड़ितमानसः ॥ ४३।४४ ।
धिग्वयो धिक् च मे कर्म्म धिग्बलं धिक् च जीवितम् ।
पुत्रं सर्व्वसुखैर्युक्तं जीवितं हि न दृश्यते ॥ ४५ ।

---

* एवं विचिन्तयानस्य अथवा एवं चिन्तयतस्तस्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नरकं पूतिकाख्यातं हृदि दुःखं विदुर्बुधाः ।
परित्राणं ततः पुत्त्रादिच्छन्तीह परत्र च ॥ ४६ ।
पूजयित्वा तु देवांश्च दत्त्वा दानन्त्वनेकशः ।
हुत्वाग्निं विधिवच्चैव स्वर्गन्तु लभते नरः ॥ ४७ ।
पुत्त्रेण लभते येन पौत्त्रेण च पितामहाः ।
अथ पुत्त्रस्य पौत्त्रेन मोदन्ते प्रपितामहाः ।
पुत्त्रेण श्रीमता हीनं नाहं जीवितुमुत्सहे ॥ ४८ ।
एतस्मिन्नन्तरे देवि नारदो द्विजसत्तमः ।
जगाम तापसारण्यमृष्याश्रमविभूषितम् ।
सर्व्वकामयुतं रम्यं बहुपुष्पफलोदकम् ॥ ४९ ।
तत्प्रविश्याश्रमपदं भ्राजमानं स्वतेजसा ।
तं दृष्ट्वा पूजयामास स्वागतेनाथ धर्म्मवित् ॥ ५० ।
अर्घ्यं पाद्यं तस्य दत्त्वा आसने चोपवेश्य च ।
उपविश्यासने देवि नारदो वाक्यमब्रवीत् ॥ ५१ ।

नारद उवाच ।

निमे शृणु महाप्राज्ञ शोकमुत्सृज्य दूरतः ।
अशोच्यमनुशोचस्त्वं प्रज्ञावान्नावबुध्यसे ॥ ५२ ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः* ।
मृतं वा यदि वा नेष्टं यो यान्तमनुशोचति ।
अमित्रास्तस्य हृष्यन्ति स चापि न निवर्त्तते ॥ ५३ ।
अमरत्वं न पश्यामि त्रैलोक्ये सचराचरे ।

* भगवद्गीतायामनुरूपः श्लोको दृश्यते—द्वितीयोऽध्यायः ११शः श्लोकः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

देवतासुरगन्धर्व्वा मानुषा मृगपक्षिणः* ।
सर्व्वे कालवशं यान्ति सर्व्वं कालमुदीक्षते† ॥ ५४ ।
जातस्य सर्व्वभूतस्य कालो मृत्युरुपस्थितः ।
अवश्यञ्चैव गन्तव्यं कृतान्तविहितेन च ॥ ५५ ।
तव पुत्त्रो महात्मा वै श्रीमान्नाम श्रियो निधिः ।
पूर्णं वर्षसहस्रन्तु तपः कृत्वा सुदुश्चरम् ।
मृत्युकालमनुप्राप्य गतो दिव्यां पराङ्गतिम् ।
एतत्सर्व्वं विदित्वा तु नानुशोचितुमर्हसि ॥ ५६।५७ ।
नारदेनैवमुक्तं तु श्रुत्वा स द्विजसत्तमः‡ ।
प्रणम्य शिरसा पादौ निमिरुद्विग्नमानसः ।
भीतोगद्गदया वाचा निश्वसंश्च मुहुर्मुहुः ।
सव्रीड़ो भाषते विप्रः कारुण्येन समन्वितः ॥ ५८।५९ ।
अहो मुनिवरश्रेष्ठ अहो धर्म्मविदां वर ।
सान्त्वितोऽस्मि त्वया विप्र वचनैर्मधुराक्षरैः ॥ ६० ।
प्रणयात्सौहृदाद्वापि स्नेहाद्वच्यामि तच्छृणु ।
शोको निरन्तरं चित्ते§ ममैतद्धृदि वर्त्तते ॥ ६१ ।
कृतस्नेहस्य पुत्त्रार्थे मया सङ्कल्प्य यत्कृतम् ।
तर्पयित्वा द्विजान् सप्त अन्नाद्येन फलेन च ।

---

* गावपक्षिण इति (क), (ख)। † सर्व्वे कालमुदीक्षन्ते, अथवा सर्व्वः कालमुदीक्षते इति साधु। ‡ श्रुत्वा तु द्विजसत्तम इति (ग)। § शोकस्य निरतं चित्तं (शोकस्य नियतं चित्ते ?) इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पश्चाद्विसर्ज्जितं पिण्डं दर्भानास्तीर्य्य भूतले ।
उदकानयनञ्चैव ह्यपसव्येन वासितम् ॥ ६२।६३ ।
शोकस्य तु प्रभावेण एतत्कर्म्म मया कृतम् ।
अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरणं द्विज* ।
नष्टबुद्धिस्मृतिसत्त्वो ह्यज्ञानेन विमोहितः ॥ ६४ ।
न च श्रुतं मया पूर्व्वं न देवैर्ऋषिभिः कृतम् ।
भयं तीव्रं प्रपश्यामि मुनिशापात्सुदारुणात् ॥ ६५ ।

नारद उवाच ।

न भेतव्यं द्विजश्रेष्ठ पितरं शरणं व्रज ।
अधर्म्मं न च पश्यामि धर्म्मो नैवात्र संशयः ॥ ६६ ।
नारदेनैवमुक्तस्तु निमिर्ध्यानमुपाविशत् ।
कर्म्मणा मनसा वाचा पितरं शरणं गतः ॥ ६७ ।
ततोऽतिचिन्तयामास वंशकर्त्तारमात्मनः ।
ध्यायमानस्ततोऽप्याशु आजगाम तपोधनम् ॥ ६८ ।
पुत्रशोकेन सन्तप्तं पुत्रं दृष्ट्वा तपोधनम् ।
पुत्रमाश्वासयामास वाग्भिरिष्टाभिरव्ययैः† ॥ ६९ ।
निमि संकल्पितस्तेऽयं पितृयज्ञस्तपोधन ।
पितृयज्ञेति निर्द्दिष्टो धर्म्मोऽयं ब्रह्मणा स्वयम् ॥ ७० ।
ततो ह्यतितरो धर्म्मः क्रतुरेकः प्रतिष्ठितः ।
कृतः स्वयम्भुवा पूर्व्वं श्राद्धं यो विधिवत्तमः ॥ ७१ ।

---

* भगवद्गीता "अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्ज्जुन" । † अव्ययाभिरिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शृखतो नारदस्यापि विधिं विधिविदां वरः।
श्राद्धकर्म्मविधिश्चैव प्रेतकर्म्म च या क्रिया।
शृणु सुन्दरि तत्त्वेन यथा दाता सपुत्रकः।
मम चैव प्रसादेन तस्य बुद्धिं ददाम्यहम्॥ ७२।७३।
जातस्य सर्व्वभूतस्य कालमृत्युरुपस्थितः।
अवश्यमेव गन्तव्यं धर्म्मराजस्य शासनात्॥ ७४।
अमरत्वं न पश्यामि पिपीलादीनि जन्तवः*।
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च†।
मोक्षः कर्म्मविशेषेण प्रायश्चित्तेन च ध्रुवम्॥ ७५।
सत्त्वं रजस्तमश्चैव त्रयः शारीरजाः स्मृताः।
अल्पायुषो नराः पश्चाद्भविष्यन्ति युगत्रये॥ ७६।
सात्त्विकं नाऽवबुद्ध्यन्ति कर्म्मदोषेण तामसः।
तामसं नरकं विन्द्या‡त्तिर्य्यग्योनिञ्च राक्षसीम्॥ ७७।
सात्त्विकं मुक्तियानाय यान्ति वेदविदो जनाः।
धर्म्मज्ञानं तथैश्वर्य्यं वैराग्यमिति सात्त्विकम्॥ ७८।
क्रूरो भीरुर्विषादी च हिंसको निरपत्रपः।
अज्ञानान्धश्च पैशाचमेतेषां तामसा गुणाः॥ ७९।
तामसं तद्विजानीयादुच्यमानो न बुद्ध्यति।
दुर्म्मदोऽश्रद्धधानश्च विज्ञेयास्तामसा नराः॥ ८०।
प्रबलो वाचि युक्तश्च कलबुद्धिः सदायतः।

---

* पिपीलादयो जन्तव इति साधु। † भगवद्गीता द्रष्टव्या। ‡ विन्देदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शूरः सर्व्वेषु व्यक्तात्मा विज्ञेया राजसा नराः ॥ ८१ ।
चान्तो दान्तो विशुद्धात्मा विज्ञेयः श्रद्धयान्वितः ।
तपःस्वाध्यायशीलश्च एतेषां सात्विका गुणाः ॥ ८२ ।
एवं सञ्चिन्तयानस्तु न शोकं कर्त्तुमर्हसि ।
त्यज शोकं महाभाग शोकः सर्व्वविनाशनः ।
शोको दहति गात्राणि बुद्धिः शोकेन नश्यति ॥ ८३ ।
लज्जा धृतिश्च धर्म्मश्च श्रीः कीर्त्तिश्च स्मृतिर्नयः ।
त्यजन्ति सर्व्वधर्म्माश्च शोकेनोपहतं नरम् ।
एवं शोकं त्यजित्वा* तु निःशोको भव पुत्रक ॥ ८४ ।
मूढः स्नेहप्रभावेण कृत्वा हिंसानृते तथा ।
पच्यते नरके घोरे ह्यात्मदोषैर्वसुन्धरे ॥ ८५ ।
स्नेहं सर्व्वेषु संयम्य बुद्धिं धर्म्मे नियोजयेत् ।
धर्म्मलोकहितार्थाय शृणु सत्यं ब्रवीम्यहम् ॥ ८६ ।
चतुर्व्वर्णस्य वक्ष्यामि यश्च स्वायम्भुवोऽब्रवीत् ।
नेमिप्रभृतीनामेवं येन श्राद्धं प्रवर्त्तते ॥ ८७ ।
कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र शीघ्रं निःसारयेद्गृहात् ॥ ८८ ।
कुशास्तरणशायी च दिशः सर्व्वा न पश्यति ।
लब्धस्मृतिर्मुहूर्त्तन्तु यावज्जीवो न पश्यति† ।
वाचयेत्स्नेहभावेन भूमिदेवा द्विजातयः ।

---

* त्यक्त्वेति साधु । † न नश्यतीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥ ८९।९० ।
परलोकहितार्थाय गोप्रदानं विशिष्यते ।
सर्व्वदेवमया गाव ईश्वरेणावतारिताः ।
अमृतं चरयन्त्यश्च प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन शीघ्रं मुच्यति* किल्विषात् ॥ ९१।९२ ।
पश्चाच्छ्रुतिपथं दिव्यमुत्कर्णेन च श्रावयेत् ।
यावत्प्राणान् प्रमुञ्चेत† कृत्वा कर्म्म सुदुष्करम् ॥ ९३ ।
दृष्ट्वा सुविह्वलं ह्येनं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ।
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोचणम् ।
मधुपर्कं त्वरन्‡ गृह्य इमं मन्त्रमुदाहरेत् ॥ ९४।९५ ।
मन्त्रः—ओं गृहाण वै मे मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्प्रियाणां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥ ९६ ।
तत एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ।
एवं विनिःसृतात्प्राणात्संसारञ्च न गच्छति ॥ ९७ ।
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशङ्गतम् ।
महावनस्पतिङ्गत्वा गन्धांश्च विविधानपि ।

---

* मुच्यते इति साधु। † प्रमुच्येदिति साधु। ‡ त्वरमाण इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ।
तेजोऽव्ययकरञ्चास्य तत्सर्व्वं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा सलिले तन्निधाप्य च ।
तीर्थाद्यावाहनङ्कृत्वा स्नापनं तस्य कारयेत्॥९८।९९।१००।
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ।
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयूर्बलदा तथा ।
वनानि नव वाराहे तीर्थे पिण्डारके तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा ।
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत्॥१०१ १०२।१०३
प्राणहतन्तु तं ज्ञात्वा चिताङ्कृत्वा विधानतः ।
तस्या उपरि तं स्थाप्य दक्षिणाग्रं शिरस्तथा ।
दिव्यानग्निमुखान्ध्यात्वा गृह्य हस्ते हुताशनम् ।
प्रज्वाल्य विधिवत्तच्च मन्त्रमेतदुदाहरेत् ॥ १०४।१०५।
कृत्वा सुदुष्करङ्कर्म्म जानता वाप्यजानता ।
मृत्युकालवशम्प्राप्य नरः पञ्चत्वमागतः ।
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दह एतस्य गात्राणि देवलोकाय गच्छतु* ॥ १०६।१०७।
एवमुक्त्वा ततः शीघ्रङ्कृत्वा चैव प्रदक्षिणाम् ।
ज्वलमानं† तदा वह्निं शिरःस्थाने प्रदापयेत् ॥ १०८।

* गच्छतीति (ग)। † ज्वलन्तमिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चातुर्वर्ण्येषु संस्कारमेवं भवति पुत्रक ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥ १०९ ।
मृतं नाम ततोद्दिश्य* दद्यात्पिण्डं महीतले ।
तदाप्रभृति चाशौचं देवकर्म्मं न कारयेत् ॥ ११० ।

इति वराहपुराणे भगवच्छास्त्रे श्राद्धोत्पत्तौ
सप्ताशीत्यधिकशततमोऽध्यायः ।

अष्टाशीत्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

देवदेवोऽसि देवानां लोकनाथोऽपरिग्रहः ।
आशौचकर्म्म विधिवच्छ्रोतुमिच्छामि माधव ॥ १ ।

वराह उवाच ।

आशौचं शृणु कल्याणि यथा शुध्यन्ति मानवाः ।
गतायुषस्तृतीयेन स्नातव्या स्रोतसा नदी ।
पिण्डं सञ्चूरणं* दद्यात्त्रीणि दद्याज्जलाञ्जलीन् ॥ २ ।
चतुर्थे पञ्चमे षष्ठे पिण्डमेकं जलाञ्जलिम् ।
अन्यस्थानेषु दातव्यं स्नानात्त्वहनि सप्तमे ॥ ३ ।

---

* तत उद्दिश्य इति साधु ।

---

* पिण्डसंक्रमणमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवम्प्रतिदिनं कार्य्यं यावच्च दशमं दिनम् ।
चारादिना वस्त्रशौचं दिने च दशमे तथा ।
तिलामलकस्नेहेन गोत्रजैः स्नानमाचरेत् ।
पिण्डदानं विवर्त्याथ चौरकर्म्म तु कारयेत्* ।
स्नानङ्कृत्वा विधानेन ज्ञातिभिः स्वगृहं व्रजेत् ॥ ४।५ ।
एकादशे च दिवसे एकोद्दिष्टं यथाविधि ।
स्नात्वा चैव शुचिर्भूत्वा प्रेतं विप्रेषु योजयेत् ॥ ६ ।
एकोद्दिष्टं मनुष्याणां चातुर्वर्ण्यस्य माधवि ।
यथा कं द्रव्यसंयुक्तं स्वं विप्रं भोजयेत्तदा ।
स्नात्वा चैवं शुचिर्भूत्वा प्रेतं प्रेतेषु योजयेत् ॥ ७ ।
एकोद्दिष्टन्तु द्रव्याणां चातुर्वर्ण्यस्य माधवि ।
अपाकद्रव्यं संगृह्य ब्रह्मणो वचनं यथा ।
त्रिषु वर्णेषु कर्त्तव्यं पाकभोजनमित्युत ।
शुश्रूषया विपन्नानां शूद्राणाञ्च वरानने ॥ ८।९ ।
त्रयोदशे दिने प्राप्ते पाकेन भोजयेद्द्विजान् ।
मृतस्य नाम चोद्दिश्य यस्यार्थे च प्रयोजितः† ॥ १० ।
स्वरितस्येति‡ सङ्कल्प्य कृत्वा ब्राह्मणमन्दिरम् ।
गत्वा निमन्त्रितं विप्रं नम्रो भूत्वा समाहितः ।
मन्त्रेणानेन भो देवि मनस्येव पठन्ति तम् ॥ ११ ।

---

* समाचरेदिति (ग) । † यस्यार्थे विप्रयोजित इति (ग) । ‡ श्वः करिष्येति (ग), श्वः करिष्ये इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गतोऽसि दिव्यलोके त्वं कृतान्तविहितेन च।
मनसा वायुभूतस्त्वं विप्रमेनं समाश्रय॥ १२।
अस्तङ्गते तथादित्ये गत्वा ब्राह्मणमन्दिरम्।
दत्त्वा तु पाद्यं विधिवन्नमस्कृत्य द्विजोत्तमम्।
पादसंवाहनङ्कार्य्यं प्रेतस्य हितकाम्यया।
प्रेतभोगशरीरे तु ब्राह्मणस्य च सुन्दरि॥ १३।१४।
यावत्तु तिष्ठते* तत्र प्रेतभोगमुदीर्य्यते।
तावन्न संस्पृशेद्भूमि मम गात्रं प्रतिष्ठितम्॥ १५।
प्रभातायान्तु शर्व्वर्य्यामुदिते च दिवाकरे।
श्मश्रुकर्म्म प्रकर्त्तव्यं विप्रस्य तु यथाविधि।
स्नापनाभ्यञ्जनङ्कार्य्यं प्रेतसन्तोषदायकम्॥ १६।
गृहीत्वा भूमिभागञ्च स्थण्डिलं तत्र कारयेत्।
निपातदेशं संगृह्य शुचिदेशे समाहितः॥ १७।
नदीकूले निखाते वा प्रेतभूमिं विनिर्द्दिशेत्।
चतुःषष्टिकृतं भागं यथावत्सुकृतं भवेत्॥ १८।
ततो दक्षिणपूर्व्वेषु दिग्विभागेषु सुन्दरि।
छायायां कुञ्जरस्यापि नदीकूलद्रुमे तथा।
चाण्डालादिप्रहीणे तु प्रेतकार्य्यं समाचरेत्॥॥ १९।
यं देशञ्च न पश्यन्ति† कुक्कुटः श्वानशूकराः।
श्वा चापोहति रावेण गर्ज्जितेन च शूकरः।

---

* तिष्ठतीति साधु। † यं देशं नैव पश्यन्तीति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कुक्कुटपक्षवातेन चाण्डालस्य यथा धरे ।
तत्र कुर्व्वन्ति ये श्राद्धं पितॄणां बन्धनप्रदम् ।
वर्ज्जनीया बुधैरेते प्रेतकार्य्येषु सुन्दरि ॥ २०।२१ ।
देवतासुरगन्धर्व्वाः पिशाचोरगराक्षसाः ।
नागा भूतानि यक्षाश्च ये च स्थावरजङ्गमाः ।
स्नानङ्कृत्वा यथा देवि तव पृष्ठे प्रतिष्ठिताः ।
धारयिष्यामि सुश्रोणि विष्णुमायाततं जगत् ॥ २२।२३ ।
चण्डालस्पर्शितः कृत्वा नराणान्तु शुभाशुभम् ।
स्नानङ्कुर्व्वन्तु ते भूमि स्थण्डिले तदनन्तरे ॥ २४ ।
अकृत्वा पृथिवीभागं निवापं ये तु कुर्व्वते ।
त्वदधीनं जगद्भद्रे तवोच्छिष्टं हतं भवेत् ॥ २५ ।
न देवाः पितरस्तस्य गृह्णन्तीह कदाचन ।
पतन्ति नरके घोरे तेनोच्छिष्टेन सुन्दरि ॥ २६ ।
स्थण्डिले प्रेतभागन्तु दद्यात्पूर्व्वाह्णिकन्तु तम् ।
कृत्वा तु पिण्डसङ्कल्पं नामगोत्रेण माधवि ।
पश्चादश्नन्ति गोत्राणि कुलजाश्चैकभोजनाः ।
न दद्यादन्यगोत्रेभ्यो ये न भुञ्जन्ति तत्र वै ॥ २७।२८ ।
चतुर्णामपि वर्णानां प्रेतकार्य्येषु सुन्दरि ।
एवं दत्तेन प्रीयन्ते प्रेतलोकगता नराः ॥ २९ ।
अदत्त्वा प्रेतभागन्तु भुङ्क्ते यस्तत्र मानवः ।
गत्वा महानदीं सोऽपि सचेलं स्नानमाचरेत् ॥ ३० ।
तीर्थानि मनसा गत्वा त्रिभिरभ्युक्षयेद्ध्रुवम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं शुद्धिं ततः कृत्वा ब्राह्मणान् शीघ्रमानयेत् ॥ ३१ ।
आगतांश्च द्विजान्दृष्ट्वा कर्त्तव्या स्वागतक्रिया ।
अर्घ्यं पाद्यं ततो दद्याद्धृष्टपुष्टेन माधवि ।
आसनञ्चोपकल्पेत मन्त्रेण विधिपूर्व्वकम् ॥ ३२ ।
मन्त्रः—इदन्ते आसनं दत्तं विश्रामं क्रियतां द्विज ।
कुरुष्व मे प्रसादञ्च सुप्रसीद द्विजोत्तम ॥ ३३ ।
उपविश्यासने विप्रं छत्रं सङ्कल्पयेत्पुनः ।
निवारणार्थमाकाशे भूतागमनचारिणः ।
देवगन्धर्व्वयक्षाश्च सिद्धसङ्घा महासुराः ।
धारणार्थं तथाकाशे छत्रं तेजस्विनाङ्कृतम् ।
प्रेतस्य च हितार्थाय धारयेत वसुन्धरे ॥ ३४।३५ ।
पूर्व्वं* संहृष्टतुष्टेन प्रेतभागञ्च दापयेत् ।
छत्रमावरणार्थन्तु दद्याच्चैव द्विजातये ॥ ३६ ।
आकाशे तत्र पश्यन्ति देवाः सिद्धपुरोगमाः ।
गन्धर्व्वा ह्यसुराः सिद्धा राक्षसाः पिशिताशिनः ॥ ३७ ।
पश्यमानेषु† सर्व्वेषु प्रेतः संव्रीड़ितो भवेत् ।
व्रीड़मानं ततो दृष्ट्वा हसन्त्यसुरराक्षसाः ॥ ३८ ।
एवं निवारणं छत्रमादित्येन कृतं पुरा ।
प्रेतलोकगतानाञ्च सर्व्वदेवर्षिणा पुरा ॥ ३९ ।
अग्निवर्षं शिलावर्षं तप्तं तत्र जलोदकम् ।

---

* एवमिति (ग)। † पश्यत्स्विति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भस्मवर्षं ततो घोरमहोरात्रेण माधवि ।
एवं निवारणं छत्रं दद्याद्विप्राय माधवि ॥ ४० ॥
पश्चादुपानहौ दद्यात्पादस्पर्शकरे शुभे ।
उपानहे च वक्ष्यामि दत्ते भवति यत्फलम् ।
पादौ च तौ न दह्येत यमस्य विषयङ्गते ॥ ४१ ॥
तमोऽन्धकारविषमं दुर्गमं घोरदर्शनम् ।
एकाकी दुःसहं लोके पथा येन स गच्छति ॥ ४२ ॥
कालो मृत्युश्च दूतश्च यष्टिमुद्यम्य पृष्ठतः ।
अहोरात्रेण घोरेण प्रेतं नयति माधवि ।
दद्यात्तदर्थं विप्राय पदत्रे च सुखावहे* ॥ ४३ ॥
तप्तवालुमयी भूमिः कण्टकैरुपसंस्तृता ।
तेन दुर्गाणि तरति दत्तेनोपानहेन तु ॥ ४४ ॥
पश्चाद्धूपञ्च दीपञ्च दद्याद्वै मन्त्रपूर्व्वकम् ।
याति येन विजानीयात्पृथक् प्रेतेन योजयेत् ॥ ४५ ॥
नामगोत्रमुदाहृत्य प्रेताय तदनन्तरम् ।
शीघ्रमावाहयेद्भूमे दर्भपात्रे च भूतले ॥ ४६ ॥
मन्त्रः—इहलोकं परित्यज्य गतोऽसि परमाङ्गतिम् ।
गृह्ण† गन्धं मुदा युक्तो भक्त्या प्रेतोपपादितम्‡ ॥ ४७ ॥
गन्धमन्त्रः—सर्व्वगन्धं सर्व्वपुष्पं धूपं दीपं तथैव च ।

* परत्र च सुखावहे इति (ग)। † गृहाणेति साधु। ‡ भक्त्या मे प्रतिपादितमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रतिगृह्णीष्व* विप्रेन्द्र प्रेतमोक्षप्रदो भव ॥ ४८ ।
एवं वस्त्राणि विप्राय सर्वाण्याभरणानि च ।
पुनः पुनश्च पक्वान्नं प्रयच्छेत† वसुन्धरे ।
एवमादीनि द्रव्याणि प्रेतभागानि‡ सर्व्वशः ॥ ४९ ।
पादशौचादि निःकृत्वा चातुर्वर्ण्यस्य माधवि ।
एवं विधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्ज्जितम् ।
अमन्त्रस्य च शूद्रस्य विप्रो मन्त्रेण गृह्णति§ ॥ ५० ।
एतत्सर्व्वं विनिर्वर्त्य पक्वान्नं भोजयेद्द्विजम् ।
भोक्ष्यमाणेन विप्रेण ज्ञानशुद्धेन सुन्दरि ॥ ५१ ।
प्रेताय प्रथमं दद्यान्न स्पृशेत परात्परम् ।
सर्व्वं व्यञ्जनसंयुक्तं प्रेतभागम्प्रकल्पयेत् ॥ ५२ ।
देवत्वं ब्राह्मणत्वञ्च प्रेतपिण्डे प्रदीयते ।
मानुषत्वं निवापेषु ज्ञातव्यं सततं बुधैः ॥ ५३ ।
पितृस्थाने प्रदातव्यं विधानान्मन्त्रसंयुतम्¶ ।
एवं विप्रेषु प्रेतेषु एककालो न विद्यते ॥ ५४ ।
हस्तशौचं पुनः कृत्वा उपस्पृश्य यथाविधि ।
समन्त्रं प्रतिगृह्णाति पक्वान्नं भक्ष्यभोजनम् ॥ ५५ ।
भुज्यमानस्य‖ विप्रस्य प्रेतभागञ्च नित्यशः ।
ज्ञातिवर्गेषु गोत्रेषु सम्बन्धिस्वजनेषु च ।

---

* प्रतिगृह्याणेति साधु । † प्रयच्छेदिति साधु । ‡ प्रेतभागानिति साधु ।
§ गृह्णातीति साधु । ¶ विधिना मन्त्रसंयुतमिति (ग) । ‖ भुञ्जानस्येति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भागस्तत्र प्रदातव्यस्तस्यार्थं यस्य विद्यते ॥ ५६ ।
विप्रस्य दीयमाने तु वारणीयं न कस्यचित् ।
निवारयति यो दत्तं गुरुहत्याफलं लभेत्* ॥ ५७ ।
न देवाः प्रतिगृह्णन्ति नाग्नयः पितरस्तथा ।
एवं विलुप्यते धर्म्मः प्रेतस्तत्र न तुष्यति ।
एवं विचिन्त्यमानस्य यथा धर्म्मो न लुप्यते ॥ ५८ ।
ज्ञातिसम्बन्धिमध्ये तु यो दद्यात्प्रेतभोजनम् ।
हृष्टेन मनसा विप्रे प्रेतभागं विशेषतः ।
कूटवत्प्रतितिष्ठेत दृष्ट्वा तृप्तिं न गच्छति ।
एवं तु प्रेतभावेन शीघ्रं मुच्यति किल्बिषात् ॥ ५९।६० ।
तृप्तिं ज्ञात्वा तु विप्रस्य पक्वान्नेन तु माधवि ।
दातव्यमुदकं तस्य पाणावभ्युत्क्षणं ततः ॥ ६१ ।
दृष्ट्वा तु प्रोषितं तेन उच्छिष्टं न विसर्ज्जयेत् ।
ब्राह्मणेनाप्यनुज्ञातः शीघ्रं संरक्षयेत्ततः ॥ ६२ ।
दातव्यं तत्र उच्छिष्टं येन हेतुमगर्हितम् ।
उपस्पृश्य विधानेन मम तीर्थगतेन च ॥ ६३ ।
शुचिर्भूत्वा तु विधिवत्कृत्वा शान्त्युदकानि तु ।
प्रणम्य शिरसा देवि निवापस्थानमागतः ।
मन्त्रैस्तुतिस्तु कर्त्तव्या तव भक्त्या व्यवस्थितः ॥ ६४ ।

---

* लभेतेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नमो नमो मेदिनि लोकमातः
उर्व्वै महाशैलशिलाधरायै* ।
नमो नमो धारिणि लोकधात्रि
जगत्प्रतिष्ठे वसुधे नमोऽस्तु ते ॥ ६५ ।
एवं निवापदानेन तव भक्तेन सुन्दरि ।
दद्यात्तिलोदकं तस्य नामगोत्रमुदाहरेत् ॥ ६६ ।
जानुभ्यामवनिङ्गत्वा नमस्कृत्वा द्विजोत्तमान् ।
पाणिं संगृह्य हस्तेन मन्त्रेणोत्थापयेद्द्विजान् ।
दद्याच्छय्यासनं देवि तथैवाञ्जनकङ्कणम् ॥ ६७ ।
अञ्जनं कङ्कणं गृह्य शय्यामाक्रम्य स द्विजः ।
मुहूर्त्तं तत्र विश्रम्य निवापस्थानमागतः ।
गवां लाङ्गूलमुद्धृत्य दद्याद्ब्राह्मणहस्तके ॥ ६८ ।
पात्रेणोदुम्बरस्थेन कृत्वा कृष्णतिलोदकम् ।
उदाहरेत्तु मन्त्रान्वै सौरभेयान्द्विजातयः ॥ ६९ ।
मन्त्रपूतं तदा तोयं सर्व्वपापप्रणाशनम् ।
उद्धृत्य तत्र लाङ्गूलं तोयेनाभ्युक्ष्य वै ततः ।
पश्चात्प्रेतं विसर्ज्जैवं दद्याद्दानं द्विजातये ।
निवापमन्नमशुचिं दद्याद्दायसतर्पणम् ॥ ७०।७१ ।
गत्वा तु ब्राह्मणेभ्योऽपि स्वगृहं यत्र तिष्ठति ।
पक्वान्नं भोजयेत्सर्व्वं न तिष्ठेत्प्रतिवासिकम् ॥ ७२ ।

---

* शिलाधरा चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पिपीलिकादिभूतानि* प्रेतभागञ्च सर्व्वशः ।
कृत्वा तु तर्पणं देवि यस्यार्थे तस्य कल्पयेत् ॥ ७३ ।
भुक्तेषु तेषु सर्व्वेषु दीनानाथान् प्रतर्प्य च ।
प्रेतराजपुरं गत्वा प्रयच्छति स माधवि ।
सर्व्वान्नमक्षयं तस्य दत्तं भवति सुन्दरि ॥ ७४ ।
कर्त्तव्य एवं संस्कारः प्रेतभावविशोधनः ।
नेमिप्रभृतिभिः शौचं चातुर्वर्ण्यस्य सर्व्वतः ।
भविष्यति न सन्देहो दृष्टपूर्व्वं स्वयम्भुवा ॥ ७५ ।
कृत्वा तु धर्म्मसङ्कल्पं प्रेतकार्य्यं विशेषतः ।
न भेतव्यं त्वया पुत्र प्रेतकार्य्ये कृते सति ॥ ७६ ।
विस्तरेण मया प्रोक्तं प्रत्यक्षं नारदस्य च ।
त्वया वत्स सुतस्यार्थे क्रतुरेकः प्रतिष्ठितः ।
तस्मात्प्रभृति लोकेषु पितृयज्ञो भविष्यति ॥ ७७ ।
एवं यास्यसि वत्स त्वं न शोकं कर्त्तुमर्हसि ।
शिवलोकं ब्रह्मलोकं विष्णुलोकं न संशयः ॥ ७८ ।
एवमुक्त्वा तदात्रेयः पितृकर्म्म यथाविधि ।
दातव्यन्तु तृतीये च मासे सप्त नवेषु च† ।
एकादशे तथा मासे दद्यात्सांवत्सरीं क्रियाम् ॥ ७९ ।
प्रेतस्यावाहनङ्कृत्वा शुचिर्भूत्वा समाहितः ।

---

* भूतानीति सार्व्वत्रिकः पाठः भूतानामिति कृते तु सुसङ्गतिः स्यात् । † नवसु चेति साधु, तथा कृते तु छन्दोदोषः स्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पक्वान्नं भोजयेत्तत्र प्रेतभागं यथाविधि ॥ ८० ।
मन्त्रयुक्तोपचारेण चातुर्वर्ण्यस्य सर्व्वतः ।
वृषलानाममन्त्राणां प्रयोक्तव्यं यथाविधि ॥ ८१ ।
प्रेतकार्य्यें निवृत्ते तु पूर्णे संवत्सरे तथा ।
प्रयान्ति जन्तवः केचिद्गत्वा गच्छन्ति चापरे ॥ ८२ ।
पितामहः स्नुषा भार्य्या ज्ञातिसम्बन्धिबान्धवाः ।
यद्येते बहवः सन्ति स्वप्नोपममिदं जगत् ॥ ८३ ।
स्वयं मुहूर्त्तं रोदित्वा ततो याति पराङ्मुखः ।
स्नेहपाशेन बद्धो वै* क्षणार्द्धान्मुच्यते ततः ॥ ८४ ।
कस्य माता पिता कस्य कस्य भार्य्या सुतास्तथा ।
युगे युगेषु वर्त्तन्ते मोहपाशेन बध्यते† ।
स्नेहभावेन कर्त्तव्यः संस्कारो हि मृतस्य च ॥ ८५ ।
मातापितृसहस्राणि पुत्त्रदारशतानि च ।
संसारेष्वनुभूतानि‡ कस्य ते कस्य वा वयम् ॥ ८६ ।
स्वयम्भुवा विधिः प्रोक्तः प्रेतसंस्कारलक्षणः§ ।
प्रेतकार्य्यें निवृत्ते तु पितृत्वमुपजायते ।
मासि मासि ह्यमायां वै कर्त्तव्यं पितृतर्पणम् ॥ ८७ ।
पिता पितामहश्चैव तथैव प्रपितामहः ।
जुहुयाद्ब्राह्मणमुखे तृप्तिर्भवति शाश्वती ॥ ८८ ।

---

* नद्धीवै इति (ग) । † बद्धत इति (ग) । ‡ अनुभूतस्येति (ग) । § प्रेतसंसार-लक्षण इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवमुक्त्वा स आत्रेयः पितृयज्ञविनिश्चयम् ।
मुहूर्त्तं ध्यानमास्थाय तत्रैवान्तरधीयत ॥ ८९ ।

नारद उवाच ।

श्रुत्वा तु मृतसंस्कारमात्रेयोक्तं यथाविधि ।
चातुर्वर्ण्यस्य सर्व्वस्य त्वया धर्म्मः प्रतिष्ठितः ॥ ९० ।
पितृयज्ञमुपश्राद्धे मासि मासि दिने तथा ।
वर्त्तयन्ति यथान्यायमृषयश्च तपोधनाः ।
निर्द्दिष्टं ब्राह्मणानां वै शूद्राणां मन्त्रवर्ज्जितम् ९१ ।
नेमिना च कृतं श्राद्धं ततः प्रभृति वै द्विजाः ।
कुर्व्वन्ति सततं श्राद्धं नेमिश्राद्धं तदुच्यते ॥ ९२ ।
स्वस्त्यस्तु ते महाभाग यास्यामि मुनिसत्तम ।
एवमुक्त्वा मुनिश्रेष्ठो नारदो द्विजसत्तमः ।
तेजसा द्योतयन्सर्व्वं गतः शक्रपुरम्प्रति ॥ ९३ ।
एवञ्च पिण्डसङ्कल्पं श्राद्धोत्पत्तिञ्च माधवि ।
आत्रेयेणैव मुनिना स्थापितं ब्राह्मणेषु च ॥ ९४ ।

इति वराहपुराणे भगवच्छास्त्रे पिण्डकल्पश्राद्धोत्पत्तिर्नाम
अष्टाशीत्यधिकशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऊननवत्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतं श्राद्धं यथावृत्तं शौचाशौचांश्च सर्व्वशः ।
चतुर्णामपि वर्णानां प्रेतभोज्यं यथाविधि ।
उत्पन्नं संशयं मेऽद्य भगवन्वक्तुमर्हसि ॥ १ ।
चातुर्वर्ण्येषु सर्व्वेषु दद्याद्दानं द्विजोत्तमे ।
प्रतिग्टह्णन्ति ये तत्र प्रेतभागं विशेषतः ॥ २ ।
अनिष्टं गर्हितं तत्र प्रेतेन सह भोजनम् ।
भुक्त्वा तेषां द्विजो देव मुच्यते केन कर्म्मणा ॥ ३ ।
कथन्ते तारयिष्यन्ति दातारं पुरुषोत्तम ।
प्रणयात्स्त्रीस्वभावेन पृच्छामि त्वां जनार्दन ॥ ४ ।
एवमुक्तोऽपि भूम्याऽसौ शङ्खदुन्दुभिनिस्वनः ।
वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ ५ ।

वराह उवाच ।

साधु भूमे वरारोहे यस्मात्त्वम्परिपृच्छसि ।
कथयिष्यामि ते देवि तारयन्ति यथा द्विजाः ॥ ६ ।
भुक्त्वा तु प्रेतभोज्यानि ब्राह्मणो ज्ञानदुर्ल्लभः ।
विशोधनार्थं देहस्य उपवासन्तु कारयेत् ॥ ७ ।
अहोरात्रोषितो भूत्वा विप्रो ज्ञानेन संयुतः ।
पूर्व्वसन्ध्यां विनिर्वर्त्य कृत्वा चैवाग्नितर्पणम् ।
तिलहोमं प्रकुर्व्वीत शान्तिमङ्गलपाठकः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राक्स्रोतां च नदीं गत्वा स्नानं कृत्वा विधानतः ।
पञ्चगव्यं ततः पीत्वा मधुपर्केण संयुतम् ।
औडुम्बरे च पात्रे च कृत्वा शान्त्युदकानि च ।
प्रोक्षयेच्च गृहं सर्व्वं यत्रातिष्ठत्स्वयं द्विजः ॥ ८।९।१० ।
देवाश्चाग्निमुखाः सर्व्वे तर्पयित्वा विभागशः ।
भूतानाञ्च बलिं दद्याद्ब्राह्मणानाञ्च भोजनम् ।
एका गौस्तु प्रदातव्या पापक्षयकरी तदा ॥ ११ ।
एवं तु कुरुते यश्च स याति परमां गतिम् ।
प्रेतान्ने चोदरस्थे तु कालधर्म्ममुपागतः ।
आकल्पं नरके घोरे वसमानः* सुदुःखितः ।
प्राप्नोति राक्षसत्वं वै ततो मुच्यति† किल्बिषात् ॥ १२ ।
प्रायश्चित्तन्तु कर्त्तव्यं दातृभोक्तृसुखावहम् ।
गावो हस्त्यश्व-आदीनि सागरान्तानि माधवि ।
प्रतिगृह्णन्ति ये विप्रा मन्त्रेण विधिपूर्व्वकम् ।
प्रायश्चित्तञ्चरेद्यस्तु स तारयति निश्चितम् ॥ १३।१४ ।
द्विजो ज्ञानेन सम्पन्नो वेदाभ्यासरतः सदा ।
स तारयति चात्मानं दातारं नैव संशयः‡ ।
ब्राह्मणो नावमन्तव्यस्त्रिभिर्वर्णैर्धराधरे ॥ १५ ।
दैवे च जन्मनक्षत्रे श्राद्धकाले च पर्व्वसु ।

---

* वसमान इति आर्षं, वसन्निति साधु । † मुच्यते इति साधु । ‡ नात्र संशयः इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रेतकार्य्येषु सर्व्वेषु परीक्ष्य निपुणं द्विजम्।
वेदविद्याव्रतस्नातम्बहुधर्म्मनिरन्तरम्* ।
शीलयुक्तं सुसन्तुष्टं धर्म्मज्ञं सत्यवादिनम्।
क्षमायुक्तञ्च शास्त्रज्ञमहिंसायां रतं तथा।
एभिर्गुणैस्तु संयुक्तं ब्राह्मणं प्राप्य सत्वरः।
दद्याद्दानानि विप्राय सर्व्वै तारयितुङ्क्षमः॥ १६।१७।१८।
कुण्डगोलेषु यद्दत्तं निष्फलं तत्तु जायते।
कुण्डगोलः प्रतिग्राही दातारञ्चाप्यधो नयेत्॥ १९।
पित्रे कर्म्मणि चैकन्तु कुण्डं वा गोलकं तथा।
दृष्ट्वा तं पितरो यान्ति निराशा निरयं द्रुतम्॥ २०।
दैवे कर्म्मणि चैवन्तु तेषां दत्तं सुनिष्फलम्।
तस्माद्दानं न दातव्यमपात्राय यशस्विनि।
अत्रार्थे यत्पुरा वृत्तं तच्छृणुष्व वसुन्धरे॥ २१।
अवन्तीविषये कश्चिद्राजा अत्यन्तधार्म्मिकः।
नाम्ना मेधातिथिश्चैव मनुवंशविवर्द्धनः॥ २२।
राज्ञः पुरोहितश्चासीच्चन्द्रशर्म्मा द्विजोत्तमः।
आत्रेयगोत्रे चोत्पन्नो वेदवादरतः सदा॥ २३।
स राजा ब्राह्मणेभ्यश्च गा ददाति दिने दिने।
शतं दत्त्वा विधानेन पश्चाद्भुङ्क्ते नराधिपः॥ २४।
गते बहुतिथे काले राज्ञो मेधातिथेः पितुः।
श्राद्धस्य दिवसः प्राप्तो वैशाखे वरवर्णिनि॥ २५।

---

* षट्कर्म्मनियतं शुचिमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स विप्रानाह्वयामास पितुर्वै श्राद्धकारणात् ।
आगतान्ब्राह्मणान्दृष्ट्वा मेधातिथिरकल्मषः ।
विप्रान्नत्वा गुरूंश्चैव श्राद्धारम्भमथाकरोत् ॥ २६ ।
श्राद्धङ्कृत्वा तु विधिवत्पिण्डान्निर्वाप्य यत्नतः ।
श्राद्धसङ्कल्पितं चान्नं विप्रेभ्यः प्रददौ बहु ॥ २७ ।
तन्मध्ये ब्राह्मणः कश्चिद्गोलकोऽवस्थितस्तदा* ।
श्राद्धे सङ्कल्पितं चान्नं तस्मै दत्तं विधानतः† ॥ २८ ।
तेनैव श्राद्धदोषेण राज्ञस्तु पितरस्तदा ।
स्वर्गाद्भ्रष्टा लम्बन्ते स्म वने कण्टकसंयुते ।
क्षुत्पिपासार्दिता नित्यं क्रन्दन्ति‡ च पुनः पुनः ॥ २९ ।
कदाचिद्दैवयोगेन राजा मेधातिथिः स्वयम् ।
मृगयार्थङ्गतस्तत्र द्विजैः परिजनैर्वृतः ॥ ३० ।
तत्रावलम्बतो§ दृष्ट्वा तानपृच्छद्द्विजप्रियः ।
के भवन्तोऽत्र संप्राप्ता दशामेतां सुदुःखिताः ।
केन कर्म्मविपाकेन भवन्तः कथयन्तु मे ॥ ३१ ।

पितर ऊचुः ।

अस्मद्वंशकरो नित्यं नाम्ना मेधातिथिः प्रभुः ।
वयं तस्यैव पितरो नरकङ्गन्तुमुद्यताः ॥ ३२ ।
तेषान्तु वचनं श्रुत्वा राजा दुःखसमन्वितः ।
उवाच तान् पितॄन् सर्व्वान् सान्त्वपूर्व्वमिदं वचः ॥ ३३ ।

* तथेति (ग) । † विप्रेभ्यः प्रददौ बहु इति (ग) । ‡ क्रन्दन्तीति साधु ।
§ लम्बमानानिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मेधातिथिरुवाच ।

मेधातिथिरहं नाम्ना भवन्तः पितरो मम ।
केन वै कर्म्मदोषेण निरयङ्गन्तुमुद्यताः ॥ ३४ ।

पितर ऊचुः ।

श्राद्धं सङ्कल्पितं चान्नं दत्तं तद्गोलकाय वै ।
तेनैव कर्म्मदोषेण प्रयाता॰ नरकं वयम् ।
तत्र दुःखं महद्भुक्त्वा पुनर्गच्छामि* वै दिवम् ॥ ३५ ।
पुत्र त्वञ्चैव दाता च सर्व्वलोकहिते रतः ।
असंख्यातास्त्वया दत्ता गावः सुबहुदक्षिणाः ॥ ३६ ।
तेन पुण्येन गच्छामः स्वर्गं ह्यतिसुखप्रदम् ।
तत्र चान्नं न विद्येत येन तृप्तिर्भविष्यति ।
पुनः श्राद्धन्त्वया कार्य्यं पितॄणां तृप्तिदायकम् ॥ ३७ ।
तेषान्तु वचनं श्रुत्वा मेधातिथिरगाद्गृहम् ।
आहूय चन्द्रशर्म्माणं गुरुं वचनमब्रवीत् ॥ ३८ ।

मेधातिथिरुवाच ।

चन्द्रशर्म्मन्पुनः श्राद्धं करिष्ये पितुरद्य वै ।
आहूयन्तां द्विजाः सर्व्वे कुण्डगोलकवर्ज्जिताः ॥ ३९ ।
इत्युक्तमात्रे वचने चन्द्रशर्म्मा पुरोहितः ।
आहूतवान्द्विजान् सर्व्वान्वेदपाठकृतश्रमान् ।
साधून्क्षान्तान् कुलीनांश्च सुशीलान्मानवर्ज्जितान् ॥ ४० ।
राज्ञा तु कारयामास श्राद्धं विधिविदां वरः ।

---

* गच्छामः इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कृते श्राद्धे ततः पश्चात्पिण्डान्निर्वाप्य यत्नतः ।
ब्राह्मणान् भोजयामास दक्षिणाभिः प्रपूज्य च ॥ ४१ ।
पश्चाद्विसर्ज्जयामास स्वयन्तु बुभुजे नृपः ।
भुक्त्वा पुनर्वनङ्गत्वा दृष्टवांश्च स्वकान् पितॄन् ।
हृष्टान् पुष्टान् बलैर्युक्तान्राजा तु मुमुदे भृशम् ॥ ४२ ।
दृष्ट्वा तु पितरश्चैवं राजानं पितृवत्सलम् ।
ऊचुर्विनयसम्पन्नाः प्रीतिपूर्व्वमिदं वचः ॥ ४३ ।
स्वस्ति तेऽस्तु गमिष्यामः स्वर्गलोकम्प्रति प्रभो ।
इदानीञ्च त्वया कार्य्यमस्मद्धितमनुत्तमम् ॥ ४४ ।
गोलकाय न दातव्यं दैवं पित्र्यमथापि वा ।
तयोर्दत्तन्तु यच्छ्राद्धं निष्फलं तत्स्मृतं बुधैः ॥ ४५ ।
दैवे कर्म्मणि पित्रे च ब्राह्मणो नैव लभ्यते ।
सङ्कल्पयित्वा* अन्नन्तु गोभ्यो देयं यथाविधि ॥ ४६ ।
गवामभावे नद्यां वा क्षिपेदन्नं प्रयत्नतः ।
अपात्राय न दातव्यं नास्तिकाय गुरुद्रुहे ।
गोलकाय न दातव्यं कुण्डाय च विशेषतः ॥ ४७ ।
इत्युक्त्वा पितरः सर्व्वे गताः स्वर्गाय भामिनि ।
मेधातिथिरपि प्रायात्स्वपुरं ब्राह्मणैर्वृतः ।
यदुक्तं पितृभिः सर्व्वं तच्चकार मुदा युतः ॥ ४८ ।
तस्मात्ते कथितं देवि एकोऽपि ब्राह्मणोत्तमः ।
सन्तारयति दुर्गेभ्यो विषमेभ्यो न संशयः ॥ ४९ ।

---

* संकल्प्य इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकोऽपि तारितुं* शक्तो यथा नावा महज्जलम् ।
तस्माद्दानं प्रदातव्यं ब्राह्मणाय वसुन्धरे ॥ ५० ।
देवासुरमनुष्याणां गन्धर्व्वोरगरक्षसाम् ।
सर्व्वे श्राद्धङ्करिष्यन्ति नेमिप्रभृति माधवि ।
मासे मासे च वै पश्चात्पितृपक्षे तपोधनाः ॥ ५१ ।

इति वराहपुराणे भगवच्छास्त्रे पिण्डकल्पोत्पत्तिर्नाम

ऊननवत्यधिकशततमोऽध्यायः ।

नवत्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

देवमानुषतिर्य्यक्षु प्रेतेषु नरकेषु च ।
आयान्ति जन्तवः केचिद्भूत्वा गच्छन्ति चापरे ॥ १ ।
स्वप्नोपममिमं लोकं ह्यात्मकर्म्म शुभाशुभम् ।
वर्त्तते तिष्ठते देव तव मायाबलैर्जगत् ॥ २ ।
क एते पितरो देव श्राद्धं भोच्यन्ति योगतः ।
आत्मकर्म्मवशाल्लोके गतिः पञ्चसु वर्त्तते ॥ ३ ।
कथन्तं पिण्डसङ्कल्पं मासे मासे नियोजयेत् ।
के भवन्ति च भोक्तारः श्राद्धे पिण्डान् पितृक्रियाः ।
निश्चयं श्रोतुमिच्छामि परङ्कौतूहलं हि मे ॥ ४ ।

---

* तारयितुमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पृथिव्या एवमुक्तस्तु देवीनारायणोहरिः ।
वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ ५ ।

वराह उवाच ।

साधु भूमे वरारोहे सर्व्वधर्म्मव्यवस्थिते ।
कथयिष्यामि ते देवि यन्मान्त्वम्परिपृच्छसि ॥ ६ ।
ये ते भवन्ति भोक्तारः पितृयज्ञेषु माधवि ।
पिता पितामहश्चैव तथैव प्रपितामहः ।
क्रियते पिण्डसङ्कल्पो मासे ह्येकदिने तथा ॥ ७ ।
ज्ञात्वा नक्षत्रसंयोगं पितृपक्षे ह्युपागते ।
तिथिं पर्व्व विजानीयाद्येषु दत्तं महत्फलम् ॥ ८ ।
करिष्यन्ति च ये श्राद्धं श्रद्धया ज्ञानिनो जनाः ।
तत्सर्व्वं कथयिष्यामि श्रूयतां शुभलोचने ॥ ९ ।
केचिद्यजन्ति यज्ञं वै ब्रह्मयज्ञं द्विजातयः ।
केचिद्यजन्ति सुभगे देवयज्ञं हुताग्नने ॥ १० ।
केचिच्च भूतयज्ञेन वर्त्तयन्ति सुमध्यमे ।
केचिन्मनुष्ययज्ञेन पूजयन्ति गृहाश्रमे ।
पितृयज्ञञ्च भो देवि शृणु वक्ष्यामि निश्चयम् ॥ ११ ।
ये यजन्ति वरारोहे क्रतूनेकाग्रतैरपि ।
सर्व्वे ते मयि वर्त्तन्ते सत्यमेतद्ब्रवीमि ते ॥ १२ ।
अग्निर्मुखञ्च देवानां हव्यकव्येषु माधवि ।
उत्तरोऽग्निरहञ्चैव दक्षिणाग्निरहं तथा ।
अहमाहवनीयोऽग्निः सर्व्वयज्ञेषु सुन्दरि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पावनः पावकश्चैवं अहमेव व्यवस्थितः ॥ १३।१४ ।
सर्व्वेष्वेव तु कार्य्येषु देवसत्रेषु माधवि ।
वैश्वदेवे नियुञ्जीत ब्रह्मचारी शुचिः सदा ॥ १५ ।
भिक्षुको देवतीर्थेषु वानप्रस्थो यतिस्तथा ।
एतान्न भोजयेच्छ्राद्धे देवतार्थेषु पूजयेत्* ॥ १६ ।
व्रतस्थान् संप्रवक्ष्यामि श्राद्धमर्हन्ति ये द्विजाः ।
उत्तमो गृहसन्तुष्टः क्षान्तो दान्तो जितेन्द्रियः ।
उदासीनः सत्यसन्धः श्रोत्रियो धर्म्मपाठकः ।
वेदविद्याव्रतस्नातो सुविमृष्टान्नभोजकः ।
ईदृशान् भोजयेच्छ्राद्धे पितृयज्ञेषु माधवि ॥ १७।१८ ।
दत्त्वा हुताशनायादौ देवतीर्थेषु सुन्दरि ।
पश्चाद्ब्राह्मणमुखे दद्यात्पित्रर्थञ्च यथाविधि ॥ १९ ।
चतुर्णामेव वर्णानां† यद्यथा श्राद्धमर्हति ।
तथा विधिः प्रयोक्तव्यः पितृयज्ञेषु सुन्दरि ॥ २० ।
यन्न पश्यन्ति ते भोज्यं श्वानः कुक्कुटशूकराः ।
ब्राह्मणाश्चाप्यपांक्तेया नराः संस्कारवर्ज्जिताः ॥ २१ ।
सर्व्वकर्म्मकरा ये च सर्व्वभक्षाश्च ये नराः ।
एतान् श्राद्धे न पश्येत पितृयज्ञेषु सुन्दरि ।
एते पश्यन्ति यच्छ्राद्धं तच्छ्राद्धं राक्षसं विदुः ॥ २२ ।
मया प्रकल्पितो भागो बलये पूर्व्वमेव तु ।

---

* एतान् भोजयेच्छ्राद्धेषु देवतीर्थेषु पूजयेदिति (क), (ख) । † चतुर्णामेकवर्णानामिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

हृतं यदा तु त्रैलोक्ये शक्रस्यार्थे त्रिविक्रमे ।
एवं श्राद्धं प्रतीचन्ति* मन्त्रहीनमविक्रियम् ।
वर्ज्जनीया बुधैरेते पितृयज्ञेषु सुन्दरि ॥ २३।२४ ।
प्रच्छन्नं भोजयेच्छ्राद्धे तर्पयित्वा द्विजं शुचिः ।
पितॄंस्तत्राह्वयेद्भूमे मन्त्रेण विधिपूर्व्वकम् ।
पिण्डास्त्रयः प्रदातव्याः सह-व्यञ्जनसंयुताः ॥ २५ ।
पिता पितामहश्चैव तथैव प्रपितामहः ।
अपसव्येन दातव्यं मासि मासि तिलोदकम् ॥ २६ ।
प्रणम्य शिरसा देवीर्निर्वापस्य च धारिणीः ।
वैष्णवी काश्यपी चेति अजया चेति नामतः ।
एवं दत्तेन प्रीयन्ते पितरश्च न संशयः ॥ २७ ।
परमात्मा शरीरस्थो देवतानां मया कृतः ।
त्रयस्तत्र वरारोहे देवगात्राद्विनिःसृताः ।
पितृदेवा भविष्यन्ति भोक्तारः पितृपिण्डकान् ॥ २८ ।
देवतासुरगन्धर्व्वा यक्षराक्षसपन्नगाः ।
छिद्रं श्राद्धेऽस्य पश्यन्ति वायुभूता न संशयः ॥ २९ ।
पितृयज्ञं विशालाक्षि ये कुर्व्वन्ति विदो जनाः ।
आयुः कीर्त्तिं बलं तेजो धनपुत्त्रपशुस्त्रियः ।
ददन्ति पितरस्तस्य आरोग्यं नात्र संशयः ॥ ३० ।
आत्मकर्म्मवशाल्लोकान् प्राप्नुवन्तीह शोभनान् ।

---

* प्रतीचन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तिर्य्यक्षु च विमुच्यन्ते* प्रेतभावेन मानवाः॥ ३१।
नरके पच्यमानानां त्राता भवति मानवः।
पूजकः पितृदेवानां सर्व्वकालं गृहाश्रमे॥ ३२।
द्विजातींस्तर्पयित्वा तु पूर्णेन विधिना नरः।
अक्षय्यं तस्य मन्यन्ते पितरः श्राद्धतर्पिताः॥ ३३।
नरा ये पितृभक्तास्ते प्राप्नुवन्ति पराङ्गतिम्।
सात्त्विकं शुक्लपन्थानमेते यान्ति द्विजोजनाः॥ ३४।
पुनरन्यत्प्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि।
अज्ञानतमसारूढ़ा निकृतिज्ञाः शठास्तथा।
स्नेहपाशशतेनैव पच्यन्ते नरके नराः॥ ३५।
कल्पान्तं पच्यमानापि† ये न त्रायन्ति‡ मानवाः।
तेषां पुत्त्राश्च पौत्त्राश्च कदाचिदपि सुन्दरि।
मुच्यन्ते जलबिन्दूंश्च श्रमां प्राप्य जलाशये।
तेनैव भविता तृप्तिस्तेषां निरयगामिणाम्॥ ३६।३७।
ये वै श्राद्धम्प्रकुर्व्वन्ति तर्पयित्वा द्विजातयः।
दत्त्वा तिलोदकं पिण्डान् पितृभ्यो भक्तिभावतः।
निरयात्तेऽपि मुच्यन्ते तृप्तिर्भवति चाक्षया॥ ३८।
गृह्य चौदुम्बरं पात्रङ्कृत्वा तत्र तिलोदकम्।
विप्राणां वचनङ्कृत्वा यथाशक्त्या§ च दक्षिणा।
देया तेषान्तु विप्राणां पितॄणां मोक्षणाय च॥ ३९।

* तिर्य्यक्षु न च मुच्यन्ते इति (क), (ख)। † पच्यमाना अपीति साधु। ‡ त्रायन्ते इति साधु, कर्म्मणि प्रयोगोऽयम्। § यथाशक्तीति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

देयो नीलो वृषस्तत्र नरकार्त्तिविनाशनः ।
नीलषण्डस्य लाङ्गूले तोयमप्युद्धरेद्यदि ।
षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः ॥ ४० ।
मुक्तमात्रेण शृङ्गेण नीलषण्डेन सुन्दरि ।
उद्धृतो यदि सुश्रोणि पङ्कः शृङ्गेण तेन च ।
बान्धवाः पितरस्तस्य निरये पतितास्तु ये ।
तानुद्धृत्य वरारोहे सोमलोकं प्रयच्छति ॥ ४१।४२ ।
मुक्तेन नीलषण्डेन यत्पुण्यं जायते भुवि ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
सोमलोकेषु मोदन्ते क्षुत्तृड्भ्याञ्च विवर्ज्जिताः ॥ ४३ ।
एष धर्म्मो गृहस्थानां पुत्त्रपौत्त्रसमन्विताः ।
त्रातारश्च भविष्यन्ति वर्त्तयन्तो यथासुखम् ॥ ४४ ।
पिपीलिकादिभूतानि जङ्गमाश्च विहङ्गमाः ।
उपजीवन्ति सुश्रोणि गृहस्थेषु न संशयः ॥ ४५ ।
एवङ्गृहाश्रमो मूलं धर्म्मस्तत्र प्रतिष्ठितः ।
मासि मासि तु ये श्राद्धं प्रवर्त्तन्ति* गृहाश्रमे ।
तिथौ पर्व्वणि ये चैव स्वपितॄंस्तारयन्ति वै ॥ ४६ ।

न यज्ञदानाध्ययनोपवासै-
स्तीर्थाभिषेकैरपि चाग्निहोत्रैः ।
दानैरनेकैर्विधिसम्प्रदत्तै-
र्न तत्फलं श्राद्धगृहस्थधर्म्मे ॥ ४७ ।

---

* प्रवर्त्तन्तीति आर्षं, प्रवर्त्तन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पितरो निर्गतास्तत्र ब्रह्मविष्णुशरीरगाः ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥ ४८ ।
एवं क्रमेण वै तत्र पितृदेवा वसुन्धरे ।
देवताः कश्यपोत्पन्नाः श्राद्धेषु विनियोजिताः ॥ ४९।५० ।
तत एते न जानन्ति देवाः शक्रपुरोगमाः ।
ईश्वरश्च न जानाति आत्मदेहविनिःसृताः ।
न च ब्रह्मा विजानाति निःसृतो मम मायया ।
एवं मायामयौ भूमौ ब्रह्मरुद्रौ वहिष्कृतौ ॥ ५१।५२ ।
पुनश्चान्यत्प्रवक्ष्यामि पितृयज्ञेषु सुन्दरि ।
दद्याद्वै ब्राह्मणमुखे नाग्नौ तु जुहुयात्क्वचित् ।
कृत्वा वै पिण्डसङ्कल्पं दर्भानास्तीर्य्य भूतले ॥ ५३ ।
तेन ते पितृपिण्डेन पितृदेवा वसुन्धरे ।
अजीर्णेनाभिपीड्यन्ते भुज्यन्ते* न च सुन्दरि ॥ ५४ ।
ततो दुःखेन सन्तप्ताः सोममेवाभिपद्यते ।
दृष्टाः सोमेन सुश्रोणि देवताजीर्णपीड़िताः† ।
स्वागतेनाथ वाक्येन पूजितास्तदनन्तरम् ॥ ५५ ।

सोमोवाच‡ ।

देवताः कस्य चोत्पन्ना दुःखिताः केन हेतुना ।
एवन्तु भाषमाणस्य सोमस्य तदनन्तरम् ।

---

* भुञ्जते इति साधु । † देवता अजीर्णपीड़िता इति साधु । ‡ सोमोवाच इति सार्व्वत्रिकः पाठः, सोम उवाच इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ऊचुस्ते सोममेवापि* वाक्यं नः श्रूयतामिति ॥ ५६ ।
त्रयस्तु पितरो देवा ब्रह्मविष्णुहरोद्भवाः ।
श्राद्धे नियोजितास्तैस्तु पितृपिण्डेन तर्पिताः ।
अजीर्णं जायते सोम तेन वै दुःखिता वयम् ॥ ५७ ।

सोम उवाच ।

सखा चाहं भविष्यामि त्रयाणाञ्च चतुर्थकः ।
सहितास्तत्र गच्छामो यथा श्रेयो भविष्यति ॥ ५८ ।
एवमुक्तास्तु† सोमेन पितृदेवास्तदन्तरे ।
सोमं सोमेन गच्छन्ति‡ श्रेयष्कामा वसुन्धरे ॥ ५९ ।
शरण्यं शरणं देवं ब्रह्माणं पद्मसम्भवम् ।
मेरुशृङ्गे सुखासीनं ब्रह्मर्षिगणसेवितम् ।
दृष्ट्वा पितामहं देवम्प्रणम्य सहसा क्षितौ ।
अत्रिपुत्रेण सोमेन भाषितो वै पितामहः ॥ ६०।६१ ।
य एते पितरो देव दुःखिताजीर्णपीड़िताः ।
आगताः शरणं चात्र सोमं सोमेन सत्तम ।
यथा नश्यन्त्यजीर्णानि तथा कुरु पितामह ॥ ६२ ।
मुहूर्त्तं ध्यानमास्थाय ईश्वरञ्च ददर्श ह ।
उवाच वचनं तत्र ब्रह्मा योगीश्वरम्प्रति ॥ ६३ ।
एते ते पितरो देव दुःखिताजीर्णपीड़िताः ।

---

* सोममेवाथेति (ग) । † एवमुक्तास्ते इति (ग) । ‡ सोममेवान्तं गच्छन्तीति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आगताः शरणञ्चात्र सोमेन सहिता मम ।
आचक्ष्व निर्म्मिता येन यथा श्रेयो भवेत्तव ॥ ६४ ।
ब्रह्मणा चैवमुक्तस्तु ईश्वरं परमेश्वरः ।
मुहूर्त्तं ध्यानमास्थाय दिव्यं योगञ्च माधवि ।
पश्यते* ईश्वरन्तत्र योगवेदाङ्गनिर्म्मितम् ।
विस्मयं परमङ्गत्वा ब्रह्माणं वाक्यमब्रवीत् ॥ ६५।६६ ।
निर्म्मिता विष्णुना ब्रह्मन् वैष्णव्या मायया च ते ।
प्रथमं पितरो देवा ये च श्रेष्ठा भवन्ति ते ॥ ६७ ।
पिता तु ब्रह्मदैवत्यो मम गात्राद्विनिर्म्मितः ।
पितामहो विष्णुदेवो विष्णुगात्राद्विनिर्म्मितः ।
प्रपितामहो रुद्रदेवो मम गात्राद्विनिर्म्मितः ॥ ६८ ।
श्राद्धे नियोजितास्तेऽत्र मर्त्त्येषु पितृदेवताः ।
ब्राह्मणानां हितार्थाय निर्म्मिता विष्णुमायया ॥ ६९ ।
तर्पिताः पितृयज्ञेषु पितरोऽजीर्णपीड़िताः ।
आगताः शरणं ब्रह्मन् सोमेन सहिता यदि ।
येन नश्यत्यजीर्णञ्च पितॄणाञ्च सुखं भवेत् ।
शृणु तत्ते प्रवक्ष्यामि ब्रह्मन् लोकपितामह ॥ ७०।७१ ।
शाण्डिल्यपुत्रस्तेजस्वी धूम्रकेतुर्विभावसुः ।
श्राद्धे तु प्रथमं तस्य दातव्यं मानुषेषु वा ।
सह तेनैव भोक्तव्यं पितृपिण्डविसर्ज्जितम् ॥ ७२ ।

---

* पश्यतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ईश्वरेणैवमुक्तस्तु ब्रह्मा कमलसम्भवः ।
आहूय मनसा चैव आगतो हव्यवाहनः ।
प्रदीप्तस्तेजसा वह्निः सर्व्वभक्षो हुताशनः ॥ ७३ ॥
योजितः पञ्चयज्ञेषु ब्रह्मणा मम मायया ।
ब्रह्माग्निं भाषते तत्र शृणुष्व च हुताशन ॥ ७४ ॥
भोक्तव्यं प्रथमं ब्रह्मन् पितृपिण्डविसर्ज्जितम् ।
त्वया भुक्तेति भोक्ष्यन्ति देवताः समरुद्गणाः ॥ ७५ ॥
भोक्तव्यं अध्यमं श्राद्धं पथ्यमन्नञ्च वै सह ।
पश्चाद्दत्तन्तु तं पिण्डं सह सोमेन भुञ्जते ॥ ७६ ॥
ब्रह्मणा ह्येवमुक्तास्तु पितृदेवहुताशनाः ।
प्रस्थिताः सह सोमेन देवतास्ता वसुन्धरे ॥ ७७ ॥
पितृयज्ञं वरारोहे भोक्ष्यन्ति सहिताः सदा* ।
एवन्तु प्रथमं श्राद्धं दद्यादग्नेर्वसुन्धरे ॥ ७८ ॥
उद्दिश्य च पितॄन्देवि तर्पयित्वा द्विजातयः† ।
पश्चात्पिण्डान् विसर्जीत दर्भानास्तीर्य्य भूतले ॥ ७९ ॥
प्रथमं ब्रह्मणोऽंशाय दद्यात्पिण्डं विधानतः ।
पितामहाय रुद्रांशसम्भूताय तु मध्यमम् ॥ ८० ॥
प्रपितामहाय विष्णोस्तु दद्यात्पिण्डं महीतले ॥ ८१ ॥
विधिना मन्त्रपूर्व्वेण श्राद्धं कुर्व्वन्ति ये नराः ।
तेषां वरम्प्रयच्छन्ति पितरः श्राद्धतर्पिताः ॥ ८२ ॥

---

* सहितास्तदेति (ग) । † द्विजातीनिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मम मायाबलेनैव कृतं श्राद्धं द्विजातिभिः ॥ ८३ ।
अपांक्तेयांस्तथा विप्रान्प्रवक्ष्यामि वसुन्धरे* ।
नपुंसकाश्चित्रकरा वसुपालविनिन्दकाः ॥ ८४ ।
कुनखाः श्यावदन्ताश्च काणाश्च विकटोदराः ।
नर्त्तका गायनाश्चैव तथा रङ्गोपजीविनः ॥ ८५ ।
वेदविक्रयिणश्चैव सर्व्वयाजनयाजकाः ।
राजोपसेवकाश्चैव बाणिज्ये क्रयविक्रयाः ॥ ८६ ।
ब्रह्मयोन्यां समुत्पन्नाः सङ्कीर्णाः पतिताश्च ये ।
असंस्कारप्रवृत्ताश्च शूद्रकर्म्मोपजीविनः ॥ ८७ ।
शूद्रकर्म्मकरा ये च गणका ग्रामयाजकाः ।
दीक्षितः क्रोड़पृष्टश्च यश्च वार्धुषिको द्विजः ॥ ८८ ।
विक्रेतारो रसानाञ्च ये च वैश्योपजीविनः ।
तस्करा लेखकाराश्च याजका रङ्गकारकाः ॥ ८९ ।
शौलिका गिरिका ये च दाम्भिका ये च माधवि ।
सर्व्वकर्म्मकरा ये च सर्व्वविक्रयिणस्तथा ॥ ९० ।
एतान्न भोजयेच्छ्राद्धे पित्र्यें च वसुन्धरे ।
दूराध्वनि गता ये च तत्र कर्म्मोपजीविनः ॥ ९१ ।
रसविक्रयिणश्चैव शैलूषस्तिलविक्रयी ।
श्राद्धकालमनुप्राप्तं राजसं तं विदुर्बुधाः ॥ ९२ ।
अन्ये ये दूषिता देवि द्विजरूपेण राक्षसाः ।

---

* प्रवक्ष्यामि च सुन्दरीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतान्न पश्येच्छ्राद्धेषु पितृपिण्डेषु माधवि ॥ ९३ ।
अपांक्तेयांस्तथा विप्रान् भुञ्जतः पश्यतो द्विजान् ।
पितरस्तस्य षण्मासं दुःखमृच्छन्ति दारुणम् ॥ ९४ ।
न्यस्तपात्रं द्रुतं कुर्य्यात्प्रायश्चित्तमुभौ धरे ।
घृतन्तु जुहुयादग्नावादित्यं चावलोकयेत् ॥ ९५ ।
पुनरावपनङ्कृत्वा पितरश्च पितामहान् ।
गन्धपुष्पञ्च धूपञ्च दद्यादर्घ्यं तिलोदकम् ॥ ९६ ।
यथाविधि च विप्राय भोजयेच्च पुनः शुचिः ।
पुनश्चान्यत्प्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि ॥ ९७ ।
स्नानशुद्धेन विप्रेण मन्त्रशुद्धिं यथाविधि ।
मृतान्नं ये न भुञ्जन्ति कदाचिदपि माधवि ॥ ९८ ।
वैश्वदेवेषु दातव्यं श्राद्धेषु च न योजयेत् ।
प्रेतान्नं भुञ्जमानास्तु श्राद्धमर्हन्ति ये द्विजाः ॥ ९९ ।
तेषां दोषं प्रवक्ष्यामि भुक्तं भोजयते तु सः ।
दम्भकारकृतोच्छिष्टङ्कृत्वा तु नरकं व्रजेत् ॥ १०० ।
प्रायश्चित्तम्प्रवक्ष्यामि यथा शुध्यन्ति ते नराः ।
माघमासे तु द्वादश्यां सर्पिर्युक्तन्तु पायसम् ॥ १०१ ।
स लिहेन्मधुमांसेन तर्पयित्वा द्विजातयः ।
सवत्साङ्कपिलां दद्यादात्मनः शुद्धिमिच्छता ॥ १०२ ।
पुनः श्राद्धं प्रकुर्व्वीत आत्मनः शुभमिच्छता ।
स्नानोपलेपनं भूमे कृत्वा विप्रान् प्रमन्त्रयेत्* ॥ १०३ ।

* निमन्त्रयेदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दन्तकाष्ठं विसर्जीत* ब्रह्मचारी शुचिर्भवेत् ।
यत्नेन मिथुनं श्राद्धे भोजयित्वा विसर्ज्जयेत् ॥ १०४ ।
अमायायाञ्च विशालाक्षि दन्तकाष्ठं न खादयेत् ॥ १०५ ।
अमायान्तु च यो मूर्खो दन्तकाष्ठं हि खादति ।
हिंसितो भवती† सामो देवताः पितरस्तथा ॥ १०६ ।
प्रभातायान्तु शर्व्वर्य्यामुदिते च दिवाकरे ।
दिवाकृत्यं ततो गृह्य विप्रस्य विधिपूर्व्वकम् ।
श्मश्रुकर्म्म च कर्त्तव्यं नखानां छेदनानि च ॥ १०७ ।
स्नापनाऽभ्यञ्जने दद्यात्पितृभक्तेन सुन्दरि ।
पक्वान्नं तत्र वै कार्य्यं सुविमृष्टञ्च शुद्धितः ॥ १०८ ।
वृत्ते तु तत्र मध्याह्ने श्राद्धारम्भन्तु कारयेत् ।
स्वागतञ्च तथा कृत्वा पाद्यार्थं सलिलं शुचिः‡ ॥ १०९ ।
पाद्यं दत्त्वा तु विप्राय गृहस्याभ्यन्तरं नयेत् ।
आसनङ्कल्पयित्वा तु आवाह्य तदनन्तरम् ॥ ११० ।
अर्घ्यं दत्त्वा विधानेन गन्धमाल्यैः प्रपूज्य च ।
धूपं दीपं तथा वस्त्रं तिलोदकमथापि वा ॥ १११ ।
पात्रञ्च भोजनस्यार्थे विप्राग्रे धारयेत्तथा ।
भस्मना मण्डलङ्कार्य्यं पङ्क्तिदोषनिवारकम् ॥ ११२ ।
अग्निकार्य्यं ततः कृत्वा अन्नञ्च परिवेषयेत् ।
तत्र कार्य्यो न सङ्कल्पः पितॄनुद्दिश्य सुन्दरि ॥ ११३ ।

---

* विसर्ज्जयेदिति साधु । † भवतीति साधु । ‡ मण्डलं शुचिरिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथासुखेन भोक्तव्यमिति ब्रूयाद्द्विजम्प्रति ।
रक्षोघ्नमन्त्रपाठांश्च श्रावयेत विचक्षणः ॥ ११४ ।
तृप्तन्तु ब्राह्मणं दत्त्वा दद्याद्वै विकिरं ततः ।
उत्तरीयासनं दत्त्वा पिण्डप्रश्नन्तु कारयेत् ॥ ११५ ।
दक्षिणाभिमुखो भूत्वा दर्भानास्तीर्य्य भूतले ।
पिण्डदानं प्रकुर्व्वीत पित्रादित्रितये तथा ॥ ११६ ।
पिण्डानाम्पूजनङ्कार्य्यं तन्तुवृद्धैर यथाविधि ।
ब्राह्मणस्य च हस्ते तु दद्यादक्षय्यमात्मवान् ॥ ११७ ।
दक्षिणाभिः प्रतोष्यापि स्वस्तिवाच्यं विसर्ज्जयेत् ।
पिण्डास्त्रयस्तु वसुधे यावत्तिष्ठन्ति भूतले ॥ ११८ ।
आप्यायमानाः पितरस्तावत्तिष्ठन्ति वै गृहे ।
उपस्पृश्य शुचिर्भूत्वा दद्याच्छान्त्युदकानि च ॥ ११९ ।
प्रणम्य शिरसा भूमौ निवापस्य च धारिणीः* ।
वैष्णवी काश्यपी चेति अक्षया चेति नामतः ॥ १२० ।
भक्षयेत्प्रथमं पिण्डं पत्नैव देयन्तु मध्यमम् ।
तृतीयमुदके दद्याच्छ्राद्धे एवं विधिः स्मृतः ॥ १२१ ।
पितृदेवान्विसर्जीत ततश्च प्रणमेत्तु तान् ।
एवं दत्तेन तुष्यन्ति पितृदेवा न संशयः ।
दीर्घायुष्यं प्रयच्छन्ति पुत्रपौत्रधनानि च ॥ १२२ ।
ज्ञानोत्तमेषु विप्रेषु दद्याच्छ्राद्धं विधानतः ।

* धारिणि इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्यथा तत्तु वै श्राद्धं निष्फलं नास्ति संशयः ॥ १२३ ।
मन्त्रहीनं क्रियाहीनं यः श्राद्धं कुरुते द्विजः ।
मङ्गलस्यासुरेन्द्रस्य फलं भवति भागतः ॥ १२४ ।
उद्धरेद्यदि पात्रन्तु ब्राह्मणो ज्ञानवर्ज्जितः ।
राचसैर्ह्रियते तच्च भुञ्जतस्तस्य सुन्दरि ॥ १२५ ।
एतत्ते कथितं भद्रे पितृकार्य्यमनुत्तमम् ।
उत्पत्तिश्चैव दानन्तु यत्पुण्यङ्कथितन्तव* ।
अपरञ्चापि वसुधे† किमन्यच्छ्रोतुमिच्छसि ॥ १२६ ।

इति वराहपुराणे श्राद्धपितृयज्ञनिश्चयो नाम
नवत्यधिकशततमोऽध्यायः ।

एकनवत्यधिकशततमोऽध्यायः ।

सूत उवाच ।
एवं श्रुत्वा बहून्धर्म्मान्धर्म्मशास्त्रविनिश्चयात् ।
वाराहरूपिणं देवं पुनः पप्रच्छ मेदिनी ॥ १ ।
धरण्युवाच ।
एवं शास्त्रं मया देव तव वक्राद्विनिःसृतम् ।

---

* कथितं मयेति (ग) । † अतः परञ्च वसुधे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

श्रुतं सुबहुशश्चैव तृप्तिर्मम न विद्यते ॥ २ ।
ममैवानुग्रहार्थाय रहस्यं वक्तुमर्हसि ।
कीदृशो* मधुपर्कस्य किं पुण्यङ्गा च देवता ॥ ३ ।
कानि द्रव्याणि कस्मै च देयो विष्णो वदस्व मे ।
इति भूम्या वचः श्रुत्वा देवदेवो जनार्द्दनः ।
वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ ४ ।

वराह उवाच ।

शृणु भूमि प्रयत्नेन मधुपर्को यथा कृतः ।
उत्पत्तिश्चैव दानञ्च सर्व्वो यस्य च हीयते ॥ ५ ।
अहं ब्रह्मा च रुद्रश्च कृत्वा लोकस्य संचयम् ।
अव्यक्तानि च भूतानि यानि कानि च सर्व्वथा ॥
ततो भूमे दक्षिणाङ्गात्पुरुषो मे विनिःसृतः ।
रूपवान् द्युतिमांश्चैव श्रीमान् ह्रीकीर्त्तिमान्नरः ॥ ६।७ ।
तत्र पप्रच्छ मां ब्रह्मा मम गात्राद्विनिःसृतः ।
य एव तिष्ठते विष्णो त्रयाणाञ्च चतुर्थकः ॥ ८ ।
स रहस्य लघुर्देव एतत्तव न युज्यते ।
ब्रह्मणो वचनं श्रुत्वा मयाप्येवं प्रभाषितम् ॥ ९ ।
एषच मे समुत्पन्नः सर्व्वकर्म्मसुनिष्ठितः ।
मधुपर्केति† विख्यातो भक्तानां भवमोचणः ॥ १० ।
मयात्र शंसितं‡ ब्रह्मनुद्रे चापि समासतः ।

* कीदृच इति (ग) । † मधुपर्क इतीति साधु । ‡ संस्कृतमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

साधु विष्णो भागतस्ते* एष चापि विनिःसृतः ॥ ११ ।
उद्भवं मधुपर्कस्य आत्मसम्भवनिश्चयम् ।
ततस्तु मां ब्रवीद्ब्रह्मा† कारणं मधुरं वचः ॥ १२ ।
मधुपर्केण किङ्कार्य्यमेतदाचक्ष्व निष्कलम् ।
पितामहवचः श्रुत्वा मयाऽसौ प्रतिभाषितः ॥ १३ ।
कारणं मधुपर्कस्य दानं सङ्करणं तथा‡ ।
ममार्चनविधिङ्कृत्वा§ मधुपर्कं प्रयच्छति ॥ १४ ।
ब्रह्मन्यात्युत्तरं स्थानं¶ यत्र गत्वा न शोचति ।
तस्य क्रियाम्प्रवक्ष्यामि मम दानप्रतिग्रहात् ॥ १५ ।
यस्य दानविधिं प्राप्य यान्ति दिव्याङ्गतिं मम ।
व्रतेष्वेवोपचारेषु ये च ब्रह्मन्मम प्रियाः ।
संगृह्य मधुपर्कं वै इमं मन्त्रमुदाहरेत् ॥ १६ ।
मन्त्रः—ओं एषो हि देव भगवंस्तव गात्रसूतः
संसारमोक्षणकरो मधुपर्कनामा ।
भक्त्या मयायम्प्रतिपादितोऽद्य
गृहाण देवेश नमो नमस्ते ॥ १७ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यादृशो मधुपर्को वै‖ या च तस्य महत्क्रिया** ॥ १८ ।

---

* प्रभातस्ते इति (ग) । † अब्रवीद्ब्रह्मेति साधु । ‡ दानं स कारणन्तथेति (ग) । § समार्चनविधिङ्कृत्वेति (ग) । ¶ ब्रह्मन् यात्यपरं स्थानमिति (ग) । ‖ यादृक्सौ (सः ?) मधुपर्कोवै इति (ग) । ** महत्क्रियेति आर्षं, महाक्रियेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

घृतं दधि मधुञ्चैव* करवीत समं† तथा।
विधिना मन्त्रपूतेन यदीच्छेत्सिद्धिमुत्तमाम् ॥ १९ ।
समासाद्य ततः कृत्वा मम कर्म्मपरायणः ।
उचितेनोपचारेण यत्त्वया परिपृच्छितम्‡ ॥ २० ।

इति वराहपुराणे मधुपर्क्कोत्पत्तिदानसङ्करणो नाम
एकनवत्यधिकशततमोऽध्यायः ।

द्विनवत्यधिकशततमोऽध्यायः ।

सूत उवाच ।
श्रुत्वा तु मधुपर्क्कस्य उत्पत्तिं दानमेव च ।
पुण्यञ्चैव फलञ्चैव कारणं ग्रहणं तथा ।
विस्मयम्परमङ्गत्वा सा महासंशितव्रता ।
पादौ गृह्य यथान्यायम्प्रत्युवाच जनार्द्दनम् ॥ १।२ ।
देव वृत्तोपचारेण तव यन्मनसि प्रियम् ।
किञ्च तत्रैव दातव्यं तव कर्म्मपरायणैः ।
एतदाचक्ष्व तत्त्वेन तत्र यत्परमं महत् ॥ ३ ।

---

* मधुचैवेति साधु । † कुर्व्वीत सममिति साधु ; कारयीत सममिति (ग) ।
‡ परिपृष्टमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वराह उवाच।

साधु भूमि महाभागे यन्मान्त्वम्परिपृच्छसि।
कथयिष्यामि तत्सर्व्वं दुःखसंसारमोचणम्॥ ४।
क्त्वा तु मम कर्म्माणि यत्त्वया पूर्व्वभाषितम्।
पश्चाच्छान्तिं च मे कुर्य्याद्भूमि राष्ट्रसुखावहम्॥ ५।
सर्व्वकर्म्म ततः कृत्वा भूम्यां जानु निपात्य च।
नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत्॥ ६।
मन्त्रः—ओँ नमोनमो वासुदेव त्वं गतिस्त्वं परायणम्।
शरणं त्वां गतो नाथ संसारार्णवतारक॥ ७।
आगतस्त्वं च सुमुख समुचितेन वै पुनः।
दिशः पश्य अधः पश्य व्याधिभ्यो रक्ष नित्यशः॥ ८।
प्रसीद स्वस्य राष्ट्रस्य राज्ञः सर्व्वबलस्य च।
गर्भिणीनाञ्च वृद्धानां व्रीहिणाञ्च गवान्तथा।
ब्राह्मणानाञ्च सततं शान्तिं कुरु शुभं कुरु॥ ९।
अन्नं कुरु सवृष्टिञ्च* सुभिक्षमभयं तथा।
राष्ट्रं प्रवर्द्धतु† विभो शान्तिर्भवतु नित्यशः॥ १०।
देवानां ब्राह्मणानाञ्च भक्तानाङ्कन्यकासु च।
पशूनां सर्व्वभूतानां शान्तिर्भवतु नित्यशः॥ ११।
एवं शान्तिं पठित्वा तु मम कर्म्मपरायणः।
पुनर्जलाञ्जलिं दत्त्वा इमं मन्त्रमुदाहरेत्॥ १२।

---

* सुपुष्टिञ्चेति (ग)। † प्रवर्द्धतामिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मन्त्रः—योऽसौ भवान्सर्व्वजगत्प्रसूतो
यज्ञेषु देवेषु च कर्म्मसाक्षी ।
शान्तिं भवान्कुर्व्वतु वासुदेव
संसारमोक्षञ्च कुरुष्व देव ॥ १३ ।
एषसिद्धिश्च कीर्त्तिश्च ओजसान्तु महौजसम् ।
लाभानां परमो लाभो गतीनां परमा गतिः ॥ १४ ।
एवं पठति तत्त्वेन मम शान्तिं सुखावहाम् ।
ते तु मत्कर्मतां यान्ति पुनरावृत्तिवर्ज्जिताः ॥ १५ ।
एवं शान्तिं पठित्वा तु मधुपर्कम्प्रयोजयेत् ।
नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ १६ ।
मन्त्रः—योऽसौ भवान्देववरप्रसूतो
यो वै समर्च्यो मधुपर्कनामा ।
आगच्छ सन्तिष्ठ इमे च पात्रे
ममापि संसारविमोक्षणाय ॥ १७ ।
सर्पिर्दधिमधुञ्चैव* समं पात्रे उदुम्बरे ।
अलाभे मधुनश्चापि† गुड़ेन सह मिश्रयेत् ॥ १८ ।
घृतालाभे तु सुश्रोणि लाजैः सह विमिश्रयेत् ।
अलाभे वापि दध्नश्च क्षीरेण सह मिश्रयेत्‡ ॥ १९ ।
दधि मधु घृतञ्चैव§ कारयेत समं तथा ।

---

* मधुचैवेति साधु । † मधुनी वाऽपीति (ग) । ‡ एष श्लोकः (ग) पुस्तके नास्ति ।
§ दधि गुड़ं घृतञ्चैवेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अहं दधि मधु रुद्रः सर्पिश्चापि पितामहः ॥ २० ।
सर्व्वेषामर्थलाभे तु मम कर्म्मपरायणः ।
अप एव ततो गृह्य इमं मन्त्रमुदाहरेत् ॥ २१ ।
मन्त्रः—ओं योऽसौ भवान्नाभिमात्रप्रसूतो
यज्ञैश्च मन्त्रैः सरहस्यजप्यैः ।
सोऽयं मया ते परिकल्पितश्च
गृहाण दिव्यो मधुपर्कनामा ॥ २२ ।
यो ददाति महाभागे मयोक्तं विधिपूर्व्वकम् ।
सर्व्वयज्ञफलम्प्राप्य मम लोकम्प्रपद्यते ॥ २३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यो वै प्राणान्प्रमुञ्चेत* मम कर्म्मपरायणः ।
तस्य चैव ह दातव्यं मन्त्रेण विधिपूर्व्वकम् ॥ २४ ।
यावत्प्राणान् प्रमुञ्चेत कृत्वा कर्म्म सुपुष्कलम् ।
मद्भक्तेन तु दातव्यः सर्व्वसंसारमोक्षणः ॥ २५ ।
दृष्ट्वा तु विह्वलो ह्येनं मम कर्म्मपरायणः ।
मधुपर्कं परं गृह्य इमं मन्त्रमुदाहरेत् ॥ २६ ।
मन्त्रः—योऽसौ भवांस्तिष्ठसि सर्व्वदेहे
नारायणः सर्व्वजगत्प्रधानः ।
गृहाण चैवं सुरलोकनाथ
भक्तोपनीतं मधुपर्कसंज्ञम् ॥ २७ ।

---

* प्रमुञ्चेदिति साधु, एवं परत्रापि ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अनेनैव तु मन्त्रेण दद्याच्च मधुपर्ककम् ।
नरस्य मृत्युकाले तु दद्यात्संसारमोक्षणम् ॥ २८ ।
एषायतिर्महाभागे मधुपर्कस्य कीर्त्तिता ।
एवङ्कश्चिन्न जानाति मधुपर्कं वसुन्धरे ॥ २९ ।
एवं हि मधुपर्कश्च देयः सिद्धिमभीप्सुभिः ।
अर्च्चित्वा देवदेवेशं सर्व्वसंसारनाशनम् ॥ ३० ।
ददाति मधुपर्कं यः स याति परमाङ्गतिम् ।
अयं पवित्रो विमलः सर्व्वकामविशोधनः ॥ ३१ ।
दीक्षिताय च दातव्यो यश्च शिष्यो गुरुप्रियः ।
न मूर्खाय प्रदातव्यमविनीताय कर्हिचित् ॥ ३२ ।
शृणोति मधुपर्कस्य आख्यानं पापनाशनम् ।
याति दिव्यां परां सिद्धिं मधुपर्कस्य कारणात् ॥ ३३ ।
एतत्ते कथितं भद्रे मधुपर्कविभावनम् ।
सर्व्वसंसारमोक्षार्थं यदीप्सेत्सिद्धिमुत्तमाम्* ॥ ३४ ।
राजद्वारे श्मशाने वा भये च व्यसने तथा ।
ये पठन्ति इमां शान्तिं शीघ्रं कार्य्यं भविष्यति ॥ ३५ ।
अपुत्रो लभते पुत्त्रमभार्य्यश्च प्रियां लभेत् ।
अपतिर्लभते भर्त्तां† बद्धो मुच्येत बन्धनात् ॥ ३६ ।
एतत्ते कथितं भूमे महाशान्तिसुखावहम् ।

---

* रहस्यं परमं महदिति (ग) । अतः परं तत्र (ग) पुस्तके यत्नेन विधानेन कुर्य्याच्छान्तिमनुत्तमामिति पाठोऽस्ति । † भर्त्तारमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वसंसारमोक्षार्थं रहस्यं परमं महत्॥ ३७।
यस्त्वनेन विधानेन कुर्य्याच्छान्तिमनुत्तमाम्।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति॥ ३८।

इति वराहपुराणे भगवच्छास्त्रे सर्व्वशान्तिकरणं नाम
द्विनवत्यधिकशततमोऽध्यायः।

त्रिनवत्यधिकशततमोऽध्यायः।

लोमहर्षण उवाच।

व्यासशिष्यं महाप्राज्ञं वेदवेदाङ्गपारगम्।
द्वारदेशे समासीन*ङ्कृतपूर्व्वाह्णिकक्रियम्।
अश्वमेधे तथा वृत्ते राजा वै जनमेजयः।
ब्रह्मवध्याभिभूतस्य दीक्षां द्वादशवार्षिकीम्।
प्रायश्चित्तं चरित्वा तु आगतो गजसाह्वयम्।
उपगम्य महात्मानं जाह्नवीतीरसंश्रयम्।
ऋषिं परमसम्पन्नं वैशम्पायनमञ्जसा।
कर्म्मणा प्रेरितस्तेन चिन्ताव्याकुललोचनः।
कुरूणां पश्चिमो राजा पश्चात्तापेन पीड़ितः।
व्यासशिष्यमुपाभ्येत्य प्रश्नमेनमपृच्छत†॥ १—५।

---

* गङ्गाद्वारे समासीनमिति (ग)। † अपृच्छदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जनमेजय उवाच।

भगवञ्ज्ञायते तीव्रं चिन्तयानस्य सुव्रत।
कर्म्मपाकफलं यस्मिन्मानुषैरुपभुज्यते॥ ६।
एतदिच्छाम्यहं श्रोतुं कीदृशं तु यमालयम्।
किम्प्रमाणञ्च किंरूपं कथङ्गत्वा स पश्यति॥ ७।
न गच्छेयङ्कथं विप्र प्रेतराज्ञो* निवेशनम्।
धर्म्मराजस्य धीरस्य सर्व्वलोकानुशासिनः॥ ८।

सूत उवाच।

एवं पृष्टो महातेजास्तेन राज्ञा द्विजोत्तमः।
उवाच मधुरं वाक्यं राजानं जनमेजयम्॥ ९।

वैशम्पायन उवाच।

शृणु राजन्† पुरावृत्ताङ्कथां परमशोभनाम्।
धर्म्मवृद्धिकरीं नित्यां यशस्यां कीर्त्तिवर्द्धिनीम्।
पावनीं सर्व्वपापानां प्रवृत्तौ शुभकारिणीम्।
इतिहासपुराणानाङ्कथां वै विदुषाम्प्रियाम्॥ १०।११।
कश्चिदासीत्पुरा राजन्नृषिः परमधार्म्मिकः।
उद्दाल इति विख्यातः‡ सर्व्ववेदाङ्गतत्त्ववित्॥ १२।
तस्य पुत्रो महातेजा योगमास्थाय बुद्धिमान्।
नाचिकेत इति ख्यातः सर्व्ववेदाङ्गतत्त्ववित्॥ १३।

---

* प्रेतराजस्येति साधु। † महाराज पुरावृत्तामिति (ग)। ‡ उद्दालक इति ख्यात-इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेन रुष्टेन शप्तोऽभूत्पुत्रः परमधार्म्मिकः ।
गच्छ शीघ्रं यमं पश्य मम क्रोधेन दुर्म्मते ॥ १४ ।
तथेत्युक्त्वा महातेजाः पुत्रः परमधार्म्मिकः ।
चिन्तयित्वा मुहूर्त्तन्तु योगमास्थाय बुद्धिमान् ।
क्षणेनान्तर्हितो जातः पितरम्प्रत्युवाच ह ।
विनयात्पृष्ठतो वाक्यं भावेन च समन्वितम् ॥ १५ ।
मा भूद्वाक्यञ्च ते मिथ्या धार्म्मिकस्य कदाचन ।
गमिष्यामि पुरं रम्यं धर्म्मराजस्य धीमतः ।
इह चैव पुनस्तावदागमिष्ये न संशयः ॥ १६ ।

पितोवाच ।

एकस्त्वमसि वत्सस्य नान्यो बन्धुर्विधीयते ।
अधर्म्मं चानृतञ्चास्तु अकीर्त्तिर्वापि पुत्रक ॥ १७ ।
मिथ्याभिशंसिनं तात यथेष्टं तारयिष्यति ।
रोषेण हि मृषावादी निर्दयः कुलपांसनः ॥ १८ ।
अप्रवृत्तस्त्वसम्भाष्योयोऽहं मिथ्याप्रयुक्तवान् ।
त्वां वै धर्म्मसमाचारमभिधानेन* शप्तवान् ॥ १९ ।
अहं पुत्र न सद्वादी न क्षमे धर्म्मदूषितम् ।
मम त्वं हि महाभाग नित्यं चित्तानुपालकः ॥ २० ।
धर्म्मज्ञश्च यशस्वी च नित्यक्षान्तोजितेन्द्रियः ।
शुश्रूषुरनहंवादी शक्तस्तारयितुं मम ॥ २१ ।

---

* अभिधानेनेति सार्व्वत्रिकः पाठः, परमविधानेनेति सङ्गच्छते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

याचितस्त्वं मया पुत्र गन्तुं वै तत्र नार्हसि ॥ २२ ।
यदि वैवस्वतो राजा तत्र प्राप्तं यदृच्छया ।
रोषेण त्वां महातेजा विसृजेन्न कदाचन ॥ २३ ।
विनश्येयमहं पश्य कुलसेतुविनाशनः ।
धिक्कृतः सर्व्वलोकेन पापकर्त्ता नराधमः ॥ २४ ।
पूतेति नरकस्याख्या दुःखेन नरकं विदुः ।
पुत्त्रिचाणं भवेत्पुत्त्रमिहेष्यन्ति परत्र च ॥ २५ ।
हुतं दत्तं तपस्तप्तं पितरश्चापि पोषिताः ।
अपुत्त्रस्य हि तत्सर्व्वं मोघं भवति निश्चयः ॥ २६ ।
शुश्रूषावान्भवेच्छूद्रो वैश्यो वा कृषिजीवनः ।
सत्यगोप्ता तु राजन्यो ब्राह्मणो वा स्वकर्म्मकृत् ।
तपो वा विपुलं तप्त्वा दत्त्वा दानमनुत्तमम् ।
अपुत्त्रो नाप्नुयात्स्वर्गं यथा तात मया श्रुतम् ॥ २७।२८ ।
पुत्त्रेण लभते जन्म पौत्त्रेण तु पितामहः ।
पुत्त्रस्य च प्रपौत्त्रेण मोदते प्रपितामहः ॥ २९ ।
न हास्यामीति वत्स त्वां मम वंशविवर्द्धनम् ।
याच्यमानः प्रयत्नेन तत्र गन्तुं न चार्हसि ॥ ३० ।

वैशम्पायन उवाच ।

एवं विलपमानन्तं पितरम्प्रत्युवाच ह ।
हृष्टपुष्टवपुर्भूत्वा* पुत्त्रः परमधार्म्मिकः ॥ ३१ ।

---

* हृष्टपुष्टमना भूत्वेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुत्त्र उवाच ।

न विषादस्त्वया कार्य्यो द्रक्ष्यसे मामिहागतम् ।
दृष्ट्वा च तमहं देवं सर्व्वलोकनमस्कृतम् ।
आगच्छामि पुनश्चात्र न मेऽस्ति* मृत्युतो भयम् ।
पूजयिष्यति मां तात राजा त्वदनुकम्पया ॥ ३२।३३ ।
सत्ये तिष्ठ महाभाग सत्यञ्च परिपालय ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ ३४ ।
सूर्य्यस्तपति सत्येन वातः सत्येन वाति च ।
अग्निर्दहति सत्येन सत्येन पृथिवी स्थिता ॥ ३५ ।
उदधिर्लङ्घयेन्नैव मर्यादां सत्यपालितः ।
मन्त्रः प्रयुक्तः† सत्येन सर्व्वलोकहितायते ॥ ३६ ।
सत्येन यज्ञा वर्त्तन्ते मन्त्रपूताः सुपूजिताः ।
सत्येन वेदा गायन्ति सत्ये लोकाः प्रतिष्ठिताः ॥ ३७ ।
सत्यं गाति तथा साम सर्व्वं सत्ये प्रतिष्ठितम् ।
सत्यं स्वर्गश्च धर्म्मश्च सत्यादन्यन्न विद्यते ॥ ३८ ।
सत्येन सर्व्वं लभते यथा तात मया श्रुतम् ।
न हि सत्यमतिक्रम्य विद्यते किं तदुत्तमम् ॥ ३९ ।
देवदेवेन रुद्रेण वेदगर्भः पुरा किल ।
सत्यस्थिते तदेवान्यः परित्यक्तो महात्मना ॥ ४० ।

---

* न च मे मृत्युतोभयमिति (ग) । † क्वचित् मन्त्राः प्रयुक्ता इति बहुवचनान्तः पाठः, स च हितायते इत्यनेन न सङ्गच्छते, हितायन्ते इति कृते तु छन्दोदोषः स्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दीक्षां धारयते ब्रह्मा स तेनैव सुयन्त्रितः ।
और्वेणाग्निस्तथा क्षिप्तः सत्येन बड़वामुखे ॥ ४१ ।
संवर्त्तेन पुरा तात सर्व्वे लोकाः सदैवताः ।
देवानामनुकम्पार्थं धृता वीर्य्यवता तदा ॥ ४२ ।
पाताले पालयन् सत्यं बली वैरोचनो वसन् ।
वर्द्धमानो महाशृङ्गैः शतशृङ्गो महागिरिः ।
स्थितः सत्ये महाविन्ध्यो वर्द्धमानो न वर्द्धते ।
सर्व्वं चराचरमिदं सत्येन ध्रियते जगत् ॥ ४३।४४ ।
गृहधर्म्माश्च ये दृष्टा वानप्रस्थाश्च शोभिताः ।
यतीनाञ्च गतिः शुद्धा ये चान्ये व्रतसंस्थिताः ॥ ४५ ।
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ४६ ।
सत्येन पाल्यते धर्म्मो धर्म्मो रक्षति रक्षितः ।
तस्मात्सत्यं कुरुष्वाद्य रक्ष आत्मानमात्मना ॥ ४७ ।
एवमुक्त्वा हृष्टपुष्टः* स्वेन देहेन सुव्रत ।
तपसा प्राप्तयोगस्तु जितात्मा कृतसंयमः ।
ऋषिपुत्त्रो महातेजा सत्यवागनसूयकः ।
प्राप्तश्च परमं स्थानं यत्र राज्ञो यमस्य तु ॥ ४८।४९ ।

इति वराहपुराणे प्रागितिहासे संसारचक्रे ऋषिपुत्त्रप्रयाणे
नाम त्रिनवत्यधिकशततमोऽध्यायः ।

---

* ततो हृष्ट इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चतुर्नवत्यधिकशततमोऽध्यायः ।

वैशम्पायन उवाच ।

गतश्च परमं स्थानं यत्र राजा दुरासदः ।
अर्च्चितस्तु यथान्यायं दृष्ट्वैव तु विसर्ज्जितः ॥ १ ।
ततो हृष्टमना राजन् पुत्त्रं दृष्ट्वा तपोनिधिः ।
परिष्वज्य च बाहुभ्यां मूर्द्धन्याघ्राय यत्नतः ।
दिवञ्च पृथिवीञ्चैव नादयामास हृष्टवत् ।
स संहृष्टमनाः प्रीतस्तानुवाच तपोधनान् ॥ २।३ ।
पश्यन्तु मम पुत्त्रस्य प्रभावं दिव्यतेजसः ।
यमस्य भवनङ्गत्वा पुनः शीघ्रमिहागतः ॥ ४ ।
पितृस्नेहानुभावेन गुरुशुश्रूषयापि च ।
दैवेन हेतुना चायं जीवन्दृष्टो मया सुतः ॥ ५ ।
लोके मत्सदृशो नास्ति पुमान् भाग्यसमन्वितः ।
एष मृत्युमुखङ्गत्वा मम पुत्त्र इहागतः ॥ ६ ।
कच्चित्त्वं न हतो वत्स नैव बद्धो यमालये ।
कच्चित्ते सशिवः पन्था गच्छतस्तव पुत्त्रक ॥ ७ ।
कच्चित्ते व्याधयो घोरा नान्वगच्छन् यमालये ।
किमपूर्व्वं त्वया दृष्टं कच्चित्तुष्टो महातपाः ॥ ८ ।
कच्चिद्राजा त्वया दृष्टः प्रेतानामधिपो बली ।
परुषेण न कच्चित्त्वां चक्षुषा पश्यते* यमः ॥ ९ ।

---

* पश्यतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कच्चिन्न तुष्टो भगवांस्त्वां दृष्ट्वा स्वयमागतम् ।
कच्चिच्छीघ्रं विसृष्टोऽसि धर्म्मराजेन पुत्रक ॥ १० ।
कच्चिद्दौवारिकास्तत्र न रौद्रास्त्वां यमालये ।
कच्चिद्राज्ञा विसृष्टं तु न बाधन्तेतरे जनाः* ॥ ११ ।
कच्चित्पन्थास्त्वया लब्धो निर्गमो वा यमालये ।
अयं मम सुतः प्राप्तः प्रसन्ना मम देवताः ॥ १२ ।
ऋषयश्च महाभागा द्विजाश्च सुमहाव्रताः ।
यन्मे वत्सः पुनः प्राप्तो यमलोकाद्दुरासदात् ॥ १३ ।
एवमाभाषमाणन्तु श्रुत्वा सर्व्वे वनौकसः ।
त्यक्त्वा व्रतानि सर्व्वाणि नियमांश्च तथैव च ॥ १४ ।
जपन्तश्चैव जाप्यानि पूजयन्तश्च देवताः ।
उदूर्द्ध्वबाहवः केचित्तिष्ठन्तोऽन्ये सुदारुणम् ॥ १५ ।
एकपादेन तिष्ठन्तः पश्यन्तोऽन्ये दिवाकरम् ।
एवमेव परित्यज्य नियमान् पूर्व्वसञ्चितान् ॥ १६ ।
वैश्वानरा महाभागास्तपसा शंसितव्रताः ।
आगतास्त्वरितं द्रष्टुं नाचिकेतं सुतं तदा ॥ १७ ।
दिग्वाससश्च ऋषयो दन्तोलूखलिनस्तथा ।
अश्मकूटाश्च मौनाश्च शीर्णपर्णाम्बुभोजनाः ॥ १८ ।

---

* न बाधन्तेतरे जना इति सार्व्वत्रिकः पाठः, ततश्चास्माभिरपि स एव रक्षितः । किन्त्वत्र नाबाधन्तेतरे जनाः (इतरे जना न अबाधन्त) इत्येव सुसङ्गतः पाठः लिपिकर-प्रमादात्कदाचित् 'ना' इत्यस्याकारः पतितोऽद्यापि तदवस्थस्तिष्ठतीत्यस्माकमनुमानम् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

धूमपाश्च तथा चान्ये तप्यमानाश्च पावके ।
परिवार्य्य तथा दृष्ट्वा तस्य पुत्रं तपोनिधिम् ॥ १९ ।
उपविष्टास्तथा चान्ये स्थिताश्चान्ये सुयन्त्रिताः ।
ते सर्व्वे तन्तु पृच्छन्ति ऋषयो वेदपारगाः ॥ २० ।
नाचिकेतकन्तं दृष्ट्वा यमलोकादिहागतम् ।
भीतास्तत्र स्थिता दृष्टाः* केचित्कौतूहलान्विताः ॥ २१ ।
केचिद्विमनसश्चैव केचित्संशयवादिनः ।
तमूचुः सहिताः सर्व्वे ऋषिपुत्रं तपोधनम् ॥ २२ ।

ऋषय ऊचुः ।

भो भो सत्यव्रताचार गुरुशुश्रूषणे रत ।
नाचिकेत सुत प्राज्ञ स्वधर्म्मपरिपालक ॥ २३ ।
ब्रूहि सत्यं त्वया दृष्टं श्रुतञ्च सविशेषकम् ।
ऋषीणां श्रोतुकामानां पितुश्चैव विशेषतः ॥ २४ ।
अपि गुह्यञ्च वक्तव्यं पृष्टे सति विशेषतः ।
सर्व्वस्यापि भयं तीव्रं यद्द्वारा प्रतिदृश्यते ॥ २५ ।
मृतं नैव परं तात दृश्यते कालमायया ।
स्वकर्म्म भुज्यते तात प्रयत्नेन च मानवैः ॥ २६ ।
इह चैव कृतं यत्तु तत्परत्रोपभुज्यते ।
करोति यदि तत्कर्म्म शुभं वा यदि वाऽशुभम् ॥ २७ ।
तथाऽत्र दृश्यते काले कालस्यैव तु मायया ।

---

* भीतास्त्रस्ताः स्थिता दृष्टेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

म्रियते च यथा जन्तुर्यथा गर्भे च तिष्ठति ॥ २८ ।
तस्य पारं न गच्छन्ति बहवः पारचिन्तकाः ।
तत्र स्थिते जगत्सर्व्वं लोभमोहतमोवृतम् ॥ २९ ।
चिन्तयेत न चिन्ताऽत्र* मृगयन्ति च यद्धितम् ।
करोति चित्रगुप्तः किं किञ्च जल्पत्यसौ पुनः ॥ ३० ।
धर्म्मराजस्य किं रूपङ्कालो वद कीदृशो मुने ।
किंरूपा व्याधयश्चैव विपाको वापि कीदृशः ॥ ३१ ।
किञ्च कुर्व्वन् प्रमुच्येत किं वा कर्म्म समाचरेत् ।
आसद्यं सर्व्वलोकस्य तत्कर्म्म दुरतिक्रमम् ॥ ३२ ।
क्रोधबन्धनजं क्लेशङ्कर्षणं छेदनं तथा ।
येन गच्छन्ति विप्रेन्द्र लोके कर्म्मविदो जनाः ॥ ३३ ।
सितात्मानः कथं यान्ति कथङ्गच्छति पापकृत् ।
यथा श्रुतं यथा दृष्टं यथा चैवावधारितम् ॥ ३४ ।
प्रणयात्सौहृद्रात् स्नेहादस्माभिरभिपृच्छितम्† ।
वद सर्व्वं महाभाग याथातथ्येन विस्तरम् ॥ ३५ ।

वैशम्पायन उवाच ।

ऋषिभिस्त्वेवमुक्तस्तु नाचिकेतो महामनाः ।
यदुवाच महाराज शृणु तज्जनमेजय ॥ ३६ ।

इति वराहपुराणे संसारचक्रे ऋषिसम्भाषणे नाम
चतुर्नवत्यधिकशततमोऽध्यायः ।

---

* चिन्त्यते न हि चिन्ताऽत्रेति तु सम्यक् । † अभिपृष्टमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पञ्चनवत्यधिकशततमोऽध्यायः ।

नाचिकेत उवाच ।

कथ्यमानं मया विप्राः शृखन्तु तपसि स्थिताः ।
प्रणम्य तस्मै देवाय धर्म्मराजाय धीमते ॥ १ ।
संसारन्तु यथाशक्त्या* कथ्यमानं निबोधत ।
असत्यवादिनो ये च जन्तुस्त्रीबालघातकाः ॥ २ ।
तथा ब्रह्महणः पापा ये च विश्वासघातकाः ।
ये ये शठाः कृतघ्नाश्च लोलुपाः पारदारिकाः ॥ ३ ।
कन्यानां दूषका ये च ये च पापरता नराः ।
वेदानां दूषितारश्च वेदमार्गविहिंसकाः ॥ ४ ।
शूद्राणां याजकाश्चैव हाहाभूता द्विजातयः ।
अयाज्ययाजकाश्चैव ये ये कुष्ठयुता नराः† ॥ ५ ।
सुरापी ब्रह्महा चैव यो द्विजो वीरघातकः ।
तथा वार्द्धुषिका ये च जिह्मप्रेचाश्च ये नराः ॥ ६ ।
मातृत्यागी पितृत्यागी यः स्वसाध्वीं परित्यजेत्‡ ।
गुरुद्वेषी दुराचारी दूताश्चाव्यक्तभाषिणः ॥ ७ ।
गृहक्षेत्रहरा ये च सेतुबन्धविनाशकाः ।
अपुत्राश्चाप्यदाराश्च श्रद्धया च विवर्ज्जिताः ॥ ८ ।

---

* यथाशक्तीति साधु । † येज्यबुद्धियुता (?) नरा इति (ग) । ‡ यश्च साध्वीं परित्यजेदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अशौचा निर्द्दयाः पापा हिंसका व्रतभञ्जकाः ।
सोमविक्रयिणश्चैव स्त्रीजितः सर्व्वविक्रयी ॥ ९ ।
भूम्यामनृतवादी च वेदजीवी च यो द्विजः ।
नक्षत्री च निमित्ती च चाण्डालाध्यापकस्तथा ॥ १० ।
सर्व्वमैथुनगामी च अगम्यागमने रतः ।
मायिका रतिकाश्चैव तुलाधाराश्च ये नराः ॥ ११ ।
सर्व्वपापसुसङ्गाश्च चिन्तका येऽतिवैरिणः* ।
स्वाम्यर्थे न हता ये च ये च युद्धपराङ्मुखाः ॥ १२ ।
परवित्तापहारी च राजघाती च यो नरः ।
अशक्तः पापघोषश्च तथा ये ह्यग्निजीविनः ॥ १३ ।
शुश्रूषया च मुक्ता ये लिङ्गिनः पापकर्म्मिणः ।
पानगारी चक्रिणश्च† नरा ये चाप्यधार्म्मिकाः ॥ १४ ।
देवागारांश्च सत्रांश्च तीर्थं विक्रयिणस्तथा ।
व्रतविद्वेषिणो ये च तथाऽसद्वादिनो नराः ॥ १५ ।
मिथ्या च नखरोमाणि धारयन्ति च ये नराः ।
कूटा वक्रस्वभावाश्च कूटशासनकारिणः ॥ १६ ।
अज्ञानादव्रती यश्च यश्चाश्रमबहिष्कृतः ।
विप्रकीर्णप्रतिग्राही सूचकस्तीर्थनाशकः ।
कलहश्च प्रतर्कश्च निष्ठुरश्च नराधमः ॥ १७ ।
एते चान्ये च बहवो ह्यनिर्द्दिष्टाः सहस्रशः ।

---

* चिन्तका ये च वैरिणामिति (ग) । † पानागारी च चक्री चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्त्रियश्च पुरुषाश्चैवं यत्र गच्छन्ति तच्छृणु ॥ १८ ।
कुर्व्वन्तीह यथा सर्व्वं तत्र गत्वा यमालये ।
तानि तत्कथयिष्यामि श्रूयतां द्विजसत्तमाः* ॥ १९ ।

वैशम्पायन उवाच ।

एवं तस्य वचः श्रुत्वा सर्व्व एव तपोधनाः ।
पप्रच्छुर्विस्मयाविष्टा नाचिकेतमृषिं तदा ॥ २० ।

ऋषय ऊचुः ।

त्वया सर्व्वं यथा दृष्टं ब्रूहि तत्र विदां वर ।
यथास्वरूपः कालोऽसौ येन सर्व्वं प्रवर्त्तते ॥ २१ ।
इह कर्म्माणि यः कृत्वा पुरुषो ह्यल्पचेतनः ।
वारयेत्स तदा तन्तु ब्रह्मलोके च स प्रभुः ॥ २२ ।
कल्पान्तं पच्यमानोऽपि दह्यमानोऽपि वा पुनः ।
न नाशो हि शरीरस्य तस्मिन्देशे तपोधनाः ॥ २३ ।
यस्य यस्य हि यत्कर्म्म पच्यमानः पुनः पुनः ।
अवश्यञ्चैव गन्तव्यं तस्य पार्श्वं पुनः पुनः ॥ २४ ।
न तु त्रासाद्द्विजः शक्तास्तत्र गन्तुं हि कश्चन ।
न गच्छन्ति च ये तत्र दानेन नियमेन च ॥ २५ ।
वैतरण्याश्च यद्रूपं किं तोयं च वहत्यसौ ।
रौरवो वा कथं विप्र किं रूपं कूटशाल्मलेः ॥ २६ ।
कीदृशा वा हि ते दूताः किंकार्य्याः† किम्पराक्रमाः ।

---

* द्विजसत्तम इति (ग) । † किंवीर्य्या इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किञ्च किञ्च तु कुर्वाणाः किञ्च किञ्च समाचरन् ॥ २७ ।
न चेतो लभते जन्तुश्छादितं पूर्व्वतेजसा ।
धृतिं न लभते किञ्चित्तैस्तैर्दोषैः सुवासिताः ॥ २८ ।
दोषं सत्यमजानन्तस्तथा मोहेन मोहिताः ।
बोद्धव्यं नावबुध्यन्ते गुणानान्तु गुणोत्तरम् ॥ २९ ।
हाहाभूताश्च चिन्तार्त्ताः सर्व्वदोषसमन्विताः ।
परं परमजानन्तो रमन्ते कस्य मायया* ॥ ३० ।
क्लिश्यन्ते बहवस्तत्र कृत्वा पापमचेतसः ।
एतत्कथय वत्स त्वं यतः प्रत्यक्षदर्शिवान् ॥ ३१ ।

इति वराहपुराणे संसारचक्रे दुष्कृतदेही नाम
पञ्चनवत्यधिकशततमोऽध्यायः ।

षण्णवत्यधिकशततमोऽध्यायः ।

वैशम्पायन उवाच ।
तेषां तद्वचनं श्रुत्वा ऋषीणां भावितात्मनाम् ।
उवाच वाक्यं वाक्यज्ञः सर्व्वं निरवशेषतः ॥ १ ।

---

* कालमाययेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नाचिकेत उवाच ।

श्रूयतां द्विजशार्दूलाः कथ्यमानं मया द्विजाः ।
योजनानां सहस्रन्तु विस्तराद्द्विगुणायतम् ।
द्विगुणं परिवेषेण तद्वै प्रेतपतेः पुरम् ॥ २ ।
भवनैरावृतं दिव्यैर्जाम्बूनदमयैः शुभैः ।
हर्म्यप्रासादसंबाधमहाट्टालसमन्वितम् ॥ ३ ।
सौवर्णेनैव महता प्राकारेणाभिवेष्टितम् ।
कैलासशिखराकारैर्भवनैरुपशोभितम् ॥ ४ ।
तत्र वै* विमला नद्यस्तोयपूर्णाः सुशोभनाः ।
दीर्घिकाश्च तथा कान्ता नलिन्यश्च सरांसि च ॥ ५ ।
तड़ागाश्चैव कूपाश्च वृक्षखण्डाः सुशोभनाः ।
नरनारीसमाकीर्णा गजवाजिसमाकुलाः ॥ ६ ।
नानादेशसमुत्थानैर्नानाजातिभिरेव च ।
सर्व्ववीजैस्तथाकीर्णं तस्य राज्ञः पुरोत्तमम् ॥ ७ ।
क्वचिद्युद्धं क्वचिद्द्वन्द्वं ते न बद्धो यमालये ।
क्वचिद्गायन्हसंश्चैव क्वचिद्दुःखेन दुःखितः ॥ ८ ।
क्वचित्क्रीड़न्यथाकर्म्म क्वचिद्भुञ्जन्† क्वचित्स्वपन् ।
क्वचिन्नृत्यन् क्वचित्तिष्ठन् क्वचिद्बन्धनसंस्थितः ॥ ९ ।
एवं शतसहस्राणि तस्य राज्ञः पुरोत्तमे ।
स्वकर्म्मभिः प्रदृश्यन्ते स्थूलाः सूक्ष्माश्च जन्तवः ॥ १० ।

---

* तत्रैवेति (ग) । † भुञ्जान इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मया दृष्टा द्विजश्रेष्ठ तस्य राज्ञः पुरोत्तमे ।
अङ्गानि चैव सीदन्ति मनो विह्वलतीव मे ॥ ११ ।
दिव्यं भावाः स्पृशन्त्येते चिन्तयानस्य तत्फलम् ।
तथापि कथयिष्यामि यथा दृष्टं तथा श्रुतम् ॥ १२ ।
पुष्पोदका नाम तत्र नदीनां प्रवरा नदी ।
दृश्यते न च दृश्येत नानावृक्षसमाकुला ॥ १३ ।
सुवर्णकृतसोपाना दिव्यकाञ्चनबालुका ।
प्रसन्नेन च तोयेन शीतलेन सुगन्धिना ॥ १४ ।
पुष्पत्फलवनाकीर्णा नानापक्षिसमाकुला ।
भ्राजते सरितां श्रेष्ठा सर्व्वपापप्रणाशिनी ॥ १५ ।
तस्यास्तीरे मया दृष्टाः पादपाश्च सहस्रशः ।
अमराः क्रीड़मानाश्च जलक्रीड़ां पुनः पुनः ।
विशालजघना यस्यां गन्धर्व्वाः सामगा इव ।
भुजङ्गावनताङ्ग्यश्च किन्नर्य्यश्च सुगायनाः* ।
दिव्यभूषणसम्भोगैः क्रीड़न्त्यत्र समागताः ॥ १६।१७ ।
एवं नारीसहस्राणि तत्र दिव्यानि नित्यशः ।
क्रीड़न्ति सलिले तत्र प्रासादेषु शुभेषु च ॥ १८ ।
तत्रापरे वृक्षखण्डा नित्यपुष्पफलान्विताः ।
ते च कामप्रदा नित्यं तमद्विजसमायुताः ॥ १९ ।
प्रमदाश्च जले तत्र कामरूपाः† सुमेखलाः ।

---

* किन्नर्य्यश्च तु गायना इति (ग) । † कान्तरूपा इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

रमयन्त्यो नरांस्तत्र यथाकामं यथासुखम् ॥ २० ।
तां नदीञ्चोभयम्ब्यस्ताः क्रीड़न्ति सहिताः प्रियैः ।
गायन्ति सलिले काश्चिन्मधुरं मधुविह्वलाः ॥ २१ ।
जलतूर्य्यनिनादेन भूषणानां स्वनेन च ।
भाति सा निम्नगा दिव्या दिव्यरत्नैरलङ्कृता ॥ २२ ।

वैवस्वती नाम महानदी सा
शुभा नदीनां प्रवराऽतिरम्या ।
प्रयाति मध्ये नगरस्य नित्यं
मातेव पुत्रं परिपालयन्ती ॥ २३ ।
तोयानुरूपा च मनोहरा च
दिव्येन तोयेन सदैव पूर्णा ।
यस्यास्तु हंसाः पुलिनेषु मत्ताः
कुन्देन्दुवर्णाः प्रचरन्ति नित्यम् ॥ २४ ।
रथाङ्गसाह्वैः प्रवरैश्च पद्मैः
प्रतप्तजाम्बूनदकर्णिकाभिः ।
या दृश्यते चैव मनोज्ञरूपा
सुवर्णसोपानयुता सुकान्ता ॥ २५ ।
यस्यास्तु तोयं विमलं सुगन्धि
स्वादु प्रसन्नममृतोपमदिव्यरूपम्* ।

---

* छन्दसोऽत्र रूपान्तरं दृश्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वृक्षास्तु यस्या वनखण्डजाताः
सदा शुभैः पुष्पफलैरुपेताः ॥ २६ ।
नार्य्यः सुरूपा मदविह्वलाश्च
क्रीड़न्ति ता यत्र मनोज्ञरूपाः ।
यस्या जलं क्रीड़नताड़नाद्यै-
र्विवर्णतां याति न वै कदाचित् ॥ २७ ।
या देवतानामपि पूजनीया
तपोनिधीनाञ्च तथा मुनीनाम् ।
या दृश्यते तोयभरेण कान्ता
कृतिः कवीनामिव निर्म्मलार्था ॥ २८ ।
जलञ्च दत्तम्बहुभिर्नरैश्च
तस्याः स्वरूपप्रतिमा च निष्ठा ।
प्रासादपङ्क्तिर्ज्ज्वलनप्रकाशा
तस्यास्तु तीरे बहुभक्तिरम्या ॥ २९ ।
वादित्रगीतस्वनतालयुक्ता
गायन्ति नार्य्यः सहिताः सदा हि ।
कन्याकुलानां मृदुभाषितानि
मनोहराणाञ्च वनेषु तेषु ॥ ३० ।
कुर्व्वन्ति संहर्षमिव स्वनेन
मनोज्ञरूपा दिवि देवतानाम् ।
मृदङ्गनादश्च सुतन्त्रियुक्तै-
र्गीतध्वनिश्चैव सुवंशयुक्तः ॥ ३१ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रासादकुञ्जेषु विहार्य्यमाणा-
न तृप्तिमेवं बहु ताः* प्रयान्ति ।
गन्धः सुगन्धोऽगुरुचन्दनानां
वातः शुभोवाति सुशीतमन्दः ।
क्वचित् सुगन्धः प्रचचार भूयः
प्रासादरोधं प्रविरूढ़मार्गः ॥ ३२ ।
क्वचिज्जनाः क्रीड़नकावसक्ताः
क्वचिच्च नारीनरगीतशब्दाः ।
तथाऽपरे क्रीड़नकाः सकान्ताः
सुवर्णवेदीकृतसानुशोभाः ॥ ३३ ।
विमानभूताः प्रचरन्ति तोये
प्रमत्तनारीनरसङ्कुलाश्च ।
शक्यो विभागो न हि रम्यताया-
असौ दिनैर्वा बहुभिः प्रवक्तुम् ।
नैषा कथा कर्म्मसमाधियुक्ता
शक्या प्रवक्तुं दिवसैरनल्पैः ॥ ३४ ।

इति वराहपुराणे संसारचक्रे धर्म्मराजपुरवर्णनं
नाम षसवत्यधिकशततमोऽध्यायः ।

---

* बहुधेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सप्तनवत्यधिकशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

दशयोजनविस्तारं ततो द्विगुणमायतम् ।
प्राकारेण परिच्छिन्नं प्रासादशतशोभितम् ॥ १ ।
समालिखन्निवाकाशं प्रदीप्तमिव तेजसा ।
गोपुरन्तूत्तमं तत्र प्रासादशतशोभितम् ॥ २ ।
नानायन्त्रैः समाकीर्णं ज्वालामालासमायुतम् ।
देवतानामृषीणाञ्च ये चान्ये शुभकारिणः ॥ ३ ।
प्रवेशस्तत्र तेषां हि विहितो धर्म्मदर्शिनाम् ।
राजतं गोपुरं सर्व्वं शारदाभ्रचयप्रभम् ।
मानुषाणां सुकृतिनां प्रवेशस्तत्र निर्मितः* ॥ ४।५ ।
अग्निधर्म्मसमाकीर्णं सर्व्वदोषसमन्वितम् ।
आयसङ्गोपुरं तत्र दक्षिणं भीमदर्शनम् ।
रौद्रम्प्रतिभयाकारं सुतप्तं दुर्निरीक्षणम् ।
प्रवेशो हि ततस्तेन विहितो रविसूनुना ।
पापिष्ठानां नृशंसानां क्रव्यादानां दुरात्मनाम् ।
पापानां चैव सर्व्वेषां ये चान्ये घातकारकाः ॥ ६।७।८ ।
औदुम्बरमवीचीकमुच्चावचमनोकृतम् ।
गोपुरं पश्चिमं तच्च दुर्निरीक्ष्यं समन्ततः ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

महता वह्निजालेन समालिप्तं भयानकम्।
दुष्कृतीनाम्प्रवेशार्थं यमेन विहितं स्वयम्॥ ६।१०।
तस्मिन्पुरवरे रम्ये रम्या परमशोभना।
सर्व्वरत्नमयी दिव्या वैवस्वतनियोजिता।
सभा परमसम्पन्ना धार्म्मिकैः सत्यवादिभिः।
जितक्रोधैरलुब्धैश्च वीतरागैस्तपस्विभिः* ॥ ११।१२।
सा सभा धर्म्मयुक्तानां सा सभा पापकारिणाम्।
सा सभा सर्व्वलोकस्य शुभस्यैवाशुभस्य च।
कर्म्मणा सूचितस्याथ सा सभा धर्म्मसंहिता॥ १३।
अनिर्वर्त्य यथा कर्म्म शास्त्रदृष्टेन कर्म्मणा।
निर्व्विशङ्का निराक्षेपा धर्म्मज्ञा धर्म्मपाठकाः॥ १४।
चिन्तयन्ति च कार्य्याणि सर्व्वलोकहिताय ते†।
यथादृष्टं यथाशास्त्रं यथाकालनिवेदकाः॥ १५।
ततः सर्व्वं च तत्सर्व्वं चिन्तयन्ति सुयन्त्रिताः।
मनुः प्रजापतिश्चैव पाराशर्य्यो महामुनिः॥ १६।
अत्रिरौद्दालकिश्चैव आपस्तम्बश्च वीर्य्यवान्।
वृहस्पतिश्च शुक्रश्च गौतमश्च महातपाः॥ १७।
शङ्खश्च लिखितश्चैव अङ्गिरा भृगुरेव च।
पुलस्त्यः पुलहश्चैव ये चान्ये धर्म्मपाठकाः॥ १८।

---

* जितक्रोधैरलुब्धैस्तु चरितस्याऽथ सा सभेति (क), (ख)। † हिताय चेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यमेन सहिताः सर्व्वे चिन्तयन्ति प्रतिक्रियाम् ।
सर्व्वे च कामप्रचुरा ये दिव्या ये च मानुषाः ॥ १९ ।
कुण्डलाभ्यां पिनद्धाभ्यामङ्गदाभ्यां महातपाः ।
भ्राजते मुकुटस्तस्य ब्रह्मदत्तो महाद्युतिः ॥ २० ।
तेजसा वचसा चैव दुर्निरीक्षो महाबलः ।
एकस्थमिव सर्व्वेषां तेजस्तेजस्विनां तदा ॥ २१ ।
तस्य पार्श्वे महादिव्या ऋषयो ब्रह्मवादिनः ।
दीप्यमानाः स्ववपुषा वेदवेदाङ्गपारगाः ॥ २२ ।
वेदार्थानां विचारज्ञाः सत्यधर्म्मपुरस्कृताः ।
छन्दःशिक्षाविकल्पज्ञाः सर्व्वशास्त्रविकल्पकाः ॥ २३ ।
निरुक्तमतिवादाश्च सामगान्धर्व्वशोभिताः ।
धातुवादाश्च विविधा निरुक्ताश्चैव नैगमाः ॥ २४ ।
तत्र चैव मया दृष्टा ऋषयः पितरस्तथा ।
भवने धर्म्मराजस्य प्रगायन्तः कथाः शुभाः ॥ २५ ।
तस्य पार्श्वे मया दृष्टः कृष्णवर्णो महाहनुः ।
उत्तमः प्रकृताकार ऊर्द्ध्वरोमा निराकृतिः ॥ २६ ।
वामबाहुश्च दण्डेन प्रवरेण समन्वितः ।
विकृतास्यो महादंष्ट्री नित्यक्रुद्धोभयानकः ॥ २७ ।
शिक्षार्थं धर्म्मराजेन सन्दिष्टः स पुनः पुनः ।
शृणोति चैव कालोऽसौ नित्ययुक्तः सनातनः ॥ २८ ।
तथान्ये चापरे तत्र शासनेषु समाहिताः ।
दृष्टा तत्र मया तात सर्व्वतेजोमयी शुभा ॥ २९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यमेन पूज्यमाना सा दिव्यगन्धानुलेपनैः॥ ३०।
संहारः सर्व्वलोकानां गतीनाञ्च महागतिः।
अतः परं न कर्त्तव्यं साधनङ्कथितं बुधैः॥ ३१।
बिभ्यति ह्यसुरास्तत्र ऋषयश्च तपोधनाः।
असुराश्च सुराश्चैव योगिनश्च महौजसः॥ ३२।
नमस्कार्य्या च पूज्या च मोहनी सर्व्वसाधनी*।
तस्याङ्गेभ्यः समुद्भूता व्याधयः क्लेशसम्भवाः॥ ३३।
अपराश्च महाघोराः व्याधयः कालनिर्मिताः।
पौरुषेण समायुक्ताः सर्व्वलोकनयायताः॥ ३४।
प्रकृत्या दुर्विनीतश्च महाक्रोधः सुदारुणः।
महासत्त्वो महातेजाः जरामरणवर्ज्जितः॥ ३५।
मृत्युर्दृष्टो दुराधर्षो दिव्यगन्धानुलेपनः।
गायना हसनाश्चैव सर्व्वजीवप्रबोधकाः॥ ३६।
मृत्युना सहिता नित्यं कालज्ञाः कालसम्मताः।
दिव्याभरणशोभाभिः शोभमानाः सुतेजसः॥ ३७।
सबालव्यजनच्छन्नैः† केचित्तत्र महौजसः।
पर्य्यास्तरणसंछन्नेष्वासनेषु तथा परे॥ ३८।
पूज्यमाना मया दृष्टाः केचित्तत्र महौजसः।
अनेकाश्च ज्वरास्तत्र‡ वेदनाश्च सुदारुणाः॥ ३९।

---

* इत्यर्द्धमनन्वयं लक्ष्यते, परार्द्धेनान्वयश्चेत् बहुवचनान्तता युक्ता। † सुबालव्यजनच्छन्नैरिति (ग)। ‡ अथान्ये च ज्वरास्तत्रेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारीनरस्वरूपाश्च मया दृष्टा अनेकशः ।
कामक्रोधविचारिण्यो नानारूपधराः स्त्रियः ॥ ४० ।
जीवभक्षकराः* घोरास्तीव्ररोषा भयानकाः ।
तासां हलहलाशब्दः सर्वासाञ्च समन्ततः ॥ ४१ ।
धर्मराजसमीपे तु दारयन्ति धरामिमाम्† ।
कुष्माण्डा यातुधानाश्च राक्षसाः पिशिताशनाः ॥ ४२ ।
एकपादा द्विपादाश्च त्रिपादा बहुपादकाः ।
एकबाहुर्द्विबाहुश्च त्रिबाहुर्बहुबाहुकः ॥ ४३ ।
शङ्कुकर्णा महाकर्णा हस्तिकर्णास्तथाऽपरे ।
केचित्तु तत्र पुरुषाः सर्व्वशोभाविशोभिताः ॥ ४४ ।
केयूरैर्मुकुटैश्चान्ये चित्रैरङ्गैस्तथाऽपरे ।
स्रग्विणो बद्धपादाश्च सर्व्वाभरणभूषिताः ॥ ४५ ।
सकुठाराः सकुद्दालाः सचक्राः शूलपाणयः ।
सशक्तितोमराः केचित्सधनुष्का दुरासदाः ॥ ४६ ।
असिहस्तास्तथा चान्ये तथा मुद्गरपरायणाः ।
सज्जिता दधिहस्ताश्च गन्धहस्ता ह्यनेकशः ॥ ४७ ।
विचित्रभक्षहस्ताश्च वस्त्रहस्तास्तथैव च ।
धूपान् प्रगृह्य विविधान्वासांसि शुभदर्शनाः ॥ ४८ ।
शिविकाश्च महाशोभा यानानि विविधानि च ।
वाजिकुञ्जरयुक्तानि हंसयुक्तानि चापरे ॥ ४९ ।

---

* जीवक्षयकरा इति (ग) । † धरामिमा इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शरभै ऋषभैश्चापि हस्तिभिश्च सुदर्शनैः।
मयूरैः सारसैश्चैव चक्रवाकैश्च वाजिभिः॥ ५० ।
एवंरूपा मया दृष्टास्तत्र चान्ये भयानकाः।
उज्ज्वला मलिनाश्चैव जीर्णवस्त्रा नवांशुकाः॥ ५१ ।
सुमनाभिमना मूका मारकाः शतमारकाः।
समार्ज्जारी काचवर्णा कृष्णा चैव कलिस्तथा॥ ५२ ।
धर्म्महस्ता यशोहस्ताः कीर्त्तिहस्तास्तथापरे।
एते पुरोगमास्तत्र कृतान्तस्य महात्मनः॥ ५३ ।
यद्येतानि यजेद्विप्रो नास्ति तस्य पराभवः।
नमस्कार्य्याश्च पूज्याश्च आपन्नेन हि नित्यशः।
परितुष्य कृता नित्यं विहिताः सार्व्वलौकिकाः॥ ५४ ।

इति वराहपुराणे संसारचक्रे कृतान्तकालमृत्युकिङ्करवरवर्णनी
नाम सप्तनवत्यधिकशततमोऽध्यायः।

अष्टनवत्यधिकशततमोऽध्यायः।

वर्त्तमानः सभामध्ये राजा प्रेतपुराधिपः।
मामिकमृषभं* तत्र दर्शनञ्च ददौ यमः॥ १ ।

---

* मामिकं मृतकमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

याथातथ्येन मे पूजा कार्य्येण विधिनाऽकरोत् ।
आसनं पाद्यमर्घ्यञ्च वेददृष्टेन कर्म्मणा ॥ २ ।
अब्रवीच्च पुनर्हृष्टो आस्यताञ्च वरासने ।
काञ्चने कुशसंच्छन्ने दिव्यपुष्पोपशोभिते ॥ ३ ।
तस्य वक्त्रं महारौद्रं नित्यमेव भयानकम् ।
पश्यतस्तस्य मां विप्रास्ततः सौम्यतरं बभौ ॥ ४ ।
लोहिते तस्य वै नेत्रे जल्पतश्च पुनः पुनः ।
पद्मपत्रनिभे चैव जज्ञाते मम सौहृदात् ॥ ५ ।
ततोऽहं तस्य भावेन भावितश्च पुनः पुनः* ।
प्रहृष्टमानसो जातो विश्वासश्च परङ्गतः ॥ ६ ।
तस्य प्रीतिकरं सद्यः सर्व्वदोषविनाशनम्† ।
कामदञ्च यशोदञ्च दैवतैश्चापि पूजितम् ॥ ७ ।
कालवृद्धिकरं स्तोत्रं चिप्रं तत्र उदीरयन् ।
येन प्रीतो महातेजा यमः परमधार्म्मिकः ॥ ८ ।

ऋषिपुत्त्र उवाच ।

त्वं धाता च विधाता च श्राद्धे चैव हि दृश्यते ।
पितॄणां परमो देवश्चतुष्पाद नमोऽस्तु ते ॥ ९ ।
कालज्ञश्च कृतज्ञश्च सत्यवादी दृढव्रतः ।
प्रेतनाथ महाभाग धर्म्मराज नमोऽस्तु ते ॥ १० ।
कर्म्म कारयिता चैव‡ भूतभव्यभवत्प्रभो ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति । † तस्य प्रीतिरसौ दृष्टः सर्व्वदोषविनाशन इति (क), (ख) । ‡ कर्त्ता कारयिता चैवेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यावकोमोहनश्चैव सङ्क्षेपो विस्तरस्तथा ॥ ११ ।
दण्डपाणि विरूपाक्ष पाशहस्त नमोऽस्तु ते ।
आदित्यसदृशाकार सर्व्वजीवहर प्रभो ॥ १२ ।
कृष्णवर्ण दुराधर्ष तैलरूप नमोऽस्तु ते ।
मार्तण्डसदृश श्रीमन्मार्तण्डसमतेजसः* ॥ १३ ।
हव्यकव्यवहस्त्वं हि प्रभविष्णो नमोऽस्तु ते ।
पापहन्ता व्रती श्राद्धो नित्ययुक्तो महातपाः ॥ १४ ।
एकदृग्बहुदृग्भूत्वा काल मृत्यो नमोऽस्तु ते ।
क्वचिद्दण्डी क्वचिन्मुण्डी क्वचित्कालो दुरासदः ॥ १५ ।
क्वचिद्बालः क्वचिद्वृद्धः क्वचिद्रौद्रो नमोऽस्तु ते ।
त्वया विराजितो लोकः शासितो धर्म्महेतुना ॥ १६ ।
प्रत्यक्षं दृश्यते देव त्वद्विना न च सिध्यति ।
देवानां परमो देवस्तपसां परमन्तपः ॥ १७ ।
जपानां परमं जाप्यं त्वत्तश्चान्यो न दृश्यते ।
ऋषयो वा तथा क्रुद्धा हतबन्धुसुहृज्जनाः ॥ १८ ।
पतिव्रतासु या नार्य्यो दुःखितास्तपसि स्थिताः ।
न त्वं शक्त इह स्थानात्यातनाय कदाचन ॥ १९ ।
तस्मात्त्वं सर्व्वदेवेषु एको धर्म्मभृतां वरः ।
कृतज्ञः सत्यवादी च सर्व्वभूतहिते रतः ॥ २० ।

---

* समतेज इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वैशम्पायन उवाच ।

एवं श्रुत्वा स्तवं दिव्यमृषिपुत्त्रेण भाषितम् ।
परितुष्टस्तदा धर्म्मो औद्दालकसुतम्प्रति ॥ २१ ।

यम उवाच ।

परितुष्टोऽस्मि भद्रन्ते माधुर्य्येण तवानघ ।
याथातथ्येन वाक्येन ब्रूहि किं करवाणि ते ॥ २२ ।
वरं वरय भद्रन्ते यं वरङ्काङ्क्षसे* द्विज ।
शुभं वा श्रेयसा युक्तं जीवितं वाप्यनामयम् ॥ २३ ।

ऋषिपुत्त्र उवाच ।

नेच्छाम्यहं महाभाग मृत्युं वा जीवितम्प्रभो ।
यदि त्वं वरदो राजन् सर्व्वभूतहिते रतः ॥ २४ ।
द्रष्टुमिच्छाम्यहं देव तव देशं यथातथम् ।
पापानाञ्च शुभानाञ्च या गतिस्त्विह दृश्यते ॥ २५ ।
सर्व्वं दर्शय मे राजन्यदि त्वं वरदो मम ।
चित्रगुप्तञ्च तं राजन् कार्य्यार्थं तव चिन्तकम् ॥ २६ ।
दर्शयस्व महाभाग सर्व्वलोकस्य चिन्तक ।
यथा कर्म्मविशेषाणां दर्शनार्थङ्करोति सः ॥ २७ ।
एवमुक्तो महातेजाः द्वारस्थं संदिदेश ह ।
चित्रगुप्तसकाशन्तु नय विप्रं सुयन्त्रितम् ॥ २८ ।
वक्तव्यश्च महाबाहुरस्मिन्विप्रे यथातथम् ।

* काङ्क्षसीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राप्तकालञ्च युक्तञ्च तत्सर्व्वं वक्तुमर्हसि ॥ २९ ।
ततोऽहं त्वरितो नीतस्तेन दूतेन दर्शितः ।
प्राप्तश्च परया प्रीत्या चित्रगुप्तनिवेशनम् ॥ ३० ।
प्रत्युत्थितश्च मां दृष्ट्वा चिन्तयित्वा तु तत्त्वतः ।
स्वागतं मुनिशार्द्दूल यथेष्टं परिगम्यताम् ॥ ३१ ।
एवं सम्भाष्य मां वीरः स्वान् भृत्यान् सन्दिदेश ह ।
कृताञ्जलिपुटान् सर्व्वान् घोररूपान् भयानकान् ॥ ३२ ।

चित्रगुप्त उवाच ।

भो भो शृणुत मे दूता मम चित्तानुवर्त्तकाः ।
भक्तिमन्तो दुराधर्षा नित्यं व्रतपरायणाः ॥ ३३ ।
अयं विप्रो मयादिष्टः प्रेतावासं गमिष्यति ।
अस्य रक्षा च गुप्तिश्च भवद्भिः क्रियतामिति ॥ ३४ ।
नैव दुःखेन खेदः स्यान्न चोष्णेन च शीततः ।
बुभुक्षापि तृषा वापि एष आज्ञापयामि वः ॥ ३५ ।
एवं दत्तवरो विप्रो गुरुचित्तानुचिन्तकः ।
सर्व्वभूतदयावांश्च द्रव्यवांश्च स वै द्विजः ॥ ३६ ।
यथाकाममयं पश्येद्धर्म्मराजपुरोत्तमम् ।
एवमुक्त्वा महातेजा गच्छ गच्छेति चाब्रवीत् ॥ ३७ ।

ऋषिपुत्त्र उवाच ।

सन्दिष्टाश्च ततो दूताश्चित्रगुप्तेन धीमता ।
धावन्तस्त्वरमाणास्तु गृह्णन्तो घ्नन्त एव च ॥ ३८ ।
बध्नयन्ति महाकाया निर्द्दहन्ति महाबलाः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पाटयन्ति प्रहारैश्च ताड़यन्ति पुनः पुनः ॥ ३९ ।
वेणुयष्टिप्रहारैश्च प्रहरन्ति ततोऽधिकैः ।
भग्ना भिन्ना विभिन्नाश्च तथा भग्नशिरोधराः ॥ ४० ।
रुदन्ति करुणङ्घोरं त्रातारं नाप्नुवन्ति ते ।
नरकेऽपि तथा पूर्णे अगाधे तमसावृते ॥ ४१ ।
केचिच्च तेषु पच्यन्ते दह्यन्ते पावकेन्धनम् ।
तैलपाके तथा केचित्केचित्चारेण सर्पिषा ॥ ४२ ।
पतन्ति ते दुरात्मानस्तत्र तत्र च कर्म्मभिः ।
यातनाभिर्दह्यमाना घोराभिश्च ततस्ततः ॥ ४३ ।
केचिद्यन्त्रमुपारोप्य सम्पीड्यन्ते तिला इव ।
तेषां सम्पीड्यमानानां शोणितं स्रवति बहु ॥ ४४ ।
ततो वैतरणी घोरा सम्भूता निम्नगा तथा ।
सफेनसलिलावर्त्ता दुस्तरा पापकर्म्मिणाम् ॥ ४५ ।
अथान्ये शूल आरोप्य दूताः पादेषु गृह्य वै ।
वैतरण्यां सुघोरायाम्प्रक्षिपन्ति सहस्रशः ॥ ४६ ।
नात्युष्णे रुधिरे तत्र फेनमालासमाकुलाः ।
दशन्ति सर्पास्तांस्तत्र प्राणिनस्तु सहस्रशः ॥ ४७ ।
अनुत्तार्य्य तदा तस्या उच्छ्रिता विकृतावशाः ।
आवर्त्तादूर्म्मयश्चैव उत्तिष्ठन्ति सहस्रशः ॥ ४८ ।
तत्र शुष्यन्ति ते पापाः सर्व्वदोषसमन्विताः ।
मज्जन्तश्च वमन्तश्च त्रातारं नाप्नुवन्ति ते ॥ ४९ ।
अथान्ये बहवस्तत्र बहुभिश्चापि दूतकैः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कूटशाल्मलिमारोप्य लौहकण्टकसंवृताम् ॥ ५० ।
असिशक्तिप्रहारैश्च ताड़यन्ति पुनः पुनः ।
तत्र शाखासु घोरासु मया दृष्टाः सहस्रशः ॥ ५१ ।
कुष्माण्डा यातुधानाश्च लम्बमाना भयानकाः ।
अतिक्रम्य च ते स्कन्धास्तीक्ष्णकण्टकसङ्कुलाः ॥ ५२ ।
वेदनार्त्तास्तु वेगेन शीघ्रं शाखानुपारुहन्* ।
तत्र ते निहता घोरा राक्षसाः पिशिताशनाः ॥ ५३ ।
आरूढ़गात्राणि घ्नन्ति निःशङ्कं तमसावृतम् ।
संक्रामश्च सुखादन्ति शालायाङ्कपिवङ्गृशम् ॥ ५४ ।
यथा च कुक्कुटं खादेत्कश्चिन्म्लेच्छो निराकृतिः ।
तथा कटकटाशब्दस्तस्मिन्वृत्ते मया श्रुतः ॥ ५५ ।
पक्कमाम्रफलं यद्वन्नरः खादेद्यथा वने ।
एवं ते मुखतः कृत्वा महावक्त्रा दुरासदाः ॥ ५६ ।
चूषयित्वा तु तान् सर्व्वांस्ते च तस्मिन्नगोत्तमे ।
विसृजन्ति चितिं यावदस्थिभूतान्नरांस्तथा ॥ ५७ ।
ततो जवेन संयुक्ता वनस्थाश्चूषिताः पुनः ।
आविष्टानि च कर्म्माणि पुनः शीघ्रमकामयन् ॥ ५८ ।
अधस्तात्तु पुनस्तत्र पश्यन्तः पापकर्म्मिणः ।
बहुसंख्येषु पापेषु दारुणेषु सुदुःखिताः ॥ ५९ ।
विधानं पाहि चैवेति वदन्तः परुषं वचः† ।

---

* शाखा इति साधु । † पुरुषं वच इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यमदूता निरामर्षाः सूदयन्ति पुनः पुनः ॥ ६० ।
पाषाणवर्षैः केचित्तु पांशुवर्षैश्च विद्रुताः ।
प्रविशन्ति नगच्छायां ततस्ते प्रज्वलन्ति तु ॥ ६१ ।
द्रवन्ति च पुनस्तत्र दूतैश्चापि दृढं हताः ।
भुवनेषु च घोरेषु पच्यन्ते ते दृढाग्निना ॥ ६२ ।
वारिपूर्णं ततः कुम्भं शीतलञ्च जलं पुनः ।
दीयतां दीयताञ्चेति ब्रुवते नः प्रसीदथ ॥ ६३ ।
ततः पानीयरूपेण जलं तप्तन्तु दीयते ।
तेन दग्धाश्च आर्त्ताश्च क्रोशन्तश्च परस्परम् ॥ ६४ ।
आलिङ्ग्यालिङ्ग्य दुःखार्त्ताः केचित्तत्र पतन्ति वै ।
तथान्ये क्षुधितास्तत्र हाहाभूतमचेतसः ॥ ६५ ।
अन्नानाञ्च सुमिष्टानां भक्ष्याणाञ्च विशेषतः ।
पश्यन्ति राशिं तत्रस्थां सुगन्धां पर्व्वतोपमाम् ॥ ६६ ।
दधिक्षीररसांश्चैव कृशरान्पायसं तथा ।
मधुमाधवपूर्णानि सुरामैरेयकस्य च ॥ ६७ ।
माध्वीकस्य च पानस्य सीधोर्जातिरसस्य च ।
पानानि चैव दिव्यानि शीतलानि सुगन्धि च ॥ ६८ ।
गोरसस्य च पानानि भाजनानि च नित्यशः ।
तपोऽर्जितानि दिव्यानि तिष्ठन्ति सुकृतात्मनाम् ॥ ६९ ।
माल्यानि धूपगन्धाश्च नानारससमायुताः ।
मनोहराश्च कान्ताश्च भूमिस्थाश्च सहस्रशः ॥ ७० ।
भोजनेषु च सर्व्वेषु स्त्रियः कान्ता मनोहराः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गृहीतकुम्भमणिकाः सर्व्वाभरणभूषिताः ॥ ७१ ।
फलानि कुण्डहस्ताश्च पात्रहस्तास्तथापराः ।
सुमनःपाद्यहस्ताश्च अदीनाः परमाङ्गनाः ॥ ७२ ।
अन्नदानरताश्चैव भोजयन्ति सहस्रशः ।
नूपुरोज्ज्वलपादाश्च तिष्ठन्ति च मनोहराः ॥ ७३ ।
उपस्थाप्य महायोग्यमत्र काले च योषितः ।
ब्रुवन्ति सर्वास्ताश्चैव तस्यां तस्य च दक्षिणाः ॥ ७४ ।
निघ्नन्तश्च हसन्तश्च दूता निष्ठुरवादिनः ।
भो भो कृतघ्ना लुब्धाश्च परदाराभिमर्षकाः ॥ ७५ ।
पापाशया* निष्कृतिकाः सर्व्वदानविवर्ज्जिताः ।
परापवादनिरताः पापैर्बद्धकथानकाः ॥ ७६ ।
निर्लज्जा गृहका देया याचितुं मनसा हि ताः ।
सुलभानि न दत्तानि विभवे सति लौकिके ॥ ७७ ।
पानीयमथ काष्ठानि यद्यन्नं सुखमागतम् ।
तेन वध्या भवन्तो वै यातनाभिरनेकशः ॥ ७८ ।
कर्म्मणाञ्च चयो जातः संसारे यदि पच्यथ† ।
विमुक्ता इहलोकात्तु जनिष्यथ‡ सुदुर्गताः ॥ ७९ ।
कुलेषु सुदरिद्रेषु सञ्जाताः पापकर्म्मिणः ।
पापैरनुगता घोरैर्मानुषं लोकमाश्रिताः ॥ ८० ।
वृत्तस्था भुञ्जते होमांश्चातुर्वर्ण्यान्विशेषतः ।

---

* पापाः शठा इति (ग)। † यदि पच्यध्वे इति साधु। ‡ परस्मैपदमार्षम्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततः सत्यरताः शान्ता दयावन्तः सुधार्म्मिकाः ॥ ८१ ।
इह विश्राम्य ते धीराः किञ्चित्कालं सहानुगाः ।
गच्छन्ति परमं स्थानं पृथिव्यां वा महत्कुले ॥ ८२ ।
बहुसुन्दरनारीके समृद्धे सुसमाहितः* ।
अजायन्त तथा चान्ताः प्राप्स्यन्ति परमाङ्गतिम् ॥ ८३ ।

इति वराहपुराणे भगवच्छास्त्रे संसारचक्रयातनानां स्वरूपवर्णनो नाम अष्टनवत्यधिकशततमोऽध्यायः ।

नवनवत्यधिकशततमोऽध्यायः ।

ऋषिपुत्र उवाच ।

तस्मिन् क्षितितलं सर्व्वमायसैः कण्टकैश्चितम् ।
प्रभवन्ति पुनः केचिद्विषमं तमसाश्रितम् ॥ १ ।
अथान्ये छिन्नपादास्तु छिन्नपाणिशिरोधराः ।
पापाचारास्तथा देशादुपसर्पत मा चिरम् ॥ २ ।
ये तु धर्म्मरता दान्ता वपुष्मन्तो यथा गृहे ।
परिपान्ति क्षितिं सर्व्वं पात्यन्ते पापकारिणः ॥ ३ ।
याचमानाः स्थिता नित्यं सुप्रीतैस्तोयभोजनैः ।
स्त्रियः श्रीरूपसङ्काशाः सुकुमाराः सुभोजनाः ॥ ४ ।

---

* सुसमाहिते इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कृत्वा पूजां परां तत्र प्रतीचन्ते परं जनम्।
अग्नितप्ते सुघोरे च निक्षिप्यन्ते शिलातले ॥ ५ ।
आलोके च प्रदर्श्यन्ते* वृचाश्च भुवनानि च।
आयान्ति दह्यमानेषु पृष्ठपादोदरेषु च ॥ ६ ।
तत्र गत्वा तु ते दूताः प्रविशन्ति सुदारुणाः।
क्लिश्यन्ति बहवस्तत्र चातारं नाप्नुवन्ति ते ॥ ७ ।
अथान्ये तु श्वभिर्घोरैरापादतलमस्तकम्।
भच्यमाणा रुदन्तश्च क्रोशन्तश्च पुनः पुनः ॥ ८ ।
अथान्ये तु महारूपा महादंष्ट्रा भयानकाः।
सूचीमुखकृताः पापाः चुधितास्तृषितास्तथा ॥ ९ ।
अन्नानि दीयमानानि भच्याणि विविधानि च।
भोज्यानि लेह्यचोष्याणि यैर्निषिद्धं दुरात्मभिः ॥ १० ।
असौ सारमयी† नारी वह्नितप्ता सुदारुणा‡।
आलिङ्गति नरं तत्र धावन्तं चानुधावति ॥ ११ ।
धावन्तं चानुधावन्ती इदं वचनमब्रवीत्।
अहं ते भगिनी पाप अहं भार्या सुतस्य ते।
मातृष्वसा ते दुर्बुद्धे मातुलानी पितृष्वसा ॥ १२ ।
गुरुभार्या मित्रभार्या भ्रातृभार्या नृपस्य च।
श्रोत्रियाणां द्विजातीनां जायास्तु धर्षितास्त्वया§ ॥ १३ ।

---

* प्रदृश्यन्ते इति (ग)। † असौ सारमयीति सार्व्वत्रिकः पाठः, अयःसारमयीति तु सम्यक्। ‡ वह्नितप्तेति (क), (ख)। § श्रोत्रियाणां द्विजानान्तु जायास्ता धर्षितास्त्वयेति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मोच्यसे न हि पापात्त्वं रसातलगतो यथा ।
किम्प्रधावसि निर्लज्ज व्यसनैश्चोपपादितः ॥ १४ ॥
वधिष्येऽहं ध्रुवं पाप यथा कर्म्म त्वया कृतम् ।
एवं वै बोधयन्तीह श्रावयन्ति पुनः पुनः ॥ १५ ॥
अभिद्रवन्ति तं पापं घोररूपा भयानकाः ।
ज्ञानिनाञ्च सहस्रेषु जातं जातं तथा स्त्रियः ॥ १६ ॥
अनुपीड्य दुरात्मानं धर्षयन्ति सुदारुणम् ।
वृषली बहुलैर्दुःखैः किं क्रन्दसि पुनः पुनः ॥ १७ ॥
किं क्रन्दसि सुदुर्बुद्धे परिष्वक्तः स्वयं मया ।
दशधा त्वं मया पाप नीयमानः पुनः पुनः ॥ १८ ॥
अञ्जलिं वापि कुर्व्वाणो याचमानो न लज्जसे ।
न मोक्ष्यसे मया पाप कुतो गच्छसि मूढ़ वै ॥ १९ ॥
यत्र यत्र प्रयासि त्वमिति गत्वा यमालये ।
तत्र तत्रैव पाप त्वां न त्यच्ये* पारदारिकम् ॥ २० ॥
लोहयष्टिप्रहारैश्च ताड़यन्ति पुनः पुनः ।
गोपाला इव दण्डेन कालयन्तो मुहुर्मुहुः ॥ २१ ॥
व्याघ्रसिंहशृगालैश्च तथा गर्द्दभराक्षसैः ।
भक्ष्यन्ते श्वापदैरन्यैः श्वभिः काकैस्तथाऽपरे† ॥ २२ ॥
असितालवनं तत्र धूमज्वालासमाकुलम् ।
दावाग्निसदृशाकारं प्रदीप्तं सर्व्वतोऽर्च्चिषा ॥ २३ ॥

---

* त्यक्ष्यामीति साधु । † (ग) पुस्तकेऽतः परं सार्द्धचिश्लोका न सन्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र क्षिप्ता ततः पापं यमदूतैः सुदारुणैः।
दह्यमानाः सुतप्तांश्च संश्रयन्ते द्रुमान् पुनः॥ २४।
असिपत्रैस्ततो वृक्षाश्छिन्दन्ति बहुशो नरान्।
तत्र छिन्नाश्च दग्धाश्च हन्यमानाश्च सर्व्वशः॥ २५।
विघुष्टा विकृताश्चैव दह्यमाना नदन्ति ते।
असितालवनद्वारि ये तिष्ठन्ति महारथाः॥ २६।
पापकर्म्मसमायुक्तांस्तर्ज्जयन्ति सुदारुणाः।
भो भो पापसमाचारा धर्म्मसेतुविनाशकाः॥ २७।
अतो निमित्तं पापिष्ठा यातनाभिः सहस्रशः।
अनुभूयेह तत्सर्व्वं मानुष्यं यदि यास्यथ॥ २८।
कुलेषु सुदरिद्राणां गर्भवासेन पीड़िताः।
भोगैश्च पीड़िताः नित्यं उत्पत्स्यथ* सुदुर्गताः॥ २९।
अग्निज्वालानिभास्तत्र अग्निस्पर्शा महारवाः।
पक्षिणश्चायसैस्तुण्डैर्व्याघ्राश्चैव सुदारुणाः॥ ३०।
तत्र घोरा बहुविधाः क्रव्यादाः श्वादयस्तथा।
खादन्ति रुषितास्तत्र बहवो हिंसका नरान्†॥ ३१।
ऋक्षद्वीपिसमाकीर्णे बहुकीटपिपीलके।
असितालवने विप्रा बहुदुःखसमाकुले॥ ३२।
तत्र क्षिप्ता मया दृष्टा यमदूतैर्महाबलैः।
असिपत्रसुभग्नाङ्गाः शूललग्नास्तथाऽपरे॥ ३३।

---

* परस्मैपदमार्षम्। † अग्निस्पर्शा महारवा इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तथाऽपरो महादेशो नानारूपो भयानकः ।
पुष्करिण्यश्च वाप्यश्च ह्रदा नद्यस्तथैव च ॥ ३४ ।
तड़ागानि च कूपाश्च रुधिरस्य सहस्रशः ।
पूतिमांसकृमीणाञ्च अमेध्यस्य तथैव च ॥ ३५ ।
अन्यानि च मया तत्र दृष्टानि मुनिसत्तमाः ।
तत्र क्लिश्यन्ति ते पापास्तस्मिन्मध्ये सहस्रशः ॥ ३६ ।
जिघ्रन्तश्च तथा गन्धं मज्जन्तश्च सहस्रशः ।
अस्थिपाषाणवर्षांश्च रुधिरस्य बलाहकाः ॥ ३७ ।
अश्मवर्षञ्च ते घोराः पातयन्ति सहस्रशः ।*
धावतां प्लवताञ्चैव हा हतोऽस्मीति भाषिणाम् ॥ ३८ ।
प्राहतानां पुनः शब्दो वध्यताञ्च सुदारुणः ।
क्रन्दताञ्चरुणोन्मिश्रं दिशोऽपूर्य्यन्त सर्व्वशः ॥ ३९ ।
क्वचिद्बद्धः क्वचिद्रुद्धः क्वचिद्विद्धः सुदारुणैः ।
क्वचित्स्थूलैस्तथाबद्ध उद्बद्धश्च क्वचित्तथा ॥ ४० ।
हाहा भयानकोन्मिश्रः शब्दोऽश्रूयत दारुणः ।
अपश्यम्पुनरन्यत्र यत्स्मृत्वा चोद्विजेन्नरः ॥ ४१ ।

इति वराहपुराणे संसारचक्रे यातनास्वरूपवर्णनो नाम
नवनवत्यधिकशततमोऽध्यायः ।

---

* (ख) पुस्तकेऽत्र पाठक्रमभेदो लक्ष्यते । (ग) पुस्तके धावतामित्याद्यर्द्धं जिघ्रन्तश्चेत्यादितः परमेव दृश्यते ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्विशततमोऽध्याय: ।

ऋषिपुत्त्र उवाच ।

तप्तश्चैव महातप्तं महारौरवरौरवौ ।
सप्ततालश्च नरको नरक: कालसूत्रक: ॥ १ ।
अन्धकारश्च नरको अन्धकारपरस्तथा ।
अष्टावेते तु नरका: पच्यन्ते यत्र पापिन: ॥ २ ।
प्रथमे प्रथमं विद्याद्द्वितीये द्विगुणं तथा ।
तृतीये त्रिगुणं विद्याच्चतुर्थे तु चतुर्गुणम् ॥ ३ ।
पञ्चमे तु गुणा: पञ्च षष्ठे षड्गुणमुच्यते ।
सप्तमे तु गुणा: सप्त अष्टमेऽष्टविधा गुणा: ॥ ४ ।
अहोरात्रेण चाध्वानं प्रेता गच्छन्ति तत्पुरम् ।
दु:खितानां ततो दु:खं दु:खाद्दु:खतरं तत: ॥ ५ ।
दु:खमेवात्र हि सुखं दु:खैर्दु:खं विवध्यते* ।
उपायस्तत्र नैवास्ति येन स्वल्पं सुखम्भवेत् ॥ ६ ।
मुच्यते च मृतस्तत्र मारकास्तत्र दुर्लभा: ।
शब्दे स्पर्शे तथा रूपे रसे गन्धे तु पञ्चमे ॥ ७ ।
न सुखं तत्र तस्यास्ति किञ्चिदेवात्र विद्यते ।
शारीरैर्मानसैश्चैव दु:खैर्दु:खान्तगामिभि: ॥ ८ ।
आयसै: कण्टकैस्तीक्ष्णैस्तप्तैस्तप्तावृता मही ।

---

* हि वध्यते इति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अन्तरीक्षं खगानीकैरग्निजिह्वैः समावृतम् ॥ ९ ।
अतीव च बुभुक्षात्र पिपासा चाप्यतीव हि ।
उष्णमत्युष्णमेवात्र शीतलञ्चातिशीतलम् ॥ १० ।
पातुकामश्च पानीयं राक्षसैर्नीयते सरः* ।
हंससारससङ्कीर्णं पद्मोत्पलविभूषितम् ॥ ११ ।
पातुकामश्च पानीयं सहसा तत्र धावति ।
सलिलं प्रक्षते चैव तत्र तप्ततरं तथा ॥ १२ ।
ततः पक्वानि मांसानि राक्षसैः परिणीयते ।
क्षारोदकेऽपि च तथा क्षिप्यतेऽत्र महाह्रदे† ॥ १३ ।
तत्र चैव ह्रदे नैका मत्स्याः खादन्ति सर्व्वशः ।
ततः कालावसाने तु कथञ्चित्प्रपलायिनः ॥ १४ ।
किञ्चिदन्तरमागम्य वेदनार्थाः पतन्ति हि ।
यातनार्थं पुनस्तत्र मांसञ्चैवोपजायते ॥ १५ ।
शिरस्येवोपविष्टस्य प्रस्थितस्य प्रधावतः ।
तस्यार्त्तायामवस्थायां दुःखम्भवति दारुणम् ॥ १६ ।
करीषगर्त्तस्तत्रैव कुम्भीपाकः सुदारुणः ।
पद्मपत्राकृतिस्तस्य पेशी तत्र शरीरज ॥ १७ ।
पाटयन्ति‡ सुमार्गेण राक्षसाः करपत्रिकाः ।
निपीड्य दशनैरोषं भीमनादाः सुरोषिताः ॥ १८ ।
असिपत्रवनञ्चात्र शृङ्गाटकवनं तथा ।

---

* रस इति (ग) । † नदे इति (ख) । ‡ पीड़यन्तीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र शृङ्गाटकाश्चैवं तप्तबालुकमिश्रिताः ॥ १९ ।
दह्यते छिद्यते चैव विध्यते भिद्यते तथा ।
पाट्यते पीड्यते चैव क्वथ्यते च विशस्यते ॥ २० ।
श्यामाश्च शबलाश्चैव श्वानस्तेऽत्र दुरासदाः ।
खादन्ति च सुसंरब्धाः सर्पवृश्चिकसन्निभैः ॥ २१ ।
कण्टकैः प्रतिकूलैश्च तत्रान्या कूटशाल्मलिः ।
कर्षन्ति तत्र वै वैनं यावदस्यावशेषितः ॥ २२ ।
यद्दुःखं तस्य दुर्बुद्धेः प्रतिकूलञ्च तस्य यत् ।
तत्तदोत्पद्यते शीघ्रं यातनार्थाय यत्नतः ॥ २३ ।
शीतकामस्य वै चोष्णमुष्णकामस्य शीतलम् ।
सुखकामस्य वै दुःखं सुखं नैवाऽत्र विद्यते ॥ २४ ।
छिन्नाश्च शतधाप्येवं ह्यनिशन्तैः सहस्रशः ।
छिन्नाङ्गाः सर्व्वगात्रेषु सर्व्वमेव स विन्दति ॥ २५ ।
सलिलञ्च नदीङ्घोरां व्यालाकीर्णां भयानकाम् ।
तां चैवोत्तार्य्यते* प्रेता यां दृष्ट्वैव भयं भवेत् ॥ २६ ।
करम्भवालुका नाम शतयोजनमायता ।
अग्निज्वालासमा घोरा यथा येन स गच्छति ॥ २७ ।
ततो वैतरणी नाम क्षारोदा तु महानदी ।
योजनानि तु पञ्चाशदधस्तात्पञ्चयोजनम् ॥ २८ ।
अगाधपङ्का वै तत्र चर्म्ममांसास्थिभेदना ।
तत्र कर्क्कटका घोरा वज्रदंष्ट्रा विशन्ति ताम् ॥ २९ ।

* उत्तार्य्यन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

उलूकाश्च धनुर्मात्रा वज्रजिह्वास्थिभेदनाः ।
महाभिषा महाक्रोधा दुर्विषह्याः सुदारुणाः ॥ ३० ।
समुत्तीर्य्य तु कृच्छ्रेण तस्माद्योजनकर्दमात् ।
वसन्त्यत्र धरे केचिच्छून्यागारे निराश्रये ॥ ३१ ।
यत्र वै मूषिकगणा भक्षयन्ति ह्यनेकशः ।
मूषिकैर्जग्धगात्रस्तु अस्थिमात्रावशेषितः ॥ ३२ ।
प्रभाते वायुना स्पृष्टः पुनर्मांसं स विन्दति* ।
शून्यागारप्रवेशात्तु गव्यूती नातिदूरतः ॥ ३३ ।
सहकारवनं नाम रौद्रा† यत्र च पक्षिणः ।
निस्त्वगस्थिस्तु क्रियते निर्मांसश्चैव मानवः ॥ ३४ ।
निःशिराजालकश्चैव निरक्षिश्रवणस्तथा ।
वटवृक्षो नातिदूरे दक्षिणे तु त्रियोजनम् ॥ ३५ ।
सन्ध्याभ्र इव चाभाति प्रदीप्तो नित्यमेव तु ।
दशयोजनविस्तीर्णा अधः शतसमायता ॥ ३६ ।
यमचुल्लीति विख्याता गम्भीरा सा त्रियोजनम् ।
नित्यं प्रज्वलिता सा तु नित्यं धूमान्धकारिता ॥ ३७ ।
तत्र प्रेतसहस्राणि प्रयुतान्यर्व्वुदानि च ।
प्रक्षिप्यन्ते त्वहोरात्रं राक्षसैर्यमकिङ्करैः ॥ ३८ ।
मासमेकं वसत्यन्ये तस्यां चुल्ल्यां परिभ्रमन् ।
ततः शकुनिका नाम वसामेदोवहा नदी ॥ ३९ ।

* (ख) पुस्तके एतच्चरणं परवर्त्तिनः षट् पादाश्च न सन्ति । † चमरा यत्र पक्षिण-इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

चुल्लीकुचौ तु विश्रान्ता वेगिनी वहते तु सा ।
तां समुत्तीर्य्य कृच्छ्रेण यातनाः सप्तकाः पुनः ॥ ४० ॥
एकैकं दुस्तरङ्घोरं यथापूर्व्वं यथाक्रमात् ।
अनुभुङ्क्ते स कृच्छ्रेण दुष्कृती तीव्रवेदनाः ॥ ४१ ॥
दश तत्र लताः शूलाः कुम्भीपाकास्त्रयोदश ।
याति पापमहोरात्रं तस्मिन्नियमितेन तु ॥ ४२ ॥
राक्षसैर्निरनुक्रोशैर्दुर्निरीक्षैस्ततस्ततः ।
अङ्गारेषु विधूमेषु शूलप्रोतस्तु पच्यते ॥ ४३ ॥
शुष्कोदपाने धूमे च अधःशीर्षोऽवलम्बते ।
ज्वाल्यते तीक्ष्णतैले तु कटाह्यां स तु पच्यते ॥ ४४ ॥
करीषगर्त्ते स पुनः पच्यते मेदवह्निना ।
एकैकस्मिन्दशाहञ्च शूलादिषु स पच्यते ॥ ४५ ॥
यातनाः सप्तकास्तस्य निष्क्रान्तस्य त्रियोजने ।
यतो यमनदी नाम तप्तत्रपुजलोर्म्मिणी ॥ ४६ ॥
समुत्तीर्य्य तु कृच्छ्रेण दह्यमानस्त्वचेतनः ।
ततो मुहूर्त्तं विश्रान्तः किञ्चिदन्तरमागतः ॥ ४७ ॥
दीर्घिकां मोक्षते कान्तां शीतोदां शीतकाननाम् ।
सर्व्वकामान्स लभते भगिनी सा यमस्य तु ॥ ४८ ॥
भक्ष्यभोज्यञ्च सर्व्वैस्तु पापिभिस्तत्र लभ्यते ।
स सर्व्वं विस्मरत्यत्र त्रिरात्रमुषितोऽपि च ॥ ४९ ॥
ततो शूलग्रहो नाम पर्व्वतः शतयोजनः ।
निराश्रयः स सत्वानामेकपाषाण एव च ॥ ५० ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र वर्षति पर्ज्जन्यस्तत्र तप्तजलं सदा ।
तत्र कृच्छ्रेण तरति अहोरात्रेण मानवः ॥ ५१ ।
शृङ्गारकवनं नाम तत्र पश्यन्ति शाद्वलम् ।
नीलमक्षिकदंशैश्च सुव्याप्तं तद्वनं महत् ॥ ५२ ।
यैस्तु स्पृष्टश्च दृष्टश्च कृमिरूपश्च जायते ।
प्रेतो वर्षति मांसासृगस्मात्कृच्छ्रात्तु निर्गतः ॥ ५३ ।
ततोऽन्यल्लभते चैव यातनार्थम्प्रयत्नतः ।
ततः पश्यति पुत्रांस्तु महद्दुःखं सुदारुणम् ॥ ५४ ।
मातरं पितरञ्चैव पुत्रान्दारांस्तथा प्रियान् ।
पुरस्ताद्दह्यमानं* स क्रन्दमानमचेतनम् ॥ ५५ ।
हा पुत्र त्राहि त्राहीति क्रन्दमानस्ततस्ततः ।
लगुडैर्मुद्गरैर्दण्डैर्जानुभिर्वेणुभिस्तथा ॥ ५६ ।
मुष्टिभिश्च कशाभिश्च व्यालैरङ्गतैरपि ।
तद्दृष्ट्वा तादृशं दुःखं ततो मोहं स गच्छति ॥ ५७ ।
एवमेवात्मकर्म्माणि पर्य्यायेण पुनः पुनः ।
प्राप्नुवन्तीह तेऽत्रैव नरा दुष्कृतकारिणः ॥ ५८ ।
पातकानि च चत्वारि समाचारेण पञ्चमम् ।
कृत्वा तानि नरा यान्ति तं देशं पापकारिणः ॥ ५९ ।
तमादिषु च सर्व्वेषु गुणान्तरपृथङ्गतः ।
यदा भवति स प्रेतस्तदा स्थावरतां व्रजेत् ॥ ६० ।

---

* वध्यमानञ्चेति क्वचित्पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तदा वा स्थावरे तेषु जातस्य हि भवेन्नरः।
क्रमशः स भवेत्प्रेतस्तदा पशुगणेष्वपि ॥ ६१ ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
गतः स वसति प्रेतो नरके तु पुनः पुनः ॥ ६२ ।
ततो निवृत्तकर्म्मा तु स्वेदजः सम्भवेत्पुनः ।
स्वेदजानां ततो नित्यं सर्व्वसंसारचंक्रमात् ॥ ६३ ।
ततश्च पक्षिणां योनिं सर्व्वां संसरते* पुनः ।
गोयोनौ तु ततो गत्वा पुनर्मानुषतां व्रजेत् ॥ ६४ ।
मानुषे शूद्रतां याति लब्ध्वा यदि तु तुष्यति ।
ततो विशत्वङ्गच्छेत कर्म्मणाऽनेन वेष्टितः ॥ ६५ ।
वैश्यात्क्षत्त्रियतां याति तस्माच्च ब्राह्मणो भवेत् ।
ब्राह्मणत्वमपि प्राप्तः पापकर्म्मा दुरात्मवान् ॥ ६६ ।
दुःशिक्षितेन मनसा आत्मद्रुहो भवेत्तदा ।
शरीरं मानसङ्घोरं व्यसनैरुपपादितम् ॥ ६७ ।
उपयुक्तो नरो जातः पूर्व्वकर्म्मभिरन्वितः ।
ज्ञेयश्च ब्रह्महा कुष्ठी काकाक्षः काकतालुकः ॥ ६८ ।
सुरापः श्यावदन्तश्च पूतिगन्धश्च पापकृत् ।
राजहा पितृहा चैव सुरापश्चापि यो भवेत् ॥ ६९ ।
सुवर्णहर्ता च नरो ब्रह्मघ्नेन समो हि सः ।
क्वचिच्चात्र विरूपाणां नराणां पापकर्म्मिणाम् ॥ ७० ।

---

* संसरतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यावता* कर्म्मभिस्तैस्तैस्तेषु निर्याणवेश्मसु ।
छिन्नभिन्नविशस्तानां रुधिरेण समन्ततः ॥ ७१ ।
व्याप्तं महीतलं सर्व्वमापगाश्चापि निर्गताः ।
अजस्रं क्लिश्यमानानां क्रन्दताञ्च सुदारुणम् ॥ ७२ ।
समुत्तस्थौ महानादो हाहाकारसमाकुलः ।
बध्नतो विविधैर्बन्धैर्घातयन्तश्च दारुणम् ॥ ७३ ।
लौहयष्टिप्रहारैश्च आयुधैश्च सुदारुणैः ।
छेदनैर्भेदनैश्चोग्रैः पीड़नाभिश्च सर्व्वशः ।
श्रान्ताः कर्म्मकरा दूता मोहेनायत्तचेतसः ॥ ७४ ।
यदा श्रान्ताश्च खिन्नाश्च हन्तारः पापकर्म्मिणाम् ।
विज्ञापयेत्†तदा दूताश्चित्रगुप्तं महौजसम् ॥ ७५ ।

इति वराहपुराणे संसारचक्रे नरकयातनास्वरूपवर्णनी नाम
द्विशततमोऽध्यायः ।

एकाधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

ततस्ते सहिताः सर्व्वे अन्योऽन्याभिरताः सदा ।
नानावेशधरा दूताः कृताञ्जलिपुटास्तदा ॥ १ ।

---

* यावद्भिरिति साधु । † विज्ञापयेयुरिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दूता ऊचुः ।

वयं श्रान्ताश्च चीणाश्च अन्यान्योजितुमर्हसि ।
वयमन्यत्करिष्यामः स्वामिन्कार्य्यं सुदुष्करम् ॥ २ ।
अन्ये हि तावत्तत्कुर्य्युर्यथेष्टं तव सुव्रत ।
भगवन्परिक्लिष्टाः स्म त्राहि नः परमेश्वर ॥ ३ ।
ततो विद्वत्तरक्तात्तस्तेन वाक्येन रोषितः ।
विनिःश्वस्य यथा नागो ह्यपश्यत्सर्व्वतो दिशम् ॥ ४ ।
अदूरे दृष्टवान् कश्चित्पुरुषं स ह्यनाकृतिम् ।
स तु वेगेन सम्प्राप्त इङ्गितज्ञो दुरात्मवान् ॥ ५ ।
निःसृतः स च रोषेण चित्रगुप्तेन धीमता ।
ततः स त्वरितो गत्वा मन्देहो नाम राचसः ॥ ६ ।
नानारूपधरा घोरा नानाभरणभूषिताः ।
विनाशाय महासत्वो यत्र तिष्ठन्महायशाः ॥ ७ ।
चित्रगुप्तो महाबाहुः सर्व्वलोकार्थचिन्तकः ।
समः सर्व्वेषु भूतेषु भूतानाञ्च समादिशत् ॥ ८ ।
ततस्ते विविधाकारा राचसाः पिशिताशनाः ।
उपरुह्य तथा सर्व्वे मातङ्गांश्च हयन्तथा ॥ ९ ।
बद्धगोधाङ्गुलित्राणा नानायुधधरास्तथा ।
अग्रतः किङ्करास्तिष्ठन्* कृत्वा पादाभिवन्दनम् ॥ १० ।
ब्रुवन्तश्च पुनर्हृष्टाः शीघ्रमाज्ञापय प्रभो ।
तव सन्देशकर्त्तारः कस्य कुन्ताम जीवितम् ॥ ११ ।

---

* तिष्ठन्तीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेषां तद्वचनं श्रुत्वा चित्रगुप्तो ह्यभाषत ।
रोषगद्गदया वाचा निःश्वसन्वै मुहुर्मुहुः ॥ १२ ।
भो भो मन्देहका वीराः मम चित्तानुपालकाः ।
एकान् बध्नीत गृह्णीत भूतराक्षसपुङ्गवाः ॥ १३ ।
एवं हत्वा च बद्ध्वा च आगच्छत पुनर्यथा ।
हन्तारः सर्व्वभूतानां कृतघ्ना दृढ़विक्रमाः ॥ १४ ।
हत्वा वै पापकानेतान्मम विप्रियकारिणः ।
एतच्छ्रुत्वा वचस्तस्य वचनञ्चेदमब्रुवन् ॥ १५ ।

राक्षसा ऊचुः ।

श्रान्ता वा क्षुधिता वापि दुःखिता वा तपोधनाः ।
अमात्या एव ज्ञातव्या भृत्याः शतसहस्रशः ॥ १६ ।
एते वधार्थं निर्द्दिष्टास्त्वयैव च महात्मना ।
न युक्तं विविधाकारा ह्यस्माकं नाशनाय वै* ॥ १७ ।
यथा ह्येते समुत्पन्नाः सर्व्वधर्म्मानुचिन्तकाः ।
तथा वयं समुत्पन्नास्तदर्थं हि भवानपि ॥ १८ ।
मा च मिथ्या परिज्ञातं धर्म्मिष्ठस्य भवत्विति ।
अस्माकं विग्रहे वीर मुच्यन्ते यदि मन्यसे ॥ १९ ।
परित्रायस्व नो वीर किङ्कराणां महाबलान् ।
हन्यमानान्हि रक्षोभिरस्मानद्य रणाजिरे ॥ २० ।
एवमुक्ता ततो घोराः व्याधयः कामरूपिणः ।
सन्नद्धास्त्वरितं शूरा भीमरूपा भयानकाः ॥ २१ ।

* एष श्लोकः (ग) पुस्तके नास्ति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गजैरन्ये तथा चाश्वै रथैश्चापि महाबलाः ।
कण्टकैस्तुरगैर्हंसैरन्ये सिंहैस्तथापरे ॥ २२ ।
मृगैः शृगालैर्महिषैर्व्याघ्रैर्मेषैस्तथापरे ।
गृध्रैः श्येनैर्मयूरैश्च सर्पगर्द्दभकुक्कुटैः ॥ २३ ।
एवं वाहनसंयुक्ता नानाप्रहरणोद्यताः ।
समागता महासत्वा अन्योन्यमभिकाङ्क्षिणः ॥ २४ ।
तूर्य्यक्ष्वेड़ितसङ्घुष्टैर्वलितास्फोटितैरपि ।
जयार्थिनो द्रुतं वीराश्चालयन्तश्च मेदिनीम् ॥ २५ ।
ततः समभवद्युद्धं तस्मिंस्तमसि सन्तते ।
मुकुटैरङ्गदैश्चित्रैः केयूरैः पट्टिशासिकैः ॥ २६ ।
सकुण्डलैः शिरोभिश्च भ्राजते वसुधातलम् ।
बहुभिश्च सकेयूरैश्छत्रैश्च मणिभूषणैः ॥ २७ ।
शूलशक्तिप्रहारैश्च यष्टितोमरपट्टिशैः ।
असिखड्गप्रहारैश्च बलप्राणसमीरितैः ॥ २८ ।
अभवद्दारुणं युद्धं तुमुलं लोमहर्षणम् ।
नखैर्दन्तैश्च पादैश्च तेऽन्योऽन्यमभिजघ्निरे* ॥ २९ ।
बाहुभिः समनुप्राप्तः केशाकेशि ततः परम् ।
अयुक्तमतुलं युद्धं तेषां वै समजायत ॥ ३० ।
ततस्ते राक्षसा भग्ना दूतैर्घोरपराक्रमैः ।
देहि देहि वदन्त्येव भिन्द गृह्णीष्व तिष्ठ च ॥ ३१ ।
वध्यमानाः पिशाचास्ते ये निवृत्ता रणार्दिताः ।

* अभिजघ्नुरिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आह्वयन्त प्रतिभयात्क्रोधसंरक्तलोचनाः ॥ ३२ ।
तिष्ठ तिष्ठ क्व यासीति न गच्छामि दृढ़ो भव* ।
मया मुक्तमिदं शस्त्रं तव देहविनाशनम् ॥ ३३ ।
किन्तु मूढ़ त्वया शस्त्रं न मुक्तं मे रुजाकरम् ।
मया चिप्तास्तु इषवः प्रतीच्छ किम्म्लायसे ॥ ३४ ।
किन्त्वं वदसि दुर्बुद्धे एषोऽहं पारगो रणे ।
मम बाहुविमुक्तास्तु यदि जीवस्यतो वद ॥ ३५ ।
तत्र ते सहसा घोरा राक्षसाः पिशिताशनाः ।
मन्देहा नाम नाम्ना ते वध्यमानाः सहस्रशः ॥ ३६ ।
ततो भग्ना यदा ते तु राक्षसाः कामरूपिणः ।
प्रतिपद्यन्त† ते मायां तामसीं तमसा वृताः ॥ ३७ ।
अदृश्याश्चैव दृश्याश्च तद्बलं तमसा वृताः ।
ततस्ते शरणं जग्मुर्ज्वरं परमभीषणम् ॥ ३८ ।
शूलपाणिं विरूपाक्षं सर्व्वप्राणिप्रणाशनम् ।
मन्देहा नाम नाम्ना वै राक्षसाः पिशिताशनाः ॥ ३९ ।
खादन्ति चैव घ्नन्ति स्म चित्रगुप्तेन चोदिताः ।
व्याधीनाञ्च सहस्राणि दूतानाञ्च महाबलाः ॥ ४० ।
वयमद्य महाभाग त्रायस्व जगतः पते ।
ततस्तेषां वचः श्रुत्वा दूतानाङ्कामरूपिणाम् ॥ ४१ ।
ज्वरः क्रुद्धो महातेजा योधानान्तु सहस्रशः ।
कालो मुण्डः केकराक्षो लोहयष्टिपरिग्रहः ॥ ४२ ।

* दृढ़व्रत इति (ग) । † प्रत्यपद्यन्तेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विविधान् सन्दिदेशाऽत्र पुरुषानग्निवर्चसः।
बद्धाञ्जलिपुटान् सर्व्वानिदमाह सुरेश्वरः॥ ४३।
पात शीघ्रमिमान् पापान्योगेन च बलेन च।
ततस्ते त्वरितङ्गत्वा यत्र ते पिशिताशनाः॥ ४४।
ज्वराज्ञया च ते सर्व्वे जीमूतघननिस्वनाः।
बहूंस्ते राक्षसान् घोरान्दर्पोत्सिक्तान् सहस्रशः॥ ४५।
बहुशस्त्रप्रहारैश्च शस्त्रैश्च विविधोज्ज्वलैः।
तरसा राक्षसा विघ्ना रुधिरेण परिप्लुताः॥ ४६।
मोचयामास सङ्ग्रामं स्वयमेव यमस्ततः।
राक्षसान्मोचयित्वाऽथ हन्यमानान्समन्ततः॥ ४७।
गत्वा ज्वरं महाभागं विनयात्सान्त्वयन्मुहुः*।
पूजयन्वै ज्वरं दिव्यं गृह्य† हस्ते महायशाः॥ ४८।
प्रविवेश गृहं स्वन्तु सम्भ्रमेणेहशेन तु।
आननं तु समुत्प्रोञ्छ्य स्वेदसङ्ग्रामबिन्दुवत्॥ ४९।
धर्म्मराजोऽथ विश्रान्तं कालभूतं महाज्वरम्।
किञ्चिं वृत्तमिदं देव व्यापिनस्त्वं‡ महातपाः॥ ५०।
रोषायासकरश्चैव सर्व्वलोकनमस्कृतः।
अहंस्त्वञ्चैव देवेश इमं लोकं चराचरम्॥ ५१।
शासेमहि§ यथाकामं यथादृष्टं यथाश्रुतम्।

---

* सान्त्वयन्मुनिरिति (ख), (ग)। † गृहीत्वेति साधु। ‡ व्यापिनस्ते महातपः, अथवा व्यापी त्वं हि महातपा इति साधु। § शास्महे इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्वया ग्राह्यो ह्यहं देव मृत्युना च सुसंवृतः ॥ ५२ ।
लोकान् सर्व्वानहं हन्मि सर्व्वघाती न संशयः ।
गच्छ गच्छ यथास्थानं युद्धञ्च शमय स्वयम् ॥ ५३ ।
राक्षसानां हतास्तत्र षष्टिकोट्यो रणाजिरे ।
अमराश्चाक्षयाश्चैव न हि त्वाम्प्रापयन्ति वै ॥ ५४ ।
ततो ह्युपरतं युद्धं धर्म्मराजो यमः स्वयम् ।
दूतानां चित्रगुप्तेन सख्यमेकमकारयत् ॥ ५५ ।
ततः सम्भाषते* दूताश्चित्रगुप्तं तथैव च ।
नियुञ्जस्व† मया पूर्व्वं सर्व्वकर्म्माणि जन्तुषु ॥ ५६ ।
स्वकर्म्मगुणभूतानि ह्यशुभानि शुभानि तु ।
दूताः रुद्रं‡ समागम्य चित्रगुप्तस्य पार्श्वतः ।
उपस्थानञ्च कुर्व्वन्ति कालचिन्तकमब्रुवन् ॥ ५७ ।
यथा लोका यथा राजा यथा मृत्युः सनातनः ।
तद्देवोत्तिष्ठ तिष्ठेति क्षम्यतां क्षम्यताम्प्रभो ॥ ५८ ।

इति वराहपुराणे भगवच्छास्त्रे संसारचक्रे राक्षसकिङ्करयुद्धं नाम एकाधिकद्विशततमोऽध्यायः ।

---

* सम्भाषन्ते इति साधु । † नियुङ्क्ष्व इति साधु । ‡ ततोदूताः समागम्येति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्व्यधिकद्विशततमोऽध्यायः ।

ऋषिरुवाच ।

विस्मयस्तु मया दृष्टस्तस्मिन्नद्भुतदर्शनः ।
चित्रगुप्तस्य सन्दिष्टो धर्म्मराजेन धीमतः* ॥ १ ।
प्राप्नुवन्ति फलन्ते† वै ये च क्षिप्ताः पुरा जनाः ।
अग्निना वै प्रतप्तास्ते बद्धा बन्धैः सुदारुणैः ॥ २ ।
सन्तप्ता बहवो ये ते तैस्तैः कर्म्मभिरुल्वणैः ।
श्यामानां दशनानाञ्च इमं शीघ्रं प्रमापय ॥ ३ ।
दुराचारं पापरतं निर्घृणं पापचेतसम् ।
श्वानस्तु हिंसका ये च भक्षयन्तु दुरात्मनः‡ ॥ ४ ।
पितृघ्नो मातृगोघ्नस्तु सर्व्वदोषसमन्वितः ।
आरोप्य शाल्मलीङ्घोरां कण्टकैस्तैर्विपाटय ॥ ५ ।
एनं पाचय तैलस्य घृतक्षौद्रस्य वा पुनः ।
तप्तद्रोण्यां ततो मुञ्च ताम्रतप्तखले पुनः ॥ ६ ।
नराधममिमं क्षिप्त्वा प्रदीप्ते हव्यवाहने ।
ततो मनुष्यतां प्राप्य ऋणैस्तत्र प्रदीप्यते ॥ ७ ।
शयनासनहर्त्तारमग्निदायी च§ यो नरः ।

---

* सन्दिष्टो धर्म्मराजेन धीमतेति सम्यक् । † फलन्तीति साधु । ‡ दुरात्मानं दुरात्मानो वा साधु । § शयनासनहर्त्ता च वह्निदायीति कृते तु सम्यक् स्यात् । अन्यथा शयनासनहर्त्तारमिति द्वितीयान्तपदमनन्वयं तिष्ठेत् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वैतरण्यामयञ्चैव क्षिप्यतामचिरं पुनः ॥ ८ ।
पापकर्म्मायमत्यर्थं सर्व्वतीर्थविनाशकः ।
तस्य प्रदीप्तः कीलोऽयं वह्नितप्तोऽतिदुस्सहः ॥ ९ ।
आदेश्य उभयोरस्य* कर्णयोः† कूटसाक्षिणः ।
यो नरः पिशुनः कूटसाक्षी चालीकजल्पकः ॥ १० ।
ग्रामयाजनकं विप्रमभुवं दाम्भिकं शठम् ।
बद्ध्वा तु बन्धने घोरे दीयतान्तु न किञ्चन ॥ ११ ।
जिह्वाऽस्य छिद्यतां शीघ्रं वाचा दुष्टस्य पापिनः ।
गम्यागम्यं पुरा येन विज्ञातं न दुरात्मना ॥ १२ ।
कृतं लोभाभिभूतेन कामसम्मोहितेन च ।
तस्य छित्वा ततो लिङ्गं क्षारमग्निञ्च दीपय ॥ १३ ।
इमन्तु खलकङ्कत्वा दुरात्मा‡ पापकारिणम् ।
दायादा बहवो येन अर्थहेतोर्विनाशिताः ॥ १४ ।
इमं वार्द्धुषिकं विप्रं सर्व्वत्राङ्गेषु छेदय ।
तथायं यातनां यातु पापम्बहु समाचरन् ॥ १५ ।
सुवर्णस्तेयिनं पापङ्कृतघ्नञ्च तथा नरम् ।
क्रूरं पितृहणञ्चैनं ब्रह्मघ्नेषु समीकुरु ॥ १६ ।
अस्थि छित्वा ततः क्षिप्रं क्षारमग्निञ्च दापय ।

---

* आदेश्यसुभयोरिति बहुषु पाठः, सच आर्षः कीलशब्दस्य पुंस्त्वादादेश्यमित्यस्यापि पुंस्त्वमुचितम् । † कर्णयोरित्यत्र कर्म्मणोरिति क्वचित् पाठः सचासंगत एव । ‡ दुरात्मानमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इमन्तु विप्रच्छादन्तु तीक्ष्णदंष्ट्राः सुदारुणाः ॥ १७ ।
पिशुनं हि महाव्याघ्राः पञ्च घोराः सुदारुणाः ।
इमं पचत पाकेषु बहुधा मर्म्मभेदिनम् ॥ १८ ।
येनाग्निरुज्झितः पूर्व्वं गृहीत्वा च न पूजितः ।
इमं पापसमाचारं वीरघ्नमतिपापिनम् ॥ १९ ।
कर्कटस्य तु घोरस्य नित्यक्रुद्धस्य प्रापय ।
इमङ्घोरे ह्रदे चिप्रं सर्व्वयाजनयाजकम् ॥ २० ।
सर्व्वेषान्तु पशूनां यो नित्यं धारयते जलम् ।
न त्राता न च दाता च पापस्यास्य दुरात्मनः ॥ २१ ।
अदानव्रतिनो विप्राः वेदविक्रयिणस्तथा ।
सर्व्वकर्म्माणि कुर्य्युर्यें दीयते न च किञ्चन ॥ २२ ।
तोयभाजनहर्त्तारं भोजनं योऽनिवारयन् ।
हन्यतां सुदृढैर्दण्डैर्यमदूतैर्महाबलैः ॥ २३ ।
वेणुदण्डकशाभिश्च* लोहदण्डैस्तथैव च ।
जलमस्मै न दातव्यं भोजनञ्च कथञ्चन ॥ २४ ।
तस्मा अन्नञ्च† पानञ्च न दातव्यं कदाचन ।
हतविश्वास्यहन्तारं वह्नौ शीघ्रम्प्रपाचय ॥ २५ ।
ब्रह्मदेयं हृतं येन तं वै शीघ्रं विपाचय ।
बहुवर्षसहस्राणि पातयेः कर्म्मविस्तरे ॥ २६ ।
समुत्तीर्णन्ततः पश्चात्तिर्य्यग्योनौ प्रपातयेः ।

---

* कषाभिश्चेति (ग) । † तस्मादन्नञ्चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सूक्ष्मदेहत्रिपाकेषु कीटपक्षिविजातिषु ॥ २७ ।
क्लिष्टो जातिसहस्रेषु जायते मानुषस्ततः ।
तत्र जातो दुरात्मा च कुलेषु विविधेषु च ॥ २८ ।
हिंसारूपेण घोरेण ब्रह्मबध्यां प्रदापयेत् ।
राजप्रमारकञ्चोरं ब्रह्मघ्नं दुष्कृतं तथा ॥ २९ ।
सुवर्णस्तेयिनञ्चैव सुरापञ्चैव कारयेत् ।
अनुभूय ततः काले ततो यक्ष्म प्रयोजयेत् ॥ ३० ।
गोघातको ह्ययम्पापः कूटशाल्मलिमारुहेत् ।
क्रथते विविधैर्घोरै राक्षसैर्घोरदर्शनैः ॥ ३१ ।
पूतिपाकेषु पच्येत जन्तुभिः सम्प्रयोजितः ।
ब्रह्मवध्याचतुर्भागैर्मृगपशुत्वमागतः ॥ ३२ ।
उद्विग्नवासं पतितं यत्र यत्रोपपद्यते ।
पापकर्मसमुद्विग्नो जातो जातः पुनः पुनः ॥ ३३ ।
अयं तिष्ठति किं पापः पितृघाती दुरात्मवान् ।
ते तु वर्षशतं साग्रं भक्षयन्तु विचेतसः ॥ ३४ ।
ततः पाकेषु घोरेषु पच्यताञ्च नराधमः* ।
ततो मानुषतां प्राप्य गर्भस्थो म्रियतां पुनः ॥ ३५ ।
व्यापन्नो दशगर्भेषु ततः पश्चाद्विमुच्यताम् ।
तत्रापि लब्ध्वा मानुष्यं क्लेशभागी च जायताम् ॥ ३६ ।

---

* पच्य तावन्नराधम इति (ग), अत्र पच्येति आर्षं, पक्त्वा पाचयित्वा वा साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

बुभुक्षारुग्विकारैश्च सततं तत्र पीड्यताम् ।
पापाचारमिमङ्घोरं मित्रविश्वासघातकम् ॥ ३७ ।
यन्त्रेण पीड्यतां क्षिप्रं ततः पश्चाद्विमुच्यताम् ।
दीप्यतां ज्वलने घोरे वर्षाणाञ्च शतद्वयम् ॥ ३८ ।
जायताञ्च ततः पश्चाच्छुनां योनौ दुरात्मवान् ।
भ्रष्टोऽपि जायतां तस्मान्मानुषः क्लेशभाजनः ।
प्राप्तवान्विविधान्रोगान् संसारे चैव दारुणान् ॥ ३९ ।
ब्रह्मस्वहारी पापोऽयं नरो लवणहारी च ।
वर्षाणान्तु शतं पञ्च तत्र क्लिष्टो दुरात्मवान् ।
क्रमिको जायते पश्चाद्विष्ठायाङ्क्रमिकोऽपरः ।
शकुन्तो जायते घोरस्तत्र पश्चाद्वको भवेत्* ॥ ४०।४१ ।
द्रुममग्निप्रदङ्घोरङ्काष्ठाग्नौ सम्प्रतापय ॥ ४२ ।
स्वकर्म्मसु विहीनेषु पश्चाल्लब्धगतिस्तथा ।
ततश्चाथ मृगो वापि ततो मानुषतां व्रजेत् ॥ ४३ ।
तत्रापि दारुणं दुःखमुपभुङ्क्ते दुरात्मवान् ।
सर्व्वदुष्कृतकार्य्येषु सह सङ्घातचिन्तकैः ॥ ४४ ।
एवङ्कर्म्मसमायुक्तास्ते भवन्तु सहस्रशः ।
परद्रव्यापहाराश्च रौरवे पतितास्तथा ॥ ४५ ।
कुम्भीपाकेषु निर्दग्धः पश्चाद्गर्द्दभताङ्गतः ।
ततो जातस्त्वसौ पापः शूकरो मलभुक्तथा ॥ ४६ ।

---

* वकीभवेदिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राप्नोतु विविधांस्तापान्यथा हृतधनश्च सन् ।
क्षुधातृष्णापराक्रान्तो गर्द्दभो दशजन्मसु ॥ ४७ ।
मानुष्यं समनुप्राप्य चौरो भवति पापकृत् ।
परोपघाती निर्लज्जः सर्व्वदोषसमन्वितः ॥ ४८ ।
वृक्षशाखावलम्बोऽत्र* अधःशीर्षः प्रजायते ।
अग्निना पच्यतां पश्चाल्लुब्धो वै पुरुषाधमः ॥ ४९ ।
ततो वर्षशते पूर्णे मुच्यते स पुनः पुनः ।
अजितात्मा तथा पापः पिशुनश्च दुरात्मवान् ॥ ५० ।
पूर्व्वैश्च शूकरो भूत्वा नकुलो जायते पुनः ।
विमुक्तश्च ततः पश्चान्मानुष्यं लभते चिरात् ॥ ५१ ।
धिक्कृतः सर्व्वलोकेन कूटसाक्ष्यनृतव्रतः ।
न शर्म्म लभते क्वापि कर्म्मणा स्वेन गर्हितः ॥ ५२ ।
इमं ह्यानृतिकं दुष्टं चित्रहारकमेव च ।
स्वकर्म्म दुष्कृतं यावत्तावद्दुःखं भुनक्त्यसौ ॥ ५३ ।
कर्म्मण्येकैकशश्चायं स तु तिष्ठत्वयं पुनः ।
वर्षलक्षं न सन्देहस्ततस्तिष्ठत्वयं पुनः ॥ ५४ ।
ततो जातीः स्मरेत्सर्व्वास्तिर्य्यग्योनिसमाश्रितः ।
जायतां मानुषः पश्चात्क्षुधया परिपीड़ितः ॥ ५५ ।
सर्व्वकामविमुक्तस्तु सर्व्वदोषसमन्वितः ।
क्वचिज्जात्यां भवेदन्धः क्वचिद्बधिर एव च ॥ ५६ ।

* अथ इति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्वचिन्मूकश्च काणश्च क्वचिद्व्याधिसमन्वितः।
एवं हि प्राप्नुयाद्दुःखं न च सौख्यमवाप्नुयात् ॥ ५७ ॥
जात्यन्तरसहस्राणि प्रयुतान्यर्व्वुदानि च।
शान्तिं न लभते चैव भूमि क्षेत्रहरो* नरः ॥ ५८ ॥
तीव्रैरन्तर्गतैर्दुःखैर्भूमिहर्त्ता नराधमः।
इमं बन्धैर्दृढैर्बद्ध्वा विपाचय तथाचिरम्† ॥ ५९ ॥
प्रबद्धः सुचिरङ्कालं मम लोकगतो नरः।
जायतां स चिरम्पापो मार्ज्जारस्तेन कर्म्मणा ॥ ६० ॥
तीव्रक्षुधापरिक्लिष्टो बद्धो बन्धनयन्त्रितः।
दुःखान्यनुभवंस्तत्र पापकर्म्मा नराधमः ॥ ६१ ॥
सप्तधा सप्त चैकाञ्च जातिङ्गत्वा स पच्यते।
इमं शाकुनिकम्पापं श्वभिर्गृध्रैश्च घातय ॥ ६२ ॥
ततः कुक्कुटतां यातु विड्भक्षश्च दुरात्मवान्।
दंशश्च मशकश्चैव ततः पश्चाद्भवेत्तु सः ॥ ६३ ॥
जातिकर्म्मसहस्रन्तु ततो मानुषतां व्रजेत्।
इमं सौकरिकं पापं महिषा घातयन्तु तम्।
वर्षाणाञ्च सहस्रन्तु धावमानन्ततस्ततः।
विभिन्नञ्च प्रभिन्नञ्च शृङ्गाभ्यां पद्भिरेव च‡ ॥ ६४।६५ ॥

---

* भूमिः क्षेत्रहर इति बहुषु पाठः। † तमाचिरमिति (ग)। ‡ इमं सौकरिकं पापं महिषाघातसंयुता। वर्षाणाञ्च सहस्रन्तु धावमानस्ततस्ततः। विभिन्नश्च प्रभिन्नश्चेत्येवं प्रायः सार्व्वत्रिकः पाठः, सचासङ्गतः सविशेषणपापमिति कर्म्मपदस्यानन्वितत्वात्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तस्माद्देशात्ततो मुक्तस्ततः शूकरतां व्रजेत् ।
महिषः कुक्कुटश्चैव शशो जम्बूक एव च ॥ ६६ ।
यां यां याति पुनर्जातिं तत्र भक्ष्यो भवेत्तु सः ।
कर्म्मक्षयोऽन्यथा नास्ति मया पूर्व्वं विनिर्म्मितम् ॥ ६७ ।
प्राप्य मानुषतां पश्चात्पुनर्व्याधो भविष्यति ।
अन्यथा निष्कृतिर्नास्ति जातिजन्मशतैरपि ॥ ६८ ।
उच्छिष्टान्नप्रदातारं पापाचारमधार्म्मिकम्* ।
अङ्गारैः पच्यताञ्चैनं† त्रीणि वर्षशतानि च ॥ ६९ ।
भिन्नचारित्रदुःशीला भर्त्तुर्व्यलीककारिणी ।
आयसान्पुरुषान् सप्त आलिङ्गतु समन्ततः ॥ ७० ।
ततः शुनी भवेत्पश्चात्सूकरी च ततः परम् ।
कर्म्मक्षये ततः पश्चान्मानुषी दुःखिता भवेत् ।
न च सौख्यमवाप्नोति तेन दुःखेन दुःखिता ॥ ७१ ।
अनेन भृत्या बहवः श्रान्ताः शान्ताः प्रवाहिताः ।
भक्ष्यं भोज्यञ्च पानञ्च न तेषामुपपादितम् ।
अनुमोदे प्रजा दृष्ट्वा लिप्समानो दुरात्मवान् ॥ ७२ ।
एवं कुरुत भद्रं वो मम पार्श्वे तु दुर्म्मतिः ।
रौरवे नरके घोरे सर्व्वदोषसमन्विते ।
सर्व्वकर्म्माणि कुर्व्वाणं क्षपयध्वं दुरासदम् ।

---

* विनिर्म्मितमिति (क), (ख), विनिर्म्मितामिति (ग) । † पचतामित्यात्मनेपदमार्षं पचन्त्विति साधु । पच्यतामिति (ग), तदपि आर्षं कर्म्मणोऽनुक्तत्वात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

वर्षाणान्तु सहस्राणि तैस्तैः कर्म्मभिरावृतम् ॥ ७३।७४ ।
प्रक्षिप्यतामयं पश्चाद्दस्युजातौ दुरात्मवान् ।
जायतामुरगः पश्चात्ततः कर्म्म समाश्रयेत् ॥ ७५ ।
ततः पश्चाद्भवेत्पापश्चेतरः* सर्व्वपापकृत् ।
शूकरस्तु भवेत्पश्चान्मेषश्च जायते पुनः ।
हस्त्यश्वश्च शृगालश्च शूकरो वक एव च ॥ ७६ ।
ततो जातस्तु सर्व्वेषु संसारेषु पुनः पुनः ।
वर्षाणामयुतं साग्रं ततो मानुषतां व्रजेत् ॥ ७७ ।
पञ्चगर्भेषु सापत्सु पञ्च जातौ म्रियेत सः ।
अपोगण्डो म्रियेत्पश्चा† कर्म्मशेषक्षये तु सः ।
ततो मानुषतां याति एष कर्म्मविनिर्णयः‡ ॥ ७८ ।
पापस्य सुकृतस्याथ प्रजानां विनिपातने ।
भूतानाञ्चाप्यसम्मानं दुष्प्रहारश्च सर्व्वशः ।
अतः स्वयम्भुवा पूर्व्वं कर्म्मपाको यथार्थवन् ॥ ७९ ।

इति वराहपुराणे संसारचक्रे कर्म्मपाको नाम

द्व्यधिकद्विशततमोऽध्यायः ।

---

* श्वानर इति (ग) । † म्रियेतेति साधु । ‡ एककर्म्मविनिर्णय इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्र्यधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

अन्यानपि तथा पापांश्चित्रगुप्तो दिदेश ह ।
व्यामिश्रान् कथ्यमानांश्च शृणुध्वं तान्महौजसः ॥ १ ।
शीलसंयमहीनानां कृष्णपद्मानुगामिनाम् ।
महापापैरुपेतानाङ्कथ्यतां तत्पराभवम् ॥ २ ।
राजद्विष्टा गुरुद्विष्टाः सर्व्वे ते वै विगर्हिताः* ।
अविश्वास्या ह्यसम्भाष्याः कुच्चिमात्रपरायणाः ॥ ३ ।
हिंसाविहारिणः क्रूराः सूचकाः कार्य्यदूषकाः ।
गवेडकस्य वधका महिषाणामजांन† तथा ॥ ४ ।
दावाग्निं ये च मुञ्चन्ति ये च सौकरिकास्तथा ।
तत्र कालमसंख्येयं पच्यन्ते पापकारिणः ॥ ५ ।
कर्म्मक्षयाद्यदा भूयो मानुष्यं प्राप्नुवन्ति ते ।
अल्पायुषो भवन्तीह व्याधिग्रस्ताश्च नित्यशः ॥ ६ ।
गर्भ एव विपद्यन्ते म्रियन्ते बालकास्तथा ।
परिरिङ्गरताः केचिन्म्रियन्ते पुरुषाधमाः ॥ ७ ।
काष्ठवंशे च शस्त्रे च वायुना ज्वलनेन च ।
तोयेन वा पाशबन्धैः पतनेन विषेण वा ॥ ८ ।

---

* सर्व्वे ते वै हि गर्हिता इति (क), (ख), । † अजानामिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मातापितृवधक्लिष्टं मित्रसम्बन्धिबन्धजम्।
बहुशः प्राप्नुवन्त्येते विद्रवञ्चाप्यभीक्ष्णशः॥ ९।
प्राणातिपातनन्ते वै प्राप्नुवन्ति यथा तथा।
लोहका कारुकाश्चैव गर्भाणां विनिहिंसकाः॥ १०।
मूलकर्म्मकरा ये च गरदाः पुरदाहकाः।
ये च पञ्जरकर्त्तारो ये च शूलोपघातकाः॥ ११।
पिशुनाः कलहाश्चैव ये च मिथ्याविदूषकाः।
गोकुञ्जरखरोष्ट्राणां चर्म्मका मांसभेदकाः॥ १२।
उद्वेजनकराश्चण्डाः पच्यन्ते नरकेषु ते।
तत्र कालन्तु सम्प्राप्य यातनाश्च सुदुःसहाः॥ १३।
कर्म्मक्षयी यदा भूयो मानुष्यम्प्राप्नुवन्ति ते।
हीनाङ्गाः सुदरिद्राश्च भवन्ति पुरुषाधमाः॥ १४।
श्रवणच्छेदनञ्चैव नासाच्छेदनमेव च।
छेदनं हस्तपादानां* प्राप्नुवन्ति स्वकर्म्मणा॥ १५।
शारीरं मानसं दुःखं प्राप्नुवन्ति पुनः पुनः।
गलवेदनास्तथोग्राश्च† तथा मस्तकवेदनाः॥ १६।
कुक्ष्यामयं तथा तीव्रं प्राप्नुवन्ति नराधमाः।
जड़ान्धबधिरा मूकाः पङ्गवः पादसर्पिणः॥ १७।
एकपक्षहताः काणाः कुनखाश्चामयाविनः।
कुब्जाः खञ्जास्तथा हीना विकलाश्च घटोदराः॥ १८।

---

* हस्तपादस्येति साधु। † अत्रैकाक्षराधिक्याच्छन्दोदोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गलत्कुष्ठाः श्वित्रकुष्ठा भवन्ति स्वैश्च कर्म्मभिः ।
वाताण्डाश्चाण्डहीनाश्च प्रमेहमधुमेहिनः ॥ १९ ॥
योनिशूलाक्षिशूलाश्च श्वासहृद्गुह्यशूलिनः ।
पिण्डकावर्त्तभेदैश्च प्लीहगुल्मादिरोगिणः ॥ २० ॥
बहुभिर्दारुणैर्घोरैर्व्याधिभिः समनुद्रुताः ।
इत्येतान्हिंसकान् क्रूरान् घातयन्तु सुदारुणान् ।
मिथ्याप्रलापिनो दूतान् पाचयन्तु यथाक्रमम् ॥ २१ ॥
कर्कशाः पुरुषाः सत्या ये च योषा निरर्थकाः ।
एषां चतुर्विधा भाषा या मिथ्याप्यभिधीयते ॥ २२ ॥
हास्यरूपेण या भाषा चित्ररूपेण वा पुनः ।
अरहस्यं रहस्यं वा पैशुन्येन तु निन्दनात् ।
उद्वेगजनना वापि कटुका लोकगर्हिताः ॥ २३ ॥
स्नेहक्षयकरां रूक्षां भिन्नवृत्तविभूषिताम् ।
कदलीगर्भनिःसारां मर्म्मस्पृक्कटुकाक्षराम् ।
स्वरहीनामसंख्येयां भाषन्ति* च निरर्थकाम् ॥ २४ ॥
अयन्त्रितमुखा ये च ये निबद्धाः प्रलापिनः ।
दूषयन्ति हि जल्पन्तोऽनृजवो निष्ठुराः शठाः ।
निन्दया गतलज्जाश्च मूर्खा मर्म्मविभेदिनः ॥ २५ ॥
न मर्षयन्ति येऽन्येषां कीर्त्यमानाञ्छुभान् गुणान् ।
दुर्वाचः परुषांश्चण्डान्बध्नयध्वं नराधमान् ॥ २६ ॥

---

* भाषन्ते इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततस्तिर्य्यक् प्रजायन्ते बहुधा कीटपक्षिणः।
लोके दोषकराश्चैव लोकद्विष्टास्तथापरे॥ २७।
तत्र कालं चिरङ्घोरं पच्यन्ते पापकारिणः।
कर्म्मक्षयो यदा भूयो मानुष्यम्प्राप्नुवन्ति ते॥ २८।
परिभूता अविज्ञाना नष्टचित्ता अकीर्त्तयः।
अनर्चाश्चाप्यनर्हाश्च* स्वपचे ह्यवमानिताः॥॥ २९।
त्यक्ता मित्राणि मित्रेषु ज्ञातिभिश्च निराकृताः।
लोकदोषकराश्चैव लोकद्वेष्याश्च ये नराः॥ ३०।
अन्यैरपि कृतं पापं तेषां पतति मस्तके।
वज्रं शस्त्रं विषं वापि देहाद्देहनिपातनम्॥ ३१।
मिथ्याप्रलापिनामेषामुक्ता क्लेशपरम्परा।
स्तेयहारम्प्रहारञ्च नीतिहारं तथैव च॥ ३२।
स्तेयकर्म्माणि कुर्व्वन्ति प्रसह्य हरणानि च।
करचण्डाशिनो ये च राजशब्दोपजीविनः॥ ३३।
पीड़यन्ति जनान् सर्व्वान् कृपणान् ग्रामकूटकान्।
सुवर्णमणिमुक्तानां कूटकर्म्मानुकारकाः॥ ३४।
समये कृतहर्त्तारो लोकपीड़ाकरा नराः।
अनादिबुद्धयश्चान्ये अर्थातिशयकारिणः॥ ३५।
भूतनिष्ठाभियोगज्ञा व्यवहारेष्वनर्थकाः।
भेदकाराश्च धातूनां रजतस्य च कारकाः॥ ३६।

---

* अह्नीनाश्चेति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न्यासार्थहारका ये च सम्मोहनकराश्च ये ।
ये तथोपाधिकाः क्षुद्राः पच्यन्ते तेषु तेष्वथ ॥ ३७ ।
निरयेष्वप्रतिष्ठेषु दारुणेषु ततस्ततः ।
तत्र कालन्तु सुचिरं पच्यन्तां पापकारिणः ॥ ३८ ।
कर्म्मक्षयो यदा तेषां मानुष्यं प्राप्नुवन्ति ते ।
तत्र तत्रोपपद्यन्ते यत्र यत्र महद्भयम् ॥ ३९ ।
यस्मिंश्चौरभयं देशे क्षुद्भयं राजतो भयम् ।
आपद्गतोऽपि भयं यत्र व्याधिमृत्युभयं तथा ॥ ४० ।
ईतयो यत्र देशेषु लुब्धेषु नगरेषु च ।
क्षयाः कालोपसर्गा वा जायन्ते तत्र ते नराः ॥ ४१ ।
बहुदुःखपरिक्लिष्टा गर्भवासेन पीड़िताः ।
एकहस्ता द्विहस्ता वा कूटाश्च विकृतोदराः ॥ ४२ ।
शिराविवृतगात्राश्च हीनाङ्गा वातरोगिणः ।
अश्रुपातितनेत्राश्च भार्य्यां न प्राप्नुवन्ति ते ॥ ४३ ।
तेषामपत्यं न भवेत्तद्रूपञ्च सुलक्षणम् ।
अतिक्रूरं विवर्णञ्च विकृतं भ्रान्तलोचनम् ॥ ४४ ।
संसारे च यथा पक्वं कृपणं भैरवस्वनम् ।
महतः परिवारस्य तुष्टश्चोच्छिष्टभोजकः ॥ ४५ ।
रूपतो गुणतो हीनो बलतः शीलतस्तथा ।
राजभृत्या भवन्त्येते पृथिवीपरिचारकाः ॥ ४६ ।
अनालया निरामर्षा वेदनाभिः सुसंवृताः ।
समकार्य्यसजात्यानां मित्रसम्बन्धिनां तथा ॥ ४७ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कर्म्मान्तकारका* ह्येते तृणभूता भवन्ति ते।
अनर्थो राजदण्डो वा नित्यमुत्पाद्यते वधः॥ ४८।
कर्म्मकल्याणकृच्छ्रेषु भृशञ्चापि विमुह्यति।
कर्षकाः पशुपालाश्च वाणिज्यस्योपजीवकाः॥ ४९।
यद्यत्कुर्व्वन्ति ते कर्म्म सर्व्वत्र क्षयभागिनः।
सत्यमन्विष्यमाणापि† नैव ते कीर्त्तिभागिनः॥ ५०।
यत्किञ्चिदशुभङ्कर्म्म‡ तस्मिन्देशे समुच्छ्रितम्।
तस्य देशस्य नैवास्ति वर्ज्जयित्वातुरान्नरान्॥ ५१।
सुवृष्ट्यामपि तेषां वै क्षेत्रन्तन्तु विवर्ज्जयेत्§।
अशनिर्वा पतेत्तत्र क्षेत्रं वापि विनश्यति॥ ५२।
न सुखं नापि निर्वाणं तेषां मानुषता भवेत्।
उत्पद्यते नृशंसानां तीव्रः क्लेशः सुदारुणः॥ ५३।
स्तेयकर्म्मप्रयुक्तानां मुक्त्वा क्लेशपरम्पराम्।
परदाराप्रसक्तानामिमां शृणुत यातनाम्॥ ५४।
तिर्य्यङ्मानुषदेहेषु यान्ति विच्छिन्नमानसाः।
विहरन्ति ह्यधर्म्मेषु धर्म्मचारित्रदूषकाः॥ ५५।
तांस्तेनैव प्रदानेन संग्रहे तु ग्रहेण वा।
मूलकर्म्मप्रयोगेण राष्ट्रस्यातिक्रमेण वा॥ ५६।

---

* कर्म्मान्तकालया इति (क), (ख)। † अन्विष्यमाणा अपीति साधु। ‡ सत्यमन्विष्यमाणोऽपीति (ग)। § तन्तु विवर्ज्जयेदिति सार्व्वत्रिकः पाठः, तत्तु विवर्ज्जयेदिति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रसह्य वा प्रकृत्या वै ये चरन्ति कुलाङ्गनाः ।
वर्णसङ्करकर्त्तारः कुलधर्म्मादिदूषकाः ॥ ५७ ।
शीलशौचादिसम्पन्नं ये जनं धर्म्मलक्षणम् ।
धर्षयन्ति च ये पापाः श्रूयतां तत्पराभवः ॥ ५८ ।
निरयम्पापभूयिष्ठा अनुभूय महाभयम् ।
बहुवर्षसहस्राणि कर्म्मणा तेन दुष्कृताः ॥ ५९ ।
कर्म्मक्षये यदा भूयो मानुष्यं यान्ति दारुणम् ।
सङ्कीर्णयोनिजाः क्षुद्रा भवन्ति पुरुषाधमाः ॥ ६० ।
वेश्यालङ्घककूटानां शौण्डिकानां तथैव च ।
दुष्टपाषण्डनारीणां नैकमैथुनगामिनाम् ॥ ६१ ।
निर्लज्जाः पण्ड्रकाः केचिद्धङ्पौरुषगण्डकाः ।
स्त्रीबन्धकाः स्त्रीविनाशाः स्त्रीवेषाः स्त्रीविहारिणः ॥ ६२ ।
स्त्रीणाञ्चानुप्रवृद्धा ये स्त्रीभोगपरिभोगिनः ।
तद्दैवतास्तन्नियमास्तद्वेषास्तत्प्रभाषिताः ॥ ६३ ।
तद्भावास्तत्कथालापास्तद्भोगाः परिभोगिनः ।
विप्रलोभञ्च दानेषु प्राप्नुवन्ति नराधमाः ॥ ६४ ।
सौभाग्यपरमासक्ता नरा वीभत्सदर्शनाः ।
अबुद्धैः सह संवासं प्रियञ्चाविप्रियं तथा ॥ ६५ ।
शारीरं मानसं दुःखम्प्राप्नुवन्ति नराधमाः ।
कृमिभिर्भक्षणञ्चैव तप्ततैलोपसेचनम्* ।

* तैलोपसेवनमिति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अग्निज्वारनदीभ्यान्तु प्राप्नुवन्ति न संशयः ॥ ६६ ।
परदारप्रसक्तानां भयं भवति निग्रहः ।
सर्व्वञ्च निखिलङ्कार्य्यं यन्मया समुदाहृतम् ॥ ६७ ।

इति वराहपुराणे पापसमूहानुक्रमी नाम

त्र्यधिकद्विशततमोऽध्यायः ।

चतुरधिकद्विशततमोऽध्यायः ।

ऋषिरुवाच ।

इदञ्चैवापरं तस्य वदतो हि मया श्रुतम् ।
चित्रगुप्तस्य विप्रेन्द्रा वचनं लोकशासिनः ॥ १ ।
दूरेऽसाविति किङ्कार्य्यं न चयोऽस्त्यस्य कर्म्मणः ।
किङ्करूपां कुरुते तस्मिन्गृहाण जहि मा व्यथः ॥ २ ।
व्रीड़ितः किम्भवान् ज्ञातं किं तिष्ठसि पराङ्मुखः ।
किं न गच्छसि वेगेन किं त्वया सुचिरङ्कृतम् ॥ ३ ।
गच्छ गच्छ पुनस्तत्र शीघ्रञ्चैनमिहानय ।
अशक्तोऽस्मीति किं रोषमर्हन्ते दर्पमीदृशम् ॥ ४ ।
किं त्वं वदसि दुर्बुद्धे विवाहस्तस्य वर्त्तते ।
ऊर्द्ध्वरेतास्तपस्वीति त्वं मां भाषयसे कथम् ॥ ५ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किं त्वं वदसि गर्ह्यञ्च* मुहूर्त्तं परिपालय ।
रमते कान्तया सार्द्धमिति किं त्वं प्रभाषसे ॥ ६ ।
पतिव्रतेति साध्वीति रहस्यं भाषसे पुनः ।
किञ्चिं वदसि बालो हि निशि चैवागतो गृहम् ॥ ७ ।
आनीयते कथं ज्ञात्वा भोक्तुकामं कथं हरे ।
जलशायिनङ्कथञ्चैव† दातुकामङ्कथं हरे‡ ॥ ८ ।
धार्म्मिका यूयमेवात्र अहमेको नृशंसवत् ।
यात यात तथा दृष्ट्वा यथाकालो नातिक्रमेत्§ ॥ ९ ।
शीघ्रं त्वं भव सर्पो हि व्याघ्रस्त्वञ्च सरीसृपः ।
जलेग्राहो भव त्वं हि त्वङ्कमिस्त्वं सरीसृपः ॥ १० ।
नरकानुगतस्त्वं हि व्याधिभूतः समाश्रयः ।
अतीसारो भव त्वं हि त्वं छर्दिस्त्वं पुनर्भवः ॥ ११ ।
कर्णरोगो विसूची च नित्यरोगश्च सम्भव ।
ज्वरो भव महाघोरो जलेग्राहो दुरासदः ॥ १२ ।
वातव्याधिस्तथा घोरस्तथैव त्वं जलोदरः ।
उन्मादोऽपस्मारश्चैव¶ वातरोगस्तथैव च ॥ १३ ।
विभ्रमस्त्वं भवेच्छीघ्रं विष्टम्भश्च पुनर्भव ।
व्याधिर्भव महाघोरो ह्ययं तृष्णान्तु विन्दतु‖ ॥ १४ ।

---

* गर्ज्जन् वै इति (ग) । † अत्रैकाक्षराधिक्याच्छन्दोदोषः । ‡ बहुषूभयत्रापि हरेरिति षष्ठ्यन्तः पाठः । § नातिक्रमेदित्यत्र छन्दोदोषः । नतिक्रमेदिति कृते तु आर्षप्रयोगो भवेत् । ¶ अत्रापि छन्दोदोषः । ‖ विन्दतीति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथाकालं यथादृष्टं तावत्कालोऽत्र तिष्ठतु* ।
कालं संहरणे वापि शुभस्यागमनेऽपि वा ॥ १५ ।
भवन्तः कृतकर्म्माणस्ततो मोक्षमवाप्स्यथ।
द्रुतं द्रवत वेगेन सर्व्वे गच्छत मा चिरम् ॥ १६ ।
वराज्ञा धर्म्मराजस्य या मया समुदाहृता ।
एकाहं क्षपयेस्तत्र द्विरात्रं तत्र मा चिरम् ॥ १७ ।
त्रिरात्रं चतुरात्रं वै षड्रात्रं दशरात्रकम् ।
पक्षं वा मासमेकं वा बहून्मासांस्तथापि वा ॥ १८ ।
क्षपयित्वा यथाकालं ततो मोक्षमवाप्स्यथ ।
भूतात्मा मूढ़वांस्तत्र करुणः कष्टमेव च ॥ १९ ।
यस्मिन्यस्मिंस्तु कालेऽहं यावतश्च श्रयाम्यहम् ।
तस्मिंस्तस्मिन्महाकालं यूयं तत्कर्त्तुमर्हथ ॥ २० ।
विनियोगा मया सृक्ता† यथापूर्व्वं यथाश्रुतम् ।
जाग्रतं वा प्रमत्तं वा यथा कालो न सम्मतेत् ॥ २१ ।
यत्नात्तथा तु कर्त्तव्यं भवद्भिर्मम शासनात् ।
अभयञ्चात्र यच्छामि ब्राह्मणेभ्यो न संशयः ॥ २२ ।
तस्माद्यात ऋषिभ्यश्च स्त्रीभ्यश्चैव महाबलाः ।
यातनाया न भेतव्यमहमाज्ञापयामि वः ॥ २३ ।
यथावाच्यञ्च कुरुत यथा कालो न गच्छति ।
यथाकामं प्रकुरुत यच्च दृष्टं यथा तथा ॥ २४ ।

---

* तिष्ठतीति (ख)। † युक्ता इति (ख,) (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मयाज्ञप्ता विशेषेण मृत्युना सह सङ्गतः ।
यथावीरो महातेजाश्चित्रगुप्तो महायशाः ॥ २५ ।
यथाब्रवीत्स्वयं रुद्रो यथा शक्रः शचीपतिः ।
यथाज्ञापयते ब्रह्मा चित्रगुप्तस्तथा प्रभुः ॥ २६ ।

इति वराहपुराणे संसारचक्रे दूतप्रेषणं नाम
चतुरधिकद्विशततमोऽध्यायः ।

पञ्चाधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

इदमन्यत्पुरा विप्राः श्रूयतां तस्य भाषितम् ।
यमस्य चित्रगुप्तस्य यच्च तत्र मया श्रुतम् ॥ १ ।
अयन्तु भवतां यातु यातु स्वर्गं महीक्षिताम् ।
अयं वृक्षस्त्वयं तिर्य्यगयं मोक्षं व्रजेन्नरः ॥ २ ।
अयं नागो भवेच्छीघ्रमयन्तु परमाङ्गतिम् ।
स्वपूर्व्वकान् पश्यति* यमात्मनस्तु पितामहान् ॥ ३ ।
क्लिश्यतो रुदतश्चैव वदतश्च पुनः पुनः ।
स्वेन दोषेण सर्व्वे वै अक्षयं नरकङ्गताः ॥ ४ ।

---

* पश्यतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दारत्यागी अधर्म्मिष्ठः पुत्रपौत्रविवर्ज्जितः।
चिप्तं वै रौरवे ह्येनं त्तपयन्तु महौजसः॥ ५।
मुच्यतान्त इमे सर्व्वे अतीतानागतांस्तथा।
मुच्यतामाशु मुच्यन्तां त एते पापवर्ज्जिताः॥ ६।
आगमे च विपत्तौ च सर्व्वधर्म्मानुपालकाः।
ते तु कल्पान् बहून् स्वर्गे उषित्वा ह्यनसूयकाः॥ ७।
बहुसुन्दरनार्य्यङ्के* ह्याद्ये परमधार्म्मिकम्।
कलौ मानुषतां यातु धर्म्मस्येह निदर्शनम्॥ ८।
त्रिपिष्टपे परिक्लेशो वासो ह्यस्याचयो भवेत्।
अयमायोधने शत्रुं हत्वा तु निधनङ्गतः॥ ९।
ब्राह्मणार्थे गवार्थे वा राष्ट्रार्थे निधनङ्गतः।
शक्रस्य ह्यमरावत्यां निवेदयत मा चिरम्॥ १०।
तत्र वैमानिको भूत्वा कल्पमेकं निवत्स्यति।
तथैवायं महाभागो धर्म्मात्मा धर्म्मवत्सलः॥ ११।
बहुदानरतो नित्यं सर्व्वभूतानुकम्पकः।
एनङ्गन्धैश्च माल्यैश्च शीघ्रमेव प्रपूजय॥ १२।
अस्मै पूजा भवेद्देया मया दिष्टा महात्मने।
वीज्यतां चामरैरेष रथमस्मै प्रदीयताम्॥ १३।
प्रेतवासं समुत्सृज्य इतो यातु त्रिविष्टपम्।
इन्द्रस्योर्द्धं भवेच्चैवं देवदेवस्य धीमतः॥ १४।

---

* बहुसुन्दरीणामङ्के इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शङ्खतूर्य्यनिनादैन तत्र वै विजयेन च ।
तत्र वै पूजयित्वा च प्रायशो लभतां सुखम् ॥ १५ ।
अयङ्गच्छतु भद्रञ्च इन्द्रदेशं दुरासदम् ।
अनेन वै कीर्त्तिमता लोकः सर्व्वो ह्यलङ्कृतः ॥ १६ ।
गुणैश्च शतसंख्याकैः शक्र एनं प्रतीक्षते ।
तावत्स्थास्यति धर्म्मात्मा यावच्छक्रस्त्रिपिष्टपे ॥ १७ ।
तावत्स मोदते स्वर्गे यावद्धर्म्मोऽनुमीयते ।
ततश्चुतश्च कालेन मानुष्ये सुखमश्नुते ॥ १८ ।
रत्नवेणुप्रदश्चैव सर्व्वधर्म्मैरलङ्कृतः ।
अश्विनोर्नैयलोकन्तु सर्व्वसौख्यसमन्वितम् ॥ १९ ।
अयं यातु महाभागो देवदेवं सनातनम् ।
अतिसृष्टः पुरा येन यथोक्ताः सुखदोहनाः ॥ २० ।
सर्व्वशक्त्या समेतेन द्विजेभ्य उपपादिताः ।
शुचीनां ब्राह्मणानाञ्च अन्नदानं विशेषतः ॥ २१ ।
तेन कल्पं वसिष्यन्ति* रुद्रकन्या मनोरमाः ।
तत्र कल्पं वसेद्गत्वा रुद्रलोकं न संशयः ॥ २२ ।
तेन दत्तं द्विजातिभ्यो मधुखण्डं पुरःसरम् ।
रसैश्च विविधैर्युक्तं सर्व्वगन्धमनोरमम् ॥ २३ ।
तरुणी क्षीरसम्पन्ना गौः सुवर्णयुता शुभा ।
सवत्सा हेमवासाश्च दत्ताऽनेन महात्मना ॥ २४ ।

* वत्स्यन्तीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अस्य लेख्यं मया दृष्टं तिस्रः कोव्यस्त्रिपिष्टपे ।
स्वर्गात्परिच्युतश्चापि ऋषीणां जायते कुले ॥ २५ ।
सुवर्णस्य प्रदाता च त्रिदशेभ्यो निवेद्यताम् ।
त्रिदशानभ्यनुज्ञाप्य* यातु देवमुमापतिम् ॥ २६ ।
तत्रैष वै महातेजा यथेष्टं काममाप्नुयात् ।
तत्रैवायमपि प्रेतगणभक्तो महातपाः ॥ २७ ।
प्रयातु पितृभिः सार्द्धं तर्पिता येन पूर्व्वजाः ।
दानव्रता दिवं यातु नानालोकनमस्कृताः ॥ २८ ।
अयं भद्रो महाकामं सर्व्वभूतहिते रतः ।
सर्व्वकामैरयं पूज्यः सर्व्वकामप्रदो नरः ॥ २९ ।
क्षितिप्रदो द्विजातिभ्यो ह्ययं यातु त्रिपिष्टपम् ।
तत्रैव तिष्ठतां वीरो ब्रह्मलोके सहानुगः ॥ ३० ।
विविधैः कामभोगैस्तु सेव्यमानो नरोत्तमः ।
अक्षय्यं चाजरं स्थानं पूज्यमानो महर्षिभिः ॥ ३१ ।

इति वराहपुराणे भगवच्छास्त्रे संसारचक्रे शुभाशुभफलानुकीर्त्तनं नाम पञ्चाधिकद्विशततमोऽध्यायः ।

---

* अभ्यनुज्ञात इति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

षड़धिकद्विशततमोऽध्यायः।

ऋषिरुवाच।

चित्रगुप्तस्य सन्देशो वदतो यो मया श्रुतः।
श्रूयतां वै महाभागास्तपःसिद्धा द्विजोत्तमाः॥ १।
इमं सर्व्वातिथिं दान्तं सर्व्वभूतानुकम्पकम्।
समान्नदानदातारं शेषभोजनभोजिनम्॥ २।
मुञ्च मुञ्च महाभृत्य एष धर्म्मस्य निर्णयः।
अहङ्कालेन सार्द्धं हि मृत्युना प्रकृतस्तथा॥ ३।
मम स्थास्यन्ति पार्श्वेषु पापा वै विकृतास्तथा।
एनङ्गास्यन्ति गन्धर्व्वा गगनेऽप्सरसस्तथा॥ ४।
दीयतामासनं दिव्यं तथान्यद्यानमेव च।
अन्यान्यान् कामयेत्कामान्मनसा यानि चेच्छति॥ ५।
तत्तु* शीघ्रं प्रदातव्यं धर्म्मराजस्य शासनात्।
अक्रियाणि तु दानानि पूर्व्वं दत्तानि धीमता॥ ६।
प्रेच्यताञ्च महाभागो भोक्तुञ्चैव सहानुगः।
तिष्ठत्वेषोऽत्र वै वीरो ममादेशान्महायशाः॥ ७।
यावत्स्वर्गाद्विमानानि समागच्छन्ति कृत्स्नशः।
ततः स प्रवरैर्यानैः सानुगः सपरिच्छदः॥ ८।
देवानां भवनं यातु दैवतैरभिपूजितः।

---

* तत्तु इति बहुषु पाठः, तत्तु आर्षम्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्रैव रमतां वीरो यावल्लोको हि धार्य्यते ॥ ९ ।
स कृतार्थः सदा लोके यत्रैषोऽभिप्रयास्यति ।
तत्र मेध्यं पवित्रञ्च यत्र स्थास्यत्ययं शुचिः ॥ १० ।
नैककन्याप्रदातारं नैकयज्ञकृतं तथा ।
पूज्यतां* सर्व्वकामैस्तु पदङ्गच्छतु वैष्णवम् ॥ ११ ।
तत्रैष रमतां धीरः सहस्रमयुतं समाः ।
ततो वै मानुषे लोके आढ्ये वै जायतां कुले ॥ १२ ।
भूतानुकम्पको ह्येष क्रियतामस्य चार्च्चनम् ।
वर्षाणामयुतञ्चायं तत्र तिष्ठतु देववत् ॥ १३ ।
जायते तु ततः† पश्चात्सर्व्वमानुषपूजितः ।
उपानहौ च छत्रञ्च जलभाजनमेव च ॥ १४ ।
असकृद्येन दत्तानि तस्मै पूजां प्रयच्छथ ।
सभा यत्र प्रवर्त्तन्ते यस्मिन्देशे सहस्रशः ॥ १५ ।
हस्तेन संस्पृशत्येष मृदुना शीतलेन च ।
विद्याधरस्तथा ह्येष नित्यं मुदितमानसः ॥ १६ ।
महापद्मानि चत्वारि तस्मिंस्तिष्ठन्तु‡ नित्यशः ।
ततश्चुरतश्च कालेन मानुषं लोकमास्थितः ॥ १७ ।
बहुसुन्दरनारीके§ कुले जन्म समाप्नुयात् ।

---

* पूज्यतामिति आर्षं, पूजयन्त्विति साधु ।　† स धीरो जायते इति (ख) । ‡ तस्मिंस्तिष्ठतु नित्यश इति (ग), अस्मिन् पाठे तस्मिन्नित्येकवचनमार्षम् ।　§ बहुसुन्दरिनारीके इति (ग), एवं परत्र बहुसुन्दरिनारीभिरिति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दधि चीरं घृतञ्चैवं येन दत्तं द्विजातिषु ॥ १८ ।
एष वा यातु नः पार्श्वे अस्मै पूजाम्प्रयच्छथ ।
नीयतां नीयतां शीघ्रं यत्र यत्र न चालयेत् ॥ १९ ।
गोरसस्य तु पूर्णानि भाजनानि सहस्रशः ।
यत्र दत्त्वा च पीत्वा च बान्धवेभ्यो विभागशः ॥ २० ।
ततः पश्चादयं यातु यत्र लोकोऽनसूयकः ।
तत्रैव रमतां धीरो बहुवर्षशतान्ययम् ॥ २१ ।
बहुसुन्दरनारीभिः सेव्यमानो महातपाः ।
अमराख्यो भवेत्तत्र गोलोकेषु समाहितः ॥ २२ ।
इदमेवापरञ्चैव चित्रगुप्तस्य भाषितम् ।
सर्व्वदेवमया देव्यः सर्व्ववेदमयास्तथा ॥ २३ ।
अमृतं धारयन्त्यश्च प्रचरन्ति महीतले ।
तीर्थानां परमं तीर्थमतस्तीर्थं न विद्यते ॥ २४ ।
पवित्रञ्च पवित्राणां पुष्टीनां पुष्टिरेव च ।
तस्मात्पुरस्तु दातव्यं गवां वै मेध्यकारणात् ॥ २५ ।
दध्ना हि त्रिदशाः सर्व्वे चीरेण च महेश्वरः ।
घृतेन पावको नित्यं पायसेन पितामहः ॥ २६ ।
सकृद्दत्तेन प्रीयन्ते वर्षाणां हि त्रयोदश ।
तां दत्त्वा चैव पीत्वा च प्रीतो मेध्यस्तु जायते ॥ २७ ।
पञ्चगव्येन पीतेन वाजिमेधफलं लभेत्* ।

* लभेतेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥ २८ ।
दन्तेषु मरुतो देवा जिह्वायान्तु सरस्वती ।
खुरमध्ये तु गन्धर्व्वा खुराग्रेषु तु पन्नगाः ॥ २९ ।
सर्व्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदे सर्व्वनक्षत्राणि लाङ्गुले धर्म्म आश्रितः ॥ ३० ।
अपाने सर्व्वतीर्थानि प्रस्रावे जाह्नवी नदी ।
नानाद्वीपसमाकीर्णाश्चत्वारः सागरास्तथा ॥ ३१ ।
ऋषयो रोमकूपेषु गोमये पद्मधारिणी ।
रोमे वसन्ति विद्याश्च त्वक्केशेष्वयनद्वयम् ॥ ३२ ।
धैर्य्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथैव च ।
स्मृतिर्मेधा तथा लज्जा वपुः कीर्त्तिस्तथैव च ॥ ३३ ।
विद्या क्षान्तिर्मतिश्चैव सन्ततिः परमा तथा ।
गच्छन्तमनुगच्छन्ति एता गावो न संशयः ॥ ३४ ।
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ।
यत्र गावस्तत्र लक्ष्मीः सांख्यधर्म्मश्च शाश्वतः ॥ ३५ ।
सर्व्वरूपेषु ता गावस्तिष्ठन्त्यभिमतास्तथा ।
भवनेषु विशालेषु सर्व्वप्रासादपङ्क्तिषु ॥ ३६ ।
स्त्रियश्च पुरुषाश्चैव रचयन्तः सुयन्त्रिताः ।
शयनासनपानेषु उपविष्टाः सहस्रशः ॥ ३७ ।
क्रीड़न्ति विविधैर्भोगैर्भोगेषु च सहस्रशः ।
तत्र पानगृहेष्वन्ये पुष्पमालाविभूषिताः ॥ ३८ ।
भक्ष्याणां विविधानाञ्च भोजनानाञ्च सञ्चयान् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शयनासनपानानि वाजिनो वारणास्तथा ॥ ३९ ।
अपश्यन्विविधास्तत्र स्त्रियश्च शुभलोचनाः ।
शोभयन्ति स्त्रियः काश्चिज्जलक्रीड़ागतास्तथा ॥ ४० ।
उद्यानेषु तथा चान्या भवनेषु च पुण्यतः ।
अनेन सदृशं नास्ति अस्माद्न्यत्र विद्यते ॥ ४१ ।
अहो सूत्रकृतं शिल्पमहो रत्नैरलङ्कृतम् ।
एवं गृहाद्गृहङ्गच्छन्नहं तत्र ततस्तमः* ॥ ४२ ।
ततस्तु निखिलं सम्यग्दृष्ट्वा कर्म्म महोदयम् ।
पुनरेवागतः पार्श्वं यमस्य द्विजसत्तमः ॥ ४३ ।

इति वराहपुराणे संसारचक्रे शुभकर्म्मफलोदयो नाम
षड़धिकद्विशततमोऽध्यायः ।

सप्ताधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

इदमन्यन्महाभागा नारदात्कलहप्रियात् ।
श्रुतं विप्रा यथा तत्र यमस्य सदसि स्वयम् ॥ १ ।
तथा च पृच्छतस्तस्य पुरावृत्तं महात्मनः ।

---

* महत्तत्र ततस्तम इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आख्यानङ्कथयामास यदुक्तं चित्रभानुना ॥ २ ।
यथा च जनको राजा कामान्दिव्यानवाप्तवान् ।
तत्सर्व्वङ्कथयिष्यामि श्रूयतां मुनिसत्तम ॥ ३ ।
अयं तत्र महातेजा नारदो मुनिसत्तमः ।
धर्म्मराजसभां प्राप्तस्तपसा द्योतितप्रभः ॥ ४ ।
तत्र राजाऽथ वेगेन तं दृष्ट्वा स्वयमागतम् ।
अर्च्चयित्वा यथान्यायङ्कृत्वा चैव प्रदक्षिणम् ॥ ५ ।
उवाच च महातेजाः सूर्य्यपुत्त्रः प्रतापवान् ।
स्वागतन्ते द्विजश्रेष्ठ दिष्ट्या प्राप्तोऽसि नारद ॥ ६ ।
सर्व्वज्ञः सर्व्वदर्शी च* सर्व्वधर्म्मविदां वरः ।
गान्धर्व्वस्येतिहासस्य विज्ञाता त्वं महामुने ॥ ७ ।
वयं पूताश्च मेध्याश्च त्वां दृष्ट्वा ह्यागतं विभो ।
अयं देशः पुनः पूतः सर्व्वतो मुनिसत्तम ॥ ८ ।
यत्कार्य्यं येन वा कार्य्यं यद्वै मनसि वर्त्तते ।
प्रब्रूहि भगवन्नाशु यच्चान्यत्किञ्चिदुत्तमम् ॥ ९ ।
दुर्लभं त्रिषु लोकेषु यच्च प्रियतरं तव ।
तपोमयानां सर्व्वेषां द्विजातीनाञ्च सुव्रत ॥ १० ।
इति धर्म्मवचः श्रुत्वा नारदः प्राह धर्म्मवित् ।
अहं ते कथयिष्यामि यत्पृष्टं संशयास्पदम् ॥ ११ ।

नारद उवाच ।

भवान् पाता च गोप्ता च नेता धर्म्मस्य नित्यशः ।

---

* सर्व्वशीलस्येति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सत्येन तपसा क्षान्त्या धैर्य्येण च न संशयः ॥ १२ ।
भावज्ञश्च कृतज्ञश्च त्वदन्यो न हि विद्यते ।
संशयं सुमहत्प्राप्तस्तन्ममाचक्ष्व सुव्रत ॥ १३ ।
अमरत्वङ्कथं याति व्रतेन नियमेन च ।
केन वा दानधर्म्मेण तपसा वा सुरोत्तम ॥ १४ ।
अतुलाञ्च श्रियं लोके कीर्त्तिञ्च सुमहत्फलम् ।
लभन्ते शाश्वतं स्थानं दुर्ल्लभं विगतज्वराः ॥ १५ ।
केन गच्छन्ति नरकं पापिष्ठं लोकगर्हणम् ।
सर्व्वमाख्याहि तत्त्वेन परङ्कौतूहलं हि मे ॥ १६ ।

यम उवाच ।

न गच्छन्ति नरा घोरा बहवो धर्म्मनिर्म्मितम् ।
बन्धांश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन ॥ १७ ।
विस्तरेण तु तत्सर्व्वं ब्रवीमि मुनिसत्तम ।
श्रूयतां तन्महाभाग श्रुत्वा चैवोपधारय ॥ १८ ।
नाग्निचिन्नरकं याति न पुत्री न च भूमिदः ।
शूरश्च शतवर्षी च वेदानाञ्चैव पारगः ॥ १९ ।
पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः ।
अजिताश्चाशठाश्चैव स्वामिभक्ताश्च ये नराः ॥ २० ।
अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्यवस्थिताः ।
पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः ॥ २१ ।
स्वदारनिरता दान्ताः परदारविवर्ज्जकाः ।
सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकाः ॥ २२ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम्।
यातनास्थानसम्पूर्णं हाहाप्रतिभयाकुलम्॥ २३।
ज्ञानवन्तो द्विजा ये च येच विद्यापरङ्गताः।*
उदासीना न गच्छन्ति स्वाम्यर्थे च हता नराः॥ २४।
न गच्छन्त्यत्र दातारः सर्व्वभूतहिते रताः।
शुश्रूषका मातृपित्रोर्न गच्छन्ति च ये नराः॥ २५।
तिलान् गाञ्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम्।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः॥ २६।
यथोक्तं यजमानाश्च सत्रयाजिन एव च।
चातुर्मास्यकरा ये च ये द्विजा आहिताग्नयः॥ २७।
गुरुचित्तानुपालाश्च व्रतिनो मौनयन्त्रिताः।
नित्यस्वाध्यायिनो दान्ताः सदा सभ्याश्च ये नराः॥ २८।
मां न पश्यन्ति ते चैव आत्मभावेन भाविताः।
अपर्व्वमैथुना† ये च न गच्छन्ति जितेन्द्रियाः।
ब्राह्मणा अमरत्वञ्च प्राप्नुवन्ति न संशयः॥ २९।
निवृत्ताः सर्व्वकामेभ्यो निराशाः सुजितेन्द्रियाः।
न गच्छन्ति हि तद्घोरं यत्र ते पापकर्म्मिणः॥ ३०।

नारद उवाच।

किं दानं श्रेय आहोस्वित्पात्रेण फलमुच्यते‡।

---

* पारङ्गता इति (क), (ख), तत्र छन्दोदोषः। † असर्व्वमैथुना इति (ग)।
‡ अयुते इति (ख), (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किं वा कर्म्म महत्कृत्वा स्वर्गलोके महीयते ॥ ३१ ।
रूपं वा धनधान्यं वा आयुश्च कुलमेव वा ।
प्राप्यते येन दानेन तन्ममाचक्ष्व सुव्रत ॥ ३२ ।

यम उवाच ।

न शक्यं विस्तरेणेह वक्तुं वर्षशतैरपि ।
शुभाशुभानाङ्गतयो द्रष्टुं वा प्रष्टुमेव वा ॥ ३३ ।
किञ्चिन्मात्रं प्रवक्ष्यामि येन यत्प्राप्यते नरैः ।
विविधानि च सौख्यानि प्रायशस्तु गुणागुणैः ॥ ३४ ।
रहस्यमिदमाख्यानं श्रूयतां मुनिसत्तम ।
या गतिः प्राप्यते येन प्रेत्यभावे न संशयः ॥ ३५ ।
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ।
आयुःप्रकर्षो भोगाश्च भवन्ति तपसैव तु ॥ ३६ ।
ज्ञानविज्ञानमारोग्यं रूपसौभाग्यसम्पदः ।
तपसा प्राप्यते भोगो मनसा नोपदिश्यते* ॥ ३७ ।
एवम्प्राप्नोति पुण्येन मौनेनाज्ञां महामुने ।
उपभोगांस्तु दानेन ब्रह्मचर्य्येण जीवितम् ॥ ३८ ।
अहिंसया परं रूपं दीक्षया कुलजन्म च ।
फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् ॥ ३९ ।
पयोभक्ष्या दिवं यान्ति जायते द्रविणाढ्यता† ।

---

* मनसा यीयदिष्यते इति (ग), तत्तु आर्षं येन यदिष्यते इति साधु । † द्रविणं तथा इति (क), (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गुरुशुश्रूषया नित्यं श्राद्धदानेन सन्ततिः ॥ ४० ।
गवाद्याः कालदीचाभिर्ये तु वा तृणशायिनः ।
स्वयं त्रिषवणाद्ब्रह्म त्वपः* पीत्वेष्टलोकभाक् ॥ ४१ ।
क्रतुयष्टा† दिवं याति उपहारश्च सुव्रत ।
कृत्वा तु दशवर्षाणि नीरपानाद्दिविशिष्यते‡ ॥ ४२ ।
रसानां प्रतिसंहारात्सौभाग्यमनुजायते ।
आमिषस्य प्रतीहाराद्धवत्यायुष्मती प्रजा ॥ ४३ ।
गन्धमाल्यनिवृत्त्या तु मूर्त्तिर्भवति पुष्कला ।
अन्नदानेन च नरः स्मृतिं मेधाञ्च विन्दति ॥ ४४ ।

छत्रप्रदानेन गृहं वरिष्ठं
रथं तथोपानहसम्प्रदानात्§ ।
वस्त्रप्रदानेन सुरूपता च¶
धनैश्च पुत्रैश्च भृता भवन्ति ॥ ४५ ।

पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ।
अन्नपानप्रदानेन कामभोगैस्तु तृप्यते ॥ ४६ ।

पुष्पोपगन्धञ्च फलोपगन्धं
यः पादपं स्पर्शयते द्विजाय ।
स स्त्रीसमृद्धं हि सुरत्नपूर्णं

---

* त्वाप इति (ग) । † ऋतुयष्टेति (ग) । ‡ वीरयानादिति (ग) । § ततोपानहसम्प्रदानादिति (ग) । तत्तु आर्षं, तत उपानहसम्प्रदानादिति साधु । ¶ स्वरूपता चेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गृहं हि सर्व्वोपचितं लभेत ॥ ४७ ।

वस्त्रान्नपानीयरसप्रधानान्

प्राप्नोति तानेव रसप्रदानात्* ।

स्रग्धूप†गन्धान्यनुलेपनानि

पुष्पाणि गृह्याणि मनोरमाणि ।

दत्त्वा द्विजेभ्यः स भवेत्सुरूपो

रोगांश्च कांश्चिल्लभते न जातु ॥ ४८ ।

वीजैरशून्यैः शयनाभिरामं

दद्याद्गृहं यः पुरुषो द्विजाय ।

स स्त्रीसमृद्धं गजवाजिपूर्णं

लभेदधिष्ठानवरं वरिष्ठम् ॥ ४९ ।

धूपप्रदानेन‡ तथा गवाञ्च

लोकानवाप्नोति नरो वसूनाम् ।

गजं तथा गोवृषभप्रदानैः

स्वर्गे सुखं शाश्वतमामनन्ति ॥ ५० ।

घृतेन तेजः सुकुमारताञ्च

प्राणद्युतिः स्निग्धता चापि तैले§ ।

---

* वस्त्रान्नपानीयरसप्रदानात् प्राप्नोति तानेव रसप्रधानानिति (ग)। अयं पाठः सम्यक् । † स्रग्रूपेति (क), (ख) । ‡ धुर्य्यप्रदानेनेति (ग) । § स्निग्धतेत्यत्र दीर्घतया छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

क्षौद्रेण नानारसतृप्ततां च
दीपप्रदानाद्युतिमाप्नुवन्ति ॥ ५१ ।
पायसेन वपुःपुष्टिं कृशरात्स्निग्धसौम्यताम् ।
फलैस्तु लभते पुत्रं पुष्पैः सौभाग्यमेव च ॥ ५२ ।
रथैर्दिव्यं विमानन्तु शिविकाञ्चैव मानवः ।
प्रेच्चणैरपि सौभाग्यं प्राप्नोतीह न संशयः ।
अभयस्य प्रदानेन सर्व्वकामानवाप्नुयात् ॥ ५३ ।

इति वराहपुराणे संसारचक्रे पुरुषविलोभनी
नाम सप्ताधिकद्विशततमोऽध्यायः ।

अष्टाधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

मुहूर्त्तस्य तु कालस्य दिव्याभरणभूषितान् ।
प्रयातान्दिवि संप्रेच्य विमानैः सूर्य्यसन्निभैः ॥ १ ।
ब्राह्मणास्तपसा सिद्धाः सपत्नीकाः सबान्धवाः ।
सानुरागा ह्युभयतो मन्युनाभिपरिप्लुताः ॥ २ ।
विवर्णवदनो राजा प्रभातेजोविवर्ज्जितः ।
अचिरादेव सञ्जातः क्रोधेन भृशदुःखितः ॥ ३ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तं तथा निष्प्रभं दृष्ट्वा धर्म्मराजं तपोधनः ।
नारदश्चाब्रवीत्तत्र ज्ञात्वा तस्य मनोगतम् ॥ ४ ।
अपि त्वं भ्राजमानस्तु पशोः पतिरिवापरः ।
कस्मात्ते शोभनं वक्त्रं चणाद्विवर्णतां गतम् ॥ ५ ।
विनिश्वसन्यथा नागः कस्मात्त्वं परितप्यसे ।
राजन्कस्माद्विभेषि त्वमेतदिच्छामि वेदितुम् ॥ ६ ।

यम उवाच ।

विवर्णं जायते वक्त्रं शुष्यते न च संशयः ।
यन्मया ईदृशं दृष्टं श्रूयतां तन्महामुने ॥ ७ ।
यायावरास्तु ये विप्रा उञ्छवृत्तिपरायणाः ।
दृढ़स्वाध्यायतपसो श्रीमन्तो ह्यनसूयकाः ॥ ८ ।
अतिथिप्रियकाश्चैव नित्ययुक्ता जितेन्द्रियाः ।
ते त्वहंमानिनः सर्व्वे गच्छन्त्युपरि मे द्विज ॥ ९ ।
न च मामुपतिष्ठन्ति* न चैव वशगा मम ।
मस्तके मम गच्छन्ति सपत्नीकाः सहानुगाः ॥ १० ।
दिव्यगन्धैर्विलिप्ताङ्गा माल्यभूषितवाससः ।
सृजन्तो मम माल्यानि तेन ताम्ये द्विजोत्तम ॥ ११ ।
मृत्यो तिष्ठसि कस्यार्थे को वा मृत्युः कथं भवेत् ।
किं त्वं न भाषसे मृत्यो ब्रूहि लोके निरर्थकः ॥ १२ ।
लोभासक्तान्सदा हंसि† पापिष्ठान्धर्म्मवर्ज्जितान् ।

---

* उपतिष्ठन्तीति आर्षम्, उपतिष्ठन्ते इति साधु । † त्वमशक्तान् सदा हंसीति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एषां* तपसि सिद्धानां नाहं विग्रहवानिह† ॥ १३ ।
निग्रहानुग्रहौ नापि मया शक्यौ महात्मनाम् ।
कर्त्तुं वा प्रतिषेद्धुं वा तेन तप्ये भृशं मुने ॥ १४ ।
एतस्मिन्नन्तरे तत्र विमानेन महाद्युतिः‡ ।
पतिव्रता समं भर्त्रा सानुगा सपरिच्छदा ॥ १५ ।
महता तूर्य्यघोषेण सम्प्राप्ता प्रियदर्शना ।
धर्म्मराजहितं सर्व्वं धर्म्मज्ञा धर्म्मवत्सला ।
साब्रवीत्तु विमानस्था साधयन्ती शुभाङ्गना ।
विचित्रं प्रसृतं वाक्यं सर्व्वसत्त्वसुखावहम् ॥ १६।१७ ।

पतिव्रतोवाच ।

धर्म्मराज महाबाहो कृतज्ञः सर्व्वसम्मतः§ ।
मैवमीर्षां कुरुष्व त्वं ब्राह्मणेषु तपस्विषु ॥ १८ ।
एतेषां तपसां वीर माहात्म्यम्बलमेव च ।
अचिन्त्याः सर्व्वभूतानां ब्राह्मणा वेदपारगाः ॥ १९ ।
ब्राह्मणाः सततं पूज्या ब्राह्मणाः सर्व्वदेवताः ।
मात्सर्य्यं क्रोधसंयुक्तं न कर्त्तव्यं द्विजातिषु ॥ २० ।
त्वया शुभाशुभङ्कर्म्म नित्यं पूजा मनस्विनाम् ।
रागो वा रोषमोहौ वा न कर्त्तव्यौ सदा सताम् ।
प्रयाता गगने दृष्टा विद्युत्सौदामिनी यथा ॥ २१ ।

---

* येषामिति (ख)। † विग्रहवानिवेति (ग)। ‡ महामतिरिति (ग)। § सत्य-सम्मत इति (क)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दृष्ट्वा पतिव्रतां नारीं धर्म्मराजेन पूजिताम् ।
अब्रवीन्नारदस्तत्र धर्म्मराजं तथागतम् ॥ २२ ।

नारद उवाच ।

का एषा सुमहाभागा सुरूपा प्रमदोत्तमा ।
या त्वया पूजिता राजन्हितमुक्ता गता पुनः ॥ २३ ।
एतदिच्छाम्यहं ज्ञातुं परङ्कौतूहलं हि मे ।
एतन्मे सुमहाभाग कथयस्व समासतः ॥ २४ ।

यम उवाच ।

अहं ते कथयिष्यामि कथां परमशोभनाम् ।
एषा मया यथा तात पूजिताऽपूजि कृत्स्नशः ॥ २५ ।
पुरा कृतयुगे तात निमिर्नाम महायशाः ।
आसीद्राजा महातेजाः सत्यसन्धेति विश्रुतः ॥ २६ ।
तस्य पुत्त्रो मिथिर्नाम जननाज्जनकोऽभवत् ।
तस्य रूपवती नाम पत्नी प्रियहिते रता ॥ २७ ।
सा चापि शुभकर्म्माणि पतिभक्ता पतिव्रता ।
प्रीत्या परमया युक्ता भर्त्तुर्वचनकारिणी ॥ २८ ।
सोऽपि राजा महाभागः सर्व्वभूतहिते रतः ।
धर्म्मात्मा च महात्मा च सत्यसन्धो महातपाः ॥ २९ ।
य इमां पृथिवीं सर्व्वां धर्म्मेण परिपालयन् ।
न व्याधिर्न जरा मृत्युस्तस्मिन्राजनि शासति ॥ ३० ।
ववर्ष सततं देवस्तस्य राष्ट्रे महाद्युतिः ।
एवं बहुगुणोपेतं तस्य राज्यं महात्मनः ॥ ३१ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न कश्चिद्दृश्यते मर्त्त्यो रुजार्त्तो दुःखितोऽपि वा।
अथात्र बहुकालस्य राजानं मिथिलाधिपम्।
उवाच राज्ञी विप्रेन्द्र विनयात्प्रसृतं वचः॥ ३२।

राज्ञुवाच।

भृत्यानाञ्च द्विजातीनां तथा परिजनस्य च।
यदस्ति द्रविणं किञ्चित्पृथिव्यां यद्गृहे च ते॥ ३३।
विनियुक्तन्तु तत्सर्व्वं सान्निध्यन्तु तथा त्वया।
न च राजन्विजानासि भोजनस्य प्रशंससि॥ ३४।
नास्ति तन्नियमः कश्चित्पुष्पमूल्यञ्च नास्ति नः।
न वा गवादिकङ्किञ्चिन्न च वस्त्राणि कर्हिचित्॥ ३५।
न चैव वार्षिकः कश्चिद्विद्यते भाजनस्य च।
दृश्यते हि महाराज मम चैवाथ सुव्रत॥ ३६।
यत्कर्त्तव्यं मया वापि तन्मे ब्रूहि नराधिप।
कर्त्तास्म्यहं विशेषेण यद्वाक्यमपि मन्यसे॥ ३७।

राजोवाच।

न शक्यमुपरोधेन वक्तुं भामिनि विप्रियम्।
न च पश्याम्यहं देवि तव चैव जनस्य च॥ ३८।
तद्ब्रवीमि यथाशक्त्या यदि मे मन्यसे प्रिये।
हविष्ये वर्त्तमानानामिदं वर्षशतङ्गतम्॥ ३९।
कुद्दालेन हि काष्ठेन क्षेत्रं वै कुर्म्महे प्रिये।
ततो धर्म्मविधिं तत्त्वात्प्राप्नुयां मे न संशयः॥ ४०।
भक्ष्यं भोज्यञ्च ये ये च ततस्त्वं सुखमाप्स्यसि।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवमुक्ता ततो राज्ञी राजानमिदमब्रवीत् ॥ ४१ ॥

देव्युवाच ।

भृत्यानान्तु सहस्राणि तव राजन्निवेशने ।
अश्वानाञ्च गजानाञ्च सौरभानां तथैव च ॥ ४२ ॥
उष्ट्राणां महिषाणाञ्च खराणाञ्च महायशाः ।
एते सर्व्वे कथं राजन्न कुर्व्वन्ति तवेप्सितम् ॥ ४३ ॥

राजोवाच ।

नियुक्तानि हि कर्म्माणि वार्षिकाणीतराणि च ।
सर्व्वकर्म्माणि कुर्व्वन्ति ये भृत्या मे वरानने ॥ ४४ ॥
बलीवर्द्दाः खरा अश्वा गजा उष्ट्रा ह्यनेकशः ।
सर्व्वे नियुक्ता मे देवि सर्व्वकर्म्मसु शोभने ॥ ४५ ॥
आयसन्त्रपुषन्ताम्रं राजतङ्काञ्चनं तथा ।
नियुक्तानि तु सर्व्वाणि सर्व्वकर्म्मस्वनिन्दिते ॥ ४६ ॥
ननु पश्याम्यहं देवि किञ्चिद्वैमं न चायसम्* ।
येन कुर्य्याम्यहं देवि कुद्दालं सुसमाहितः ॥ ४७ ॥
एवमुक्ता महादेवी तेन राज्ञा सुशोभना ।
हृष्टपुष्टमना देवी राजानमिदमब्रवीत् ॥ ४८ ॥
गच्छ राजन्यथाकाममनुयास्यामि पृष्ठतः ।
एवमुक्तः सुनिष्क्रान्तः सभार्य्यः स नरेश्वरः ॥ ४९ ॥
ततो राजा च देवी च चेत्रं मृगयतस्तदा ।

---

* च चायसमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गतौ च परमाध्वानं ततो राजाब्रवीदिदम् ॥ ५० ॥
इदं भद्रं मम क्षेत्रमास्स्वात्र वरवर्णिनि ।
यावद्गुल्मानिमान् भद्रे कण्टकांश्च वरानने ।
अहं छिनद्मि वै देवि त्वमेताञ्छोधय प्रिये ।
एष ते कर्म्मयोगस्तु ततः प्राप्स्यामि चेप्सितम्* ॥ ५१।५२ ॥
एवमुक्ता महादेवी तेन राज्ञा तपोधन ।
उवाच मधुरं वाक्यं प्रहसन्ती नृपाङ्गना ॥ ५३ ॥
वृक्षोऽत्र दृश्यते पार्श्वे सौवर्णो गुल्म एव च ।
पानीयस्य तु सान्निध्यं न किञ्चिदिह दृश्यते ।
कथञ्चित्कृरिष्यावो हृद्रोगस्य तु कारकम् ॥ ५४ ॥
इयं नदी ह्ययं वृक्ष इयं भूमिः समांसला ।
अस्मिन्वापि कृतङ्कर्म्म कथं गुणकरं भवेत् ॥ ५५ ॥
तस्यास्तद्वचनं श्रुत्वा राजा वचनमब्रवीत् ।
शुभं सानुनयं वाक्यं भूतानां गुणवत्सलः ॥ ५६ ॥
पूर्वग्रहे भवेत्पूर्वं विनियुक्तं तथा प्रिये ।
पानीयस्य तु पार्श्वेन सन्निकृष्टेन सुन्दरि ॥ ५७ ॥
चतुर्थं जनपर्य्यन्तं† न किञ्चिदिह दृश्यते ।
अयङ्ग्राहो महादेवि न च बाधाऽत्र कस्यचित् ॥ ५८ ॥

---

* प्राप्स्याम चेप्सितमिति (ग)। † चतुर्थं जनपर्य्यन्तमिति सार्व्वत्रिकः पाठः स च लिपिकरपरम्पराप्रमादकृत एवेति सम्भाव्यते। चतुर्थोजनपर्य्यन्तमित्येवंरूपस्यैव मौलिकत्वमासीदित्यस्मदनुमानम्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततस्तच्छोधयामास तत्चैवं भार्य्यया सह ॥ ५६ ।
वियन्मध्ये तथोग्रश्च सविता तपते सदा ।
सम्वृद्धश्च तदा* तत्र निदाघः काल आगतः ॥ ६० ।
प्रवृद्धो दारुणो घर्म्मः कालश्चैवातिदारुणः ।
ततः सा तृषिता देवी क्षुधिता च तपस्विनी ॥ ६१ ।
स्निग्धौ ताम्रतलौ पादौ तस्यां सन्तापमागतौ ।
गुणप्रवाहरक्तौ तु तस्याः पादौ च सुव्रत ॥ ६२ ।
सूर्य्यस्य पादा मध्याह्ने तापयन्त्यग्निसन्निभाः ।
ततः सा व्यथिता देवी भर्त्तारमिदमब्रवीत् ॥ ६३ ।
तृषितास्मि महाराज उष्णेन पीड़िता भृशम् ।
पानीयं दीयतां राजञ्छीघ्रं मम प्रसादतः ॥ ६४ ।
इत्युक्त्वा पतिता देवी विह्वला दुःखपीड़िता ।
पतन्त्या च तया सूर्य्यो दृष्टो विह्वलया तथा ॥ ६५ ।
यदृच्छया पतन्त्या तु सूर्य्यः कोपेन वीक्षितः ।
ततो विवस्वान् भगवान् सन्त्रस्तो गगने तदा ॥ ६६ ।
दिवं मुक्त्वा महातेजाः पतितो धरणीतले ।
ततो दृष्ट्वा तु राजासौ† स्वभावेन च वर्ज्जितम् ॥ ६७ ।
किमर्थमिह तेजस्विंस्त्यक्त्वा‡ मण्डलमागतः ।
किङ्करोमि महातेजाः सर्व्वलोकनमस्कृतः ॥ ६८ ।

---

* तथेति (ग)। † ततो दृष्ट्वा तु तं राजेति (ग)। ‡ तेजः स्वमिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं ब्रुवन्तं राजानं सूर्य्यः सानुनयोऽब्रवीत्।
पतिव्रता शुभाची च ममैषा रुषिता भृशम्॥ ६९।
ततोऽहं पतितो राजंस्तव कार्य्यानुशासनः।
अनया सदृशी नारी त्रैलोक्ये नैव विद्यते॥ ७०।
पृथिव्यां स्वर्गलोके वा न काचिदिह दृश्यते।
अहोऽस्याः परमं सत्त्वमहोऽस्याः परमन्तपः॥ ७१।
अहो धैर्य्यञ्च शक्तिश्च तवैवं शंसिता गुणाः।
तथेयं ते महाभाग तव चित्तानुसारिणी॥ ७२।
अनुरूपा विशुद्धा च तपसा च वराङ्गना।
पतिव्रता च साध्वी च नित्यं तव हिते रता॥ ७३।
सदृशी ते महाभाग शक्रस्येह यथा शची।
पात्रं पात्रवता प्राप्तं सुकृतस्य महत्फलम्॥ ७४।
अनुरूपः सुरूपो वा यतो जातः सुयन्वितः।
मा च ते वितथः कामो भवेच्चैव नराधिप॥ ७५।
कुरुष्व दयितञ्चैवं यथा मनसि वर्त्तते।
भोजनार्थं महाराज त्वदन्यो न हि विद्यते॥ ७६।
फलदश्च सुशस्यश्च भविष्यति हि कामदम्।
एवमुक्त्वा ततः सूर्य्यः ससर्ज्ज जलभाजनम्॥ ७७।
उपानहौ च छत्रञ्च दिव्यालङ्कारभूषितम्।
ददौ च राज्ञे सविता प्रीत्या परमया युतः॥ ७८।
उपभोक्तुं सुखस्यार्थं सुपुण्यस्य विशेषतः।
दत्त्वा तत्पुण्यकर्म्माणं ततः प्राह दिवाकरः॥ ७९।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ततस्तच्छोधयामास तत्त्वेनं भार्य्यया सह ॥ ५९ ।
वियन्मध्ये तथोग्रश्च सविता तपते सदा ।
सम्बद्धश्च तदा* तत्र निदाघः काल आगतः ॥ ६० ।
प्रवृद्धो दारुणो घर्म्मः कालश्चैवातिदारुणः ।
ततः सा तृषिता देवी क्षुधिता च तपस्विनी ॥ ६१ ।
स्निग्धौ ताम्रतलौ पादौ तस्यां सन्तापमागतौ ।
गुणप्रवाहरक्तौ तु तस्याः पादौ च सुव्रत ॥ ६२ ।
सूर्य्यस्य पादा मध्याह्ने तापयन्त्यग्निसन्निभाः ।
ततः सा व्यथिता देवी भर्त्तारमिदमब्रवीत् ॥ ६३ ।
तृषितास्मि महाराज उष्णेन पीड़िता भृशम् ।
पानीयं दीयतां राजञ्छीघ्रं मम प्रसादतः ॥ ६४ ।
इत्युक्त्वा पतिता देवी विह्वला दुःखपीड़िता ।
पतन्त्या च तया सूर्य्यो दृष्टो विह्वलया तदा ॥ ६५ ।
यदृच्छया पतन्त्या तु सूर्य्यः कोपेन वीक्षितः ।
ततो विवस्वान् भगवान् सन्त्रस्तो गगने तदा ॥ ६६ ।
दिवं मुक्त्वा महातेजाः पतितो धरणीतले ।
ततो दृष्ट्वा तु राजासौ† स्वभावेन च वर्ज्जितम् ॥ ६७ ।
किमर्थमिह तेजस्विंस्त्यक्त्वा‡ मण्डलमागतः ।
किङ्करोमि महातेजाः सर्व्वलोकनमस्कृतः ॥ ६८ ।

---

* तथेति (ग) । † ततो दृष्ट्वा तु तं राजेति (ग) । ‡ तेजः स्वमिति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवं ब्रुवन्तं राजानं सूर्य्यः सानुनयोऽब्रवीत् ।
पतिव्रता शुभाङ्गी च ममैषा कथिता भृशम् ॥ ६९ ।
ततोऽहं पतितो राजंस्तव कार्य्यानुशासनः ।
अनया सदृशी नारी त्रैलोक्ये नैव विद्यते ॥ ७० ।
पृथिव्यां स्वर्गलोके वा न काचिदिह दृश्यते ।
अहोऽस्याः परमं सत्त्वमहोऽस्याः परमन्तपः ॥ ७१ ।
अहो धैर्य्यञ्च शक्तिश्च तवैवं शंसिता गुणाः ।
तथेयं ते महाभाग तव चित्तानुसारिणी ॥ ७२ ।
अनुरूपा विशुद्धा च तपसा च वराङ्गना ।
पतिव्रता च साध्वी च नित्यं तव हिते रता ॥ ७३ ।
सदृशी ते महाभाग शक्रस्येह यथा शची ।
पात्रं पात्रवता प्राप्तं सुकृतस्य महत्फलम् ॥ ७४ ।
अनुरूपः सुरूपो वा यतो जातः सुयन्त्रितः ।
मा च ते वितथः कामो भवेच्चैव नराधिप ॥ ७५ ।
कुरुष्व दयितङ्क्षिप्रं यथा मनसि वर्त्तते ।
भोजनार्थं महाराज त्वदन्यो न हि विद्यते ॥ ७६ ।
फलदश्च सुशस्यश्च भविष्यति हि कामदम् ।
एवमुक्त्वा ततः सूर्य्यः ससर्ज्ज जलभाजनम् ॥ ७७ ।
उपानहौ च छत्रञ्च दिव्यालङ्कारभूषितम् ।
ददौ च राज्ञे सविता प्रीत्या परमया युतः ॥ ७८ ।
उपभोक्तुं सुखस्यार्थं सुपुण्यस्य विशेषतः ।
दत्त्वा तत्पुण्यकर्म्माणं ततः प्राह दिवाकरः ॥ ७९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एवमुक्त्वा तु भगवांस्तथा तत्कृतवान् क्वचित् ।
राज्ञा च जनकेनैव प्रियाया हितकाम्यया ॥ ८० ।
ततः साप्यायिता देवी तोयेन शुभलक्षणा ।
लब्धसंज्ञा गतभया राजानमिदमब्रवीत् ॥ ८१ ।
देवी दृष्ट्वा तदाश्चर्य्यं विस्मयोत्फुल्ललोचना ।
केन दत्तं शुभं तोयं दिव्यं छत्रमुपानहौ ।
एतन्मे संशयं राजन् कथयस्व तपोधन ॥ ८२ ।

राजोवाच ।

एष देवो महादेवि विवस्वान्नाम नामतः ।
तवानुकम्पया देवि मुक्त्वाकाशमिहागतः ॥ ८३ ।
एवमुक्त्वा तु सा देवी भर्त्तारमिदमब्रवीत् ।
करवाण्यस्य कां प्रीतिं ज्ञायतामस्य वाञ्छितम् ॥ ८४ ।
ततो राजा महातेजाः प्रणिपत्य कृताञ्जलिः ।
विज्ञापयामास तदा भगवन् किङ्करोमि ते ॥ ८५ ।
एवमुक्तो नरेन्द्रेण सूर्य्यो वचनमब्रवीत् ।
अभयं मे महाराज स्त्रीभ्यो भवतु मानद ॥ ८६ ।
तच्छ्रुत्वा वचनं तस्य भास्करस्य तु मानदः ।
तां प्रियां प्रीतहृदयां श्रावयंस्तस्य भाषितम् ॥ ८७ ।
राज्ञस्तु वचनं श्रुत्वा देवी वचनमब्रवीत् ।
प्रीत्या परमया युक्ता तस्य राज्ञो मनःप्रिया ॥ ८८ ।
रश्मीनां वारणार्थाय छत्रं दत्त्वा तु कुण्डिकाम् ।
इमौ चोपानहौ दत्त्वा पादस्य शङ्करावुभौ ॥ ८९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अभयं ते महाभाग यथा त्वं वृतवानसि।
एवं पतिव्रतां विप्र पूजयामि नमामि च ॥ ९० ।

इति वराहपुराणे संसारचक्रे पतिव्रतीपाख्यानं नाम
अष्टाधिकद्विशततमोऽध्यायः।

नवाधिकद्विशततमोऽध्यायः।

नारद उवाच।

कर्म्मणा केन राजेन्द्र तपसा वा तपोधनाः।
उत्तमाञ्च गतिं याति कृष्णवासः प्रशंस मे।
एवमुक्तस्तु धर्म्मात्मा नारदेनाब्रवीत्तदा ॥ १ ।

यम उवाच।

न तस्या नियमो विप्र तपो नैव च सुव्रत।
उपवासो न दानं वा न देवो वा महामुने ॥ २ ।
यादृशी तु भवेद्विप्र शृणु तत्त्वं समासतः ॥ ३ ।
प्रसुप्ते या प्रस्वपिति जागर्ति विबुधे स्वयम्।
भुङ्क्ते तु भोजिते विप्र सा मृत्युं जयति ध्रुवम् ॥ ४ ।
मौने मौना भवेद्या तु स्थिते तिष्ठति या स्वयम्।
सा मृत्युञ्जयते विप्र नान्यत्पश्यामि किञ्चन ॥ ५ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकदृष्टिरेकमना भर्त्तुर्वचनकारिणी ।
तस्या बिभीमहे सर्व्वे ये तथान्ये तपोधन ।
देवानामपि सा साध्वी पूज्या परमशोभना ॥ ६ ।
भर्त्त्रा चाभिहिता यापि न प्रत्याख्यायिनी भवेत् ।
वर्त्तमानापि विप्रेन्द्र प्रत्याख्यातापि वा सदा ॥ ७ ।
न दैवतं सम्प्रयाति पत्युरन्यङ्कदाचन ।
सा न मृत्युमुखं याति एवं या स्त्री पतिव्रता ॥ ८ ।
एवं या तु भवेन्नित्यं भर्त्तुः प्रियहिते रता ।
अनुवेष्टनभावेन भर्त्तारमनुगच्छति ॥ ९ ।
सा तु मृत्युमुखद्वारं न गच्छेद्ब्रह्मसम्भव ।
एष माता पिता बन्धुरेष मे दैवतम्परम् ॥ १० ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याश्चाहङ्कृताञ्जलिः ॥ ११ ।
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥ १२ ।
गीतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत* मृत्युद्वारं न पश्यति ॥ १३ ।
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यं या मनसा पश्येन्मृत्युद्वारं न पश्यति ॥ १४ ।
देवता अर्चयन्तं वा भोजमानमपि द्विजान् ।
पतिं न त्यजते† चित्तान्मृत्युद्वारं न पश्यति ॥ १५ ।

* पश्येदिति साधु । † त्यजतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भानौ चानुदिते वापि उत्थाय च तपोधनाः।
गृहं मार्जयते नित्यं मृत्युद्वारं न पश्यति॥ १६।
चक्षुर्देहस्य भावस्य यस्या नित्यं सुसंवृतम्।
शौचाचारसमायुक्ता सापि मृत्युं न पश्यति॥ १७।
भर्त्तुर्मुखमप्रपश्येद्या भर्त्तुश्चित्तानुसारिणी।
वर्त्तते च हिते भर्त्तुर्मृत्युद्वारं न पश्यति॥ १८।
एवङ्कीर्त्तिमतां लोके दृश्यन्ते दिवि देवताः।
मानुषाणाञ्च भार्य्या वै तत्र देशे तु दृश्यते॥ १९।
कथितैव पुरा विप्र आदित्येन पतिव्रता।
मया तस्मात्तु विप्रर्षे यथा वृत्तं यथा श्रुतम्*।
गुह्यमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताः॥ २०।

इति वराहपुराणे संसारचक्रे पतिव्रतामाहात्म्यं नाम
नवाधिकद्विशततमोऽध्यायः।

दशाधिकद्विशततमोऽध्यायः।

नारद उवाच।

रहस्यं धर्म्ममाख्यानं त्वयोक्तन्तु महायशः।
स्त्रीणां माहात्म्यमुद्दिश्य भास्करस्य मतं यथा॥ १।

---

* यथासुखमिति (ख), (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इदं हि सर्व्वभूतेषु परङ्कौतूहलं मम ।
तदहं श्रोतुमिच्छामि कथयस्व महातपः ॥ २ ।
ये नरा दुःखसन्तप्तास्तपस्तीव्रं समाश्रिताः ।
नानाव्रतशतोपायैः सुखहेतोर्म्महाप्रभ ॥ ३ ।
मनसा निश्चितात्मानस्त्यक्त्वा सर्व्वप्रियाप्रियम् ।
काङ्क्षन्ते बहवः केचित्केनचिद्विनिहन्यते ॥ ४ ।
श्रुता लोके श्रुतिस्तात श्रेयोधर्मो हि नित्यशः ।
सम्यक्कृच्छ्राश्रितस्याथ कथं पापे मतिर्भवेत् ॥ ५ ।
कस्यैतच्चेष्टितं तात कर्त्ता कारयिताऽपि वा ।
कः कर्षति जगच्चैकोभूतग्रामं चतुर्व्विधम् ॥ ६ ।
कं वा द्वेषं पुरस्कृत्य मतिस्तस्य प्रवर्त्तते* ।
सुखदुःखादि लोकेऽस्मिन्प्रकरोति सुदारुणम् ॥ ७ ।
यद्येवन्तु मया गुह्यं दुर्व्विज्ञेयं सुरैरपि ।
शक्यं श्रोतुं महाराज तदाख्याहि† तपोधनाः ॥ ८ ।
नारदेनैवमुक्तस्तु धर्म्मराजोमहामनाः ।
विनयात्प्रस्तुतं वाक्यमिदमाह महामुनिः‡ ॥ ९ ।

यम उवाच ।

देवर्षे श्रूयतां पुण्यं यद्ब्रवीषि महामुने ।
त्वदुक्त्या मे कथयतः शृणुष्वावहितोऽनघ ॥ १० ।

---

* मतिस्तस्य च वर्त्तते इति (ग) । † तदाख्याति तपोधन इति (क), (ख) ।
‡ महामतिरिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न कश्चिद्दृश्यते* लोके कर्त्ता कारयितापि वा।
यद्वै परमधर्म्मात्मन्यस्मिन् कर्म्म प्रतिष्ठितम्॥ ११।
यस्य वै कीर्त्त्यते नाम येन चाज्ञाप्यते† जगत्।
व्याहरामि वचस्वाहं यः करोति स्वयङ्कृतम्॥ १२।
दिव्येऽस्मिन् सदसि ब्रह्मन् ब्रह्मर्षिगणसंवृते।
यथाश्रुतं यथादृष्टङ्कथयिष्याम्यहं विभो॥ १३।
स्वकर्म्म भुज्यते तात सम्भूतैर्यत्कृतं स्वयम्।
आत्मानं पातयत्यात्मा किञ्चित्कर्म्म च कारयेत्॥ १४।
वायुना भाविता संज्ञा संसारे सा दृढ़ीकृता।
तामेव भजते जन्तुः सुकृतं वाथ दुष्कृतम्॥ १५।
अभिघाताभिभूतस्तु आत्मनात्मानमुद्धरेत्।
आत्मा शत्रुश्च बन्धुश्च न कश्चिद्बन्धुरात्मनः॥ १६।
बन्धं बन्धुपरिक्लेशं निर्म्मितं पूर्व्वकर्म्मभिः।
जगत्यामुपभुङ्क्ते वै जीवो योनिशतैरपि॥ १७।
मिथ्याप्रवृत्तः शब्दोऽयं जगद्भ्रमति सर्व्वशः।
यावत्तत्कुरुते कर्म्म तावत्कर्म्म स्वयङ्कृतम्॥ १८।
यथा यथा क्षयं याति अशुभं पुरुषस्य वै।
तथा तथा शुभा बुद्धिर्मनुजस्य प्रवर्त्तते॥ १९।
संसारे प्राप्तदोषस्य जायमानस्य देहिनः।
पतताच्च गतो भावः पापकर्म्मक्षयेन तु।

---

* किं कश्चिदिति (क), (ख)। † वा ज्ञाप्यते इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

शुभाशुभकरीं बुद्धिं लभते पौर्व्वदैहिकीम् ॥ २० ।
दुष्कृतैः कर्म्मभिर्द्देही शुभैर्वा स्वयमर्ज्जितैः ।
क्लेशक्षयं पापहरं शुभङ्कर्म्म करोत्यथ ॥ २१ ।
शुभाशुभं प्राप्य नरः कर्म्माकर्म्म तथैव च ।
विद्यते विमले कर्म्मण्यमरेषु महीयते ॥ २२ ।
स्वर्गः शुभफलप्राप्तिर्निरयः पापसम्भवः ।
नैव कश्चित्प्रदाता च नाऽपहर्त्ता प्रदृश्यते ॥ २३ ।
नारद उवाच ।
यद्येवं स्वकृतङ्कर्म्म समन्वेति शुभाशुभम् ।
शुभस्येह भवेद्वृद्धिरशुभस्य क्षयोऽपि वा ॥ २४ ।
मनसा कर्म्मणा वापि तपसा चरितेन वा ।
यथा न रोहते जन्तुस्तथा त्वं वक्तुमर्हसि ॥ २५ ।
यम उवाच ।
इदं पुण्यं पवित्रञ्च अशुभानां शुभप्रदम् ।
कीर्त्तयिष्यामि ते सम्यक् पापदोषक्षयं सदा ॥ २६ ।
प्रणम्य शिरसा सम्यक् पापपुण्यकराय च ।
कर्त्तृणे जगतो नित्यं विश्वस्य जगतो ह्यहम् ॥ २७ ।
येन सृष्टमिदं सर्व्वं त्रैलोक्यं सचराचरम् ।
अनादिमध्यनिधनं दुर्विज्ञेयं सुरासुरैः ॥ २८ ।
यः समः सर्व्वभूतेषु जितात्मा शान्तमानसः ।
स पापेभ्यो विमुच्येत ज्ञानवान्सर्व्ववेदवित् ॥ २९ ।
तत्त्वार्थं वेत्ति यः सम्यक् पुरुषम्प्रकृतिं तथा ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ज्ञात्वा वा यो न मुह्येत पदमाप्नोति शाश्वतम् ॥ ३० ।
गुणागुणपरिज्ञाता ह्यचयस्य चयस्य च ।
ध्यानेनैव ह्यसंमूढ़ः स पापेभ्यः प्रमुच्यते ॥ ३१ ।
स्वदेहे परदेहे च सुखदुःखेन नित्यशः ।
विचारज्ञो भवेद्यस्तु स मुच्येतैनसा ध्रुवम् ॥ ३२ ।
अहिंस्रः सर्व्वभूतेषु तृष्णाक्रोधविवर्ज्जितः ।
शुभन्यायं सदा यश्च स पापेभ्यः प्रमुच्यते ॥ ३३ ।
प्राणायामैश्च निर्गृह्य अधः सन्धारणानि च ।
व्यवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते ॥ ३४ ।
निराशः सर्व्वतस्तिष्ठेदिष्टार्थेषु न लोलुपः ।
परीतात्मा त्यजेत्प्राणान् सर्व्वपापात्प्रमुच्यते ॥ ३५ ।
श्रद्दधानो जितक्रोधः परद्रव्यविवर्ज्जकः ।
अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते ॥ ३६ ।
गुरुशुश्रूषया युक्तस्त्वहिंसानिरतश्च यः ।
अक्षुद्रशीलस्तु नरः* स पापेभ्यः प्रमुच्यते ॥ ३७ ।
प्रशस्तानि च यः कुर्य्यादप्रशस्तानि वर्ज्जयेत् ।
मङ्गलपरमो यश्च स पापेभ्यः प्रमुच्यते ॥ ३८ ।
योऽभिगच्छति तीर्थानि विशुद्धेनान्तरात्मना ।
पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते ॥ ३९ ।
उत्थाय ब्राह्मणङ्गच्छेन्नरो भक्त्या समन्वितः ।
अभिगम्य प्रदानेन स पापेभ्यः प्रमुच्यते ॥ ४० ।

---

* अक्षुद्रशीलनरः इति पाठे छन्दोदोषः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारद उवाच ।

एतच्छ्रेयो हितञ्चैव सर्व्वेषां वै परन्तप ।
उपपन्नञ्च युक्तञ्च तत्त्वया समुदाहृतम् ॥ ४१ ।
विविधैः कारणोपायैः सम्यक्कृत्वार्थदर्शितैः ।
संशयोऽभून्मम पुरा स त्वया नाशितः प्रभो ॥ ४२ ।
ततोऽप्यल्पतरश्चेत्स्यादुपायो योगवित्तम ।
कथ्यतां मे महाभाग येन पापम्प्रणश्यति ॥ ४३ ।
दुष्करं पूर्व्वमुक्तं हि योगधर्म्मस्य साधनम् ।
पापापहरणं लोके यदन्यत्सुखसाधनम् ॥ ४४ ।
अल्पोपायकरञ्चैव सुखोपायञ्च सर्व्वशः ।
येन पापकृतान्दोषान्व्यपोहति सुदारुणान् ॥ ४५ ।
आत्मायताश्च ये नित्यं न च विस्तारविस्तरः ॥ ४६ ।
गुणैश्च विविधैर्युक्ता इहलोके परत्र च ।
कर्म्मणामशुभानाञ्च विविधोत्पत्तिजन्मनाम् ।
यः समर्थः स्फोटयितुं तन्मे ब्रूहि महातपः ॥ ४७ ।

यम उवाच ।

यथा स भगवानाह धर्म्ममेतं प्रजापतिः ।
तदहं भावयिष्यामि नमस्कृत्य स्वयम्भुवे ॥ ४८ ।
लोकानां श्रेयसोऽर्थन्तु पापानान्तु विनाशनम् ।
क्रियाकारनियोगञ्च प्रोच्यमानं निबोध मे ॥ ४९ ।
कैवल्यमभिसम्पन्ने श्रद्दधानो भवेन्नरः ।
अनन्यमानसः कुर्य्याद्यथा धर्म्मानुशासनम् ॥ ५० ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राप्नुयादीप्सितान् कामान् पापैर्मुक्तो यथासुखम्।
यः कुर्य्याद्धर्म्मसंयुक्तं विशुद्धेनान्तरात्मना॥ ५१।
यस्तु कारयते रूपं शिशुमारप्रजापतिम्।
दृष्ट्वा नमस्येत्प्रयतः स पापेभ्यः प्रमुच्यते॥ ५२।
यदा तस्य शरीरस्थं सोमं पश्येत्समाहितः।
महापातकनाशस्तु तदा तस्य विधीयते॥ ५३।
ललाटे तूत्थितं दृष्ट्वा मुच्यते च स पातकैः।
कण्ठस्थं पातकैः सर्व्वैर्हृदिस्थञ्च कृताकृतैः॥ ५४।
मनसा कर्म्मणा वाचा यत्किञ्चित्कलुषङ्कृतम्।
उदरस्थन्तु तं दृष्ट्वा मुच्यते नात्र संशयः॥ ५५।
वाङ्मनोभिः कृतानान्तु पापानां विप्र मोचणम्।
यदा लाङ्गूलकण्ठे तु स्थितं पश्येद्दिवाकरम्॥ ५६।
तदा स दुष्कृतान् सर्व्वान्विनाशयति मानवः।
यदा सोमङ्गुरुं सर्व्वं यः कुर्य्यात्तु प्रदक्षिणम्॥ ५७।
ध्यायेत त्र्यक्षयं यस्तु स पापेभ्यः प्रमुच्यते।
भृगुर्बुधः शनैश्चारो लोहिताङ्गश्च वीर्य्यवान्॥ ५८।
सौम्यरूपी यदा चन्द्रः कुरुते च प्रदक्षिणाम्।
हृदि कृत्वा तु तत्पापं यो ध्यायेदक्षरं शुचिः॥ ५९।
तदा निर्म्मलतां याति चन्द्रमाः शारदो यथा।
प्राणायामशतं कृत्वा सर्व्वपापैः प्रमुच्यते॥ ६०।
जघनस्थं शुचिर्दृष्ट्वा नरश्चन्द्रमसं मुने।
नमस्येत्प्रयतो भूत्वा सर्व्वपापैः प्रमुच्यते॥ ६१।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आर्द्रस्थमार्द्रकर्म्मा तु ध्यात्वा चाष्टशताचरम् ।
यदा चन्द्रश्च सूर्य्यश्च द्वावन्योऽन्यमपश्यतः ॥ ६२ ।
सम्पूर्णौ विमलौ सम्यग्भ्राजमानौ* स्वतेजसा ।
कृत्वा हृदि तथा पापं यो ध्यायेत्परमाव्ययम् ॥ ६३ ।
वामनं ब्राह्मणं दृष्ट्वा वाराहञ्च जलोत्थितम् ।
धरणी चोद्धृता येन सिंहञ्चापि महामुने ॥ ६४ ।
नमस्येद्वै पद्मोभक्तः स पापेभ्यः प्रमुच्यते ।
प्राणायामञ्च यः कुर्य्यात्सोऽपि पापात्प्रमुच्यते ॥ ६५ ।

इति वराहपुराणे भगवच्छास्त्रे संसारचक्रे
दशाधिकद्विशततमोऽध्यायः ।

एकादशाधिकद्विशततमोऽध्यायः ।

ऋषिपुत्त्र उवाच ।

एतच्छ्रुत्वा शुभं वाक्यं धर्म्मराजस्य नारदः ।
इमं भावेन भक्त्या च पुनर्वचनमब्रवीत् ॥ १ ।

---

* भ्राजमान इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नारद उवाच ।

समः सर्व्वेषु भूतेषु स्थावरेषु चरेषु च ।
धर्म्मराज महाबाहो पितुस्तुल्यपराक्रम ॥ २ ।
ब्राह्मणानां हितार्थाय यदुक्तं मे प्रदक्षिणम् ।
इदं श्रेयःसमाख्यानं श्रुतं श्रुतपरम्पदम् ॥ ३ ।
त्रयो वर्णा महाभाग यज्ञसामान्यभागिनः ।
शूद्रा वेदपवित्रेभ्यो ब्राह्मणैस्तु वहिष्कृताः ॥ ४ ।
यथैव सर्व्वसमता तव भूतेषु मानद ।
तथैव तेषामपि हि श्रेयो वाच्यं महामते ।
यथा कर्म्म हितं वाक्यं शूद्राणामपि कथ्यताम् ॥ ५ ।

यम उवाच ।

अहं ते कथयिष्यामि चातुर्वर्ण्यस्य नित्यशः ।
यद्धितं धर्म्मयुक्तञ्च नित्यं भवति सुव्रत ॥ ६ ।
केवलं श्रुतिसंयोगाच्छ्रद्धया नियमेन च ।
करोति पापनाशार्थमिदं वच्यामि तच्छृणु ॥ ७ ।
गावः पवित्रा मङ्गल्या देवानामपि देवताः ।
यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥ ८ ।
सौम्ये मुहूर्त्ते संयुक्ते पञ्चगव्यन्तु यः पिवेत् ।
यावज्जीवकृतात्पापात्तत्क्षणादेव मुच्यते ॥ ९ ।
लाङ्गूलेनोद्धृतं तोयं मूर्द्ध्ना गृह्णाति यो नरः ।
सर्व्वतीर्थफलम्प्राप्य सर्व्वपापैः प्रमुच्यते ॥ १० ।
प्रस्रवेन च यः स्नायाद्रोहिण्यां मानवे द्विज ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वपापकृतान्दोषान्दहत्याशु न संशयः ॥ ११ ।
धेनुस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य यो नरः ।
शिरसा प्रतिगृह्णाति स पापेभ्यः प्रमुच्यते ॥ १२ ।
ब्राह्मणस्तु सदा स्नातो भक्त्या परमया युतः ।
नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ १३ ।
उदयान्निःसृतं सूर्य्यं भक्त्या परमया युतः ।
नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ १४ ।
दध्यक्षताञ्जलीभिस्तु त्रिभिः पूजयते शुचिः* ।
तस्य भानुः प्रसन्नश्च अशुभं यत्समर्ज्जितम् ।
तस्य भानुः स संदह्य दूरीकुर्य्यात्सदा द्विज ॥ १५ ।
पावकं दधिमिश्रन्तु पात्रे औदुम्बरे स्थितम् ।
सोमाय पौर्णमास्यां हि दत्त्वा पापैः प्रमुच्यते ॥ १६ ।
अरुन्धतीं बुधञ्चैव तथा सर्व्वान्महामुनीन् ।
अभ्यर्च्य वेदविधिना तेभ्यो दत्त्वा च पावकम् ॥ १७ ।
एकाग्रमानसो भूत्वा यो नमस्येत्कृताञ्जलिः ।
किल्बिषं तस्य वै सर्व्वं तत्क्षणादेव नश्यति ॥ १८ ।
द्विजं शुश्रूषते यस्तु तर्पयित्वातिभक्तितः ।
नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ १९ ।
विषुवेषु† च योगेषु शुचिर्दत्त्वा पयो नरः ।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ॥ २० ।

---

* यस्त्रिभिः पूजयेत् शुचिरिति (क), (ख) । † विषुवत्स्वेव योगेष्विति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्राचीनाग्रान्कुशान् कृत्वा स्थापयित्वा वृषं नरः।
द्विजैः सह नमस्कृत्य सर्व्वपापैः प्रमुच्यते ॥ २१ ।
दक्षिणावर्त्तसव्येन कृत्वा प्राक्स्रोतसं नदीम्।
कृत्वाऽभिषेकं विधिवत्ततः पापात्प्रमुच्यते ॥ २२ ।*
दक्षिणावर्त्तशङ्खेन कृत्वा चैव करे जलम्।
शिरसा तद्गृहीत्वा तु विप्रो हृष्टमनाः शुचिः।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ॥ २३ ।
प्राक्स्रोतसं नदीं गत्वा नाभिमात्रजले स्थितः।
स्नात्वा कृष्णतिलैर्मिश्रा दद्यात्सप्ताञ्जलीर्नरः ॥ २४ ।
प्राणायामत्रयङ्कृत्वा ब्रह्मचारी जितेन्द्रियः।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥ २५ ।
अच्छिद्रपद्मपत्रेण सर्व्वरत्नोदकेन तु।
त्रिशो यस्तु नरः स्नायात्सर्व्वपापैः प्रमुच्यते ॥ २६ ।
अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं मुने।
कार्त्तिके मलपक्षे तु स्मृता ह्येकादशी तिथिः ॥ २७ ।
भुक्तिमुक्तिप्रदा या तु नाम्ना ख्याता प्रबोधिनी।
या सा विष्णोः परा मूर्त्तिरव्यक्तानेकरूपिणी।
सा क्षिप्ता मानुषे लोके द्वादशी मुनिपुङ्गव ॥ २८ ।
ये उपोष्यन्ति विधिवन्नारायणपरायणाः।
न तेषामशुभं किञ्चिज्जन्मकोटिकृतं मुने ॥ २९ ।

---

* एष श्लोकः (क), (ख) पुस्तकयोर्नास्ति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकादशीं समाश्रित्य पुरा पृष्टो महेश्वरः ।
वाराहरूपी धरया सर्व्वलोकहिताय वै ॥ ३० ।

धरण्युवाच ।

अस्मिन् कलियुगे घोरे नराः पापरताः प्रभो ।
ब्रह्मस्वहरणे युक्ता तथा ब्राह्मणघातकाः ॥ ३१ ।
गुरुद्रोहरता देव मित्रद्रोहरतास्तथा ।
स्वामिद्रोहरताश्चैव परदाराभिमर्शकाः ॥ ३२ ।
परद्रव्यापहारे हि संसक्ताश्च सुरेश्वर ।
अभक्ष्यभक्षणरता वेदब्राह्मणनिन्दकाः ॥ ३३ ।
दाम्भिका-भिन्नमर्य्यादा नायमस्तीति वादिनः ।
असत्प्रतिग्रहे सक्ता अगम्यागमने रताः ॥ ३४ ।
एतैश्चान्यैश्च पापैश्च संसक्ता ये नरा विभो ।
किमासाद्य गतिर्देव तेषां वद सुरेश्वर* ॥ ३५ ।

वराह उवाच ।

साधु देवि महाभागे यत्पृष्टोऽहं वरानने ।
रहस्यं ते प्रवक्ष्यामि लोकानां हितकाम्यया ॥ ३६ ।
महापातकयुक्ता ये नराः सुकृतवर्ज्जिताः ।
तेषां मया हितार्थाय निर्म्मितं तच्छृणुष्व मे ॥ ३७ ।
या सा विष्णोः परा शक्तिरव्यक्तानेकरूपिणी ।
स मर्त्यैं निर्म्मिता भूमे द्वादशी रूपधारिणी ॥ ३८ ।

---

* तेषां देव सुरेश्वर इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तामुपोष्य नरा भद्रे महापापरताश्च ये।
पुण्यपापविनिर्मुक्ता गच्छन्ति पदमव्ययम् ॥ ३९ ।
उपायोऽतः परो नान्यो विद्यते हि वसुन्धरे।
एकादशीं विना येन सर्व्वपापक्षयो भवेत् ॥ ४० ।
यथा शुक्ला तथा कृष्णा उपोष्य सा प्रयत्नतः ।
शुक्ला भक्तिप्रदा नित्यं कृष्णा मुक्तिं प्रयच्छति ॥ ४१ ।
तस्मात्सर्व्वप्रयत्नेन कर्त्तव्या द्वादशी सदा।
यदीच्छेद्वैष्णवं लोकं गन्तुं वै भूतधारिणि ॥ ४२ ।
वाचा च मनसा चैव कर्म्मणा समुपार्ज्जितम् ।
पापं मासकृतं पुंसां दहत्येकादशी कृता ॥ ४३ ।
दहन्तीह* पुराणानि भूयोभूयो वरानने ।
न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ॥ ४४ ।
यदीच्छथ नरा गन्तुं तद्विष्णोः परम्पदम् ।
न भोक्तव्यं न भोक्तव्यं तदा केशववासरे ॥ ४५ ।
ऊर्द्ध्वबाहुर्विरौम्येष प्रलापं मे शृणुष्व तम् ।
आराधयस्व विश्वेशमेकादश्यामतन्द्रितः ॥ ४६ ।
न शङ्खेन पिबेत्तोयं न हन्यान्मत्स्यसूकरौ ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ ४७ ।
स ब्रह्महा सुरापश्च स स्तेयी गुरुतल्पगः ।
एकादश्यान्तु यो भुङ्क्ते पक्षयोरुभयोरपि ॥ ४८ ।

---

* रटन्तीहेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

किं तेन न कृतं पापं दुर्वृत्तेनात्मघातिनां ।
एकादश्यां विशालाचि भुक्तं येन विजानता ॥ ४६ ।
एकादशीञ्च यः शुक्लामसमर्थ उपोषितुम् ।
तदा नक्तं प्रकर्त्तव्यं तथाऽयाचितमेव वा ॥ ५० ।
एकभक्तेन दानेन कर्त्तव्यं द्वादशीव्रतम् ।
न करोति यदा भूमे व्रतं वा दानमेव वा ॥ ५१ ।
महापातकभागी स्यात्सुगतिं नाप्नुयात्क्वचित् ।
उपवासासमर्थानां तथैव पृथुलोचने ॥ ५२ ।
एका सा द्वादशी पुण्या सोपोष्या सा प्रबोधिनी ।
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं चैतद्द्वादश द्वादशीफलम् ॥ ५३ ।
पूर्व्वाभद्रपदायोगे सैव या द्वादशी भवेत् ।
अतीव महती तस्यां सर्व्वं कृतमिहाच्चयम् ॥ ५४ ।
उत्तराभाद्रसहिता यदि सैकादशी भवेत् ।
तदा कोटिगुणं पुण्यं केशवाल्लभते फलम् ॥ ५५ ।
सकृद्देवार्च्चिते तस्यां लभते भूतधारिणि ॥ ५६ ।
यथा प्रबोधिनी पुण्या तथा यस्यां स्वपेद्धरिः ।
उपोष्या हि महाभागे अनन्तफलदा हि सा ॥ ५७ ।
शयने बोधने चैव हरेस्तु परिवर्त्तने ।
उपोष्यैव विधानेन नरो निर्म्मलतां व्रजेत् ॥ ५८ ।
तस्मात्सर्व्वप्रयत्नेन द्वादशी समुपोषयेत् ।
यदीच्छेत विशालाचि शाश्वतीं गतिमात्मनः ॥ ५६ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एकादशी सोमयुता कार्त्तिके मासि भामिनि।
उत्तराभाद्रसंयोगे अनन्तफलदा हि सा॥ ६०।
तस्यां यत्क्रियते भद्रे तदनन्तगुणं स्मृतम्॥ ६१।
एकादशी भौमयुता यदा स्याद्व्रतधारिणि।
स्नात्वा देवं समभ्यर्च्य प्राप्नोति परमम्फलम्।
प्राप्नोति सकलञ्चैव द्वादशद्वादशीफलम्॥ ६२।
जलपूर्णं तथा कुम्भं स्थापयित्वा विचक्षणः।
पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा॥ ६३।
तस्योपरि न्यसेन्मत्स्यस्वरूपन्तु* जनार्द्दनम्।
निष्कमात्र†सुवर्णेन घटितन्तु वरानने॥ ६४।
पञ्चामृतेन संस्नाप्य कुङ्कुमेन विलेपितम्।
पीतवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम्‡।
पूजयेत्कमलैर्देवि मद्भक्तः संयतेन्द्रियः॥ ६५।
मत्स्यं कूर्म्मं वराहञ्च नरसिंहञ्च वामनम्।
रामं रामञ्च कृष्णञ्च बुद्धञ्चैव च कल्किनम्॥ ६६।
एवं दशावतारांश्च पूजयेद्भक्तिसंयुतः।
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि॥ ६७।
सम्पूज्यैवमलङ्कारैर्विविधैरुपशोभितम्।
रात्रौ चोत्थापनङ्कार्य्यं देवदेवस्य सुव्रते॥ ६८।

---

* तस्य स्वरूपन्तु इति क्वचित्पाठः। † मासमात्रमिति (ख)। ‡ पीतवस्त्रयुगच्छत्र-च्छत्रोपानद्युगान्वितमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

संस्मृतः कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥ ८८ ।
एतज्ज्ञात्वा तु विद्वद्भिः पूजनीयो जनार्द्दनः ।
वेदोक्तविधिना भद्रे आगमोक्तेन वा सुधीः ॥ ८९ ।

यम उवाच ।

एतच्छ्रुत्वा महाभागा धरणी शंसितव्रता ।
समाराध्य जगन्नाथं विधिना तन्मयङ्गता ।
अतो यत्नेन वै साध्यं वैष्णवत्वं विपश्चिता ॥ ९० ।
ये वैष्णवा महात्मानो विष्णुपूजनतत्पराः ।
तेषां नैवास्त्ययं लोको यान्ति तत्परमम्पदम् ॥ ९१ ।
ये सकृद्द्वादशीमेतामुपोष्यन्ति विधानतः ।
प्रबोधनाख्यां सुधियस्ते यान्ति परमम्पदम् ॥ ९२ ।
न यमं यातनादण्डान्नरकन्न च किङ्करान् ।
पश्यन्ति द्विजशार्द्दूल इति सत्यं मयोदितम् ॥ ९३ ।
एतत्ते सर्व्वमाख्यातं यथा दृष्टं यथा श्रुतम्* ।
कथितं मे महाभाग यत्त्वया परिपृच्छितम्† ॥ ९४ ।
स्वयम्भुवा यथा प्रोक्तं गुह्याख्यानं महामुने ।
तत्ते सर्व्वं समासेन आख्यातं‡ धर्म्मवत्सल ॥ ९५ ।

इति वराहपुराणे प्रबोधिनीमाहात्म्यं नाम
एकादशाधिकद्विशततमोऽध्यायः ।

---

* यथा तत्त्वं यथा श्रुतमिति (ख), तत्रातः परं सार्द्धैकः श्लोको नास्ति । † परिपृष्टमिति साधु । ‡ व्याख्यातमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

द्वादशाधिकद्विशततमोऽध्यायः ।

नारद उवाच ।

साधु साधु महाराज सर्व्वधर्म्मविदां वर ।
त्वया तु कथिता दिव्या कथेयं धर्म्मसंहिता ॥ १ ।
अतोऽहमपि सुप्रीतस्तव धर्म्मपथे स्थितः ।
तव वाक्यानि हृष्टानि प्रोक्तानि च श्रुतानि च ॥ २ ।
त्वयाहञ्चैव राजेन्द्र पूजितश्च विशेषतः ।
गच्छामि त्वरितो लोकान्यत्र मे रमते मनः ॥ ३ ।
स्वस्ति तेऽस्तु महाराज अकम्पो भव सुव्रत ।
एवमुक्त्वा ततो यातो नारदो मुनिसत्तमः ॥ ४ ।
तेजसा द्योतयन्सर्व्वं गगनं भास्करो यथा ।
विचचार दिवं रम्याङ्कामचारी महामुनिः ॥ ५ ।
गते तस्मिंस्तु सुचिरं स राजा धर्म्मवत्सलः ।
मां दृष्ट्वा सुमनोविप्रा वाक्यैश्चित्रैश्च वन्दयन् ॥ ६ ।
कृत्वा पूजाञ्च मे युक्तां प्रियमुक्त्वा च सुव्रत ।
विसर्ज्जयामास विभुः सुप्रीतेनान्तरात्मना ॥ ७ ।
एतद्वः कथितं विप्रास्तस्य राज्ञः पुरोत्तमे ।
यथा दृष्टं श्रुतञ्चैव यथा चेहागतो ह्यहम् ॥ ८ ।

वैशम्पायन उवाच ।

तस्य तद्वचनं श्रुत्वा हृष्टपुष्टास्तपोधनाः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

केचिद्वैखानसास्तत्र केचिदासन्निरासनाः ॥ ९ ।
साधु साध्विति चैवोक्त्वा विस्मयोत्फुल्ललोचनाः ।
यायावरास्तथा चान्ये वानप्रस्थास्तथापरे ॥ १० ।
शालीनाश्च तथा केचित्कापोतीं वृत्तिमाश्रिताः ।
तथा चान्ये जगुर्वृत्तिं सर्व्वभूतदयां शुभाम् ॥ ११ ।
शिलोञ्छाश्च तथैवान्ये काष्ठान्तश्च महौजसः ।
अपाकपाचिनः केचित्पाकिनश्च क्वचित्पुनः ॥ १२ ।
नानाविधिधराः केचिज्जितात्मानस्तु केचन ।
स्थानमौनव्रताः केचित्तथान्ये जलशायिनः ॥ १३ ।
तथोर्द्ध्वशायिकाश्चान्ये तथान्ये मृगचारिणः ।
पञ्चाग्नयस्तथा केचित्केचित्पर्णफलाशिनः ॥ १४ ।
अब्भक्षा वायुभक्षाश्च तथान्ये शाकभक्षिणः ।
अतोऽन्येऽप्यतितीव्रं वै तपश्चैव प्रपेदिरे ॥ १५ ।
तपसोऽन्यत्र चास्तीति चिन्तयित्वा पुनः पुनः ।
जन्मनो मरणाच्चैव केचिद्वीरा महर्षयः ।
त्यक्त्वा धर्म्ममधर्म्मञ्च शाश्वतीं धियमाश्रिताः ॥ १६ ।
श्रुत्वा चैव कथामेतामृषयो दिव्यवर्चसः ।
जगृहुर्नियमांस्तांस्तान् भयहेतोरनिन्दिताः ॥ १७ ।
नाचिकेतोऽपि धर्म्मात्मा पुत्त्रं दृष्ट्वा तपोधनम् ।
प्रीत्या परमया युक्तो धर्म्ममेवान्वचिन्तयत् ॥ १८ ।
वेदार्थममितं विष्णुं शुद्धं चिन्मयमीश्वरम् ।
चिन्तयामास धर्म्मात्मा तपः परममाश्रितः ॥ १९ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इदन्तु परमाख्यानं भगवद्भक्तिकारकम्।
शृणुयाच्छ्रावयेद्वापि सर्व्वकामानवाप्नुयात् ॥ २० ।

इति वराहपुराणे प्रागितिहासे संसारचक्रोपाख्याने प्रबोधनीयं
नाम द्वादशाधिकद्विशततमोऽध्यायः।

त्रयोदशाधिकद्विशततमोऽध्यायः।

सूत उवाच।

पुरा देवैर्विनिहते सङ्ग्रामे तारकामये।
अत्युच्छ्रिते प्रतिबले दानवानाम्बले तथा ॥ १ ।
लब्धपदे सहस्राक्षे क्षीणशत्रौ गतास्रदे।
सम्यक्प्रसूतिमापन्ने त्रैलोक्ये सचराचरे॥ २ ।
शृङ्गे चैवाचलेन्द्रस्य मेरोः सर्व्वहिरण्मये।
मणिविद्रुमविद्धे च विपुले पङ्कजासने ॥ ३ ।
सुखोपविष्टमेकाग्रं स्थिरचित्त*ङ्क्षतेक्षणम्।
निवृत्तकार्य्यं मुदितं सूर्य्यवैश्वानरद्युतिम् ॥ ४ ।
प्रणम्य मूर्द्ध्ना चरणावुपगृह्य समाहितः।
ब्रह्माणं परिपप्रच्छ कुमारः सनत्पूर्व्वकः† ॥ ५ ।

---

* स्थितचित्तमिति (क)। † सन इति नकारस्य गुरुत्वाच्छन्दोदोषः।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सनत्कुमार उवाच ।

भगवञ्छ्रोतुमिच्छामि पुराणमृषिसंस्तुतम् ।
पुराणन्तु महाभाग त्वत्तस्तत्त्वविदां वर ॥ ६ ।
कथमुत्तरगोकर्णं दक्षिणञ्च कथं विभो ।
शृङ्गेश्वरस्य परमङ्कथं सम्यक् प्रतिष्ठितम् ॥ ७ ।
क्षेत्रस्य किम्प्रमाणं स्यात्किञ्च तीर्थफलं स्मृतम् ।
कथं पशुपतिस्तत्र भगवान्मृगरूपधृक् ॥ ८ ।
सर्व्वैस्त्वत्प्रमुखैर्देवैः कथमासादितम्पुनः ।
मृगरूपङ्कथञ्चास्य शरीरं क्व प्रतिष्ठितम् ॥ ९ ।
यथा यत्र* च यस्तत्र विधिः सम्यगनुष्ठितः ।
तत्सर्व्वं निखिलेनाशु ब्रूहि मे वाग्विदां वर ॥ १० ।
एवमुक्तः स भगवान्ब्रह्मा ब्रह्मविदां वरः ।
उवाच तस्मै पुत्राय गुह्यमेतत्पुरातनम् ॥ ११ ।

ब्रह्मोवाच ।

शृणु वत्स महाभाग यथातत्त्वं ब्रवीमि ते ।
पुराणमेतद्ब्रह्मर्षे सरहस्यं यथाश्रुतम् ॥ १२ ।
अस्ति भूधरराजस्य मन्दरस्योत्तरे शुची ।
मुञ्जवान्नाम शिखरी नन्दनोपवनद्युतिः ॥ १३ ।
वज्रस्फटिकपाषाणः प्रवालाङ्कुरशर्क्करः ।
नीलामलशिलावर्णो गुहानिर्झरकन्दरः ॥ १४ ।

---

* यथा यत्र च वने इति (ख) ; यथा तत्र चयस्तत्रेति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विचित्रकुसुमोपेतैर्लतामञ्जरिधारिभिः।
रेजे यः प्रांशुभिः शृङ्गैरुल्लिखद्भिरिवाम्बरम्॥ १५।
दर्य्यस्तत्राधिकं रेजुर्नानाधातुपरिस्रवैः।
शिलीन्ध्रकुसुमोपेताश्चित्रिता इव सर्व्वतः॥ १६।
तेऽत्र केतकिखण्डाश्च कुन्दखण्डाश्च पुष्पिताः।
उन्मीलिता इवाभान्ति धातकीवनराजिभिः॥ १७।
भिन्नेन्द्रनीलविमलैर्धौतैः प्रस्रवणाम्बुभिः।
चित्रैः कुसुमसंछन्नैः शिलाप्रस्तरविस्तरैः।
शक्रचापनिभै रम्यैः कुवेरभवनद्युती।
तस्मिन्नगवरे रम्ये महोरगनिषेविते॥ १८।१९।
क्रीड़द्भिर्दैवमिथुनैर्नृत्यद्भिश्चाप्सरोगणैः।
कूजद्भिः शिखिभिर्मत्तैः सेविते च नगोत्तमे॥ २०।
कह्लारकुसुमोपेते हंससारससेविते।
प्रसन्नसलिलाकीर्णे सरैः*रुत्फुल्लपङ्कजैः॥ २१।
गजयूथानुकीर्णाभिर्जुष्टाभिर्मृगपक्षिभिः†।
सेविताभिर्मुनिगणैः सरिद्भिरुपशोभिते॥ २२।
किन्नरोद्गीतकुहरे परपुष्टनिनादिते।
विद्याधरशताकीर्णे देवगन्धर्व्वसेविते॥ २३।
धारापातैश्च तोयानां विस्फुलिङ्गैः सहस्रशः।
प्रज्वालितातुले शृङ्गे रम्ये हरितशाद्वले॥ २४।

---

* सरैरिति आर्षं, सरोभिरिति साधु। † मृगपक्षिण इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सर्व्वर्तुकवनोद्याने पुष्पाकरसुशोभिते ।
यक्षकिम्पुरुषावासे गुह्यकानामथाश्रये ॥ २५ ।
तस्मिन् गिरिवरे रम्ये सेवितव्ये सुशोभने ।
धर्म्मारण्ये तपःक्षेत्रे मुनिसिद्धनिषेविते ॥ २६ ।
वरदस्तत्र भगवान् स्थाणुर्नाम महेश्वरः ।
सर्व्वामरगुरुर्देवो नित्यं सन्निहितः प्रभुः ॥ २७ ।
भक्त्यानुकम्पी* स श्रीमान् गिरीन्द्रसुतया सह ।
स ह्यध्यास्ते गिरिवरं† पार्षदैश्च गुहेन च ॥ २८ ।
विमानयायिनः सर्व्वे तं देवमजमव्ययम् ।
आजग्मुः सेवितुं देवा वरेण्यमजमव्ययम् ।
अन्ये देवनिकायाश्च सेवितुं प्रपतन्ति‡ तम् ॥ २९ ।
ततस्त्रेतायुगे काले नन्दी नाम महामुनिः ।
आरिराधयिषुः शर्व्वं§न्तपस्तेपे सुदारुणम् ॥ ३० ।
ग्रीष्मे पञ्चतपास्तिष्ठेत् शिशिरे सलिलाश्रयः ।
ऊर्द्ध्वबाहुर्निरालम्बस्तोयाऽनिलहुताशनैः ॥ ३१ ।
व्रतैश्च विविधैरुग्रैस्तपोभिर्नियमैस्तथा ।
जपपुष्पोपहारैश्च काले काले मुनिः सदा ॥ ३२ ।
शङ्करं विधिवद्भक्त्या सोऽर्च्चयद्द्विजपुङ्गवः ।
उग्रेण तपसात्मानं योजयामास सुव्रतः ॥ ३३ ।

---

* भक्तानुकम्पीति (ग) । † गिरिवरे इति (ग) । ‡ प्रयतन्तीति (क), (ख), तत्तु आर्ष, प्रयतन्ते इति साधु । § सर्व्वमिति (ग), एवं परत्रापि सर्व्व इति ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

काष्ठभूतो यदा विप्रः कृशो धमनिसन्ततः ।
चामोऽभूत्कृष्णवर्णश्च ततः प्रीतश्च शङ्करः ॥ ३४ ।
सम्यगाराधितो भक्त्या नियमेन च तोषितः ।
तदात्मदर्शनम्प्रादात्स मुनेर्वृषभध्वजः ॥ ३५ ।
उक्तवांश्च मुनिं शर्व्वश्चक्षुर्दिव्यं ददामि ते ।
अदृश्यं पश्य मे रूपं वत्स प्रीतोऽस्मि ते मुने ॥ ३६ ।
यत्पश्यन्तीह विद्वांसो रूपमप्रतिमौजसम् ।
सहस्रसूर्य्यकिरणं ज्वालामालिनमूर्ज्जितम् ॥ ३७ ।
बालार्कमण्डलाकारं प्रभामण्डलमण्डितम्* ।
जटाजूटतटाश्लिष्टं चन्द्रालङ्कृतशेखरम् ॥ ३८ ।
जगदालोचनं श्रीमत्प्रदीप्तत्रयलोचनम् ।
प्रादेशमात्रं रुचिरं शतशीर्षं शतोदरम् ॥ ३९ ।
सहस्रबाहुचरणं सहस्राक्षिशिरोमुखम् ।
अणीयसामणीयांसं बृहद्बृहद्बृहत्तरम् ॥ ४० ।
अक्षमालापवित्राङ्गं कमण्डलुकरोद्यतम् ।
सिंहचर्म्माम्बरधरं व्यालयज्ञोपवीतिनम् ॥ ४१ ।
दृष्ट्वा देवं महादेवं हृष्टरोमा महातपाः ।
प्राञ्जलिः प्रणतो भूत्वाऽस्तौदब्रह्म सनातनम् ॥ ४२ ।
नमो धात्रे विधात्रे च शम्भवे वरदाय च ।
जगल्लोकत्रिनेत्राय शङ्कराय शिवाय च ॥ ४३ ।

* प्रभामण्डलसेवितमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भवाय भवगोप्त्रे च मुनये कृत्तिवाससे ।
नीलकण्ठाय भीमाय भूतभव्यभवाय च ॥ ४४ ।
लम्बभ्रुवे करालाय हरिनेत्राय मीढुषे* ।
कपर्द्दिने विशालाय मुञ्जकेशाय धीमते ॥ ४५ ।
शूलिने पशुपतये विभवे स्थाणवे तथा ॥
गणानां पतये स्रष्ट्रे सङ्क्षेप्त्रे भीषणाय च ॥ ४६ ।
सौम्याय सौम्यतपसे भीमाय त्र्यम्बकाय च ।
प्रेतवासनिवासाय रुद्राय वरदाय च ॥ ४७ ।
कपालमालिने तस्मै हरिश्मश्रुधराय च ।
भक्तप्रियाय सततं नमोऽस्तु परमात्मने ॥ ४८ ।
एवं नन्दी भवं स्तुत्वा नमस्कृत्य च सर्व्वशः ।
प्रणम्य शिरसा देवं पुनः पुनरवन्दत ॥ ४९ ।
ततस्तु भगवान्प्रीतस्तस्मै विप्राय शङ्करः ।
उवाच च वचः साक्षात्तमृषिं† वरदः प्रभुः ॥ ५० ।
वरान्वृणीष्व विप्रेन्द्र यानिच्छसि महामुने ।
तांस्ते सर्व्वान् प्रयच्छामि दुर्ल्लभानपि मारिष ॥ ५१ ।
प्रभुत्वममरत्वं वा शक्रत्वमिति वा प्रभो ।
ब्रह्मत्वं लोकपालत्वमपवर्गमथापि वा ॥ ५२ ।
अथाष्टगुणमैश्वर्य्यं गाणपत्यमथापि वा ।
यदिच्छसि मुने शीघ्रं तद्ब्रूहि द्विजपुङ्गव ॥ ५३ ।

* मील्हुषे इति (क), (ख) । † वाचोवाच वचः साक्षात्तमृषिमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

इत्युक्तोऽसौ भगवता शर्व्वेण मुनिपुङ्गवः ।
प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥ ५४ ।
न प्रभुत्वं न देवत्वं नेन्द्रत्वमपि वा प्रभो ।
ब्रह्मत्वं लोकपालत्वं नापवर्गं वरप्रद ॥ ५५ ।
नैवाष्टगुणमैश्वर्य्यं गाणपत्यं न च प्रभो ।
स्पृहये देवदेवेश प्रसन्ने त्वयि शङ्कर ॥ ५६ ।
यदि प्रीतोऽसि भगवन्ननुक्रोशतया मम ।
अनुग्राह्यो ह्ययं देव त्वयावश्यं सुराधिप ॥ ५७ ।
यथान्ये न* भवेद्भक्तिस्त्वत्तो नित्यं महेश्वर ।
तथाहं भक्तिमिच्छामि सर्व्वभूताशये त्वयि ॥ ५८ ।
यथा च न भवेद्विघ्नं† तपस्यानिरतस्य मे ।
कोटिजप्येन रुद्राणामाराधनपरस्य च ॥ ५९ ।
एतत्तु वचनं श्रुत्वा नन्दिनः स महेश्वरः ।
प्रहस्योवाच तं प्रीत्या ततो मधुरया गिरा ॥ ६० ।
प्रीतोऽस्म्युत्तिष्ठ विप्रर्षे तप्यमानेन सुव्रत ।
आराधितश्च भक्त्याहं त्वया शुद्धेन चेतसा ॥ ६१ ।
पर्य्याप्तं ते महाभाग तपः कर्त्तुं तपोधन ।
निवर्त्तयति मां वत्स मत्पादाराधने रतः ॥ ६२ ।
जप्ता ते त्रिगुणा कोटी रुद्राणां पुरतो मम ।
पूर्णं वर्षसहस्रञ्च तपस्तीव्रं महामुने ॥ ६३ ।

---

* यथा नान्ये इति (ग, ; अन्ये इति आर्षमन्यस्मिन्निति साधु । † विघ्न इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

न कृतं यत्पुरा देवैर्नासुरैर्ऋषिभिर्न च ।
कृतं सुमहदाश्चर्य्यं त्वया कर्म्म सुदुष्करम् ॥ ६४ ।
सङ्क्षोभितमिदं सर्व्वं त्रैलोक्यं सचराचरम् ।
आगमिष्यन्ति ते* द्रष्टुं देवाः सर्व्वे सवासवाः ॥ ६५ ।
अक्षय्यश्चाव्ययश्च त्वं अतर्क्यः ससुरासुरैः ।
दिव्यतेजोवपुः श्रीमान्दिव्याभरणभूषितः ॥ ६६ ।
मत्तुल्यो मत्प्रभावश्च त्वमेकः ससुरासुरैः ।
मद्रूपधारी मत्तेजास्त्र्यक्षः सर्व्वगुणोत्तमः ।
भविष्यसि न सन्देहो देवदानवपूजितः ॥ ६७ ।
अनेनैव शरीरेण जरामरणवर्ज्जितः ।
दुष्प्राप्येयमवाप्ता ते देवैर्गाणेश्वरी गतिः ॥ ६८ ।
पार्षदानां वरिष्ठस्त्वं मामकानां द्विजोत्तम ।
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः ॥ ६९ ।
प्राप्तमष्टगुणं सत्यमैश्वर्य्यं ते तपोधन ।
द्वितीयां मे तनुं त्वान्तु नमस्यन्ति च देवताः ॥ ७० ।
अद्यप्रभृति देवाग्र्य देवकार्य्येषु सर्व्वतः ।
प्रभुस्त्वं भविता लोके मत्प्रसादान्मुनीश्वर ॥ ७१ ।
त्वामेवाभ्यर्च्चयिष्यन्ति सर्व्वभूतानि सर्व्वतः ।
मत्तः समभिवाञ्छन्ति प्रसादम्पार्षदाधिप ॥ ७२ ।
वरान्वरार्थिनां दाता विधाता जगतः सदा ।
भविष्यसि च धर्म्मज्ञ भीतानामभयप्रदः ॥ ७३ ।

---

* ते इति कर्म्मणि षष्ठी, त्वामित्यर्थः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु।
नावयोरन्तरङ्किञ्चिदम्बरानिलयोरिव॥ ७४।
द्वारे तु दक्षिणे नित्यं त्वया स्थेयङ्गणाधिप।
वामे तु विभुना चापि महाकालेन सर्व्वदा॥ ७५।
प्रतीहारो भवानद्य सर्व्वदा त्रिदशोत्तमः।
शिरो मे रक्षतु भवांन्महाकालोऽपि मे गणः॥ ७६।
न वज्रेण न दण्डेन न चक्रेण न चाग्निना।
कश्चिच्छक्नोति वै बाधां कर्त्तुं वै भुवनत्रये॥ ७७।
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
त्वामेव संश्रयिष्यन्ति मद्भक्ताः पुरुषाश्च ये॥ ७८।
त्वयि तुष्टे ह्यहन्तुष्टः कुपिते कुपितस्त्वहम्।
त्वत्तः प्रियतरो नास्ति ममान्यो द्विजपुङ्गव॥ ७९।
एवं तस्य वरान्दत्त्वा प्रीतः स्वयमुमापतिः।
उवाच भूयः स्पष्टेन स्वरेणाम्बरचारिणा॥ ८०।
आगतान्विद्धि सर्व्वान्वै त्रिदशान् समरुद्गणान्।
दिष्ट्या च भद्रन्ते कृतकृत्यश्च साम्प्रतम्॥ ८१।
यदीरितं मया वत्स वरम्प्रतिवचस्त्वयि।
प्रविष्टं न श्रुतिपथं दिवि सर्व्वदिवौकसाम्॥ ८२।
नारायणं पुरस्कृत्य सेन्द्रास्ते समरुद्गणाः।
प्रेमार्थं चागमिष्यन्ति वरार्थं तपसाऽमराः॥ ८३।
यक्षविद्याधरगणाः सिद्धगन्धर्व्वपन्नगाः।
मुनयश्च महात्मानस्तपोलब्धाः सहस्रशः॥ ८४।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ते बुद्ध्वा त्वद्गतामृद्धिमग्रतप्ताः परमेर्ष्यया ।
तपांसि विविधान् पुत्र विविधान्नियमांस्तथा ।
चर्तुं समभिवाञ्छन्ति सदाभ्यासे वरार्थिनः ।
वरदं मामभिज्ञाय मेरौ मौञ्जावति स्थितम् ॥ ८५।८६ ।
अत्रैते यावदागम्य न मां पश्यन्ति मानवाः ।
तावदेव इतः शीघ्रङ्गमिष्यामि महामुने ॥ ८७ ।
अद्य ते तु मया सर्व्वे देवा ब्रह्मपुरोगमाः ।
द्रष्टव्याश्चानुमन्तव्या मत्तोऽनुग्रहकाङ्क्षिणः ॥ ८८ ।
अभिप्रायञ्च सर्व्वेषां जानामि द्विजसत्तम ।
अनुगृह्य करैस्तैश्च तत्रैवान्तरधीयत ॥ ८९ ।

इति वराहपुराणे भगवच्छास्त्रे गोकर्णेश्वरमाहात्म्ये त्रयोदशाधिकद्विशततमोऽध्यायः ।

चतुर्दशाधिकद्विशततमोऽध्यायः ।

ब्रह्मोवाच ।

अन्तर्हिते ततस्तस्मिन्भवे वै भूतनायके ।
बभूव दिव्यः स तदा नन्दी गणचमूपतिः ॥ १ ।
चतुर्भुजस्त्रिनयनो दिव्यसंस्थानसंस्थितः ।
दिव्यवर्णवपुश्चारुर्दिव्यागुरुसमन्वितः ॥ २ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रिशूली परिघी दण्डी पिनाकी मौञ्जमेखली ।
शुशुभे तेजसा तत्र द्वितीय इव शङ्करः ॥ ३ ।
आस्थितः पादमाक्रम्य आह्वयन्निव स द्विजः ।
त्रिभिः क्रमैः क्रान्तुमनास्त्रिविक्रम इवोद्यतः ॥ ४ ।
तं दृष्ट्वा खचराः सर्व्वा देवताः परिशङ्किताः ।
आख्यातुं पुरुहूताय सम्भ्रान्ताः प्रययुर्दिवम् ॥ ५ ।
तेभ्यः श्रुत्वा सहस्राक्षः सर्व्वे चान्ये दिवौकसः ।
विषादम्परमङ्गत्वा चिन्तामापेदिरे भृशम् ॥ ६ ।
अयङ्कश्चिद्वरं लब्ध्वा उमाकान्तान्महेश्वरात् ।
अत्यूर्ज्जितबलः श्रीमांस्त्रैलोक्यम्प्राप्स्यति ध्रुवम् ॥ ७ ।
यादृशोऽस्य महोत्साहस्तेजोबलसमन्वितः ।
नूनमेष महासत्त्वो हरेत्स्थानं दिवौकसाम् ॥ ८ ।
यावच्चैवौजसा नाकमसौ चङ्क्रमते प्रभुः ।
प्रसादयामो वरदं तावदेव महेश्वरम् ॥ ९ ।
एवमुक्त्वा तु ते तत्र मया सह सुरोत्तमाः ।
गिरिं मौञ्जवतं शृङ्ग*माजग्मुर्देवनिर्म्मितम् ॥ १० ।
विधाता भगवान्विष्णुः प्रभुस्त्रिभुवनेश्वरः ।
अभ्यधावंस्ततः सोऽथ स हि जानाति हृद्गतम् ।
कृतेन तेन विबुधाः पश्यन्ति मुनयश्च ते ॥ ११ ।
ततः स भगवान्विष्णुः सहदेवः सधातृकः ।

---

* गिरेर्मौञ्जवतः शृङ्गमेवं कृते तु साधु स्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

जगाम तत्र यत्रासौ नन्दी तिष्ठति देववत् ॥ १२ ।

नन्द्युवाच ।

सफलं जीवितं मेऽद्य सफलश्च परिश्रमः ।
यन्मे दृष्टः सुराध्यक्षः सर्व्वलोकगुरुर्हरिः ॥ १३ ।
पर्य्याप्तं तन्ममाद्येह* कृतकृत्योऽस्मि तेन वै ।
यच्च मे प्रभुरव्यग्रः प्रीतः पापहरो हरः ॥ १४ ।
विधाय पार्षदत्वं मे वरानिष्टान्ददौ शिवः ।
परो मेऽनुग्रहः सोऽत्र पूतोऽस्मि खलु साम्प्रतम् ॥ १५ ।
यच्चोक्तं विधिना वाक्यं देवान् प्रति महात्मना ।
मामुद्दिश्य हितं तथ्यं तथैव च न चान्यथा ॥ १६ ।
यन्मां देवर्षयः प्रीत्या समागत्य प्रियंवदाः ।
तेनास्मि परमप्रीत आदृतः परमेष्ठिना ॥ १७ ।

देवा ऊचुः ।

वयं तं वरदं देवं द्रक्ष्यामस्ते वरप्रदम् ।
तवैष तपसा तुष्टः स्वयमत्यचताङ्गतः ॥ १८ ।
इत्युक्तवन्तस्ते देवाः पुनरूचुर्द्विजोत्तमम् ।
कुत्र द्रक्ष्यामहे देवं भगवन्तं कपालिनम् ॥ १९ ।

नन्द्युवाच ।

अनुगृह्य तु मां देवस्तत्रैवादर्शनङ्गतः ।
न जाने कुत्र वा देवं कुत्रास्ते तद्गवेष्यताम् ॥ २० ।

---

* ममाचक्ष्वेति (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

सनत्कुमार उवाच।

किमाह नन्दिनं देवो येनासौ नोक्तवान् प्रभुम्।
तन्मे कथय देवेश गुह्यङ्किञ्चास्ति शूलिनः॥ २१।

ब्रह्मोवाच।

यदुक्तवान्महेशानो नाख्येयोऽस्मि सुरान् प्रति।
किमुक्तवान्महादेवो नन्दिनं तच्छृणुष्व मे॥ २२।

ईश्वर उवाच।

अस्ति कश्चित्समुद्देशः चितेः सिद्धोऽद्रिसङ्कटः।
पार्श्वे हिमवतः पुण्ये तपोवनगुणैर्युतः॥ २३।
तत्र श्लेष्मातको नाम वसते पन्नगोत्तमः।
सोऽनुग्राह्यो मयावश्यं तपसा दग्धकिल्बिषः॥ २४।
तदभ्यासे च रुचिरं न चासौ वानराश्रयः।
तस्य नाम्ना च तत्स्थानं दिव्यं चिरतपोभृतम्* ॥ २५।
श्लेष्मातकवनं नाम पुण्यशीलशिलोच्चयम्।
मृगरूपेण चरता तत्र वै त्रिदशा मया।
द्रष्टव्याः सञ्जिघृक्षन्तः खिन्नाश्चान्वेषणे मम॥ २६।
नाख्यातव्यं त्वया तेषां देवताप्सरसामिदम्।
अनुगृह्य वरैस्तैश्च तत्रैवान्तरधीयत॥ २७।
विद्योतयन्दिशः सर्वास्त्रिदशैः परिवारितः।
बालुकेन्दुनिभं दिव्यमर्चितं दिव्यविन्दुभिः।

---

* चिरतपोभृशमिति (क), (ख)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

कामगं रथमारुह्य महेन्द्रः समरुद्गणः ।
आयातः शैलपृष्ठन्तमोजसा पूरयन्निव ॥ २८।२९ ।
वरदो गणवृत्तश्च वरुणो यादसाम्पतिः ।
वज्रस्फटिकचित्रेण विमानेनातितेजसा ॥ ३० ।
तप्तकाञ्चनवर्णेन रत्नचित्रेण भास्वता ।
विमानेनागतः शृङ्गे द्योतयन्वै धनाधिपः ।
विमानशतकोटीभिरागतो यक्षराक्षसैः ॥ ३१ ।
श्रीमद्भिर्बहुभिर्दिव्यैर्विमानैः सूर्य्यसन्निभैः ।
अधिष्ठितः सुकृतिभिः प्रायाद्वैवस्वतोपमः ॥ ३२ ।
चन्द्रादित्यौ ग्रहाः सर्व्वे समग्रमृक्षमण्डलम् ।
विमानैरग्निसूताभैराजग्मुः खान्महीधरम् ॥ ३३ ।
रुद्रास्त्वेकादशायाताः सूर्य्या द्वादश एव तु ।
आगतावश्विनौ देवौ मौञ्जवन्तं महागिरिम् ॥ ३४ ।
विश्वेदेवाश्च साध्याश्च गुरुश्च तपसान्वितः ।
संछाद्यैरावतपथं सहसाभ्याययुर्द्रुतम् ॥ ३५ ।
स्कन्दश्चैव विशाखश्च भगवांश्च विनायकः ।
सम्प्राप्तस्तङ्गिरिवरं मयूरशतनादितम् ॥ ३६ ।
नारदस्तुम्बुरुश्चैव विश्वावसुपरावसू ।
हाहाहूहूस्तथा चान्ये सर्व्वे गन्धर्व्वसत्तमाः ॥ ३७ ।
वैहायसैर्यानवरैर्विविधैर्वासवाज्ञया ।
अनिलश्चानलश्चैव धर्म्मः सत्यो ध्रुवोऽपरः ॥ ३८ ।
देवर्षयश्च सिद्धाश्च यक्षा विद्याधरास्तथा ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गुह्यकाश्च महात्मानः सर्व्वं एव समागताः ॥ ३९ ।
गन्धकाली घृताची च बुद्बा गौरी तिलोत्तमा ।
उर्व्वशी मेनका रम्भा पञ्चस्था च तथापरा ॥ ४० ।
एताश्चान्याश्च तच्छैलमाजग्मुर्दैवयोषितः ।
पुलस्त्योऽत्रिर्मरीचिश्च वसिष्ठो भृगुरेव च ॥ ४१ ।
कश्यपः पुलहश्चापि विश्वामित्रोऽथ गौतमः ।
भारद्वाजोऽग्निवेश्यश्च तथा वृद्धपराशरः ॥ ४२ ।
मार्कण्डेयोऽङ्गिरा गर्गः संवर्त्तः क्रतुरेव च ।
मरीचिर्जमदग्निश्च भार्गवश्चयवनस्तथा ॥ ४३ ।
नियोगान्मम विष्णोश्च शक्रस्य त्रिदिवसतेः ।
सिन्धुश्च पुरुषश्चैव सरयूश्च महानदी ॥ ४४ ।
ताम्रारुणा चारुभागा वितस्ता कौशिकी तथा ।
पुण्या सरस्वती कोका नर्म्मदा वाहुदा तथा ॥ ४५ ।
शतद्रुश्च विपाशा च गण्डकी च सरिद्वरा ।
गोदावरी च वेणी च तापी च सरिदुत्तमा ॥ ४६ ।
करतोया च शीता च तथा चीरवती नदी ।
नन्दा च परनन्दा च तथा चर्म्मखती नदी ॥ ४७ ।
पर्णाशा देविका चैव वितस्ता च तथापरा ।
सिन्धुश्च पुरुषश्चैव प्रभासः सोमएव च ॥ ४८ ।
लोहितश्चाययुस्तत्र* गङ्गासागरएव च ।

---

* लोहितश्चापयुत्तश्चेति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS.

अन्यानि चापि मेदिन्यां तीर्थान्यायतनानि च ॥ ४९ ।
निजस्वरूपाख्याजग्मुस्तत्र पुण्यान्यनेकशः ।
उपागताः सुरेन्द्रस्य नियोगादुत्तमर्ङ्गिरिम् ॥ ५० ।
शैलोत्तमो महामेरुः कैलासो गन्धमादनः ।
हिमवान्हेमकूटश्च निषधश्च महागिरिः ॥ ५१ ।
विन्ध्यो महेन्द्रः सह्यश्च मलयो दर्दुरस्तथा ।
माल्यवांश्चित्रकूटश्च तथा द्रोणः शिलोच्चयः ॥ ५२ ।
श्रीपर्व्वतो लतावेष्टः पारियात्रश्च शैलराट् ।
आगताः सर्व्वएवैते शैलेन्द्राः काननौकसः ॥ ५३ ।
सर्व्वे यज्ञाः सर्व्वविद्या वेदाश्चत्वार एव च ।
धर्म्मः सत्यं दमः स्वर्गः कपिलश्च महानृषिः ॥ ५४ ।
वासुकिश्च महाभागः अमृताशी भुजङ्गराट् ।
ज्वलत्फणसहस्रेण अनन्तश्च धराधरः ॥ ५५ ।
फणीन्द्रो धृतराष्ट्रश्च किर्म्मीराङ्गश्च नागराट् ।
अम्भोधरश्चेशः* श्रीमान्नागराजो महाद्युतिः ॥ ५६ ।
अर्व्वुदो न्यर्व्वुदबलस्तथा चक्षुःश्रवाधिपः ।
विद्युज्जिह्वो द्विजिह्वेन्द्रः† शङ्खवर्च्चो महाद्युतिः ॥ ५७ ।
ख्यातस्त्रिभुवने धीमान्नहुषो निमिषेश्वरः ।
विरोचनसुतः सत्यस्फुटामणिशतैश्चितः ॥ ५८ ।
फणाशतधरो रूपी भूरिशृङ्ग इवाचलः ।
अरिमिजयसंयुक्तः प्रज्ञावान् भुजगेश्वरः ॥ ५९ ।

* अम्भोधरश्च सः इति (ख), (ग) । † विद्युन्मेघः सुजिह्वेन्द्र इति (ख), (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

विनती नागराजश्च कम्बलाश्वतरौ तथा।
भुजगाधिपतिर्वीर एलापत्रस्तथैव च ॥ ६० ।
उरगानामधिपती कर्कोटकधनञ्जयौ।
एवमाद्याः समायाता भुजगेन्द्रा महाबलाः ॥ ६१ ।
अहोरात्रे तथा पक्षा मासाः संवत्सरास्तथा।
द्यौर्मेदिनी दिशश्चैवं त्रिदिशश्च समागताः ॥ ६२ ।
ततश्चैवागतैर्देवैर्यक्षैः सिद्धैश्च सर्वशः।
अपूर्य्यत गिरेः शृङ्गं वेलाकाले यथोदधिः ॥ ६३ ।
तस्मिन्देवसमाजे तु रम्ये शैलेन्द्रमूर्द्धनि।
पुष्पाणि मुमुचुस्तत्र तरवो ह्यनिलाहिताः ॥ ६४ ।
प्रगीता देवगन्धर्व्वाः प्रनृत्ताप्सरसोगणाः।
पक्षिणः सम्प्रहृष्टाश्च कूजन्ति मधुरं तदा ॥ ६५ ।
पुण्यगन्धाः सुखस्पर्शास्तत्र वान्ति च वायवः।
एवमागत्य ते सर्व्वे देवा विष्णुपुरोगमाः ॥ ६६ ।
श्रिया ज्वलन्तन्ददृशुर्नन्दिनं पुरतः स्थितम्।
स च तानागतान्दृष्ट्वा गन्धर्व्वाप्सरसाङ्गणान् ॥ ६७ ।
स हि तान्देवराजेन सार्द्धमन्यैश्च दैवतैः।
मूर्द्ध्ना प्रणम्य चरणौ प्राञ्जलिः प्रयतात्मवान् ॥ ६८ ।
सम्भ्रान्तः सहसा तेभ्यो नमस्कर्त्तुम्प्रचक्रमे।
नमस्कृत्य च तान् सर्व्वान् स्वागतानभिभाष्य च ॥ ६९ ।
अर्घ्यपाद्यादिभिः शीघ्रमासनैश्च न्यमन्त्रयत्।
प्रणिधानेन तस्यार्थं श्रुत्वा तत्प्रतिपूजयेत् ॥ ७० ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।
साध्या विश्वे सगन्धर्व्वा गुह्यकाश्च प्रपूजयेत् ॥ ७१ ।
विश्वावसुर्हाहाहूहू तथा नारदतुम्बुरौ ।
चित्रसेनादयः सर्व्वे गन्धर्व्वास्तमपूजयन् ॥ ७२ ।
तं वासुकिप्रभृतयः पन्नगेन्द्रा महौजसः ।
सौम्यमभ्यर्च्चयन्ति स्म दृष्ट्वा नन्दीश्वरं तथा ॥ ७३ ।
सिद्धचारणसङ्घाश्च विद्याश्चाप्सरसाङ्गणाः ।
सत्कृतं देवदेवेन गणास्तमभिपूजयन् ॥ ७४ ।
यक्षविद्याधराश्चैव ग्रहाः सागरपर्व्वताः ।
सिद्धा ब्रह्मर्षयश्चैव गङ्गाद्याः सरितस्तथा ।
आशिषः प्रददुस्तस्य सर्व्व एव मुदान्विताः ॥ ७५ ।

देवा ऊचुः ।

स सुप्रीतोऽस्तु ते* देवः सदा पशुपतिर्मुने ।
सर्व्वत्र चाप्रतिहता गतिश्चास्तु तवानघ ॥ ७६ ।
भवान्देवैस्तु वा न स्यादत ऊर्द्धं द्विजोत्तम ।
निरामयोऽमृतीभूतश्चरिष्यति विभुः सुखी ॥ ७७ ।
लोकेषु सप्तसु विभो त्र्यम्बकेन सहाच्युत ।
इत्युक्तस्त्रिदशैर्नन्दी पुनस्तान् प्रत्युवाच ह ॥ ७८ ।

नन्दिकेश्वर उवाच ।

यद्भवद्भिः प्रियं सर्व्वैः प्रीतिमद्भिः सुरोत्तमैः ।

---

* सुसुप्रीतोऽस्त्विति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

आशिषानुगृहीतोऽस्मि नियोज्योऽहं सदा हि वः ॥ ७९ ।
ब्रूत यूयं किमस्माभिः कर्त्तव्यं भवतामिह ।
आज्ञापयध्वमाज्ञप्तस्तस्माद्विबुधसत्तमाः ।
तस्य तद्वचनं श्रुत्वा शक्रः प्रोवाच तं तदा ॥ ८० ।

शक्र उवाच ।

कुत्रासौ प्रस्थितो भद्रं कुत्र वा स गतोऽपि वा ।
पश्यामो विप्र तं सर्व्वे देवानामधिपं विभुम् ॥ ८१ ।
स्थाणुमुग्रं शिवं देवं शर्व्वमेव स्वयं मुने ।
यदि जानासि भगवानीश्वरो यत्र तिष्ठति ॥ ८२ ।
तत्स्थानं न समाख्याहि महर्षे शीघ्रमेव हि ।
तच्छ्रुत्वा वचनं धीमानीरितं वज्रपाणिना ।
प्रत्युवाच ततः शक्रं नन्दी पशुपतिं स्मरन् ॥ ८३ ।

नन्दिकेश्वर उवाच ।

श्रोतुमर्हसि देवेन्द्र यथा तत्त्वं दिवस्पते ।
अस्मिन् गिरौ मुञ्जवति स्थाणुरभ्यर्च्चितो मया ॥ ८४ ।
प्रीतोऽसौ मां वरैर्दिव्यैरनुगृह्य हरः प्रभुः ।
प्रीतो विनिर्गत इतस्तं विज्ञातुं बिभेम्यहम् ॥ ८५ ।
यद्याज्ञापयसे देव अहं त्वच्छासने स्थितः ।
मार्गयामो हि यत्नेन भगवन्तन्तु वासव ॥ ८६ ।

इति वराहपुराणे गोकर्णमाहात्म्ये नन्दिकेश्वरवरप्रदानिको
नाम चतुर्दशाधिकद्विशततमोऽध्यायः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पञ्चदशाधिकद्विशततमोऽध्यायः ।

ब्रह्मोवाच ।

ततः शक्रः सुरगणैः सह सर्व्वैः समेत्य च ।
बुद्धिञ्चकार गमने मार्गितुं* यत्र शङ्करः ॥ १ ।
तत उत्थाय ते देवाः सर्व्वं एव शिलोच्चयात् ।
विहायसा ययुः शीघ्रं तेनैव सह नन्दिना ॥ २ ।
स्वर्लोकं ब्रह्मलोकञ्च नागलोकञ्च सर्व्वशः ।
बभ्रमुस्त्रिदशाः सर्व्वे रुद्रान्वेषणतत्पराः ।
खिन्नाः क्लिष्टाश्च सुभृशं न पुनस्तत्पदं विदुः ॥ ३ ।
चतुःसमुद्रपर्य्यन्तां सप्तद्वीपवतीं महीम् ।
सशैलकाननोपेतां मार्गयद्भिर्हि तं सुरम्† ।
कन्दरेषु महाद्रीणां तुङ्गेषु शिखरेषु च ।
विततेषु निकुञ्जेषु विहारेषु च सर्व्वतः ।
विचिन्वद्भिः क्षितिमिमां तृणं द्विविदलीकृतम् ।
न प्रवृत्तिः क्वचिदपि शम्भोरासाद्यते सुरैः ॥ ४।५।६ ।
यदा निर्व्विसमनसो मार्गमाणाः सुरास्तदा ।
न पश्यन्ति शिवं तत्र तदैषां भयमाविशत् ॥ ७ ।
भीतास्ते संविदङ्कृत्वा सञ्चिन्त्य गुरुलाघवम् ।
सम्भूयान्योऽन्यममरा‡ मामेव शरणं ययुः ॥ ८ ।

---

* मार्गयितुमिति साधु । † हरमिति (ग) । ‡ सम्भूतान्योऽन्यममरा इति (ग), सम्भूता अन्योऽन्यममरा इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तमेकाग्रेण मनसा शङ्करं लोकशङ्करम्।
उपायमात्रं दृष्टं मे ध्यायंस्तद्वेषभूषणैः॥ ९।
यथा यत्र च सोऽस्माभिर्द्रष्टव्यो वृषभध्वजः।
सर्व्वं त्रैलोक्यमस्माभिर्विचितं वै निरन्तरम्।
श्लेषातकवनोद्देशं स्थानं मुक्त्वा महीतले॥ १०।
आगच्छध्वं गमिष्यामस्तमुद्देशं सुरोत्तमाः।
इत्येवमुक्ता तैः सर्व्वैस्तामाशां प्रस्थिता वयम्॥ ११।
तत्क्षणादेव सम्प्राप्ता विमानैः शीघ्रयायिभिः।
श्लेषातकवनं पुण्यं सिद्धचारणसेवितम्॥ १२।
तस्मिन् सुरमणीयानि विविधानि शुचीनि च।
ध्यानस्थानानि रम्याणि बहूनि गुणवन्ति च॥ १३।
आश्रमारण्यभागेषु दरीणां विवरेषु च।
विभ्राजद्वनराजीका नद्यश्च विमलोदकाः॥ १४।
सिंहशार्दूलमहिषगोलाङ्गूलर्क्षवानरैः।
नादितं गजयूथैश्च मृगयूथैश्च तद्वनम्।
प्रमुखे वासवङ्कृत्वा विविशुस्ते सुरास्तदा।
विमुच्य रथयानानि पद्भिः सिद्धादिसङ्कटम्।
कन्दरोदरकूटेषु तरुणाङ्गहनेषु च।
सर्व्वदेवमयं रुद्रं मार्गमाणाः शनैः शनैः॥ १५।१६।१७।
प्रविशन्तश्च ते देवा वनोद्देशे क्वचिच्छुभे।
कदलीवनसंछन्ने फुल्लपादपशोभिते॥ १८।
गिरिनद्यास्तु पुलिने हंसकुन्देन्दुसन्निभे।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गन्धामोदेन पुष्पाणां वासितं मधुगन्धिमत् ॥ १९ ।
मुक्ताचूर्णनिकाशाभिर्वालुकाभिस्ततस्ततः ।
विक्रीड़मानां* ददृशुः कन्याङ्काश्चिन्मनोरमाम् ॥ २० ।
तत्र ते विबुधा दृष्ट्वा सर्व्वे मां समचोदयन् ।
आद्योऽहं सर्व्वदेवानां कथं मे तद्भवेदिति ॥ २१ ।
मुहूर्त्तं ध्यानमास्थाय विज्ञाता सा मया तदा ।
ध्रुवं शैलेन्द्रपुत्रीयमुमा विश्वेश्वरेश्वरी ॥ २२ ।
ततस्तदुच्चशिखरमारुह्य विवुधेश्वराः ।
अधो विलोक्य ते सर्व्वे ददृशुस्तं सुरोत्तमम् ॥ २३ ।
मध्ये मृगसमूहस्य गोप्तारमिव संस्थितम् ।
एकशृङ्गैकचरणं तप्तहाटकवर्च्चसम् ॥ २४ ।
चारुवक्त्राचिद्शनं पृष्ठतः शुक्लविन्दुभिः ।
शुक्लेनोदरभागेन राजतेरुपशोभितम् ॥ २५ ।
पीनोन्नतकटिस्कन्धं निमग्नांसशिरोधरम् ।
विम्बोष्ठं ताम्रजिह्वास्यं दंष्ट्राङ्कुरविराजितम् ॥ २६ ।
तं दृष्ट्वा विबुधाः सर्व्वे शिखरात्प्रतिधाविताः ।
सर्व्वोद्यमेन तरसा तं मृगेन्द्रं जिघृक्षवः ॥ २७ ।
शृङ्गाग्रं प्रथमं धृत्वा गृहीत्वा वज्रपाणिना ।
मध्यं मया तस्य तदा गृहीतम्प्रणतात्मना ॥ २८ ।
जग्राह केशवश्चापि मूलं तस्य महात्मनः ।

* विक्रीड़मानामिति आर्षं, विक्रीड़न्तीमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रिभिरेवं गृहीतन्तु त्रिधा भूतमभज्यत ॥ २९ ।
शक्रस्याग्रं स्थितं हस्ते मध्यं हस्ते मम स्थितम् ।
विष्णोर्मूलं स्थितं हस्ते प्रविभक्तं त्रिधागतम् ॥ ३० ।
शृङ्गस्यैव गृहीतस्य त्रिधास्माकं मृगाधिपः* ।
विषाणरहितस्तस्य† प्रनष्टः पुनरत्र वै ॥ ३१ ।
अन्तर्हितोऽन्तरीक्षस्थः प्रोवाचास्मानुपालभन् ।
भो भो देवा मया यूयं वंचमानानवाप्स्यथ‡ ॥ ३२ ।
सशरीरोऽहं युष्माभिर्वंशाप्तः§ प्रगतस्त्वितः ।
शृङ्गमात्रेण सन्तुष्टा भवन्तस्तेन वञ्चिताः ॥ ३३ ।
यद्यहं सशरीरः स्यां गृहीत्वा स्थापितोऽभवम् ।
तदा चतुष्पात्सकलोधर्म्मः स्यात्प्रतिपादितः ॥ ३४ ।
कामं शृङ्गाणि मेऽत्रैव श्लेषात्मकवनेऽमराः ।
न्यायतः स्थापयिष्यध्वं लोकानुग्रहकाम्यया ॥ ३५ ।
अत्रापि महती व्युष्टिर्भविष्यति न संशयः ।
पुण्यक्षेत्रे सुमहति मत्प्रभावानुभाविते ॥ ३६ ।
यावन्ति भुवि तीर्थानि आसमुद्रसरांसि च ।
क्षेत्रेऽस्मिंस्तानि तीर्थानि आगमिष्यन्ति मत्कृते ॥ ३७ ।
अहं पुनः शैलपतेः पादे हिमवतः शुभे ।

---

* नराधिप इति (ख), (ग) । † तस्य इत्यस्य न सङ्गतिर्दृश्यते, सोऽथ इति कृते तु सङ्गतिः स्यात् । ‡ वञ्चितान् स्थानवाप्स्यथ इति कृते तु सम्यक् स्यात् । § न प्राप्त इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

नेपालाख्ये समुत्पत्स्ये स्वयमेव महीतलात् ॥ ३८ ।
दीप्ततेजोमयशिराःशरीरश्च चतुर्मुखः ।
शरीरेश इति ख्यातः सर्व्वत्र भुवनत्रये ॥ ३९ ।
तत्र नागह्रदे घोरे स्थास्याम्यन्तर्ज्जले ह्यहम् ।
त्रिंशद्वर्षसहस्राणि सर्व्वभूतहिते रतः ॥ ४० ।
यदा वृष्णिकुलोत्पन्नः कृष्णश्चक्रेण पर्व्वतान् ।
पाटयित्वेन्द्रवचनाद्दानवान्निहनिष्यति ॥ ४१ ।
तदा सदेशो भविता सर्व्वम्लेच्छैरधिष्ठितः ।
ततोऽन्ये सूर्य्यवंशीयाः चत्रियास्तान्निहत्य च ॥ ४२ ।
वसिष्यन्ति च तं देशं ब्राह्मणैः सम्प्रवर्त्तितान् ।
धर्म्मान् संस्थापयिष्यन्ति राज्यम्प्राप्स्यन्ति शाश्वतम् ॥ ४३ ।
ततो लिङ्गार्च्चनन्तत्र प्रतिष्ठास्यन्ति पार्थिवाः ।
चत्रियाः सूर्य्यवंशीयाः शून्ये लप्स्यन्ति मां नृपाः ॥ ४४ ।
ततो जनपदस्तत्र भविष्यति महांस्तदा ।
स्फीतो ब्राह्मणभूयिष्ठं सर्व्ववर्णाश्रमैर्युतः ॥ ४५ ।
सम्यक्प्रवृत्ता राजानो भविष्यन्त्यायती स्थिताः ।
एवं सम्यक्स्थिते तस्मिन्देशे पौरजने तथा ॥ ४६ ।
तत्र मामर्च्चयिष्यन्ति सर्व्वभूतानि सर्व्वदा ।
तत्राहं यैः सकृद्दृष्टो विधिवद्वन्दितस्तु यैः ।
गत्वा शिवपुरं ते मां द्रच्यन्ते दग्धकिल्विषाः ॥ ४७ ।
उत्तरेण तु गङ्गाया दचिणे चाश्विनीमुखात् ।
चेत्रं हि मम तज्ज्ञेयं योजनानि चतुर्द्दश ॥ ४८ ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

हिमाद्रिसुङ्गशिखरात्प्रोद्भूता वाग्मती नदी।
भागीरथ्याः शतगुणम्पवित्रं तज्जलं स्मृतम् ॥ ४९।
तत्र स्नात्वा हरेर्लोकानुपस्पृश्य दिवस्पतेः।
मुक्त्वा देहं नरा यान्ति मम लोकं न संशयः ॥ ५०।
अपि दुष्कृतकर्म्माणः क्षेत्रेऽस्मिन्निवसन्ति ये।
नियतं पुरुहूतस्य श्रिताः स्थाने वसन्ति ते ॥ ५१।
देवदानवगन्धर्व्वाः सिद्धविद्याधरोरगाः।
मुनयोऽप्सरसो यक्षा मोहिता मम मायया।
तद्वै गुह्यं न जानन्ति यत्र सन्निहितो ह्यहम्।
तपस्तपोधनानाञ्च सिद्धक्षेत्रं हि तत्स्मृतम् ॥ ५२।५३।
प्रभासाच्च प्रयागाच्च नैमिषात्पुष्करादपि।
कुरुक्षेत्रादपि बुधाः क्षेत्रमेतद्विशिष्यते ॥ ५४।
श्वशुरो मे स्थितो यत्र हिमवान् भूधरेश्वरः।
प्रभवन्ति यतः सर्व्वा गङ्गाद्याः सरितां वराः ॥ ५५।
तस्मिन् क्षेत्रवरे पुण्ये पुण्याः सर्व्वाः सरिद्वराः।
सर्व्वे प्रस्रवणाः पुण्याः सर्व्वे पुण्याः शिलोच्चयाः ॥ ५६।
आश्रमस्तत्र भविता सिद्धचारणसेवितः।
शैलेश्वर इति ख्यातः शरीरं यत्र मे स्थितम् ॥ ५७।
स्रवन्तीनां वरा पुण्या वाग्मती पर्व्वतोत्तमात्।
भागीरथी वेगवती कलुषं दहते नृणाम् ॥ ५८।
कीर्त्तनादेव संशुद्धे दर्शनाद्भूतिमाप्नुयाति।
पानावगाहनात्तस्यास्तारयेत्सप्त वै कुलान् ॥ ५९।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

लोकपालस्तु चरति तीर्थख्यातिञ्च तत्स्वयम् ।
तत्र स्नात्वा दिवं यान्ति मृतास्ते त्वपुनर्भवाः ॥ ६० ।
स्नात्वा स्नात्वा तु ये तत्र नित्यमभ्यर्च्चयन्ति माम् ।
उद्धराम्यहमेतान्वै प्रीतः संसारसागरात् ॥ ६१ ।
यस्तस्या वारिणा पूर्णमेकञ्च घटमुद्धरेत् ।
स्नापनार्थे मम शुचिः श्रद्दधानोऽनसूयकः ।
वेदवेदाङ्गविदुषा श्रोत्रियेण विशेषतः ।
आहूतस्याग्निहोत्रस्य यत्फलं तस्य तद्भवेत् ॥ ६२।६३ ।
तस्यास्तीरे जलोद्भेदं मन्मूलादभिनिःसृतम् ।
मृगशृङ्गोदकं नाम नित्यं मुनिजनप्रियम् ।
तत्राभिषेकं कुर्व्वीत उपस्पृश्य समाहितः ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥ ६४।६५ ।
तीर्थं पञ्चनदम्प्राप्य पुण्यं ब्रह्मर्षिसेवितम् ।
अग्निष्टोमफलं तत्र स्नातमात्रः प्रपद्यते ॥ ६६ ।
षष्टिं धेनुसहस्राणि* यानि रक्षन्ति वाग्मतीम् ।
न तां पापाः कृतघ्नो वा कदाचित्प्राप्नुयान्नरः ॥ ६७ ।
शुचयः श्रद्दधानाश्च सत्यसन्धाश्च ये नराः ।
वाग्मत्यां ते नराः स्नान्ति लभन्ते चोत्तमां गतिम् ॥ ६८ ।
आर्त्ता भीताश्च सन्तप्ता† व्याधितोऽव्याधितोऽपि वा ।
वाग्मत्याः सलिले स्नात्वा ये मां पश्यन्ति संस्कृताः ।

---

* षष्टिधेनुःसहस्राणीति (ग) । † आतापिताश्च सन्तप्ता इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तेषां शान्तिर्भवेन्नित्यं पुरुषाणां न संशयः॥ ६८।
मत्प्रभावात्तु स्नातस्य* सर्व्वं नश्यति किल्बिषम्।
ईतयः समुदीर्णापि† प्रशमं यान्ति सर्व्वशः॥ ७०।
वाग्मत्याः सलिले स्नात्वा ये मां पश्यन्ति संस्कृताः।
वाग्मती सरितां श्रेष्ठा यत्र यत्राऽवगाह्यते।
तत्र तत्र फलं दद्याद्राजसूयाश्वमेधयोः॥ ७१।
योजनाभ्यन्तरक्षेत्रं समन्तात्सर्व्वतो दिशम्।
मूलक्षेत्रन्तु विज्ञेयं रुद्रेणाधिष्ठितं स्वयम्॥ ७२।
तत्र पूर्व्वोत्तरे पार्श्वे वासुकिर्नाम नागराट्।
वृतो नागसहस्रैस्तु द्वारि तिष्ठति मे सदा॥ ७३।
स विघ्नङ्कुरुते नृणां तत्क्षेत्रं विशतां सदा।
प्रथमं स नमस्कार्य्यस्ततोऽहं तदनन्तरम्।
अनेन विधिना पुंसामविघ्नं विशतां भवेत्॥ ७४।
वन्दते परया भक्त्या यो मां तत्र नरः सदा।
पृथिव्यां स भवेद्राजा सर्व्वलोकनमस्कृतः॥ ७५।
गन्धैर्माल्यैश्च मे मूर्त्तिमभ्यर्च्चयति यो नरः।
उत्पत्स्यते स देवेषु तुषितेषु न संशयः॥ ७६।
यस्तु दद्यात्प्रदीपं मे‡ पर्व्वते श्रद्धयान्वितः।
सूर्य्यप्रभेषु देवेषु तस्योत्पत्तिर्विधीयते॥ ७७।

---

* अत्र छन्दोदोषः। † समुदीर्णा अपीति साधु। ‡ यत्कृत्वा त्वत्प्रदीपं मे इति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

गीतवादित्रनृत्यैस्तु स्तुतिभिर्जागरेण वा ।
ये मे कुर्व्वन्ति सेवां वै मत्संस्थास्ते भवन्ति हि ॥ ७८ ।
दध्ना क्षीरेण मधुना सर्पिषा सलिलेन वा ।
स्नापनं ये प्रयच्छन्ति ते तरन्ति जरान्तको ॥ ७९ ।
यः श्राद्धे भोजनं दद्याद्विप्रेभ्यः श्रद्धयान्वितः ।
सोऽमृताशी भवेन्नूनं त्रिदिवे सुरपूजितः ॥ ८० ।
व्रतोपवासैर्होमैर्वा नैवेद्यैश्चारुभिस्तथा ।
यजन्ते ब्राह्मणा ये मां परया श्रद्धयान्विताः ॥ ८१ ।
षष्टिवर्षसहस्राणि उषित्वा दिवि ते ततः ।
ऐश्वर्य्यम्प्रतिपद्यन्ते मर्त्त्यलोके पुनः पुनः ॥ ८२ ।
ब्राह्मणः क्षत्त्रियोवैश्यः शूद्रः स्त्री वापि सङ्गताः ।
शैलेश्वरन्तु तत्स्थानं भक्तितः समुपासते ।
मत्पार्षदास्ते जायन्ते सततं सहिताः सुरैः ॥ ८३ ।
शैलेश्वरम्परङ्गुह्यं* गतिः शैलेश्वरः परा ।
शैलेश्वरात्परं क्षेत्रं न क्वचिद्भुवि विद्यते ॥ ८४ ।
ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वै सर्व्वपातकैः ।
क्षेत्रमेतदनुप्राप्य निर्म्मलो जायते नरः ॥ ८५ ।
विविधान्यत्र तीर्थानि सन्ति पुण्यानि देवताः ।
येषान्तोयैर्नरः स्पृष्टः सर्व्वपापैः प्रमुच्यते ॥ ८६ ।
क्रोशं क्रोशं सुरैरूपं संहृत्य तच्च निर्म्मितम् ।

---

* शैलेश्वरः परो गुह्य इति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तीर्थं क्रोशोदकं नाम पुण्यं मुनिजनप्रियम् ।
तत्र स्नात्वा शुचिर्दान्तः सत्यसन्धो जितेन्द्रियः ।
विमुक्तः किल्बिषैः सर्व्वैः सर्व्वमेव फलं लभेत्* ॥ ८७।८८ ।
अनाशकं व्रजेद्यस्तु दक्षिणेन महात्मनः ।
शैलेश्वरस्य पुरुषः स गच्छेत्परमाङ्गतिम् ॥ ८९ ।
भृगुप्रपतनङ्कृत्वा† कामक्रोधविवर्ज्जितः ।
विमानेन दिवङ्गच्छेद्वृतः सोऽप्सरसाङ्गणैः ॥ ९० ।
भृगुमूले परं तीर्थं ब्रह्मणा निर्म्मितं स्वयम् ।
ब्रह्मोद्भेदेति‡ विख्यातं तस्यापि शृणु यत्फलम् ॥ ९१ ।
संवत्सरन्तु यस्तत्र स्नापते नियतेन्द्रियः ।
स ब्रह्मलोके विरजे गच्छते§ नात्र संशयः ॥ ९२ ।
तत्र गोरक्षकं नाम गोवृषः पदविक्षतम् ।
दृष्ट्वा च तानि हि पुमान् गोसहस्रफलं लभेत् ॥ ९३ ।
गौर्य्यास्तु शिखरं तत्र गच्छेत्सिद्धनिषेवितम् ।
यत्र सन्निहिता नित्यं पार्व्वती शिखरप्रिया ॥ ९४ ।
लोकमाता भगवती लोकरक्षार्थमुद्यता ।
तस्याः सालोक्यमायाति दृष्ट्वा स्पृष्ट्वाभिवाद्य च ॥ ९५ ।
त्यजते¶ पतितुं तस्या अधस्ताद्वाग्मतीतटे ।
उमालोके व्रजेदाशु विमानेन विहायसा ॥ ९६ ।
स्तनकुण्डे उमायास्तु यः स्नायात्खलु मानवः ।

---

* लभेतेति साधु, एवं परत्रापि । † भृगुप्रयतनं कृत्वेति क्वचित्पाठः । ‡ ब्रह्मोद्भेद-इति साधु । § गच्छतीति साधु । ¶ त्यजतीति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स्कन्दलोकमवाप्नोति भूत्वा वैश्वानरद्युतिः ॥ ९७ ।
तीर्थं पञ्चनदम्प्राप्य पुण्यं ब्रह्मर्षिसेवितम् ।
अग्निहोत्रफलं तत्र स्नानमात्रेण लभ्यते ॥ ९८ ।
नकुलोहेनमतिमान्* स्नपयेत्प्रयतात्मवान् ।
जातिस्मरः स तु भवेत्सिध्यते† चास्य मानसम् ॥ ९९ ।
तस्यैवोत्तरतस्तीर्थमपरं सिद्धसेवितम् ।
नाम्ना प्रान्तकूपानीयं गुह्यं गुह्यकरचितम् ॥ १०० ।
संवत्सरं यस्तु पूर्णं तत्र स्नायान्नरः सदा ।
गुह्यकः स भवेदाशु रुद्रस्यानुचरः सुधीः ॥ १०१ ।
दैव्याः शिखरवासिन्या ज्ञेयं पूर्व्वोत्तरेण वै ।
दक्षिणेन तु वाग्मत्याः प्रस्तुतङ्कन्दरोदरात् ।
तीर्थं ब्रह्मोदयं नाम पुण्यम्पापप्रणाशनम् ॥ १०२ ।
तत्र गत्वा जलं स्पृष्ट्वा स्नात्वा चाभ्युच्य मानवः ।
मृत्युलोकं न पश्येत‡ कृच्छ्रेषु च न सीदति ॥ १०३ ।
गत्वा सुन्दरिकातीर्थं विधिना तीर्थमादिमम् ।
तत्र स्नात्वा भवेत्तोये रूपवानुत्तमद्युतिः ॥ १०४ ।
त्रिसन्ध्यं तत्र गच्छेत§ पूर्व्वेण विधिवन्नरः ।
तत्र सन्ध्यामुपासित्वा¶ द्विजोमुच्येत किल्बिषात् ॥ १०५ ।
वाग्मत्या मणिवत्याश्च सम्भेदे पापनाशने ।
अहोरात्रं वसेद्यस्तु रुद्रजापो‖द्विजः शुचिः ॥ १०६ ।

---

* नकुलोहेमप्रतिमानिति (क); (ख) । † सिद्धप्रतीति साधु । ‡ न पश्येदिति साधु । § गच्छेदिति साधु, एवं परत्रापि । ¶ उपास्येति साधु । ‖ रुद्रयाजीति क्वचित्पाठः ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

स भवेद्वेदविद्विद्वान् यज्वा पार्थिवपूजितः।
तारितञ्च कुलं तेन सर्व्वं भवति साधुना॥ १०७।
वर्णावरोऽपि यः कश्चित्स्नात्वा दद्यात्तिलोदकम्।
तर्पिताः पितरस्तेन भवेयुर्नात्र संशयः॥ १०८।
यत्र यत्र च वाग्मत्यां स्नाति वै मानवोत्तमः।
तिर्य्यग्योनिं न गच्छेत समृद्धे जायते कुले॥ १०९।
वाग्मतीमणिवत्योश्च* सम्भेदो ऋषिसेवितः।
धीमान्गच्छेत विधिना कामक्रोधविवर्ज्जितः॥ ११०।
गङ्गाद्वारे तु यत्प्रोक्तं स्नानपुण्यफलं महत्।
स्नानस्य तद्दशगुणं भवेदत्र न संशयः॥ १११।
अत्र विद्याधराः सिद्धा गन्धर्व्वामुनयः सुराः।
स्नानमेतदुपासन्ते† यचाश्च भुजगैः सह॥ ११२।
स्वल्पमप्यत्र यत्किञ्चिद्द्विजेभ्यो दीयते धनम्।
तदक्षय्यं भवेद्दातुर्दानपुण्यफलं महत्॥ ११३।
तस्मात्सर्व्वप्रयत्नेन करणीयञ्च देवताः।
वरिष्ठं क्षेत्रमेतस्मान्नान्यदेव हि विद्यते॥ ११४।
तस्मिन् श्लेष्मातकवने पुण्ये त्रिदशसेविते।
यत्र यत्र मया देवाश्चरता मृगरूपिणा॥ ११५।
आसितं स्वपितं यातं विहृतं वा समन्ततः।

* मणिवत्याश्चेति प्रायः सार्व्वत्रिकः पाठः। † उपासते इति साधु, स्नानमेकमुपासते इत्येवं कृते तु सुसङ्गतं भवति।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

तत्र तत्राभवत्सर्व्वं पुण्यक्षेत्रं च सर्व्वशः ॥ ११६।११७ ।
शृङ्गमेतत्त्रिधाभूतं सम्यक्सुश्रूयतां मराः* ।
गोकर्णेश्वर इत्येतत्पृथिव्यां ख्यातिमेष्यति ॥ ११८ ।
एवं सन्दिश्य विबुधान्देवदेवः सनातनः ।
अदृश्यएव विबुधैः प्रययावुत्तरां दिशम्† ॥ ११९ ।

इति वराहपुराणे भगवच्छास्त्रे भगवद्गोकर्णेश्वर-
माहात्म्ये जलेश्वरमाहात्म्यवर्णनो नाम
पञ्चदशाधिकद्विशततमोऽध्यायः ।

षोड़शाधिकद्विशततमोऽध्यायः ।

ब्रह्मोवाच ।

तस्मात्स्थानादपक्रान्ते त्र्यम्बके* मृगरूपिणि ।
अन्योऽन्यं मन्त्रयित्वा तु मया सह सुरोत्तमाः ॥ १ ।
त्रिधाविभक्तं तच्छृङ्गं पृथक्पृथगवस्थितम् ।
सम्यक्स्थापयितुं देवा विधिदृष्टेन कर्म्मणा ।
स्थापितं दिवि नीत्वा वै शृङ्गाग्रं वज्रपाणिना ॥ २ ।

---

* अमरा इति साधु । † प्रयातस्तूत्तरां दिशमिति (ग) ।

* अम्बिके इति (क), (ख) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

मया तत्रैव तन्मध्यं स्थापितं विधिवत्प्रभोः ॥ ३ ।
देवैर्देवर्षिभिश्चैव सिद्धैर्ब्रह्मर्षिभिस्तथा ।
गोकर्ण इति विख्यातिः* कृता वैशेषिकी वरा ॥ ४ ।
विष्णुना देवतीर्थेन तन्मूलं स्थापितं ततः ।
तस्य शृङ्गेश्वर इति नाम तत्राभवन्महत् ॥ ५ ।
तत्र तत्रैव भगवांस्तस्मिन् शृङ्गे त्रिधा स्थिते ।
सान्निध्यङ्कल्पयामास भागेनैकेन सौन्मना:† ॥ ६ ।
शतं तेन तु भागानामात्मनो निहितं शृगे ।
तस्माद्द्विकन्तु भागानां शृङ्गाणां त्रितये न्यधात् ॥ ७ ।
मार्गेण तच्छरीरेण निर्य्याय भगवान्विभुः ।
शैशिरस्य गिरेः पादं प्रपेदे स्वयमात्मनः ॥ ८ ।
शतसंख्या स्मृता व्युष्टिस्तस्मिञ्छैलेश्वरे विभोः ।
त्रिधाविभक्ते शृङ्गेऽस्मिन्नेकाग्रगतिनि प्रभोः ॥ ९ ।
ततः सुरासुरगुरुर्देवम्भूतमहेश्वरम् ।
तपसोग्रेण संसेव्य वव्रिरे‡ विविधान्वरान् ॥ १० ।
देवदानवगन्धर्व्वाः सिद्धयक्षमहोरगाः ।
श्लेषातकवनङ्कृत्स्नं सर्व्वतः परिमण्डलम् ।
तीर्थयात्रां पुरस्कृत्य प्रादक्षिण्यञ्च चक्रतुः§ ॥ ११ ।
फलान्निर्द्दिश्य¶ तीर्थानां तथा क्षेत्रफलं महत् ।

---

* विख्याता इति (क)। † सौन्मना इति आर्षं, स उन्मना इति साधु। ‡ वव्रिरे इति आर्षं, वव्रे इति साधु। § चक्रतुरिति आर्षं, चक्रुरिति साधु। ¶ फलान्निर्द्दिश्य इति आर्षं, फलानि निर्द्दिश्य इति साधु।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

यथास्थानानि ते तस्मान्निवृत्ताश्च सुरादयः ।
एवं तस्मान्निवृत्तेषु दैवतेषु तदा ततः ।
पौलस्त्यो रावणो नाम भ्रातृभिः सह राक्षसैः ।
आगस्त्योग्रेण तपसा देवमाराधयद्विभुम् ।
शुश्रूषया च परया गोकर्णेश्वरमव्ययम् ॥ १२।१३।१४ ।
यदा तु तस्य तुष्टो वै वरदः शङ्करः स्वयम् ।
तदा त्रैलोक्यविजयं वरं वव्रे स राक्षसः ॥ १५ ।
प्रसादात्तस्य तत्सर्वं वाञ्छितं मनसा हि यत् ।
अवाप्य च दशग्रीवस्तदिष्टं परमेश्वरात् ।
त्रैलोक्यविजयायाशु तत्क्षणादेव निर्य्ययौ ॥ १६ ।
त्रैलोक्यं स विनिर्ज्जित्य शक्रञ्च त्रिदशाधिपम् ।
तदुत्पाट्यानयामास पुत्रेणेन्द्रजिता सह ॥ १७ ।
शृङ्गाग्रं* यत्पुरा नीत्वा स्थापितं वज्रपाणिना ।
तदुत्पाट्यानयामास पुत्रेणेन्द्रजिता सह ॥ १८ ।
तद्यावद्रावणः स्थाप्य† मुहूर्त्तमुदधेस्तटे ।
सन्ध्यामुपासते तत्र लग्नस्तावदसौ भुवि ॥ १९ ।
न शशाक यदा रक्षस्तदुत्पाटयितुं बलात् ।
वज्रकल्पं समुत्सृज्य तदा लङ्कां विनिर्ययौ ॥ २० ।
स तु दक्षिणगोकर्णो विख्यस्ते महामते ।
स्वयम्प्रतिष्ठितस्तत्र स्वयम्भूतपतिः शिवः ॥ २१ ।

---

* शृङ्गाग्रमित्यारभ्य उदधेस्तटे इत्यन्तः पाठः (ख) पुस्तके नास्ति । † स्थापयित्वेति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

एतत्ते कथितं सर्व्वं मया विस्तरतो मुने।
यथावदुत्तरस्तस्य गोकर्णस्य* महात्मनः॥ २२।
दक्षिणस्य च विप्रर्षे तथा शृङ्गेश्वरस्य च।
शैलेश्वरस्य च विभो स्थित्युत्पत्तिर्यथाक्रमम्॥ २३।
व्युष्टिः चेत्रस्य महती तीर्थानाञ्च समुद्भवः।
प्रोक्तं सर्व्वं मया वत्स किमन्यच्छ्रोतुमिच्छसि॥ २४।

इति वराहपुराणे गोकर्णशृङ्गेश्वरादीनां माहात्म्यं नाम
षोड़शाधिकद्विशततमोऽध्यायः।

सप्तदशाधिकद्विशततमोऽध्यायः।

सनत्कुमार उवाच।

उक्तं भगवता सर्व्वं यथावत्परमेष्ठिना।
पृष्टेन संशयं सम्यक् परङ्गत्वार्थनिश्चयम्॥ १।
भगवद्विश्वरूपस्य स्थाणोरप्रतिमौजसः।
क्रीड़तो लोकनाथस्य कानने मृगरूपिणः॥ २।
यथा शरीरं शृङ्गञ्च पुण्यचेत्रे प्रतिष्ठितम्।
हिताय जगतस्तत्र तीर्थानि च यथाभवन्।
तन्मे ब्रूहि महाभाग यथातत्त्वं जगत्पते॥ ३।

---

* उत्तरस्यैवेति क्वतं चेत्सङ्गतं भवेत्।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

ब्रह्मोवाच ।

पुलस्त्यो वक्ष्यते शेषं यदतोऽन्यन्महामुने ।
सर्व्वेषामेव तीर्थानामेषां फलविनिश्चयम् ॥ ४ ।
कुरुराज्यं पुरस्कृत्य मुनीनां पुरतो वने ।
पुत्रो मे मत्समः सम्यग्वेदवेदाङ्गतत्त्ववित् ॥ ५ ।
यच्छ्रुत्वा पुरुषस्तात विमुक्तः सर्व्वकिल्बिषैः ।
यशस्वी कीर्त्तिमान्भूत्वा वन्द्यते* प्रेत्य चेह च ॥ ६ ।
श्रोतव्यमेतत्सततं† चातुर्वर्ण्यैः सुसंयतैः ।
मङ्गल्यञ्च शिवञ्चैव धर्म्मकामार्थसाधकम् ॥ ७ ।
श्रीभूतिजननं पुण्य‡मायुष्यं विजयावहम् ।
धन्यं यशस्यं स्वस्तीयं पापघ्नं शान्तिकारकम् ॥ ८ ।
श्रुत्वैवं पुरुषः सम्यङ् दुर्गतिमवाप्नुयात् ।
कीर्त्तयित्वा व्रजेत्स्वर्गङ्कल्यमुत्थाय मानवः ॥ ९ ।

सूत उवाच ।

इत्युक्त्वा भगवान्देवः परमेष्ठी प्रजापतिः ।
सनत्कुमारं सन्दिश्य विरराम महायशाः ॥ १० ।
एतद्वः कथितं सर्व्वं मया तत्त्वेन सत्तमाः ।
वराहभूमिसंवादं सारमुद्धृत्य सत्तमाः ॥ ११ ।
यश्चैव कीर्त्तयेन्नित्यं शृणुयाद्वापि भक्तितः ।
सर्व्वपापविनिर्मुक्तः स याति परमाङ्गतिम् ॥ १२ ।

---

* नन्दते इति (ग) । † एतत्सकलं इति (ग), (घ) । ‡ चैवमिति (ख), (ङ) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

प्रभासे नैमिषारण्ये गङ्गाद्वारेऽथ पुष्करे।
प्रयागे ब्रह्मतीर्थे च तीर्थे चामरकण्टके ॥ १३।
यत्पुण्यफलमाप्नोति तत्कोटिगुणितं भवेत्।
कपिलां द्विजमुख्याय सम्यग्दत्त्वा तु यत्फलम् ॥१४।
प्राप्नोति सकलं श्रुत्वा अध्यायन्तु न संशयः।
श्रुत्वाऽस्यैव दशाध्यायं शुचिर्भूत्वा समाहितः॥ १५।
अग्निष्टोमातिरात्राभ्यां फलम्प्राप्नोति मानवः।
यः पुनः सततं शृण्वन्नैरन्तर्य्येण बुद्धिमान् ॥ १६।
धारयेत्परया भक्त्या तस्यापि शृणु यत्फलम्।
सर्व्वयज्ञेषु यत्पुण्यं सर्व्वदानेषु यत्फलम् ॥
सर्व्वतीर्थाभिषेकेन यत्फलं मुनिभिः स्मृतम्।
तत्प्राप्नोति न सन्देहो वराहवचनं यथा ॥ १७।१८।
यद्येतत्धारयेद्भक्त्या मम माहात्म्यमुत्तमम्।
अपुत्त्रस्य भवेत्पुत्त्रः सपुत्त्रस्य सुपुत्त्रकः॥ १९।
यस्येदं लिखितङ्गेहे तिष्ठते* पूज्यते सदा।
तस्य नारायणो देवः सन्तुष्टः स्याद्धि सर्व्वदा ॥ २०।
यश्चैतच्छृणुयाद्भक्त्या नैरन्तर्य्येण मानवः।
श्रुत्वा तु पूजयेच्छास्त्रं यथा विष्णुं सनातनम् ॥ २१।
गन्धपुष्पैस्तथा वस्त्रैर्ब्राह्मणानाञ्च तर्पणैः।
यथाशक्त्या नृपो ग्रामैः† पूजयेच्च वसुन्धरे ॥ २२।

* तिष्ठतीति साधु। † ग्रासैरिति (क)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

श्रुत्वा तु पूजयेद्यस्तु पौराणं नियतः शुचिः ।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ २३ ॥

इति वराहपुराणे भगवच्छास्त्रे धरणिवराहसंवादे फलश्रुतिर्नाम
सप्तदशाधिकद्विशततमोऽध्यायः ।

अष्टादशाधिकद्विशततमोऽध्यायः ।

त्रिःसप्तषट्क्षितिमिते नृपविक्रमस्य
काले गते भगवतो हरिबोधनस्य ।
वीरेश्वरेण सह माधवभट्टनाम्ना
काश्यां वराहकथितं लिखितं पुराणम् ॥ १ ॥

काशीविश्वेश्वराभ्यां नमः ।*

वराहस्य पुराणस्य वृत्तान्तान्प्रब्रवीम्यहम् ।
आदौ सम्बन्धकथनं वृत्तान्तश्चादिकर्म्मकः ॥ २ ॥
आदिसृष्टिस्ततः प्रोक्ता चरितं दुर्ज्जनस्य च ।
वृत्तान्तोद्दिश्यभागश्च† श्राद्धकल्पस्ततः परम् ॥ ३ ॥
आदि‡वृत्तान्तकथने सरमाख्यानमेव च ।
महातपोपाख्यानञ्च§ अग्न्युत्पत्तिस्ततः परम् ॥ ४ ॥

---

* एष पाठः (ग) पुस्तके नास्ति । † दैघभागश्चेति (ख) ।

‡ आदीत्यारभ्याग्न्युत्पत्तिस्ततः परमित्यन्तः सन्दर्भः (ख), (ग) पुस्तकयोर्नास्ति ।

§ महातप-उपाख्यानमिति साधु ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

अश्विनोरपि चोत्पत्तिर्गौर्य्युत्पत्तिस्तथैव च ।
विनायकस्य चोत्पत्तिर्नागोत्पत्तिस्तथैव च ॥ ५ ।
स्कन्दोत्पत्तिश्च भानोश्च उत्पत्तिः समुदाहृता ।
कामादीनां तथोत्पत्तिः देव्युत्पत्तिस्तथैव च ॥ ६ ।
धनदस्य तथोत्पत्तिः परापरविनिर्णयः ।
धर्म्मोत्पत्तिस्तथोत्पत्ती रुद्रस्य च ततः स्मृता ॥ ७ ।
सोमोत्पत्तिरहस्यञ्च पितृश्चापि समासतः ।
उक्तः प्रागितिहासश्च व्याधोपाख्यानमेव च ॥ ८ ।
ततः सत्यतपोपाख्या* मत्स्यद्वादशिका तथा ।
कूर्म्मद्वादशिका चापि वराहद्वादशी तथा ॥ ९ ।
नृसिंहद्वादशी चापि वामनद्वादशी तथा ।
भार्गवद्वादशी चापि श्रीरामद्वादशी तथा ॥ १० ।
कृष्णद्वादशिका चापि बुद्धद्वादशिका तथा ।
कल्किद्वादशिका चापि पद्मनाभस्य द्वादशी ॥ ११ ।
धरणीव्रतं ततः† प्रोक्तङ्गीतागस्त्यस्य चोत्तमा ।
पशुपालस्य चाख्यानं भर्त्तृप्राप्तिव्रतं तथा ॥ १२ ।
शुभव्रतं धन्यव्रतं कान्तिव्रतमतः स्मृतम् ।
सौभाग्यव्रतमाख्यातमविघ्नव्रतमेव च ॥ १३ ।
शान्तिव्रतङ्कामव्रतमारोग्यव्रतमेव च ।
पुत्त्रप्राप्तिव्रतं शौर्य्यव्रतं वै सार्व्वभौमिकम् ॥ १४ ।

---

* सत्यतप उपाख्या इति साधु । † पादेऽस्मिन् छन्दोदोष एकाक्षराधिक्यात् ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

पुराणस्तवनञ्चैव नारायणेश्वरेण च ।
रुद्रगीता ततः पुंसां प्रकृतिश्चापि निर्णयः ॥ १५ ।
ततो भुवनकोषस्य वर्णनं समुदाहृतम् ।
जम्बूद्वीपस्य मर्य्यादावर्णनं परिकीर्त्तितम् ॥ १६ ।
भरतादिसमुद्देशः सृष्टिसम्भाग एव च ।
नारदस्य च संवादो महिषेण प्रकीर्त्तितः ॥ १७ ।
शक्तिमाहात्म्यकथनं महिषासुरघातनम् ।
रुद्रमाहात्म्यकथनं पर्व्वाध्यायस्ततः परम्* ॥ १८ ।
श्वेतोपाख्यानमत्रोक्तं तिलधेनुविधिस्ततः ।
जलधेनूरसधेनुर्गुड़धेनुस्ततः परम् ॥ १९ ।
ततश्च शर्क्कराधेनुर्मधुधेनुस्ततः परम्† ।
दधिधेनुश्च लवणधेनुः कार्पासधेनुका ॥ २० ।
धान्याधेनुश्च भगवच्छास्त्रलक्षणमेव च ।
विष्णुस्तोत्रं ततो नाना प्रश्नाः प्रोक्ता हरिम्प्रति ॥ २१ ।
ततो भागवतानाञ्च लक्षणम्परिकीर्त्तितम् ।
लक्षणं सुखदुःखानां द्वात्रिंशदपराधकाः ॥ २२ ।
नानामन्त्रास्ततः प्रोक्ता देवोपकरणे विधिः ।
भोज्याभोज्यस्य कथनं सन्ध्योपस्थानकारणम् ॥ २३ ।
वियोगिगर्भमोक्षश्च कोकामुखप्रशंसनम्‡ ।

---

* पूर्व्वाध्याय इति (ग)। † एतदर्द्धं (ग) पुस्तकेऽष्टादशश्लोकादनन्तरं विद्यते।
‡ प्रसंशनमिति (ग)।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

भगवच्छास्त्रकथने माहात्म्यं पुष्पगन्धयोः ॥ २४ ।
रूपकारणमप्योक्तं मायाचक्रं ततः परम् ।
कुब्जाम्रकस्य माहात्म्यं वर्णदीच्चां ततः परम् ॥ २५ ।
कङ्कताञ्जनदर्पाणां मन्त्राः प्रोक्तास्ततः परम् ।
राजान्नभक्षणे प्रायश्चित्तम्प्रोक्तं ततः परम् ॥ २६ ।
दन्तकाष्ठाद्यकरणे प्रायश्चित्तं ततः परम् ।
शवादिस्पर्शने मन्त्रत्यागे चोक्तं ततः परम् ॥ २७ ।
नीलवस्त्रपरिधाने क्रोधयुक्तस्य चार्च्चने ।
रक्तवस्त्रपरिधाने अन्धकारे प्रपूजने ॥ २८ ।
कृष्णवस्त्रपरिधाने धौतवस्त्रस्य धारणे ।
क्रोड़ादिमांसभक्षे च प्रायश्चित्तम्प्रकीर्त्तितम् ॥ २९ ।
दीपोच्छिष्टस्य तैलस्य करलेपेन पूजने ।
श्मशानगमने स्पृष्टपूजने चैव शोधने ॥ ३० ।
पिण्याकभक्षणे चैव उपानद्गूढ़पादके* ।
भगवच्छास्त्रविहिताकरणे शोधने ततः ॥ ३१ ।
शूकरक्षेत्रमहिमा ततो जम्बूकगृध्रयोः ।
खञ्जरीटस्य चाख्यानं पुनः कोकामुखस्य च ॥ ३२ ।
बदरीखण्डमाहात्म्यं गुह्यधर्म्मप्रकीर्त्तनम् ।
मन्दारगुह्यमहिमा शालग्रामप्रशंसनम् ॥ ३३ ।
सोमेश्वरस्य महिमा मुक्तिक्षेत्रस्य चापि हि ।

---

* उपानद्गूढ़पादपे इति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

त्रिवेण्याश्चैव माहात्म्यं माहात्म्यङ्गण्डकीभवम् ॥ ३४ ।
चक्रतीर्थस्य महिमा हरिक्षेत्रसमुद्भवः ।
देवह्रदस्य चाख्यानं रुरुक्षेत्रस्य चापि हि ॥ ३५ ।
गोनिष्क्रमस्य महिमा द्वारवत्यास्ततः परम् ।
तत्रत्यतीर्थमहिमा लौहार्गलमतः परम् ॥ ३६ ।
मथुरातीर्थमाहात्म्यं प्रादुर्भावस्तथैव च ।
यमुनातीर्थमाहात्म्यमक्रूरस्य च तीर्थकम्* ॥ ३७ ।
देवारण्यस्य माहात्म्यं चक्रतीर्थस्य चोत्तमम् ।
कपिलस्यापि महिमा तथा गोवर्द्धनस्य च ॥ ३८ ।
तथा आख्यायिकायुक्तं विश्रान्तेश्च ततः परम् ।
गोकर्णस्य च माहात्म्यं सरस्वत्यास्तथैव च ॥ ३९ ।
यमुनोद्भेदमहिमा कालिञ्जरसमुद्भवः ।
गङ्गोद्भेदस्य महिमा शापः शाम्बस्य वै तथा ॥ ४० ।
मधुकप्रतिमायाश्च स्थापनं सम्प्रकीर्त्तितम् ।
शैलार्चास्थापनञ्चापि मृण्मयार्चास्थितिस्तथा ॥ ४१ ।
ताम्रार्चास्थापनञ्चापि कांस्यार्चास्थापनं तथा ।
रौप्यार्चास्थापनञ्चाथ सौवर्णप्रतिमास्थितिः ॥ ४२ ।
श्राद्धोत्पत्तिस्ततः प्रोक्तम्पिण्डं सङ्कल्प एव च ।
पिण्डोत्पत्तिस्ततः प्रोक्ता पितृयज्ञविनिर्णयः ॥ ४३ ।
मधुपर्कदानफलं संसारचक्रवर्णनम् ।

---

* अक्रूरान्यच्च तीर्थकम् इति (ख), अक्रूरासच्च तीर्थकमिति (ग) ।

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

दुष्कृतकर्म्मकरणं सुखवर्णनमेव च ॥ ४४ ।
कृतान्तदूतकथनं यातनारूपमेव च ।
[illegible]नं नरकाणाञ्च किङ्कराणाञ्च वर्णनम् ॥ ४५ ।
तथा कर्म्मविपाकस्य यादृशङ्कर्म्म तादृशम् ।
पापकर्म्मस्य कथनं दूतप्रेषणकर्म्म च ॥ ४६ ।
शुभाशुभस्य कथनं शुभकर्म्मफलोदयम् ।
लोभनं पुरुषस्यापि निमेराख्यानमद्भुतम् ॥ ४७ ।
प्रबोधिनीकथां दिव्याङ्गीकर्णेशसमन्वयाम् ।
[illegible]न्दिनी वरदाने च जलेशशैलयो[illegible] ॥ ४८ ।
शृङ्गेश्वरस्य महिमा एवं वृत्तान्तसङ्ग्रहः ।
एतच्छ्रुत्वाप्नुयान्मर्त्यो वराहश्रवणात् फलम् ॥ ४९ ।

इत्यनुक्रमणिका नाम अष्टादशाधिकद्विशततमोऽध्यायः ।

समाप्तं वराहं शुभम् ।

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

राज्य संग्रहालय

State Museum

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

State Museum, Library

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust , Delhi and eGangotri Funding : IKS

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow